।। श्रीः ।।

हरिदास संस्कृत ग्रन्थमाला

३००

।। श्रीः ।।

वेदेऽश्विनौ

रचयिता

डॉ० नृ० कृ० कृष्णस्वामि (अय्यर) शर्मा

व्याकरणाचार्य, एम० ए०, पी-एच० डी०

चौखम्बा संस्कृत सीरीज आफिस . वाराणसी

१९७५

प्रकाशक : चौखम्बा संस्कृत सीरीज आफिस, वाराणसी

मुद्रक : राजेश प्रिंटिंग वर्क्स, वाराणसी

संस्करण : प्रथम, वि० सं० २०३२

मूल्य : २०-००

Published with the financial assistance from the Ministry of Education and Social Welfare Government of India.

अपरं च प्राप्तिस्थानम्

चौखम्बा अमरभारती प्रकाशन

गोपाल मन्दिर लेन, वाराणसी-२२१००१

THE

HARIDAS SANSKRIT SERIES

300

VEDE AS'VINAU

(AS'VINS IN THE VEDAS)

By

Dr. T. K. KRISHNA SWAMI AIYAR

Vyakaranacharya, M. A., Ph. D.

THE

Chowkhamba Sanskrit Series Office

VARANASI-221001 (India)

1975

Gopal Mandir Lane

P. O. Chowkhamba, Post Box 8

Varanasi-221001 (India)

1975

Phone : 63145

First Edition

1975

Price Rs. 20-00

Also can be had of

Chaukhamba Amarabharati Prakashan

Oriental Publishers & Book-Sellers

K. 37/118, Gopal Mandir Lane, Varanasi-221001

INDIA

ॐ

श्रीमतां वाराणसेयानां राजेश्वरशास्त्रिणां द्रविडानां
शास्त्ररत्नाकर-पद्मभूषण-पण्डितराजानाम्

आशीर्वचनम्

"जाड्यमप्रतिपत्तिः स्यात्सर्वकार्येषु सर्वदा ।
प्रियाप्रियश्रुतेस्तद्वद्दर्शनैर्व्याधिभिर्भवेत् ॥
सुखदुःखाविवेकित्वमिष्टानिष्टानभिज्ञता ।
तूष्णीमप्रतिभा चाक्ष्णोरनिमेषोऽनवेक्षणम् ॥
अनायत्तं पारवश्यमेतैर्जाड्यं निरूप्यते ॥"

इति साहित्यविदां मर्यादानुसारेण व्याधिभिः प्रियाप्रियश्रवणदर्शनादिभिश्च कर्तव्यविस्मरणरूपम् अप्रतिभात्मकं जाड्यं जगदभिभवति यदा, तदा मधुमय-श्रीदेवतयोर्देवभिषजोरश्विनोः पारवश्यं सर्वैरेव ऋषिभिः पूर्वस्मिन् काले नुभूतमासमनः । अत एव कर्तव्यदक्षताकामाय अश्विनौ सर्वप्रथमं स्तुताविति न रोहितं साहित्यविदाम् ।

श्रीमद्भिः कृष्णस्वामि ऐय्यर शर्ममहोदयैरश्विनोरिदं माहात्म्यं स्वकीयनिबन्धे सुप्रतिपादितम्, उपासकानामत्यन्तमुपादेयं वर्तते । एतदाविष्करणेन उपासकाना-समर्चायन्ते । अस्माकमत्यन्तमभिनन्दनार्हा इति मन्यते । इति

श्री राजेश्वरशास्त्री द्रविडः

निवेदनम्

असमप्रदेशस्य डिब्रूगडविश्वविद्यालयाय "Ph.D." इत्युपाधिप्राप्तये १९६९-तमे ई० वर्षे मया समर्पितस्य प्रबन्धस्य पुस्तकाकारेयं कृतिः ।

Dr. V. राघवः (प्रबन्धस्य पथिनिर्देशकः), Dr. C. S. वेङ्कटेश्वरः, पण्डितो राजेश्वरशास्त्री द्रविडः च अस्य प्रबन्धस्य परीक्षका आसन् ।

डिब्रूगड (H.S.K.) महाविद्यालयस्य ग्रन्थागारेण, मद्रासविश्वविद्यालयस्य ग्रन्थागारेण, तथा भारतस्य राष्ट्रीयग्रन्थागारेण च प्रबन्धलेखनेऽहमुपकृतोऽभवम् ।

वाराणस्यां प्रकाशितोऽप्ययं ग्रन्थो यद्यपि मुद्रणदोषाद् न निर्मुक्तः, तथापि अन्ते संयोजितैः शोधपत्रैः सुबोधः स्यात् ।

आङ्ग्लभाषायां निबद्धः कश्चन लेखः, आङ्ग्लभाषायां संगृहीतानि कानिचन सम्बद्धान्युद्धरणानि च नास्मिन् ग्रन्थेऽधुना संयोजितानि ।

ऋतसत्ये विश्वस्य मूलभूते तत्त्वे, ययोः स्थूलरूपौ अग्नीषोमौ । अग्नेर्ज्योतिषा सोमस्य रसेन च सर्वं विश्वं व्याप्नुवाते अश्विनौ ।

"अश्विनौ व्यात्तम्" । विश्वपुरुषस्य व्यादानभूतौ तौ । मानवः पूर्वज्ञानाय प्रथमं द्यावापृथिव्यात्मनाऽश्विनौ भजति । अश्विनोः सत्ता द्यावापृथिव्यात्मना, अहोरात्रात्मना, सूर्यचन्द्रात्मना, अग्न्योषधिरूपेण, इन्द्रियविषयरूपेण, वायुशब्द-रूपेण, श्रोत्रात्मरूपेण वा सर्वत्रानुभूयते ।

त्वष्टुर्दुहिता सरण्यूः सूर्येण संगता, सवर्णां स्वस्थाने प्रतिनिधाय, अश्वा भूत्वा निर्गत्य, अश्वभूतात् सूर्याद् अश्विनौ जनयामास ।

त्वष्टुर्जामाता वायू रथसहायश्विनावात्मना सह संयोज्य, अश्विनावभेदेन धावयित्वा, ईशानं सूर्यं जनयति । वायोः प्रथमं सोमपानम् । अश्वियो वायुः सोमं मधाश्विना संयोजयति, तदाश्विनोः सूर्ये जयः, सूर्यस्य चाऽश्विभ्यामुत्पत्तिः ।

अश्विनोः रथः "अहंपूर्वः", अहंकारात्पूर्ववर्ती । त्रिलोकव्यापितया तस्य रथस्य त्रीणि स्थानानि, त्रीणि कर्माणि च भवन्ति । अत एव तयो रथस्त्रिवृत्, त्रिबन्धुरः, त्रिचक्रश्च । तस्मिन् रथे त्रीणि मिथुनानि अश्वानि भवन्ति । तुरीयत्वेन मधुपूर्णो दृतिस्तत्र विराजति ।

अश्विनौ विश्वं मधुना सिञ्चतः । तयो रथचक्रेण मधु उत्पन्नं भवति ।

द्युस्थानानां देवतानां प्रथमागामिनौ तौ । विना तौ इतरेषां देवानां पानं न भवति ।

अरणिभ्याम् अग्निनिष्पादनेन सहाऽश्विनौ देवत्वेनाभिमतौ । हिरण्मय्यौ अरणी अश्विनौ मन्थतः ।

छिन्नस्य यज्ञशिरसः ताभ्यामेव सन्धानात् सर्वे यज्ञास्तयोरधि प्रभवन्ति । यज्ञकरणेनाऽश्विनावार्तान् भिषज्यतः, विपन्नांस्त्रायेते च । मधुवर्णौ (मादकनीलकान्तियुक्तौ) शुभस्योदकस्य पालकौ तौ धियः प्रीणयन्तौ, रोगानुपक्षपयन्तौ, कामपूरकेण मनसा चरन्तौ भवतः । वाजवतीं रयिं धेनुमतीम् इषं च तौ प्रयच्छतः । तयोः इद् तमस्तिरस्कृत्य ज्योतिर्जनयति ।

अश्विभ्यां हविर्दानेन हविः गौः, अश्वः, हिरण्यम् इति त्रेधा विभक्तं भवति । ऋतसिद्धिः, सत्कर्म, प्रज्ञाधिगमः, धनम्, आत्मज्ञानं चात्र यज्ञफलत्वेन सूच्यन्ते ।

सारघेण मधुना यदाश्विनौ अक्तः, तदा पुरुषो भर्गस्वतीं वाचं वदति । अश्विनोः मधुपानम् अनु ऋतवृद्धिर्भवति । तमसि लीनं तेजो मधु, यस्मादर्को भवति । यदाऽश्विनौ तन्मधु पिबतः, तदा तमस एव ऋतेन परिणमति ।

तमोनिरसनेन ज्योतिर्वर्धनम् अश्विनोः प्रशस्तं कर्म । तयोः कर्म रथेन अनुस्यूतं भवति । अत एव समुद्रात्तारणं तयोरेकं मुख्यं कर्म । समुद्रात्तारणमन्नं, बन्धनान्मोचनं, राज्यभ्रष्टस्य स्वराज्ये प्रापणं, पतितस्योद्धरणं, भैषज्यम्, अन्धबधिरपङ्ग्वादीनाम् अविकलेन्द्रियकरणं, दुर्बलस्य बलाधानम् इत्येवमादीनि अश्विनोः कर्माणि ।

सरस्वत्या सहाश्विनौ इन्द्रं भिषज्यतः ।

अश्विनोः कर्म ऋतुतष्टे रथे उषसमारोप्य सोमं प्रति नयनेन पर्यवस्यति । आजिं जित्वा सूर्यां रथे आरोप्याऽश्विनौ सोमिनो गृहं यातः । सोमिनो गृहमत्र सूर्यः । नीयमाना सूर्या सोमेन परिणमति । सूर्यो यज्ञो यत्र रथो ज्योतिषा पृथिव्या उद्गच्छती संपृक्तः ।

विवस्वतः (सूर्यात्) समुत्पन्नावश्विनौ पृथिवीतो हविरादाय सूर्यमण्डले पितुर्योनौ निषीदतः । तदा समुद्रोदकानि, पयांसि गोकक्ष इव, आदित्यमण्डलम् अलंकुर्वन्ति ।

आध्यात्मिकम् अश्विनोः प्रत्यक्षं रूपं पुरुषस्य रसनेन्द्रियम् । रसवती रसना अन्नरसेन वाग्ज्योतिषा च अश्नुते । एवं शरीरपोषकस्य अन्नस्य ग्रहणेन, बुद्धिवर्धकस्य ज्ञानस्य च प्रयोगेण जिह्वास्वरूपौ अश्विनौ शरीरस्य भिषजौ, ज्ञानात्मनो मधुनः सेक्तारौ च भवतः ।

अश्विनोर्वाहनं रासभः । अग्नेस्तापेन व्याप्नुवन् वायुरेवात्र रासभः । शरीरे रसे प्राणो रासभः । "आत्मेव वातः स्वसराणि गच्छतम्" [ऋक् १. ३४.७] ।

विश्पलायै अश्विभ्यां प्रदत्ता जङ्घा वायोर्वीर्यम् । यस्मै धनाय विश्पला धावति, तत् तस्या एव त्वाष्ट्रं नाम । "अहंपूर्वः" येषा वर्तमानोऽश्विनोः रथः पञ्च भूतान्यभि प्रधमानः, सप्त जगतः परितो गच्छति ।

पृथिव्यां तिष्ठतोरश्विनोः सिन्धोरुपरि तले श्रोत्रे विराजतः । एवमश्विनोरधिकारः पृथिवीतो वायुं यावत् । वायुवाहनः शक्रस्तयोर्मधु ।

आधिदैविकदृष्ट्या आदित्यमण्डलं कुबीडयेनेव अश्विनोर्बाहुभ्यां दिवि उन्नीयते । अश्विनोर्बाहुभ्यामुन्नीयमानं मण्डलं पूषा हस्ताभ्यां परिगृह्णाति । एवम् अश्विनौ पूष्णः पूर्ववर्तिनौ ।

देवानां प्रभूतयशोऽश्विनोर्व्यापारः । सविता रात्रावन्धकारे विलीनान् देवान् तमसो गर्भाद् बहिर्निर्गमयति । गतिश्च पद्भ्यां क्रियते । गत्या, अग्नेस्तापेन, रूपं क्रियते, येन द्रवस्य प्रवाहो भवति । मध्या ऊढो रसमयः पदार्थो हस्ताभ्यां संगृह्य संघट्य पिण्डीक्रियते यस्य प्रसूतस्य रूपम् उदीयमाने मण्डले गोचरीभवति ।

एवं गतिः प्रवाहो रूपम् इति त्रिभिर्योजनैः सविता प्रसुवति । गतिरत्र अश्विनोः रूपं, प्रवाहः सरस्वत्या रूपं, साकारप्रसूतं चेन्द्रस्य रूपम् ।

"वेदेऽश्विनौ" इत्यस्मिन् ग्रन्थेऽश्विनोः जन्म, कालः, क्षेत्रम् । तयोर्नामविवेचना, अद्भुतानि कर्माणि, अवनं, भैषज्यम् । तयोर्गन्तव्यं स्थानं, तिरोभावः । इन्द्रस्य भैषज्यं सरस्वत्या सह ।

अश्विनोराधिदैविकम् आध्यात्मिकं च तत्त्वम् । पुराणेषु वर्ण्यमानम् अश्विनोर्जन्म ।

पाश्चात्यानाम् अनुसन्धाने, तथाऽऽधुनिकभारतीयानाम् अवलोकेऽवगता दोषाः । पाश्चात्यमतभारतीयमतयोः समन्वयः । आदित्यपर्यवसायित्वम् ।

ऋग्वेदे मण्डलान्यनु यज्ञस्य प्रगतिः । मधुकशा । हृद् । वर्तिः । भुज्युः । अत्रिः । च्यवानः । आयसी जङ्घा । वर्तिका । यज्ञशिरश्छेदसन्धाने । दधीचो मधुविद्या । सौत्रामणीष्टिः ।

आजिधावनम् । रासभः । सप्तवध्रिः । दीर्घतमसो दशमो युगः ।

इत्येतेषु कतिपयेषु विषयेषु ग्रन्थेऽस्मिन्नुद्दीपितं ज्योतिः अश्विनोः यथास्वं रूपं कर्म च बोधयितुं वैदिकविदुषां प्रीतिं जनयितुं वैदिकानुसन्धाने नूतनां दृष्टिं च प्रयोजयितुं प्रभवेद् इति सफलम् आयासे ।

नासत्यौ नयतं सत्यं वातो नो मधुमान् भवेत् ।
मधु पीत्वा च भूतेभ्य ऋतं वर्षयतं स्वकम् ॥
दस्रौ दर्शयतं सूर्यं रथे कोशे हिरण्मये ।
यत्र सोमं विदित्वाऽहममृतत्वमवाप्नुयाम् ॥
नासत्यावश्विनौ दस्रौ रोगदारिद्र्यनाशकौ ।
कुरुतं सूनृतां वाणीं पिन्वतं च धियो नृणाम् ॥
वैदिकधर्मो भारतरत्नं संस्कृतभाषा विश्वविभूतिः ।
एतत् सत्यं जयतु सुभद्रं यस्मादात्मा शुभकरणः स्यात् ॥

कृष्णस्वामिशर्मा

विजयादशमी, भौमवासरः,
शकाब्द १८९७

14–10–1975

॥ वेदेऽश्विनौ ॥

विषयानुक्रमणिका ।

प्रथमो भागः ।

संकेताक्षरनिर्देशः ।

अ	अथर्व, अध्यायः, अनुवाकः
अं	अंशः
अमरः	अमरकोशः
आ	आदिपर्व, आरण्यकम्
आ. श्रौ.	आश्वलायन श्रौतसूत्रम्
उ, उण्	उणादिसूत्रम्
उ, उप	उपनिषत्
ऋ	ऋक्
ऐ	ऐतरेयम्
का. स.	कात्यायनसर्वानुक्रमणिका
कौ	कौषीतकि
ख	खण्डः
खि	खिलः
गो	गोपथम्
छा	छान्दोग्यम्
डा	डाक्टर
तां	ताण्ड्य
तु	तुलना
तै	तैत्तिरीयम्
द्र	द्रष्टव्यम्
निघ	निघण्टुः
नि, निरु	निरुक्तम्
प	परिभाषा
पा	पाणिनिः
पु	पुराणम्
पृ	पृष्ठम्
प्र	प्रथमः, प्रपाठकः
बृ. दे.	बृहद्देवता
ब्र. का.	ब्रह्मकाण्डम्
ब्रा	ब्राह्मणम्
भाग	भागवतम्
म. भा.	महाभारतम्
रा, राम	रामायणम्
ले	लेखकः
वा	वाजसनेयि-
वि. ध. उ.	विष्णुधर्मोत्तरम्
वे. मा.	वेङ्कटमाधवः
वे. वि.	वेदार्थविचारः
श, शत	शतपथम्
श्लो.	श्लोकः
सं	संहिता
सा	सायणः
सि. कौ.	सिद्धान्तकौमुदी
सू	सूत्रम्
स्कन्दः	स्कन्दस्वामी

अनादिष्टा मन्त्रसंख्या ऋक्संहितायाः ।

—:o:—

ओ३म्

वेदेऽश्विनौ

प्रथमो भागः

प्रथमोऽध्यायः

प्रस्तावना

ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदोऽध्येयो ज्ञेयश्च [म० भाष्य० प्र० आह्निकम्] इति श्रुत्वापि कैश्चिद् ब्राह्मणैर्विधिपूर्वकं वेदाध्ययनं क्रियते।

यो विद्याच्चतुरो वेदान् साङ्गोपनिषदो द्विजः।
न चेत्पुराणं संविद्यान्नैव स स्याद् विचक्षणः ।[1]
इतिहासपुराणाभ्यां वेदं समुपबृंहयेत् ।
बिभेत्यल्पश्रुताद् वेदो मामयं प्रहरिष्यति ।।[2]

इति पद्मपुराणवचनं स्मरन्तः इतिहासपुराणानि समीक्ष्य अग्नीन्द्रादीन् वैदिकान् देवान् विमृशन्ति केचन। परन्तु यागाद्यनुष्ठानाभावात् तेषां बुद्धिं देवा न सम्यक् प्रकाशयन्ति। केचन ब्राह्मणबन्धवः, अनुपवीतिनो वेदबाह्याश्च, महता यत्नेन नानाभाषाव्याकरणदर्शनपुराणादिविद्याधिगतपाण्डित्येन वैदिकं वाङ्मय-मालोड्य नवं नवं स्वमतं विदुषां पुरत उपस्थापयन्ति। शाखाप्रभेदेन यद्यपि वेदार्थस्य इदंतया निर्णयः कर्तुं न शक्यते तथापि शाखामेकामेवाधीयानानामपि ऐकमत्यं वेदार्थे न दृश्यते।

भारतीयपरम्परा स्वार्थदुष्टा, कालकलुषिता, अर्भका, अपक्वा चेति मन्यमानाः पाश्चात्यविद्वांसो ग्रीकलाटीनादिप्राचीनयूरोपीयभाषाभिः सह वैदिकभाषायाः साहोदर्यं स्वमनीषया विदित्वा, भाषाणां धार्मिकाख्यानानां च तुलनात्मकाध्ययनेन,

---

१—"पुराणं च विजानाति यः स तस्माद् विचक्षणः ।" इति वंगवासिसंस्करणे पद्मपुराणे पाठान्तरम् ।

२—पद्मपुराणे सृष्टिखण्डे अ. २ श्लोक ५०—५१. वायुपु. अ. १ श्लो. २००—२०१ "इतिहास''''''प्रहरिष्यति ।" [म. भा. १. १. २६७—२६८] "प्रतरिष्यति" [सातवलेकरः] ।

शब्दानां नूतननिर्वचनेन वेदार्थं कुर्वाणाः, शब्दजालग्रस्ताः, भारतीयार्षविज्ञान-मस्वीकुर्वन्तोऽपि तत्परिहातुमशक्नुवन्तः, तत्र समरसरं विद्वत्प्रकाण्डतया लिखन्ति, तर्कयन्ति च। अग्निम् अजुहुतः, सोममसुन्वन्तः, याज्ञिकप्रक्रियायामश्रद्दधानाः, स्वमत्या स्वरीत्या वेदमधीयन्तो यावज्जीवं वेदव्यसनिनो भूत्वापि आत्मानं सुकृतिनं न मन्यन्ते, यतः स्वमतेऽपि ते सन्देहविमुक्ता न भवन्ति।

वेदार्थनिर्णये प्रवृत्ताः, वेदार्थस्य गाम्भीर्येण चकिताः, वेदार्थमधिगन्तुम् अशक्नुवन्तः, ऋक्संहिताया आकृतिम्, अङ्गानि, अवयवसंस्थानानि च दूषयन्ति, अन्यथा च कल्पयन्ति भारतीयपरम्परामेव विघटयन्ति। देवानां प्रीणने, देवेभ्योऽभ्युदयलाभे वा नैतेषां प्रवृत्तिः, यतो हि तद्विषये नास्तिका एते। एतेषां विदुषां मुख्यं लक्ष्यं वेदानामपौरुषेयत्वस्य वर्णानुपूर्वीकत्वस्य च खण्डनपूर्वकं वेदानां नवीनार्थकरणम्।

वैदिकम् अनुसन्धानम्—

वेदेऽश्विनौ इति प्रबन्धं निबध्नन्नहम् अज्ञानोपहतोऽपि श्रद्धया तपसा च अश्विनोः स्वरूपं मीमांसमानः भारतीयपरम्परया उपकृतोऽस्मि लब्धसायणे।

न मम अश्विनौ अश्वारोहिणौ, यतो हि तयोरश्वानां किमपि स्वरूपं न लभ्यते। तयोरश्वाः शोणा वा, श्वेता वा, द्विपादो वा चतुष्पादो वा, पुनःपुच्छा वा हिरण्यशृङ्गा[1] वा इति किमपि न श्रूयते। अतः तयोरश्वा न चतुष्पादः पार्थिवाः। तिस्रो रात्रीस्त्रीण्यहानि च अश्विनोरश्वाः दिवो रोचनानि नभसादीनि देवगृहाणि परिगच्छन्ति। [ऋ०सं० ८. ५. ८.]। लोकत्रयसंचारिणोऽश्वा अग्निवायुसूर्येषु अधिकुर्वन्ति।

अश्विनोरेवं त्रिलोकव्यापितया, यस्य तौ मधु पिबतः तस्मै अन्तरिक्षात् पयो दुग्धः [७. ७४. ३.]। अश्विनोः रथः कदाचिद् अनश्वोऽपि संचरति [१. १२०. १०.]। तयो रथस्यैकं चक्रम् अघ्न्यस्य मूर्धनि निधाय अन्यच्चक्रं द्यां परीयते [१. ३०. १९.]।

न केवलमश्विनोः रथादीनि वाहनान्यद्भुतानि, तेषां स्तोतारोऽपि अलौकिका भवन्ति। समुद्रात् पारं गमितो भुज्युः, रजसः पारे प्रापितः रजः संभवं प्रयाति। ऋते जीर्यमाणोऽत्रिः गन्तव्यं स्थानं प्रति अश्व इव बहिर्गमनाय मोचितः। कक्षीवान् दीर्घतमसो नूतनो रथ इव कृतः। अश्वैरश्वत्वं कक्षीवतो रथत्वम् अनयोरभिमाज्यं

१—हिरण्यवर्णाः [४. ४५. ४.]। अन्यत्राप्युक्तम्: "हिरण्यशृङ्गोऽयो अस्य पादाः" [१. १६३. ९.]।

सम्बन्धं द्योतयतः । कक्षीवान् नेदानीमश्वप्रग्रहवान् । तस्य कक्षाः, स एव वा खलु, रथः कृतः । समुद्रतरङ्गेषु ऊर्मिभोगेषु दोलायमानो भुज्युः समुद्रस्य पारे प्रापितः रजांसि (उदकानि) अश्विभ्यां विभक्तुं प्रवृत्तः । कक्षीवान् रथः, अत्रिरश्वः, भुज्युः सारथिः, रजांसि रथमार्गः । [१०. १४३. १–६] ।

अश्विनो रथो यदा सूर्यत्वम्[1] भवति तदा हिरण्यवाहनस्य अग्नेः, दिवं प्राप्नुवतो यजमानस्य वाऽहंकारो विलीयते । अश्विनोः रथः "अहंपूर्वः"[2], अहंकारात् पूर्ववर्ती [१. १८१. ३]। अस्याम् अवस्थायामेव अश्विनोः सन्निधिरनुभूयते । "इहेह जाता" [१. १८१. ४]।

सारघेण मधुना यदाश्विना अक्तः, तदा पुरुषो भर्गस्वतीं (दीप्तिमतीं) वाचं जनान् अनु वदति । पौरुषेण, भौतिकसम्पत्त्या, यज्ञकर्मणा च यद् यशः, यो रसः, या दीप्तिश्च भवति तानि त्रीणि अश्विनौ मधु संचिनुतः । [अ० सं० ६. ६९. १–३]

विश्वस्तावयवस्य प्रजापतेः "ऊर्ध्वं प्रतिष्ठायाः अवाचीनं मध्यात्" इति जघन्यभागोऽश्विनौ प्रति [शत० ब्रा० ८. २. १. ११–१२]। तथापि देवानां भिषजौ तौ इन्द्रमपि अवतः, नमुचिवधे, पुत्रं पितराविव । [१०. १३१. ४–५]

अश्विनोर्भैषज्यम्, अवनम्, अद्भुतकर्माणि च वैदिकविदुषां मनांसि तथाऽधिकुर्वन्ति यथा ते अत्र मीमांसमानाः कदापि न विरमन्ति । अतोऽश्विनौ अधिकृत्य कश्चन नूतनं प्रबन्धमद्यापि विरचयतीत्येतन्नैव चित्रम् ।

अभिनवा प्रवृत्तिः—

भारतीयपरम्परां (वेदार्थे) समाश्रित्य विरचितेऽस्मिन् प्रबन्धे, यद्यपि प्रबन्धदोषाः स्युः तथापि वैषम्यराहित्येन, सर्वोपादेयतया, सर्वार्थसंग्राहकतयाऽत्र वेदार्थो दृश्येत । तमो निरस्य ज्योतिरुद्गमनेऽश्विनोर्मुख्यो व्यापारः । उत्तमं, ज्येष्ठं ज्योती रोदस्योः सूर्यः (सौर्यम्) एव । अतो वेदार्थोऽत्र सूर्ये पर्यवस्यति । देवानाम् आजिधावनेऽपि सूर्य एव काष्ठा कृताऽऽसीत् ।

अद्यत्वे भौतिकविज्ञानेन चन्द्रसूर्यादीन् ग्रहान् प्रेप्सन्ति वैज्ञानिकाः । अतो वैदिकदेवानां स्वरूपकर्मधामादिनिर्णये वैदिकविदुषां भूयसी प्रवृत्तिः स्यादेव । प्रसङ्गेऽस्मिन् प्रबन्धेनानेन इमां कालिदासोक्तिं स्मारयामि ।

१—रथेन सूर्यत्वचा [१. ४७. ९; ८. ८. २]

२—अहम्पूर्वः । "अहङ्कारपूर्वो मनस्वी वा अत्युदारः" [सायणः]
"अहंपूर्वे इत्युपतिष्ठन्" [वेङ्कटमाधवः]

शुद्धान्तदुर्लभमिदं वपुराश्रमवासिनो यदि जनस्य ।
दूरीकृताः खलु गुणैरुद्यानलता वनलताभिः ॥

[अभि. शा. १. १६]

ब्रह्मणा पुरा सृष्ट्यर्थं कृतात्तपसोऽपि ऋतं च सत्यं[1] चाऽजायत । ऋतसत्ययोः परस्परदानेनाऽर्णवः (उदकवान्) समुद्रः समुत्पन्नः, ततः परं विभागेन सृष्टिक्रमः प्रावर्तत । अत्र "धाता यथापूर्वम् अकल्पयत्" । सृष्टं च विश्वं चतुर्धा विभक्तं "दिवं च पृथिवीं चान्तरिक्षमथो स्वः" [ऋ. १०. १९०. १-३] । द्यौः पृथिवी च, अनयोरन्तराऽन्तरिक्षम्, द्योलोकस्योपरि स्वर्लोकः, यत्र ग्रहनक्षत्रादीनि ज्योतिर्मण्डलानि प्रवर्तन्ते, यत्र वा सूर्याचन्द्रमसौ आयेते । रोदस्याम् द्यावापृथिव्योरन्तरा भुव उपग्रहत्वेन परिभ्रमंश्चन्द्र एवात्र चन्द्रमःपदेन न गृह्यते । अतो द्योलोकस्योपरि अपि धाम विद्यते ।

अमर्त्योऽग्निः सप्त धामानि परि गच्छति—"सप्त धामानि परियन्नमर्त्यः" [ऋ. १०. १२२. ३] । "सप्त स्थानानि अग्निश्च पृथिवी च, वायुश्चान्तरिक्षं च, आदित्यश्च द्यौश्च, चन्द्रमाश्चेति तानि स्थानानि । 'सप्त वै शीर्षण्याः प्राणाः' [तै. सं. ५. १. ७. १] इत्यमपरम्" । [वेङ्कटमाधवः] ।

अस्मिँल्लोकविभागेऽश्विनोर्व्यापारः, भूलोकदृष्ट्या, अधश्चिलोकयो रोदस्याम् एव, न तु स्वर्लोकेऽपि । अश्विनोर्माता या सरण्यूरभूताऽऽसीत् सा स्वेन रूपेणाऽश्विनौ न सुषुवे । [ऋ. १०. १७. १–२] । मर्त्येभ्योऽपगूहिता सा, वडवारूपमापन्नाऽश्वरूपमापन्नेन विवस्वता संगत्य नासिक्याऽश्विनौ प्रसूतवतीति वैदिकम् आख्यानम् । अत एवाश्विनौ "सिन्धुमातरा" [ऋ. १. ४६. २] "दिवो नपाता" [ऋ. १. ११७. १२.] "दिव आजाता" "दिव्या" [ऋ. ४. ४३. ३] इत्यादिभिर्नामभिः श्रूयेते ।

सिन्धुः समुद्रस्तयोर्माता, "समुद्रमातृकौ" इति सायणः [ऋ. १. ४६. २] । अर्णवात् समुद्रात् संवत्सरस्याऽहोरात्रादीनां च सृष्टिक्रमः । विवस्वान् सरण्यूश्चाऽऽश्वं रूपं धृत्वाऽन्तरिक्षे धावमानौ परस्परं संगत्याऽश्विनौ जनयामासतुः । अश्वाभ्यां जातत्वाद् अश्विनौ तौ । अश्वयोरशनार्थं (व्यापनार्थम्) अन्तरिक्षमपेक्षित एव । स्यन्दनात् सिन्धुः[2] । स्यन्दमानायाः अश्वाख्यायाः जातत्वाद् वाऽश्विनौ सिन्धु-

---

१—"तद् यद् ऋतम् इति वाक् सा यद् सत्यम् इति प्राणः" इति शाट्यायनकम् । [वे. मा. १०. १९०. १] ।

२—सिन्धुमातरौ [ऋ. १. ४६. २] समुद्रमातृकौ । सिन्धुः स्यन्दनात्

मातरौ । प्रातःप्रत्यहं सूर्यं दिवि उद्गमयन्तौ दिवं रक्षत इत्यतो "दिवो नपातौ"। माता च पिता च दिविष्ठौ इत्यतस्तौ "दिव आ जातौ"। द्युस्थान-देवतासु प्रथमागामिनौ तौ इति कृत्वा दिवि भवौ दिव्यौ तौ ।

अश्विनौ इति नाम तयोः सततगतिमत्त्वं द्योतयति । तयोर्व्यापारं विना द्युस्थानदेवतानामनुदयाद् देवानां प्रसवे तयोर्हेतुभूतत्वात्, वाजसनेयिसंहितायां पुरुषस्य "अश्विनौ व्यात्तम्" [वा. सं. ३१. २२] इति श्रूयते । द्युस्थानत्वात् पुरुषस्य व्यादानभूतत्वाद्व्यात्तोऽश्विनौ दिवः पृथिवीं यावद् व्याप्नुतः ।

"रथो ह वाम् ऋतजा[1] अद्रिजूतः परि द्यावापृथिवी याति सद्यः" [ऋ. ३. ५८. ८]। द्यौ च पृथिवी च व्यश्नुवानावश्विनौ क्वचिद् द्यावापृथिव्यात्मना स्तूयेते-"ईळे द्यावापृथिवी पूर्वचित्तये" [ऋ. १. ११२. १]।

विश्वसृजः पुरुषस्य सर्वथाऽविज्ञेयत्वात्, तस्य व्यात्तभूतयोरश्विनोरपि दुर्ग्राह्यत्वाद्, अश्विनोर्विवस्वतो जन्यत्वेन, प्रतीकरूपेण सूर्य एव पुरुषत्वेन परिगृह्यते चेद् अश्विनोरद्भुतानि कर्माणि दुर्बोधानि न स्युः[2] ।

सूर्यो वृत्ताकारे गच्छन्निव संवत्सरगत्या अहोरात्राणि विदधत् स्वाक्षे सूर्यं परितो भ्रमन्त्यां पृथिव्यां ऋतुपरिवर्तितैः शीतोष्णवर्षैरोषधिवनस्पतीन् उत्पादयन् प्राणिनः स्वे स्वे व्यापारे प्रवर्तयतीति पृथिव्यां मानवानां प्रत्यक्षम् । यथा कर्मकाण्डेन चित्तशुद्धिमनधिगतस्य ब्रह्मजिज्ञासायाम् अधिकारो न्यायतो न भवति, तथा प्रतीकरूपेण सूर्यमनाश्रितस्य वेदेऽश्विनोः कर्माणि वीर्याणि वा दुरधिगमानि भवन्ति । यथा लक्ष्यहीनस्य निर्लक्ष्यस्य नौः समुद्रे सततं यात्यपि आरूढं पुरुषं तस्योद्दिष्टं स्थानं न प्रापयति, यथा वा रज्ज्वा सर्पन् कश्चन प्रासादशिखरम् आरुह्यापि प्रासादं न विजानीयात्, तथा केवलाध्यात्मिकदृष्ट्या वेदार्थं प्रतिपादयन्नश्विनोः कर्माणि न विवेचयेत् । देवा अपि आजिधावने सूर्यमेव काष्ठाम् अकुर्वन् । अतः सूर्यं लक्ष्यं कृत्वा सूर्यस्य गतिर्यद्यनुचिन्त्येत तर्हि वेदार्थः सुबोधः

[निरु. ५. २०]। सिन्धूनां स्यन्दमानानाम् [निरु. १०. ५]। सिन्धुभिः स्यन्दनस्वभावैः [सायण :-ऋ. १. ३४. ८]।

१—"ऋतजाः" ऋतस्योदकस्य जनयिता । ऋते यज्ञे प्रादुर्भवतीति वा । "अद्रिजूतः" स्तोतृभिराकृष्टः ।

२—इन्द्रियस्य बोधे यथेन्द्रियं छिद्रं तथा चक्षुर्बोधे सर्वं वस्तुजातं छिद्रं भवितुमर्हति । परन्तु यदा ब्रह्मैव दुर्विज्ञेयं का पुनःचक्षुर्विषये गतिः । "इयं विसृष्टिर्यत आ बभूव यदि वा दधे यदि वा न । यो अस्याध्यक्षः परमे व्योमन्त्सो अङ्ग वेद यदि वा न वेद ॥" [ऋ. १०. १२९. ७]।

स्यात् । सूर्यमनवाप्यापि सूर्यस्य प्रकाशेन यथा पृथिव्यां मानव आयुर्वर्धयति, तथा वेदार्थविषये सूर्यं विश्वपुरुषस्य प्रतीकमात्रं कृत्वा मनीषी तत्त्वं निर्णेतुं प्रभवेत् ।

अश्विनोः यथास्वं रूपं कर्म च—

सूर्य उदेत्यस्तमेति च । सूर्यचन्द्रयोर्गतिभ्यामहोरात्रपक्षमासर्तुसंवत्सरादयः कालविभागाः पृथिव्यां कल्प्यन्ते । एवं पृथिव्यां प्राणिनां षड्भावविकाराः, मेघसर्जनेन वृष्टिकरणं, पृथिव्याम् ओषधिवनस्पतीनामृद्धिरित्यादयः सततं प्रवर्तमानाः क्रियाकलापाः कथं केन निमित्तेन प्रवर्तन्ते इति विचार्यमाणे "अश्विनौ व्यात्तम्" इति श्रुतिर्विचारपथमवतरति । दिवि सूर्यमन्तरिक्षे वायुं, सूर्यं परितः पृथिवीं चाश्विनावेव गमयतः । द्यावापृथिव्यौ, अहोरात्रौ, सूर्याचन्द्रमसौ चाश्ववद् अध्वानम् अश्नुवाते इति तयोरश्ववत्त्वदृष्ट्या तयोः प्रवर्तकत्वेन स्वामित्वेनाऽश्ववन्तावश्विनौ । "अश्वैरश्विनावित्यौर्णवाभः" [निरु. १२. १] । अश्विनोः रथस्त्रिवृत्,[1] त्रिषु लोकेषु युगपत् प्रवर्तते । दिवो मूर्धनि सूर्यस्तयो रथस्यैकं चक्रं भवति चेद् दिवि सूर्यं परितः स्वाक्षे भ्रमन्ती पृथिवी रथस्यापरं चक्रं भवति । स्वरथेनाश्विनौ कालविभागान् जनयन्तौ, अन्तरिक्षे वायुं तरणिम् इन्द्रं वर्षिणं च कुर्वन्तौ, स्थावरं जङ्गमं भूतजातं जनयन्तौ, व्यश्नुवाते सर्वं रसेनैको ज्योतिषाऽन्यः ।

सरणात्मिका सरण्यूस्तयोर्माता, ज्योतिष्मान् विवस्वांश्च पिता । एको मातुर्गुणेन रसेन, अन्यः पितुर्गुणेन ज्योतिषा च सर्वं व्यश्नुते । एतावुभावेवं व्यश्नुवानौ सर्वं स्वे स्वे कर्मणि योजयतः समानरथास्थौ तौ सहाश्रितौ, तयो रथः समानयोजनः [ऋ. १. ३०. १८] तौ च "सध्रीचीनौ" [ऋ. १०. १०९. १] ।

"अश्विनौ व्यात्तम्" इति श्रुतिः न केवलं मुखव्यादानेन अन्तरिक्षं द्योतयति अपि तु वस्तूनां सन्धानमपि । प्रातः व्यादानेन न केवलं तमस्येकीभूते द्यावापृथिव्यौ पृथक् क्रियेते, तमसि लीनाः पदार्था वा परस्परेभ्यः पृथक् क्रियन्ते, अपितु पृथक् कृतानां पृथक् सत्ता मूर्तभावाश्च व्यज्यन्ते । व्यादानं क्रियते किञ्चिद् आदातुं वा विस्रष्टुं वा । रश्मिभिः रसाहरणं, मेघसर्जनं, काले वर्षणं च व्यादानस्य फलम् । व्यादानेन सूर्यचन्द्रतारकादयः काले विसृज्यन्ते काले संह्रियन्ते च । अयमाऽऽदानेऽश्विनोर्व्यापार ओष्ठयोरिव । परन्तु एतावदेवाश्विनोर्न कर्म । व्यात्तं नाम विशेषेणाऽऽत्तम् विवृतमुखस्थानीयम् । आङ्पूर्वकाद् दाधातोः निष्ठायां रूपम् आत्तम्, विशेषेण

१—क्व त्री चक्रा त्रिवृतो रथस्य [१. ३४. ९] ।

आत्तं व्याप्तम्। आदत्ते विद्याम् गृह्णातीत्यर्थो बुध्यते। सूर्यरूपं गृह्णीतः (धत्तः) चन्द्ररूपं गृह्णीतः, मेघरूपं गृह्णीतः, तेजोरूपं गृह्णीतः। अर्थात् पिण्डभावमापद्येते अश्विनौ। एवम् अश्विनोः स्वयं मूर्तत्वे तयोरशनव्यापारो विलुप्तो भवति। पिण्डीभूता पृथिवी स्वयं न भ्रमति, तां भ्रमयतोऽश्विनौ। यथा पिण्डीभूतं शरीरं स्वयं न प्राणिति, अपितु रसात्मना वायुना, ज्योतिष्मताऽग्निना चाश्विनौ शरीरं प्राणयतः। अश्विनोर्व्यापनं विना विश्वस्मिन् किमपि न स्पन्दते। एतच्च गर्भत्वेन श्रुतिर्बोधयति[1]।

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः।
युवमग्निं च वृषणावपश्च वनस्पतीँरश्विनावैरयेथाम्॥ [ऋ. १. १५७. ५.][2]

"दिवो नपातौ" अश्विनौ विवस्वतः सूर्यस्य पुत्रौ। दिवं सूर्यमुन्नयन्तौ, दिवो रक्षकौ, दिवो न पातयितारौ दिवो नपातौ। पुत्रयोरपि तयोर्बीजवृक्षन्यायेन पितुः सूर्यस्योन्नयनम्। अपि चात्तं गच्छतोऽपि सूर्याज्जायमानतया तयोः पुत्रत्वं भवति। अश्विनौ यथा प्रातरेवं सायमपि स्तः।

मण्डलात्मनः पुरुषस्य शिरोऽक्षिपादरूपेण चित्रं श्रूयते[3]। सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात्।" [ऋ. १०. ९०. १.]।

अनेन मण्डलस्य पुरोभागे शिरःस्थानीयाः सहस्रं रश्मयः। इदमुदयस्थले। मण्डलस्य पश्चाद्भागे पादस्थानीयाः सहस्रं रश्मयः। इदमस्तस्थले। अपि च मण्डलसम्मुखीनाः चक्षुःस्थानीयाः सहस्रं रश्मयः। एवमश्विनौ सूर्यस्योदयकालेऽस्तकालेऽपि स्तः। मण्डलं परितो रश्मीनां प्रसरात् पृथिव्या उदयपार्श्वे यथा सान्ध्यं तेजः (वर्धमानम्) एवं पृथिव्या अस्तपार्श्वे सान्ध्यं तेजः (क्षीयमाणम्)। परन्तु उदयदृष्ट्या यथाऽश्विनोः स्तुतिर्भवति न तथाऽस्तदृष्ट्या। तथा च श्रुति :—

१—तु. "आत्मेव वातः स्वसराणि गच्छतम्"। [ऋ. १. ३४. ७]
"परिज्मा तनयस्य मज्मना द्विमाता तूर्षु तरणिर्विभूषति।" [ऋ. १. ११२. ४]

२—"युवां वर्णान् विकुरुथो विश्वरूपांस्तेऽधिक्षियन्ते भुवनानि विश्वा। ते भानवोऽप्यनुसृताश्चरन्ति देवा मनुष्याः क्षितिमाचरन्ति॥" [म. भा. आदि ३. ६५]

३—"आजुह्वान ईड्यो वन्द्यश्च" [१०. ११०. ३]। संमुखीनभावेन मण्डले प्रविशन्तस्ते तद् आह्वयन्तीवेति। तेषां रश्मीनां सूर्यः आजुह्वानः। [वै. वि. पृष्ठ १५]

"प्रातर्यजध्वमश्विना हिनोत न सायमस्ति देवया अजुष्टम् ।"
[ऋ. ५. ७७. २.]

"हे पुरुषाः ! अश्विनौ प्रातरेव यजध्वम् । प्रातरेव हवींषि प्रहिणुत । सायंकाले हविर्देवयाः देवगामि न विद्यते । देवा न स्वीकुर्वन्तीत्यर्थः । अजुष्टम् असेव्यं तद् भवति । "पूर्वाह्णो वै देवानाम्" इति हि श्रुतिः ।" [सायणः]

अश्विनोर्व्यापारो देवानां प्रसूत्यर्थः । यद्यपि सविता देवानां प्रसविता[1] तथापि देवाः कतिपय उषर्बुधः उषसः प्राग् देवानां प्रवृत्त्यदर्शनात् । अत उषसा सह उषस ऊर्ध्वं च सविता देवान् प्रसुवति । अथ यतः स्वयमुषा अश्विनोः रथमारोहति, अतः सविता उषसः प्राग् अश्विनोरेव रथं प्रेरयति ।

"युवोर्हि पूर्वं सवितोषसो रथमृताय चित्रं घृतवन्तमिष्यति ।" ऋ. १. ३४. १०
"विनाकमख्यत् सविता वरेण्योऽनु प्रयाणम् उषसो विराजति ।" ऋ. ५. ८१. २
"सविता उषसः प्रयाणमुदयमनु प्रकाशते । सवितुरुदयात् पूर्वं हि उषा उदेति ।"

अश्विनौ द्रवत्पाणी शुभस्पती रुद्रवर्तनी च [१. ३. १–३]। तयोः पाणी हविर्ग्रहणाय, आर्तानां भैषज्याय, विपन्नानां त्राणाय द्रवतो (धावतः)। तौ सदा शुभस्य (उदकस्य, कर्मणो, दीप्तेर्वा) पालकौ भवतः । अत एव तौ दस्रौ । तौ शत्रूणां रोगाणां चोपक्षपयितारौ, सूर्याग्निभ्यां पुष्करस्रजौ दर्शनीयौ च । शत्रून् रोदयन्तौ, संग्रामे रवं कुर्वन्तौ, स्वेन मार्गेण तौ गच्छतः । देवेषु मनुष्येषु कामपूरकेण मनसा चरन्तौ "कामप्रेणेव[2] मनसा चरन्ता"–[१. १५८. २] सर्वैरभ्यर्हौ भवतः ।

द्यावापृथिव्यौ स्वरथचक्रक्रमेण व्यापारयन्तौ, ज्योतिषा तमसस्तिरस्कारेण सूर्यं तत्तद्देशे उद्गमयन्तौ, हिरण्मयमार्गेण सूर्यत्वचा रथेन [१. ४७. ९; १. ९२. १८] तत्र तत्र वर्तेते अश्विनौ । यत्र यस्मिन्काले देवी वा इतरेषां देवानां स्तोतारो न सन्ति तत्राप्यश्विनोः स्तोतारो भवन्ति । अपि च सर्वे यज्ञा अश्विनोरधि प्रभवन्ति, ताभ्यामेव छिन्नस्य यज्ञशिरसः प्रवर्ग्यसंभारादिना संधानात् ।

"ययोरधि प्र यज्ञा असूरे सन्ति सूरयः ।
ता यज्ञस्याध्वरस्य प्रचेतसा

१—सविता सर्वस्य प्रसविता" [निरु. १०. ३१]। "सविता वै देवानां प्रसविता" [श. ब्रा. १. १. २. १७]।

२—कामप्रेणऽइव [१. १५८. २]। इदं पदं सकृदेव संहितायां श्रूयते । "यजमानस्य कामाः पूरणीयाः इति कृतसंकल्पौ" [सायणः]

स्वधाभिर्या पिबतः सोम्यं मधु ॥" ८. १०. ४[1]

"सर्वे यागा अश्विनोरुपरि प्रभवन्ति, छिन्नस्य यज्ञशिरसोऽश्विभ्यां सन्धानात् । तथा च "यज्ञस्य शिरोऽच्छिद्यत" इत्युपक्रम्य तैत्तिरीयकं "तावेतद् यज्ञशिरः" "तौ यज्ञस्य शिरः" [आनन्दाश्रम. तै. सं.] प्रत्यधत्तां यदाश्विनो गृह्यते यज्ञस्य निष्कृत्यै" [तै. सं. ६. ४. ९. १] इति । स्तोतृरहितेऽपि देवौ ययोः स्तोतारः सन्ति तावश्विनौ हिंसाप्रत्यवायादिरहितस्य यज्ञस्य प्रकृष्टं ज्ञातारौ स्वधाभिः बलहेतुभिः स्तुतिभिराह्वयामि इति शेषः ।" [सायणः]

सूर्योदयात्प्राग् अश्विनौ स्वधाभिः सोम्यं मधु पिबतः, स्वधाभिरेव रथमातिष्ठतः ।

"स्वधाभिर्या पिबतः सोम्यं मधु" ८. १०. ४

"स्वधाभिरधितिष्ठतो रथम्" ८. १०. ६[2]

१—अस्तूरे । इदं पदं संहितायामन्यत्र न श्रूयते । स्तोतृरहितेऽपि देवौ ।

२—स्वधाभिः । बलहेतुभिः स्तुतिभिराह्वयामीति शेषः । सायणोऽत्र [८. १० ४.] स्वधाभिः इति पदं पूर्वपादेन संबध्नाति । छन्दोऽत्र आस्तारपङ्क्तिः । चतुर्थी आस्तारपङ्क्तिः । "अन्त्यौ चेद् आस्तारपङ्क्तिः" [अनु. ८. ७] इति सायणः । चत्वारिंशदक्षरा पङ्क्तिः । तत्रास्तारपङ्क्तिः—अन्त्यौ पादौ चेद् जागतौ । ८ + ८ + १२ + १२ = ४०. स्वधाभिः । आत्मीयैस्तेजोभिरन्नैर्वा । [सायणः ८. १०. ६]

द्वितीयोऽध्यायः

अथ अश्विनोः नामविवेचना

अत्र ऋक्संहितायां श्रूयमाणानां मुख्यानामश्विनोर्नाम्नां विशेषणानां च संग्रहेण विचारः क्रियते ।

१—अश्विनौ—

अश्वसंभूतत्वाद्, अशनव्यापाराद्, अश्वयुक्तत्वाद्, ऐकान्तिकतयोषसा साह-चर्याच्च[1] अश्विनौ इति नामैव तयोर्मुख्यं वेदे । एतन्नाम युगपत्तयोः सर्वव्यापकत्वं, लोकेषु प्रतिदेवतं प्रतिवस्तु [८. ३५. १–२४] तयोरात्मभावं च व्यनक्ति । अत एव तौ देवानामध्वर्यू,[2] दैव्यौ भिषजौ, आजिधावने विजेतारौ च संकीर्त्येते । प्रातरनुवाके तिसृषु देवतासु अश्विनौ (एव) अन्यतमा देवता (न दस्रौ, नासत्यौ वा) । यज्ञपुरुषस्य तावेव "व्यासम्" । सृष्टिसर्जने तावेव व्यापृतौ, गर्भाधानाद् आरभ्य प्रसूतिपर्यन्तं[3] तावेवाभ्यर्थ्येते । तमोनिरसनेन ज्योतिर्वर्धने तयोरेव कर्म प्रशस्यते । सर्वाण्यवनानि सर्वाण्यद्भुतानि कर्माणि तावेवाधिकुरुतः । प्रातर्युजौ तावेव । तावेव विशेषतः सोमपानार्थम् आहूयेते । दधीचा मधुविद्या ताभ्यामेव दत्ता । तावेव यज्ञं मधुना सिञ्चतः । तयोरेव रथे मधुपूर्णो दृतिराहितः । ताभ्या-मेव दीर्घमायुः काम्यते । तावेवेन्द्रस्य रक्षितारौ । तथाहि ऋक्संहितायाम्—

१. अश्विना[4] यज्वरीरिषश्चनस्यतम् । १. ३. १ ।

१—उषसा साहचर्यम् [ऋ. १. ३४. १०] । उषा वा अश्वस्य मेध्यस्य शिरः [बृहद् आ. उ. १. १. १] । "अश्व्यं शिरः" [१. ११७. २२] ।

२—अध्वर्यन्ता यदुन्निनीथो अपाम् [१. १८१. १] । उत त्या दैव्या भिषजा शं नः करतो अश्विना [८. १८. ८] । तं संभृत्योचुरश्विनाविमं भिषज्यतम् इत्यश्विनौ वै देवानां भिषजौ, अश्विनावध्वर्यू घर्मं संभरतः [ऐ. ब्रा. ४. १] । श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः [१. १८४. ३] । आजिधावनाय इषुवच्छीघ्रगामिनौ कृतावश्विनौ । प्रपञ्चितम् एतदाजि-धावनम् ऐतरेयब्राह्मणे [१७. १–२] ।

३—ऋ. १०. १८४. २, ३; ५. ७८. ५–९ ।

४—अश्विना । अश्विनौ । सुपां सुलुक् पूर्वसवर्णात्…… [पा. ७. १. ३९]

२. स्तुषे वाम् अश्विना बृहत् । १. ४६. १ ।
३. या नः पीपरद् अश्विना ज्योतिष्मती तमस्तिरः ।
तामस्मे रासाथामिषम् । १. ४६. ६ ।
४. प्र वां दंसांस्यश्विनाववोचम् । १. ११६. २५ ।
५. यवं वृकेणाश्विना वपन्ता······उरु ज्योतिश्चक्रथुरार्याय । १.११७.२१।
६. एतानि वाम् अश्विना वीर्याणि । १. ११७. २५ ।
७. अश्विनोरसनं रथम् अनश्वं वाजिनीवतोः । १. १२० १०[1] ।
८. एतानि वाम् अश्विना वर्धनानि । २. ३९. ८ ।
९. अश्विना मधुषुत्तमो युवाकुः सोमः । ३. ५८. ६ ।
१०. दृति वहेथे मधुमन्तमश्विना । ४. ४५. ३ ।
११. इमा ब्रह्माणि वर्धनाश्विभ्यां सन्तु शंतमा । ५. ७३ १० ।
१२. अश्विना यद्ध कर्हिचिच्छुश्रूयातम् इमं हवम् । ५. ७४. १० ।
१३. श्रुतं मे अश्विना हवं सप्तवध्रिं च मुञ्चतम् । ५. ७८. ५ ।
१४. यासिष्टं वर्तिरश्विनाविरावत् । ७. ६७. १० ।
१५. इयं मनीषा इयम् अश्विना गीः । ७. ७१ ६ ।
१६. त्रीणि पदान्यश्विनोराविः सन्ति गुहा परः । ८. ८. २३ ।
१७. यन्नूनं धीभिरश्विना पितुर्योना निषीदथः । ८. ९. २१ ।
१८. सोमं पिबतम् अश्विना । ८. ३५. १–३ ।
१९. अश्विना धत्तं रत्नानि दाशुषे । ८. ३५. २२–२४ ।
२०. एतं वां स्तोमम् अश्विनावकर्म । १०. ३९. १४ ।
२१. आ भूतांशो अश्विनोः कामम् अप्राः । १०. १०६. ११ ।

इति औङः आकारादेशः । अश्विनौ अश्ववन्तौ । अश्वशब्दात् मत्वर्थे इनिः । "अत इनिठनौ" [पा. ५. २. ११५] "अश्वैरश्विनौ इत्यौर्णवाभः [निरु. १२. १] । "अश्वः कस्मात् । अश्नुतेऽध्वानम् । महाशनो भवतीति वा ।" [निरु. २. २७]

अश्नोतेः (अशातेः वा) क्वन् [उण्. १४९] अश्वशब्दः ।

"अश्विनौ यद् व्यश्नुवाते सर्वम् ।" [निरु. १२. १] । अश्नोतेः विनिः ।

१—वाजिनीवतोः । [१. १२०. १०] वाजो बलं, तद्वती सेना वाजिनी । अन्नं वा हविर्लक्षणं वाजं, तद्वती । सत्राहीनादियागसन्ततिर्वाजिनी । तद्वतोः । स्वार्थिको वा एको मत्वर्थीयः । बलवतोरन्नवतोर्वा ।

[स्कन्दस्वामी]

संहितायाम् अश्विशब्दस्य अश्विनोरर्थे [द्विवचनेनेति यावत्] प्रयोगसंख्या–४२६ । तत्र संबोधने संख्या–३२१ । इतरविभक्तिषु प्रयोगसंख्या–१०५ ।

संबोधने एकवचनान्तं बहुवचनान्तं वा पदं न श्रूयते । अश्विशब्दो यत्र विशेषणं भवति तत्र मत्वर्थप्रतीतिः–शोभनाश्वोपेतता, बह्वश्वोपेतता, अश्वयुक्तता वा–यथा—

१. अश्वीव ताँ अति येषं रथेन [२. २७. १६] । "शोभनाश्वः कश्चित् पुरुष इव तान् (पाशान्) रथेनातीत्य प्रयतेयम् ।"

२ गोमाँ अग्नेऽविमाँ अश्वी यज्ञो नृवत्सखा । [४. २. ५] । "यज्ञः अश्वोपेतः" ।

३. समिन्द्रो गा अजयत् सं हिरण्या समश्विया । ४. १७. ११ ।
अश्विया अश्वियानि शत्रुसंबन्धिनोऽश्वसमूहान् सम्यग् जयति स्म (इन्द्रः) ।

४. वाजेभिः अश्विभिः गोमद्भिः । ६. ४५. २१
बहुभिर्गोभिर्युक्तैः, बहुभिरश्वैरुपेतैः अन्नैः ।

५. यमश्वी नित्यमुपयाति यज्ञम् [७. १. १२] । "अश्ववान् अग्निः" ।

६. अश्वी रथी सुरूपः [८. ४. ९] । बहुभिरश्वैरुपेतः ।

७. उत नो गोमतस्कृधि हिरण्यवतो अश्विनः [८. ३२. ९] ।
अस्मान् अश्वयुक्तान् कुरु ।

८. सुखं रथं युयुजे सिन्धुरश्विनम् । १०. ७५. ९
सिन्धुर्देवता सुखकरं शोभनद्वारं वाऽश्ववन्तं रथं युनक्ति ।

पञ्चदेवपत्न्यः श्रूयन्ते यास्वेकाऽश्विनी । अश्विनी अश्विनोः पत्नी [सायणः] । अयमश्विनीशब्दः ऋक्संहितायां सकृच्छ्रूयते ।

९. उत ग्ना व्यन्तु देवपत्नीरिन्द्राण्यग्नाय्यश्विनी राट् ।
आ रोदसी वरुणानी शृणोतु व्यन्तु देवीर्य ऋतुर्जनीनाम् ॥ ५. ४६. ८

"उत अपि च ग्नाः स्त्रियः देवपत्नीः देवपत्न्यो देवाः पतयो यासां ताः । व्यन्तु हविर्भक्षयन्तु । इन्द्राणी इन्द्रस्य पत्नी, अग्नायी अग्नेः पत्नी, अश्विनी अश्विनोः पत्नी राट् राजमाना । रोदसी रुद्रस्य पत्नी [निरु. ११. ४९] । वरुणानी वरुणस्य पत्नी आ सर्वतः प्रत्येकं शृणोतु । किञ्च देवीः पत्नीर्यजमानेभ्यः व्यन्तु खादन्तु हविः । यो जनीनां देवजायानाम् ऋतुः कालः तदभिमानी देवोऽपि शृणोतु वेतु च ।

२—दस्रौ—

यदाऽश्विनो रथः समानयोजनोऽमर्त्यस्तदा तौ दस्रौ इति नाम्ना संबोध्येते [१. ३०. १८; ५. ७५. ९]। दस्रौ शत्रूणामुपक्षपयितारौ। अतस्तौ रुद्रवर्तनी भवतः [१. ३. ३]। दस्रौ वसूनि लम्भयतः [१. ४६. २]। तौ वसु रथे बिभृतः। [१. ४७. ३]। भैषज्यकर्माणा सुखस्य लम्भयितारौ [८. ८६. १]। तौ ह्यायुर्वर्धयतः [१. ११६. १०]। तौ दारिद्र्यमुपशमयतः [१. ११८. ३; ३. ५८. ३] । तौ मधूत्पादयन्तौ रथौ कुरुतः [४. ४३. ४] । अतस्तौ दर्शनीयौ भवतः। [६. ६२. ५; ८. ५. २; ८ २२. १७]। दस्रौ नेतृभिर्युक्तौ, नेतृभिः सयुक्तौ वा, नृवद्दस्रा[1] [८. ५. २ [। तौ अतिशयकर्माणौ "दस्रा दंसिष्ठा" [१. १८२. २]।[2]

अश्विनौ यद्यपि असुरमोचरौ, नूतनदिनापेक्षया आ मध्यरात्राद् आ सूर्योदयं तयोः कालस्य निर्णयात्[3], सूर्योदयेन तयोस्तिरोभावाच्च यत्र यत्र सूक्तेषु दस्रशब्दः प्रयुक्तो भवेत् तत्र तत्र प्रतिपाद्यमानं कर्माश्विनोर्लिङ्गं भवति। तैः कर्मभिरेवाश्विनोरनुमीयमानत्वात्, तेषु कर्मस्वेव अश्विनोः स्वरूपाभिव्यक्तेः, तत्र तत्र तौ दस्राविति नाम्ना श्रूयेते। दस्रयोर्दर्शनीयत्वादेव तौ हिरण्यवर्तनी इत्युच्येते। "एह देवा मयोभुवा दस्रा हिरण्यवर्तनी। उषर्बुधो वहन्तु सोमपीतये॥" [१. ९२. १८]। दस्रा हिरण्यवर्तनी सुषुम्ना सिन्धुवाहसा।" [५. ७५. २]। वर्ततेऽनेनेति व्युत्पत्त्या वर्तनिशब्देन रथ उच्यते। सुवर्णमयो वर्तनिर्ययोस्तौ। [सायणः १. ९२. १८]। "हिरण्यये रथे दस्रा हिरण्यये"। [१. १३९. ३–४]। "वाजुधाना शुभस्पती दस्रा हिरण्यवर्तनी" [८.५. ११]। "विश्वाभिरूतिभि··· दस्रा हिरण्यवर्तनी" [८. ८. १]।

यदा सर्वाः क्रिया अश्विनोः संबन्धेनैवानुष्ठीयन्ते, तदा सर्वमतिक्रम्याश्विनावायातः। तदा तौ दस्रौ शत्रूणामुपक्षपयितारौ हिरण्मयं (हितं च रमणीयं च) रथमारूढौ, सुषुम्नौ (सुधनौ) माध्वी (मधुविद्यावेदितारौ), सिन्धुवाहसा सिन्धुं प्रवाहयन्तौ) आयातः [५. ७५. २]।

१—नृवत् । दस्रा । "मनुष्यराजवद् हे दर्शनीयौ" [वे. मा. ८. ५. २]।

२—इन्द्रतमा हि धिष्ण्या मरुत्तमा दस्रा दंसिष्ठा रथ्या रथीतमा।
पूर्णं रथं वहेथे मध्व आचितं तेन दाश्वांसम् उप याथोऽश्विना॥ १.१८२.२
दस्रौ दर्शनीयौ इति यास्कः [निरु० ६. २६] (अन्नं दुहन्तौ मनुष्याय दर्शनीयौ)।

३—निरु० १२. १. ५

दस्रौ कर्माणि प्रीणयतः, उदकं पालयतः, स्वकान्त्या मादयतश्च । "दस्रा ...... । चित्रंजिह्वा मधुवर्णा शुभस्पती" ॥ ८. २६. ६ । दस्रौ इति संबोधन-युक्ताः कारचन अन्या अपि ऋचोऽधो निर्दिश्यन्ते ।

१. कूपाद् वन्दनस्य उद्धारः १. ११७. ५; ११८. ६; ११९. ७

२. एह यातं पथिभिर्देवयानैः ३. ५८. ५

३. पुरुवीरं बृहन्तं रयिं मिमाथाम् ४. ४४. ६

४. पुरुशाकतमा शंभविष्ठा चित्ररातो ६. ६२. ५

"अतिशयेन बहुकर्माणौ बहुसहायौ वा। अतिशयेन सुखस्य भावयितारौ सुखस्वरूपौ वा । विचित्रदानौ ।"

५. रथोऽस्तान् दिवो बाधते वर्तनिभ्याम् । ७. ६९. ३

६. पृथुपाजसा रथेन ८.५.२। "पृथुपाजसा" विस्तीर्णबलेन बहुन्नेव वा ।

७. वर्तिः अश्ववत्, गोमत्, हिरण्यवत् ८. २२. १७

दस्रशब्दस्य प्रयोगसंख्या—५१ । तत्र—

'दस्र' इत्येकवचनान्तं संबोधने द्विः [१. ४२. ५; ६. ५६. ४] । उभयत्र पूष्णो विशेषणम् । "दस्राः" इति बहुवचनान्तं संबोधनं सकृद् यच्च मरुताम् । न वो दस्रा उप दस्यन्ति धेनवः [५. ५५. ५] "हे दस्राः (मरुतः !) दर्शनीयाः ! शत्रूणामुपक्षपयितारो वा, वो युष्माकं धेनवः प्रीणयितारो मेघाः न उप दस्यन्ति न शुष्यन्ति ।" [सायणः]

दस्रा [६. ६९. ७] इन्द्राविष्ण्वोः विशेषणम् ।[1] दस्रा । प्र दस्रा नियुद्रथः पूषा अविष्टु माहिनः [१०. २६. १] । "नियुद्रथः गमनाय सर्वदा नियुक्तरथः । माहिनः महान् । प्रकर्षेण रक्षतु । दस्रा (दर्शनीयः पूषा) । यद्वा दंसयितारौ कर्मणामुपक्षपयितारौ परिसमापयितारौ इत्यर्थः । एवंभूतौ पत्नीयजमानौ पूषा रक्षतु इति योज्यम्" । [सायणः]

३. नासत्यौ ।

यथा अश्विनौ इति पदं तयोरश्वभावतां प्रत्याययति, दस्रौ इति पदं तयोरेव साक्षात् क्रियारूपतां वेदयति, तथा नासत्यौ इति पदं तयोरश्विनोः सत्यस्वरूपं भावयति । अश्वारूपायां सरण्य्वाम् अश्वरूपाद् विवस्वतः संभूतावश्विनौ[2] ।

१—इन्द्राविष्णू पिबतं मध्वोऽअस्य सोमस्य दस्रा जठरं पृणेथाम् ६. ६९. ७ ।
"दर्शनीयौ मदकरं सोमं पिबतम्, जठरं पूरयेथां च ।" [सायणः]

२—द्र. निरु. १२. १०.

मातापित्रोरसत्यकन्याभ्याम् अश्वाभ्यां संभूतौ अश्विनावपि असत्यौ । अतो "न असत्यौ नासत्यौ" इति व्याक्रिया । का नाम नासत्यता तयोरिति विचारे नासिकाप्रभवता एव नासत्यतेति निरूपितं भवति ।

"रुद्रवर्तनी" इत्यश्विनोः रुचीयं विशेषणं संहितायाम् । "संग्रामे रोदनशील-मार्गौ यद्वा स्तूयमानमार्गौ" । [सायणः–८. २२. १] ।

"रुद्रौ रोरूयमाणौ द्रवन्तौ"] सायणः २. ४१. ७] । रुद्रो रौतीति सतो, रोरूयमाणो द्रवतीति वा, रोदयतेर्वा [निरु. १०. ५] ।

आध्यात्मिकदृष्ट्या "रुद्रवर्तनी" शब्देन वाक्प्राणयोः अधिष्ठातृत्वं प्रतीयते ।

अश्विनोर्वाहनं रासभः । "रासृ शब्दे । रासिवल्लिभ्यां च [उ. सू. ४०५] इति कर्तरि अभच् प्रत्ययः । ग्रामादित्वाद् आद्युदात्तः" [सायणः] । वाजिनो रासभस्य १. ५३. ५[1]

शब्दायमानरासभयोगेनापि अश्विनोर्वाक्प्राणाभ्यां सम्बन्धः प्रतीयते । अन्यत्र अश्विनोर्व्यापनं वातस्य गत्योपमीयते । "आत्मेव वातः स्वसराणि गच्छतम्" [१. ३४. ७] । अत्र "नासत्या" इति संबोधनम् । "यथा प्राणिनामात्मभूतः प्राणवायुः तदीयानि शरीराणि गच्छति, तद्वद् हे नासत्यौ ! तिस्रः वेदीः गच्छतम् ।" "परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः" इति[2] न्यायेनापि "न असत्यौ नासत्यौ" इति पाणिनीयं व्याकरणं "नभ्राण्नपान्नवेदानासत्या······ ·· [पा. सू. ६. ३. ७५] इति, "नासिकाप्रभवौ बभूवतुरिति वा" इति निर्वचनं

१—वाजिनो रासभस्य [१. ५३. ५] । अत्र रासभ इन्द्रस्य वाहनम् । सोमपानार्थम् इन्द्रो (अत्र) रासभरथेन आगच्छति । "यत्रा रथस्य बृहतो निधानं, विमोचनं वाजिनो रासभस्य" । "गृहं प्रति गमने महतो रथस्योपरि अवस्थानं प्रयोजनम् । अत्र स्थितौ रासभस्य हेषारवं कुर्वतो वाजिनोऽश्वस्य रथाद् विमोचनं प्रयोजनम् ।" [सायणः] । कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः [१. ३४. ९] । "वाजिनो बलवतो रासभस्य भवदीयाश्वस्थानीयस्य गर्दभस्य योगो रथे योजनं कदा ।" [सायणः]

२—परोक्षप्रिया इव हि देवा भवन्ति प्रत्यक्षद्विषः ।" [गोपथपूर्वभागः २. २१] इन्धो ह वै नामैष योऽयं दक्षिणेऽक्षन् पुरुषस्तं वा एतम् इन्धं सन्तम् इन्द्र इत्याचक्षते परोक्षेणैव परोक्षप्रिया इव हि देवाः प्रत्यक्षद्विषः ।" बृहद् आ. उ. ४. २. २]

[निरु. ६. १३] च संगच्छेते ।[1]

असवौ इत्यनुनासिकाश्विनाविति कथनेनाऽश्विनाविति यदुक्तं भवेत् तदश्विनोः यथास्वं कर्म, तच्च नासत्यौ इति पदेन प्रत्याय्यते । अथवाऽश्विनौ । किं ताभ्याम् अर्पितं, किं ताभ्यां वोढं, किं ताभ्यां दशनाशेन सम्पादयित्वा दत्तम् इति विचारैरश्विसूक्तप्रतिपादितानि सर्वाणि कर्माणि विचारार्हाणि भवन्ति । तत्र मुख्यं कर्मद्वयम् । विमदाय तस्य जायायाः प्रापणमेकं, बन्धुभिः परिवृतस्य, शत्रुभिः परित्यक्तस्य जाहुषस्य पर्वतान् विभिद्य शोभनमार्गैः रथेन गृहं प्रापणम् अपरम् । एतदुभयं नासत्याभ्यां क्रियते [१. ११६. १; २०] । इदं कर्मद्वयं[2] मस्तमयादारभ्य सूर्योदय-पर्यन्तं सततं प्रवर्तते । एतदुभयकर्मणोरन्तरा अश्विनोर्दस्रयोर्वा इतराणि सर्वाणि कर्माणि वितन्यन्ते । सततं कर्मसु व्यापृतत्वाद् जरा मा बाधि इति कृत्वा आत्मनोऽजरत्वं कामयमानौ नासत्यौ जाहुषं गृहं प्रापयतः । "अजरयू अयातम्" [१. ११६. २०] । न जरा अजरा तामात्मन इच्छतः [सायणः] ।

वसिष्ठः पित्र्याणि सख्यानि समानबन्धुत्वं च नासत्याभ्यां सह प्रतिपादयति— "युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत[3] तस्य वित्तम् ।" [७. ७२. २]

१—सत्यावेव नासत्यावित्यौर्णवाभः । सत्यस्य प्रणेतारौ इत्याग्रायणः । नासिकाप्रभवौ बभूवतुरिति वा । [निरु. ६. १३] । सत्सु भवौ सत्यौ । न सत्यौ असत्यौ । न असत्यौ नासत्यौ । "नभ्राण्-नपात् नवेदा-नासत्या-नमुचि······इत्यादिना [पा. ६. ३. ७५]" सूत्रेण नञः प्रकृतिभावः । "नवेदानासत्या"—न वेत्तीति नवेदाः । वेत्तेरसुन् प्रत्ययान्तः । नासत्याः । सत्सु साधवः सत्याः । न सत्या असत्याः । नाऽसत्या नासत्याः इति काशिका । भट्टोजिदीक्षितेनापि न असत्याः नासत्याः इति बहुवचनान्तेनैव प्रश्लेषः ।

"नासत्या । असत्यम् अनृतभाषणं तद्रहितौ ।"

"न विद्यतेऽसत्यम् अनयोरिति नासत्यौ ।" [सायणः १. ३. ३]

२—समृद्धिं सार्थकीकुर्यात् सूपकारेण सत्यवान् । वैमदा जाहुषाज्जातं नासत्या-ऽनो हि सार्थकम् ॥ बाह्रि. नीतिमञ्जरी [श्लो. २३] वैमदाः विमद-स्त्रियाः सकाशात् जाहुषाच्च नासत्ययोः "अनः" रथः सार्थको जातः । नासत्याभ्यां विमदीजाहुषयोर्वहनेन स्वरथः सार्थकः कृतः ।

३—वसिष्ठो मैत्रावरुणिः । विवस्वान् अश्विनोर्जनकः । मित्रः वरुणः विवस्वान् च कश्यपाद् अदितेर्जाताः । एवं समानबन्धुत्वम् ।

विश्ववप्स्न्यो व्यासक्तो वसिष्ठस्त्रिवन्धुरेण उस्रयाम्णा रथेन नासत्यावाहूय [७. ७१. ४] तयोः कर्म स्तौति—

> युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।
> निरंहसस्तमसः स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥ [७. ७१.५]

ऐतरेयब्राह्मणे आजिधावने गर्दभरथेनाश्विनावुदजयताम् [ऐ. ब्रा. १७. ३] ।

संहितायां जयप्राप्तिः रासभेन । स च रासभो नासत्ययोर्वाहनम् । "तद् रासभो नासत्या सहस्रम् आजा यमस्य प्रधने जिगाय ।" [१. ११६. २] "कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः ।" [१. ३४. ९]

अश्विसूक्तेषु एकोऽपरोऽपि रासभशब्दोऽश्विनोर्वाहनत्वेन श्रूयते—युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू । मध्वः सोमस्य पीतये ॥ [८. ८५. ७]

नवर्चस्य गायत्रीछन्दस्कस्यास्य सूक्तस्य सर्वत्र तृतीयः पादः "मध्वः सोमस्य पीतये" इति । अत्र प्रथमायां नवम्यां चर्चि "नासत्याश्विना [नासत्या । अश्विना ।] इति संबोधनम् ।

> ऋ. १ आ मे हवं नासत्याश्विना गच्छतं युवम् ।
> ऋ. ९ नू मे गिरो नासत्याश्विना प्रावतं युवम् ।

मध्यपातिनीषु द्वितीयातृतीयाषष्ठ्यष्टमीषु ऋक्षु "अश्विना" इति संबोधनम् । चतुर्थीपञ्चम्योः "नरा" इति संबोधनम् । सप्तम्यां "वृषण्वसू" इति । अत्र आद्यन्तयोः समन्वयेन, अन्यत्र च द्वयोर्ऋचोः रासभेन सह [१. ३४. ९; ११६. २] नासत्ययोः एव श्रवणाद् अस्यां सप्तम्यां [८. ८५. ७] अपि ऋचि रथे रासभस्य योजनं नासत्याभ्यामेव भवेत् । आश्विनं शस्त्रम्, आश्विनः क्रतुः इति व्यपदेशस्तु अश्वनात्मकनामसाजात्यात् ।

आजिधावनाय नासत्यौ इषुवच्छीघ्रगामिनौ कृतौ देवैः—श्रिये पूषन्निषुकृतेव देवा नासत्या वहतुं सूर्यायाः । [१. १८४. ३]

"हे पूषन् ! पोषकौ नासत्यौ असत्यरहितौ देवौ युवां श्रिये श्रेयसे धनस्य लम्भायाश्च लाभायेत्यर्थः इषुकृतेव । इवशब्दः एवार्थे । आजिधावनाय इषुवच्छीघ्र-गमनगामिनौ कृतावेव सन्तौ सूर्याया एतन्नामिकायाः सवितुः पुत्र्याः । कर्मणि षष्ठी । सूर्यां वहतुं रथे धारयितुम् आजिमुदजयताम् इत्यर्थः । [सायणः]

अत्राऽऽजिधावने इषुवद्गमनत्वं शीघ्रगामित्वं नासत्ययोः (अश्विनोः) श्रूयते । एवमश्वनात्मकतयाऽश्वित्वं स्फुटम् ।

आजिधावनेन, तत्र च रासभयोगेन नासत्ययोः सम्बन्धो विशेषतो रम्यः[१] भवति ।

अश्विनौ यदा वायुना नियुद्भिश्च संगतौ भूत्वा युवानौ [सम्मिश्रयन्तौ] भवतस्तदा तौ नासत्यौ स्तः । तदा तौ तिरोअह्न्यं सोमं पिबतः । अह्नि तिरोहिते हूयमानः सोमः तिरोअह्न्यो भवति ।

अश्विना वायुना युवं सुदक्षा नियुद्भिश्च सजोषसा युवाना ।

नासत्या तिरोअह्न्यं जुषाणा सोमं पिबतम् अस्रिधा सुदानू ॥ [३. ५८. ७[२]]

अस्रिधा अनुपक्षीणौ । अह्नि भवम् अह्न्यम् । तिरोभूतम् अह्न्यम् यस्मिन् काले स तिरोअह्न्यः ।

यदाऽश्विनौ देवैः सचनस्तमौ (अतिशयेन सेव्यमानौ) भवतस्तदा तौ "इन्द्रनासत्या" [८. २६. ८] इति संबोध्येते ।

हिरण्यवर्तनी इति विशेषणं दस्रयोरेव । हिरण्मयो रथो दस्राभ्याम् इव नासत्याभ्यामपि संबद्धः । सुवर्त्वक्, हिरण्यत्वक्, सहस्रनिर्णिक्, हिरण्याभीशुः [१. ४७. ९; ५. ७७. ३–४; ८. ८. १४; ८. २२. ५] इति विशेषणानि नासत्यसंबद्धस्यैव रथस्य । बर्हिःशब्दोऽपि विशेषतो नासत्याभ्यां संबद्धः । बर्हिष्मती इति पदं दाशतय्यां सकृदेव श्रूयते, तच्च नासत्यसंबद्धम् । "बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योपवाजैः ।" [१. ११७. १]

अष्टमे मण्डले पञ्चमे, ऊनचत्वारिंशदृचे, सूक्ते रथस्य हिरण्मयत्वमेवं श्रूयते—

१. दस्रा हिरण्यवर्तनी पिबतं सोम्यं मधु । [८. ५. ११]

२. रथं हिरण्यवन्धुरं हिरण्याभीशुमश्विना । आ हि स्थाथो दिविस्पृशम् ॥ [८. ५. २८]

३. हिरण्ययी वां रभिरीषा अक्षो हिरण्ययः । उभा चक्रा हिरण्यया ॥ [८. ५. २९]

४. हिरण्ययेन रथेन द्रवत्पाणिभिरश्वैः । धीजवना नासत्या ॥ [८. ५. ३५]

१—द्र. "आजा यमस्य ।" [१. ११६. २] "अश्वादेर्धावनभूमिराजिरुच्यते ।" "तमसो यमनाद् यमः आदित्य इहोच्यते ।" [स्कन्दः] "आजा खेलस्य परितक्म्यायाम् ।" [१. ११६. १५] "परितक्म्या रात्रिः परित एनां तक्म । तक्मेत्युष्णनाम ।" [नि. ११. २५]

२—यद्यपि तिरोअह्न्यमन्यत्राप्यश्विनौ पिबतः, तथाप्यत्रैव "नासत्या" "अस्रिधा" इति पदद्वयं श्रूयते । अस्रिधा इति विशेषणं नान्यत्राश्विनोः श्रूयते । "तिरोअह्न्यम् ।" [१. ४७. १; ८. ३५. १९–२१]

प्रवत्पाणिशब्दः संहितायां द्विः श्रूयते। सकृदश्विनोर्विशेषणं सकृद् अश्विनो-रश्वानां विशेषणम्।

१. प्रवत्पाणी शुभस्पती [१. ३. १]
२. प्रवत्पाणिभिरश्वैः [८. ५. ३५]

संहितायां नासत्यशब्दस्य प्रयोगसंख्या–१०१

"इन्द्रनासत्या" इत्येकं समस्तं पदमपि श्रूयते [८. २६. ८]। अत्र नासत्याय इत्येकम् एकवचनान्तं पदम्। "परिज्मने नासत्याय" [४. ३. ६], वामदेवस्याऽऽर्षे आग्नेये सूक्ते। "परितो गन्त्रे (वाताय)। सत्यस्य नेत्रे। यद्वा न विद्यतेऽसत्यं यस्य तस्मै। यद्वा नासत्याय इति वचनव्यत्ययः। नासत्याभ्याम् अश्विभ्याम्।" [सायणः][1]

अन्यदेवताकेषु सूक्तेषु यत्र नासत्यशब्दः श्रूयते तत्र नासत्याभ्याम् अश्विनौ एव गृह्यंते। तत्र क्वचिद् आश्विनी ऋक्। यथा वैश्वदेवताकेषु सूक्तेषु— [३. ५४. १६; ६. ४९. ५; १०. ६१. १५]। [१०. ६१. १५]–अत्रेन्द्रः प्रार्थ्यते रुद्रपुत्रौ नासत्यौ स्तोत्राय यज्ञाय भवेताम् इति।

एवं बहुदेवताके सूक्ते–[८. १०१. ७–८] "आ मे वचांसि" इति द्वे अश्विदेवताके।

क्वचित् अर्धर्चः पादो वाऽऽश्विनः, क्वचित् पदमात्रम् आश्विनम्।

१. उभा नासत्या ५. ४६. २ [पदद्वयम्]
२. इन्द्र नासत्या रयिम् ४. ३७. ८ [एकं पदम्]।
३. तद्यान्नासत्याऽभ्यां परिज्मानं सुखं रथम् १. २०. ३ [अर्धर्चः]।
४. नासत्येव सुग्म्यो रथेष्ठः १. १७३. ४ [एकं पदम्]। नासत्यौ इव सुग्म्यः [सुगम्यः–इन्द्रः]।
५. आ नासत्योरुगाया रथेनेमं यज्ञम् उप नो यातमच्छ। ४. १४. १ [अर्धर्चः]
६. नासत्येव हव आशंभविष्ठः ९. ८८. ३ [एकं पदं]।
नासत्याविव आह्वानेऽत्यन्तं सुखस्य भावयिता सोमः।[2]

1—परितो गन्त्रे नासत्याय। अश्विनोरन्यतरस्य संज्ञेयम् [वे. भा ७.३.६]

2—नासत्येव। नासत्याविव अश्विनाविव। तौ हि द्यावापृथिव्यात्मानौ। सायणः–[१. १७३. ४]

अश्विनौ दस्रौ नासत्यौ एतानि त्रीण्यश्विनोर्मुख्यानि नामानि । अपरं भूयिष्ठं नाम नरौ इति ।

४—नरौ—

नृशब्दस्य द्विवचनान्तेन प्रयोगसंख्या–८१, अत्राश्विनोरर्थे संख्या–६४, इतरयुग्मदेवानाम् अर्थे संख्या–१७, सर्वत्र सामान्योऽर्थो "नेतारौ" इति ।

(१) १. २. ६ नरौ पुरुषौ पौरुषेण सामर्थ्येनोपेतौ–इन्द्रवायू ।
(२) १. १५१. ९ नेतारौ मित्रावरुणौ ।
(३) २. ४१. ३ नेतारौ इन्द्रवायू ।
(४) ५. ६४. ७ नेतारौ मित्रावरुणौ ।
(५-६) ६. ६०. ८; ९ नेतारौ इन्द्राग्नी ।
(७) ७. ६६. १९ यागनेतारौ मित्रावरुणौ ।
(८) ७. ८२. ८ नेतारौ इन्द्रावरुणौ ।
(९) ७. ८३. १ नेतारौ इन्द्रावरुणौ ।
(१०) ७. ९१. ६ नेतारौ इन्द्रवायू ।
(११) ७. ९४. ३ नेतारौ इन्द्राग्नी ।
(१२) ७. ९९. ४ नेतारौ इन्द्राविष्णू ।
(१३–१५) ८. ३८. ४–६ नेतारौ इन्द्राग्नी ।
(१६) ८. ४०. ३ नेतारौ इन्द्राग्नी ।
(१७) ८.१०१.२ "नरा राजाना" [नेतारौ कर्मणा दीप्यमानौ मित्रावरुणौ ।]

नयनकर्मण्य[१]श्विनोर्नृत्वं श्रूयते यथा—

ऋतेन मित्रावरुणावृतावृधावृतस्पृशा । [१. २. ८] मित्रावरुणौ । ऋतऽवृधौ । इत्यत्र यथा पूर्वस्य सामान्यवचनम् उत्तरस्य विशेषवचनं चाङ्गीक्रियते, न तथा—अश्विना पुरुदंससा नरा [१. ३. २] इत्यत्र । व्युत्पत्तिनिमित्तभेदे सत्यपि स्तुत्युपयोगेनैव पर्यायत्वेन प्रयोगात्, एकार्थवृत्तित्वाभावेनाऽसामानाधिकरण्यात्, नात्र सामान्यविशेषभावः ।
"भिन्नप्रवृत्तिनिमित्तानामेव हि एकस्मिन्नर्थे वृत्तिः सामानाधिकरण्यम् ।"
[सायणः—१. ३. २]

एवम् अश्विनोः पर्यायाणां केवलं स्तुत्युपयोगितायां सत्यामपि, स्तुत्यासु स्तुतगुणान्वेन प्रतिपादनात् तत्राऽऽदरातिशयात् स्तुत्यगुणविशिष्टगुणानां स्तोतुर्मनसि आधीयमानतया तत्र पदानां प्रवृत्तिनिमित्तावगमे जिज्ञासोः प्रवृत्तिः स्वतः स्यादेव ।

१—नॄ नये नृणाति । नरा मनुष्याः । नृत्यन्ति कर्मसु । [निरु. ५. १] नर

१. नरा शवीरया धिया [१. ३. २] "शवीरया अप्रतिहतप्रसरया ।"
२. नरा इषं पृञ्चन्ता [१. ४७. ८] "अन्नं संयोजयन्तौ ।"
३. धेनुम् अस्वं पिन्वथो नरा [१. ११२. ३] "अस्वं प्रसवासमर्थां पयसा पूरितवन्तौ ।"
४. नरा गातुमीषथुः [१. ११२. १६] "गातुः निर्गमनमार्गः" ।
५. नरा कक्षीवते पुरंधिम् अरदतम् [१. ११६. ७]
६. अश्वस्य शीर्ष्णा उवाच [१. ११६. १२]
७. अनुपूर्वं चोदयन्ता (अग्निम्) [१. ११७. ३]
८. कृष्णियाय विष्णाप्वं ददथुः [१. ११७. ७]
९. सूर्यस्य दुहिता रथम् आतिष्ठत् [१. ११८. ५]
१०. एषा नरा निषेतारा च कर्णैः [१. १८४. २]
११. एतानि वाम् अश्विना वर्धनानि तानि नरा जुजुषाणोपयातम् । [२. ३९. ८] "वर्धनानि"—पूर्वासु सप्तसु ऋक्षु [२. ३९.१–७] प्रोक्तानि ।
१२. युवोर्नरा द्रविणं जह्नाव्याम् [३. ५८. ६]
१३. युवोरत्रिश्चिकेतति नरा सुम्नेन चेतसा ।
नरा अत्रिर्वाम् आववर्तति । [५. ७३. ६-७]
१४. आ वां नरा मनोयुजो वहन्तु [५. ७५. ६]
१५. प्र मायाभिर्मायिना भूतमत्र नरा नृतू जनिमन् यज्ञियानाम् । [६. ६३. ५] "नृतू" नृत्यन्तौ । "नृवता रथेन" [६.६२.१०] । नरा नृषु प्रशस्तः अगस्त्यः [१. १८०. ८] । नरो यद् वाम् [४. ४४. ६] । नरो नेतार ऋत्विजः । [सायणः]

आश्विसूक्तेषु द्वे सूक्ते उपमाभिरश्विनोः कर्म प्रतिपादयतः । प्रथमं सूक्तं द्वितीये मण्डलेऽष्टमं गार्त्समदस्य आर्षम् [२. ३९. १-८] । अत्रान्तिमेऽर्धर्चे "तानि (वर्धनानि) नरा जुजुषाणोपयातम्" [२. ३९. ८] इति श्रुतिः ।

द्वितीयं सूक्तं दशमे मण्डले एकादशं भूतांशस्य काश्यपस्याऽऽर्षम् [१०. १०६] । अत्र नृशब्दो न श्रूयते ।

कक्षीवतः पञ्च सूक्तानि [१. ११६–१२०] । तत्रान्तिमयोः द्वयोः सूक्तयोः [११९-१२०] नृशब्दो नास्ति ।

कृष्णस्वनाम । [निघ. १. १४. २३] । तेनं अश्विनौ वाहयेते ।

"अन्तिषद् भूतु वाम् अवः" इति तृतीयपादेन युक्ते गायत्रीछन्दस्केऽष्टादशर्चे आत्रेयस्य ऋषेः सूक्ते [८. ७३. १-१८] नृशब्दो नास्ति ।

मैत्रावरुणेर्वसिष्ठस्याऽष्टौ सूक्तानि सप्तमे मण्डले [७. ६७–७४] तत्र–नरा सवनोपयातम् ६९. ६

चित्रं भोजनं ददथुर्नरा ७४. २

नरा अस्मयू आयातम् ७४.४

चतुर्थे मण्डले त्रीणि अश्विदेवताकानि सूक्तानि [४. ४३–४५] तत्र अश्विनोः संबोधनत्वेन "नरा" इति पदं नास्ति ।

"नरो यद् वाम्" [४. ४४. ६] नरो नेतार ऋत्विजः [सायणः] ।

पञ्चमे मण्डले अश्विदेवताकानि षड् सूक्तानि [५. ७३–७८] ।

तत्र चतुर्षु सूक्तेषु ५. ७४; ७६–७८ "नरा" इति पदं नास्ति ।

५. दिवो नपातौ ।

इदं पदद्वयम् अश्विनोर्विशेषणत्वेन पञ्चकृत्वः श्रूयते । एकवर्जम् [१०.६१.४] इतराणि चत्वारि आश्विनसूक्तेषु ।

(१) १. ११७. १२ द्योतमानस्य सूर्यस्य पुत्रौ ।
(२) १. १८२. १ आदित्यस्य नप्तारौ न पातयितारौ ।
(३) १. १८४. १ द्युलोकस्य न पातयितारौ नप्तृस्थानीयौ वा ।
(४) ४. ४४. २ आदित्यस्य पुत्रस्थानीयौ, द्युलोकस्य वा न पातयितारौ ।
(५) १०. ६१. ४ दीप्यमानस्य स्वर्गस्य प्रकाशात्मकस्य वा न पातयितारौ ।

[वैश्वदेवे सूक्ते इयमृक् ।]

कृष्णा यद् गोष्वरुणीषु सीदद्दिवो नपाताश्विना हुवे वाम् ।
वीतं मे यज्ञम् आगतं मे अन्नं ववन्वांसा नेषमस्मृतध्रू ॥ १०. ६१. ४

वीतं कामयेथाम् । मे अन्नं हविर्लक्षणं तदर्थं मे यज्ञम् आगच्छतम् । इषम् अन्नं ववन्वांसा न, संभजमानौ अश्वौ इव तद्वद् आगतम् । अस्मृतध्रू अस्मृतद्रोहौ मयि द्रोहं न स्मरन्तौ ।

यथा घासं भजमानौ अश्वौ शीघ्रमागच्छतः अस्मृतद्रोहौ । [वे. मा.]
अन्यत्र "नपाता" इति पदं द्विः श्रूयते ।

(१) नपाता शवसः [८. २५. ५] बलस्य पौत्रौ मित्रावरुणौ ।
(२) दिवो नपाता [३. ३८. ५] दिवो न पातयितारौ इन्द्रावरुणौ ।

६ पुरुदंसौ ।

अयं द्विवचनान्तः अश्विनोरेव बोधकः । स पञ्चकृत्वः श्रूयते । बहुकर्माणौ इत्यर्थः । पुरुदंसा [७. ७३. १], पुरुदंससा [१. ३. २; ६. ६२. १०; ८. ९. ५; ८७. ६]

पुरुदंसशब्दः सकृद् इळाया विशेषणत्वेन श्रूयते । तृतीये मण्डले भिन्नेषु सप्तसु सूक्तेषु एकैवर्गावर्त्यते इति कृत्वाऽयं शब्दः सप्तकृत्वः (एकवचनान्तः) श्रूयते । पुरुदंसम् [बहुकर्माणम् इळां भूमिम् ३. १. २३; ५. ११; ६. ११; ७. ११; १५ ७; २२. ५; २३. ५]

इळामग्ने पुरुदंसं सनिं गोः शश्वत्तमं हवमानाय साध ।
स्यान्नः सूनुस्तनयो विजावाग्ने सा ते सुमतिर्भूत्वस्मे ॥ ३. १. २३

इळाम् । अग्ने । पुरुऽदंसम् । सनिम् । गोः । शश्वत्ऽतमम् । हवमानाय । साध । स्यात् । नः । सूनुः । तनयः । विजाऽवा । अग्ने । सा । ते । सुऽमतिः । भूतु । अस्मे इति ॥

"इयं सर्वेषां पशूनां पशुपुरोडाशस्य स्विष्टकृतः पुरोनुवाक्या । हे अग्ने ! बहुकर्माणं गवां प्रदात्रीं भूमिं स्तुवते मह्यं चिरकालं यथा भवति तथा साधय । अस्माकं पुत्रः तनयः संतानस्य विस्तारयिता पुत्रपौत्रादिरूपेण स्वयं विजायते इति विजावा स्यात् । हे अग्ने ! सा प्रसिद्धा ते सुमतिः त्वदीयानुग्रहबुद्धिरस्मासु भवतु ।" [सायणः]

७. पुरुभुजा ।

इदम् अश्विनोः स्वीयं विशेषणं दशकृत्वः श्रूयते ।

(१) १. ३. १ विस्तीर्णभुजौ बहुभोजिनौ वा
(२) १. ११६. १३ बहूनां पालकौ, प्रभूतहस्तौ वा
(३) १. ११६. १४ महाबाहू, प्रभूतहस्तौ वा
(४) ५. ४९. १ पुरु भुञ्जाते इति पुरुभुजौ
(५) ५ ७३. १ बहुषु यज्ञेषु भोक्तारौ । अधिकं रक्षितारौ वा
(६-७) ६. ६३. ५, ८ पूर्णभुजौ बहूनां पालकौ वा
(८-९) ८. ८. १७; १०. ६ बहुलस्य हविषो भोक्तारौ बहूनां पालकौ वा
(१०) ८. ८६. ३ पुरूणां बहूनां धनादिदानेन भोजयितारौ यद्वा बहूनां स्तोतॄणां पालयितारौ ।

८. पुरुभूतमा ।

इदमश्विनोः स्वीयं विशेषणं त्रिः ।

(१) ५. ७३. २ पुरूणां बहूनां यजमानानां भावयितृतमौ ।
(२) ८. २२. ३ अतिशयेन बहूनां शत्रूणां भावयितारौ ।
(३) ८. २२. १२ युद्धेषु अत्यन्तं पुरुधा भवन्तौ, यद्वा अतिशयेन बहूनां शत्रूणाम् अभिभवितारौ भवन्तौ ।

९. पुरुतमा ।

इदमश्विनोर्विशेषणं सकृत् [७. ७३. १] प्रभूततमौ ।

१०. पुरुशाकतमा ।[1]

इदमश्विनोर्विशेषणं सकृत् [६. ६२. ५]

अतिशयेन बहुकर्माणौ बहुसहायौ वा ।

११. युवानौ ।

द्विवचनान्तम् इदं पदं श्रूयते एकादशकृत्वः । अश्विनोर्बोधने पञ्च, मित्रावरुणयोरेकम्, ऋभूणां पित्रोः पञ्च ।

अश्विनौ—१. ११७. १४ दुःखानां यावयितारौ ।
३. ५८. ७; ६. ६२. ४ नित्यतरुणौ ।
७. ६७. १०; ६९. ८ नित्ययौवनौ ।

मित्रावरुणौ—७. ६२. ५ नित्ययौवनौ, सर्वत्र व्याप्तौ वा ।

ऋभूणां पितरौ—१. २०. ४; ११०. ८; ४. ३३. ३; ३५. ५; ३६. ३

१२. वाजिनीवसू ।[2]

इदं द्विवचनान्तं विंशतिकृत्वः श्रूयते । तत्रैकमिन्द्रवाय्वोर्विशेषणम् । शिष्टान्यूनविंशतिरश्विनोः ।

१. २. ५ इन्द्रवायू । अन्नवती हविःसन्ततिरत्र वाजिनी । तस्या वसतः ।
२. ३७. ५ वाज एव वाजिनी । अन्नेन वासयितारौ । अन्नवर्धनौ ।

१—पुरुशाकशब्दः इन्द्रस्य विशेषणत्वेन चतुः श्रूयते ।
पुरुशाक [६. २१. १०] बहुशक्ते इन्द्र !
[६. २४. ४; ७. १९. ६] बहुकर्मन् इन्द्र !
पुरुशाकाय [३. ३५. ७] बहुभिः स्तुत्याय । यद्वा बहुसहायाय ।

२—वाजिनीवसुः । इन्द्रस्य विशेषणं द्विः [१०. ९६. ८] यज्ञधनः ।
वाजिनीवसो [३. ४२. ५] अन्नफलपराः क्रिया वाजिन्यः । तासां वासक ! (इन्द्र !) ।

८. ५. ३ अप्नवती यागक्रिया। तस्यां वसु, धनं ययोरस्ति।

८. ५. २० वाजोऽन्नं बलं वा। तद्युक्तधनौ।

१०. ४०. १२ हुविष्मती स्तुतिः ! सा धनं ययोः। हुवि.स्तुतिधनौ।

१३ शुभस्पतौ। शुभः। पती।

"पती" इति पदं श्रयस्त्रिंशत्कृत्वः श्रूयते। अश्विनोर्बोधकत्वेन प्रयोगसंख्या २३, इतरयुग्मदेवानां बोधने प्रयोगसंख्या—१०

अश्विनोरर्थे—१. ३. १; ३४. ६; ४७. ५; ११९.५; १२०. ६; २. ३१. ४; ४. ४३. ६; ५. ७५ ८; ८. ५. ५; ११; ८. १६; २२. ४; ६; १४; २६. ६; ८७. ५; १०. ४०. ४; १२; १३; १४; ८५. १५; ९३. ६; १३१.४ [२३]

अत्र ८. ८. १६—दानुनस्पती। दानस्याधिपती (अश्विनौ)। २. ३१. ४—षष्ठ्यन्तं विशेषणं विनाऽपि केवलः पतिशब्दः श्रूयतेऽत्र। "पूषा पुरंधिरश्विनावधा पती।" अधशब्दश्चार्थे। पती सूर्यायाः भर्तारौ अश्विनौ च एते सर्वेऽस्मदीयं रथं प्रेरयन्तु इत्यर्थः। [सायणः]

इतरेषामर्थे—

(१) धियस्पती [१. २३. ३] इन्द्रवायू

(२) ज्योतिषस्पती [१. २३. ५] मित्रावरुणौ

(३-४) दानुनस्पती [१. १३६. ३; २. ४१. ६] मित्रावरुणौ

(५) शवसस्पती [४. ४७. ३] बलस्य पती इन्द्रवायू

(६) दिवस्पती [५. ६३. ३] मित्रावरुणौ

(७) इषस्पती [५. ६८. ५] मित्रावरुणौ

(८) पती राधसः [५. ८६. ४] इन्द्राग्नी

(९-१०) शुभस्पती [८. ५९. ३, ५] इन्द्रावरुणौ देवताऽत्र।

१४. शचीवसू।

इदं पदं द्विः श्रूयते। अश्विनोरेव विशेषणम्। [१. ११९. ५; ७. ७४. १] कर्मधनौ।

१५. रुद्रौ।

द्विवचनान्तो रुद्रशब्दो नवकृत्वः श्रूयते। तत्र सप्ताश्विनोः, द्वौ मित्रावरुणयोः। ५. ७०. २; ३ (मित्रावरुणौ)।

अश्विनोः—(१) १. १५८. १–रुत् दुःखं तद्धेतुभूतं पापं वा। तस्य द्रावयितारौ। संग्रामे भयंकरं शब्दयन्तौ वा। रुद्रौ रौतीति सतः [निरु. १०. ५]।

(२) २. ४१. ७ रोरूयमाणौ द्रवन्तौ वा। ५. ७०. २; ३ दुःखाद् द्रावयितारौ, रुद्रद्भिर्द्रवणीयौ वा (मित्रावरुणौ)।

(३) ५. ७३. ८ रुद् स्तुतिः। तया द्रवणीयौ रुद्रपुत्रौ वा।

(४) ५. ७५. ३ रुद्रपुत्रौ स्तुत्यौ वा।

(५) ८. २६. ५ संग्रामे रोदनशीलौ द्रवन्तौ वा।

(६) १०. ९३. ७ (वैश्वदेवी ऋक्) "उत नो रुद्रा चिन्मृळताम् अश्विना" [रुद्रपुत्रौ]।

(७) रौद्रौ इति द्विवचनान्तं सकृद् श्रूयते। तच्चाश्विनोर्विशेषणं। वैश्वदेवे सूक्ते एकर्क, यत्रेन्द्रः प्रार्थ्यतेऽश्विनौ च विषयः। "उत त्या मे रौद्राव् अर्चिमन्ता नासत्याविन्द्र गूर्तये यजध्यै।" [१०. ६१. १५]। उतापि च हे इन्द्र! त्या तौ प्रसिद्धौ रुद्रपुत्रौ। "क्षोदो न रेत इत ऊति सिञ्चत्" [१०. ६१. २] इति हि रुद्रपुत्रत्वम् उक्तम्। अर्चिमन्ता दीप्तिमन्तौ नासत्यावश्विनौ मे गूर्तये स्तुतये यजध्यै यागाय च भवेताम् इति शेषः।" [सायणः]

१६. रुद्रवर्तनी।

इदमश्विनोः स्वीयं विशेषणं चतुः श्रूयते। १. ३. ३; ८. २२. १; १४; १०. ३९. ११। "रुद्राणां शत्रुरोदनकारिणां शूरभटानां वर्तनिर्मार्गो घाटीरूपो ययोस्तौ रुद्रवर्तनी। यथा शूरा घाटीमुखेन शत्रून् रोदयन्ति तद्वदेतावित्यर्थः।" [१. ३. ३]। "संग्रामे रोदनशीलमार्गौ यद्वा स्तूयमानमार्गौ।" [८. २२. १.] "स्तोत्रयुक्तमार्गौ" [१०. ३९. ११]

१७. हिरण्यवर्तनी।[1]

द्विवचनान्तमिदं षट्कृत्वः श्रूयते। अश्विनोः स्वीयं विशेषणम्। १. ९२. १८; ५. ७५. २; ३; ८. ५. ११; ८. १; ८७. ५.

१८. माध्वी।[2]

द्विवचनान्तमिदं षोडशकृत्वः श्रूयते। अश्विनोः संबोधनं सर्वत्र।

१—हिरण्यवर्तनिः [६. ६१. ७] सरस्वती। वर्ततेऽनेनेति वर्तनी रथः। हिरण्मयी वर्तनिर्यस्याः सा। हिरण्यवर्तनिः [८. २६. १८] सिन्धुः हिरण्मयस्वीयमार्गा हिरण्मयोभयकूला।

२—माध्वीः। इदं बहुवचनान्तं द्विः श्रूयते। एकम् ओषधिविशेषणम् "माध्वीर्नः सन्त्वोषधीः।" [१. ९०. ६]
अपरं गोविशेषणम् "माध्वीर्गावो भवन्तु नः" [१. ९०. ८] "माध्वीः ।

१. १८४. ४; ४. ४३. ४; ५; ५. ७५. १–९;
६. ६३. ८; ७. ६७. ४; ७; ७१. २. [१६]
माध्वी । मधुपूर्णपात्रयुक्तौ [१. १८४. ४] ।
मधुररसस्य उदकस्य स्रष्टारौ । [४. ४३. ४]
मधुविद्यावेदितारौ [५. ७५. १.] । मादयितारौ [६. ६३. ८] ।
मधुरस्य सोमस्य अर्हौ, मधुविद्यासम्बन्धिनौ वा [७. ६७. ४] ।
मधुप्रियौ [७. ६७. ७] । मधुमन्तौ [७. ७१. २] [सायणः]
"माध्वी । मधुनः पूर्णः माध्वः । कोऽसौ । दृतिः । [ऋ. ८. ५. १९] तद्वन्तौ माध्वी । "छन्दसीवनिपौ" (पा. वा. ५. २. १०९) इति मत्वर्थे ईकारः ।" [स्कन्दः ६. ६३. ८]

अन्ये पञ्चविंशत्यपराः शब्दा अश्विनोरेवार्थे प्रयुज्यन्ते ।

१. अधप्रिया । अधऽप्रिया ।[1] सकृत्प्रयुक्ते, अश्विनोः संबोधनम् । [८. ८. ४]
"अधस्ताद् अस्मिंल्लोके विद्यमानेन सोमेन प्रीयमाणौ । यद्वा वर्णलोपश्छान्दसः । कथया स्तुत्या प्रीयमाणौ ।"

२. इनतमा । सकृदश्विनोः, सकृदुषसः ।
१. १८२. २ ईश्वरतमौ (अश्विनौ)
७. ७९. ३ सर्वस्येश्वरतमा (उषाः)

माधुर्योपेताः ।" मधोरञ् च (?) [पा. सू. ४. ४. १२९] इति मत्वर्थीयः अञ् प्रत्ययः । "ऋव्य-वास्त्व्य······" इत्यादौ अञि यणादेशो निपात्यते । वा छन्दसि इति पूर्वसवर्णदीर्घत्वम् ।" [सायणः–१. ९०. ६]

"माध्वीः । मध्वेव माध्वम् । स्वार्थिकस्तद्धितः छान्दसत्वात् । तद्वत्यो माध्व्यः । ईकारप्रत्ययो मत्वर्थे । "ईवनिपौ छन्दसि" (तु. पा. वा. ५. २. १०९) इति । मधुरत्वा इत्यर्थः ।" [स्कन्दः १. ९०. ६]

"ऋव्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि छन्दसि" [पा. सू. ६. ४. १७५] ।

"मधुशब्दस्य अञि स्त्रियां यणादेशो निपात्यते" "माध्वीर्नः सन्त्वोषधीः" [१. ९०. ६] [महीधरः] ।

१—तु. कथप्रिये । [१. ३०. २०] स्तुतिप्रिये उषः ! । कथप्रियः । [१. ३८. १; ८. ७. ३१] बहुवचनम् स्तुतिप्रीता मरुतः ।

३. इन्द्रनासत्या। सकृच्छ्रूयते। अश्विनोः स्तोत्रम्।[1] [८. २६. ८] इन्द्राश्विनौ।

४. ऋतप्सू। सकृद् विशेषणं। [१. १८०. ३] सत्यस्वरूपौ। यज्ञिय-हविर्भिर्भक्षयितारौ।

५. आशुहेषसा। सकृदेव। [८. १०. २] शीघ्रास्वौ। यद्वा हेषृ शब्दे। शीघ्रं सर्वत्र शब्द्यमानौ स्तूयमानौ।

६. गम्भीरचेतसा। सकृदेव। [८. ८. २] प्रशस्तज्ञानौ।

७. दीद्यग्नी। द्विः श्रूयते। [१. १५. ११] द्योतमानाहवनीयाद्यग्नियुक्तौ। [८. ५७. २] (वालखिल्ये) दीदिरतिशयेन दीप्यमानः अग्निः जठराग्नी ययोस्तौ तादृशौ।

८. पुरुभोजसा। सकृदेव [८. २२. १६]। बहून् भोक्तारौ रक्षकौ। यद्वा बहून् स्तोतॄन् धनादिभिर्भोजयन्तौ।

९. मधुपातमा। सकृदेव [८. २२. १७]। अतिशयेन मधोः सोमस्य पातारौ।

१०. मधूयुवा। द्विः श्रूयते [५. ७३. ८] मधुरस्य सोमादेर्मिश्रयितारौ। [५. ७४. ९] मधुमन्तौ।

११. नृतू। द्विवचनान्तं सकृदेव श्रूयते [६. ६३. ५] नृत्यन्तौ अश्विनौ।

१२. न्ययाना। सकृदश्विनोः संबद्धः [६. ६२. ७] गच्छन्तौ।

१३. प्रातर्युजा। द्विवचनान्तं सकृदेव [१. २२. १] प्रातःसवनग्रहणे संयुक्तावश्विनौ। प्रातर्युज्यते गृह्यमाणेन ग्रहेण सहेति प्रातर्युजा।[2]

१४. यामहूतमा। द्विः श्रूयते। [५. ७३. ९] गमनार्थं भृशमाह्वातव्यौ। [८. ७३. ६] अतिशयेन काले ह्वातव्यौ।

१५. वत्सप्रचेतसा। सकृदेव [८. ८. ७] वत्से स्तोतरि प्रकृष्टज्ञानौ। यद्वा वत्सं निवासकं वेदितव्यं वा प्रकृष्टं चेतो ज्ञानं ययोस्तौ।

१६. विप्रवाहसा। सकृदेव [५. ७४. ७] विप्रैर्मेधाविभिर्वहनीयौ।

१—इन्द्रनासत्या। [८. २६. ८] तु. "यदिन्द्रेण सरथं याथो अश्विना।" [८. ९. १२] हे अश्विनौ! इन्द्रेण सह समानम् एकं रथमास्थाय यदि गच्छथः।

२—प्रातर्युक्। सकृदश्विनोः रथस्य विशेषणम्। प्रातर्युजं नासत्याधि तिष्ठथः [१०. ४१. २]। प्रातः उषःकालेऽश्वैरागमनो योजकं रथम्। [उद्गीथः]।

१७. विश्पलावसू । सकृदेव । [१. १८२. १] विशां प्रजानामस्माकं पालयितृधनौ । विश्पलाख्यायाश्छिन्नजङ्घायाः हिरण्मयजङ्घाप्रदानेन तथाभूतौ ।

१८. विश्वगूर्ती । स्त्रीयं सकृत् । [१. १८०. २] सर्वस्तुत्यौ । सर्वदा उद्गूर्णौ वा ।

१९. वीळुपाणी[1] । द्विवचनान्तं सकृद् । [७. ७३. ४] दृढपाणी ।

२०. वह्नी । द्विवचनान्तं सकृत् । [७. ७३. ४] हविषां वोढारौ ।

२१. शचीपती । द्विवचनान्तं सकृदश्विनोर्विशेषणम् । [७. ६७. ५] शचीति कर्मनाम कर्मणां पालकौ ।

२२. शुभ्रयावाना । [८. २६. १९] स्त्रीयं, सकृत् । शोभनशीलगमनवन्तौ ।

२३. सचनस्तमा । स्त्रीयं, सकृत् । [८. २६. ८] अतिशयेन सर्वैः समवेतव्यौ सेव्यमानौ वा ।

२४. सिन्धुवाहसा । स्त्रीयं, सकृत् । [५ ७५ २] नदीनां प्रवाहयितारौ वृष्टिप्रेरणेन ।

२५. सूर्यावसू । स्त्रीयं, सकृत् । [७. ६८. ३] सूर्यया सह रथे वसन्तौ ।

२६. पुष्करस्रजौ । स्त्रीयं, सकृत् [१०. १८४. २] ।

२७. भुजी । सकृदेव[2] [८. ८. २] ।

अन्येऽपि शब्दाः, यथा अवद्यगोहना, पुरुश्चन्द्रा, अजरौ, शतक्रतू, अनपच्युता, विश्ववारा, स्वर्विदा, सध्रीचीना, वृषणा, मघवाना, नवेदसा, अरिप्रा इत्यादीनि विशेषणानि, अश्विनोर्गुणं वा कर्म वा, कालं वा क्षेमं वा, दानं वा ऊतिं वा, प्राप्तिं वा गतिं वा, मधुपानं वा मधुधारणं वा, भेषजं वा वीर्यं वा बोधयन्ति ॥

—:०:—

१—वीळुपाणिः । सकृदग्नेर्विशेषणाम् । [७. १. १४] वाजी अग्निः दृढहस्तः । वह्नी……वीळुपाणी । [७. ७३. ४] 'वह्नाऽयमर्थश्चौऽश्वपरतया व्याख्येयः । तथा सति तौ रथस्य वोढारौ दृढपादौ अश्विनोरश्वौ ।" (सायणः) । तु. वीळुपत्मभिः आशुहेमभिः [१. ११६. २] । बलवत्पतनैः शीघ्रगमनैः (अश्वैः) [सायणः] ।

२—आ नूनं यातम् अश्विना रथेन सूर्यत्वचा ।
भुजी हिरण्यपेशसा कवी गम्भीरचेतसा ॥ [८. ८. २]

"हे भुजी ! हविषां भोक्तारौ, यद्वा स्तोतृभिः अन्नानां भोजयितारौ, सर्वस्य जगतः पालकौ वा ।" [सायणः] ।

तृतीयोऽध्यायः

अश्विनोः प्रभवः कालः क्षेत्रं च

१—अश्विनोः प्रभवः ।

सिन्धुमातरौ अश्विनौ । या दस्रा सिन्धुमातरा [१. ४६. २]। सिन्धुः माता तयोः । समुद्रमातृकौ इति सायणः ।[1]

उताश्विनावभरद् यत् तद् आसीद् अजहादु द्वा मिथुना सरण्यूः । १० १७.२ ।

विवस्वतः पुत्रौ—

यदा सरण्यूर्विवस्वतो जाया मर्त्येभ्योऽपह्नुता अश्वाभूता सती अश्वभूताद् विवस्वतः संगत्य अश्विनौ सुषुवे, तदानीं सरण्यूः द्वौ मिथुना यमभूतौ अहोरात्रौ वा अजहात् । एवम् अश्विनौ यदा जातौ तदानीमहोरात्रौ पृथग्भूतौ [१०. १७. १–२]। विवस्वतो जायमानत्वादेव तौ "दिव आजातौ" "दिव्यौ" [४. ४३. ३] च । तमो निरस्य ज्योतिष उद्गमनेन [१. ४६. ६; ४७. ७; ९; ११७. २१] तौ "स्वर्विदौ" [८. ८. ७] "दिवो नपातौ" [१. ११७. १२; १८२. १; ४. ४४. २] च ।

१—सिन्धुमातरा । समुद्रमातृकौ । यद्यपि सूर्याचन्द्रमसावेव समुद्रजौ तथाप्यश्विनोः केषांचिन्मते तद्रूपत्वात् तथात्वम् । [सायणः] । समुद्रमातृकौ [मुद्गलः] । सिन्धवो नद्यस्तासां वृष्टिद्वारेण मातरौ निर्मातारौ [स्कन्दः] । नदीनां निर्मातारौ [वे.मा.] । सिन्धुमातरा [१. ७१. २] समुद्रमातृकौ । सिन्धुमाता [७. ३६. ६] अपां मातृभूता सरस्वती । सिन्धुमातरम् [९. ६१. ७] यस्य सोमस्य सिन्धवो मातरो नद्यो भवन्ति । सिन्धुमातरः [१०. ७८. ६) नदीनिर्मातारः । सिन्धुपती (७. ६७. ९) नद्याः पालयितारौ । सिन्धुमातरौ अश्विनौ सिन्धुवाहसौ च । "सिन्धुवाहसा" (५. ७५. २) नदीनां प्रवाहयितारौ । अत्र सर्वत्र आद्युदात्त एव श्रूयते । सायणः क्वचिद् बहुव्रीहिणा विगृह्णाति क्वचित् तत्पुरुषेण । परन्तु सकृदेव सिन्धुशब्देन समुद्रं बोधते । "जगता सिन्धुं दिव्यस्तभायत्" (१. १६४. २५) । सिन्धुम् । स्यन्दनशीलम् उदकस्य स्यन्दकं वा आदित्यम् । (सायणः) । सिन्धुः । स्यन्दनशीलोदकाभिमानिनी

एवं दिव आजातौ अश्विनौ विवस्वतः सूर्यात्प्रभवतः। सिन्धुमातरा [१. ४६. २] इत्यत्र सिन्धुशब्देन स्यन्दमानः सूर्यो बोद्धव्यः, अन्यत्र [१.१६४. २५] सायणः सिन्धुशब्देन आदित्यं बोधते। अश्विनौ "इहेह जाता" [१. १८१. ४] "नाना जातौ" [५. ७३. ४] इत्यपि श्रूयेते। व्यश्नुवानावश्विनौ सर्वं विश्वं व्याप्नुतः। अत एव तौ "विश्वा" [५.७३.४] व्यासावपि। तत्र तयोरुभ-यात्मकत्वात् तयोः कर्मपृथक्त्वं प्रकल्प्य "इह" मध्यमस्थानेऽन्तरिक्षे, "इह" उत्तमस्थाने दिवि तयोर्जन्म प्रकल्प्यते [निरु. १२. ३]। तत्र प्रतीककल्पेण, रूपकेण वा तयो रूपं सूर्याचन्द्रमसौ केचन मन्यन्ते [निरु. १२. १]।

अश्वरूपाभ्यां जातावश्विनौ "तपुषो बुध्ने" दिवसस्य मूले तमसो हन्तारौ भूत्वा जायमानानि वपूंषि शरीराणि मिथुनौ सन्तौ संगच्छतः। उषःकाले तयोरेको वायुरूपेण जिह्वाया अग्रम् आतिष्ठति।

यमा चिदत्र यमसूरसूत जिह्वाया अग्रं पतदा ह्यस्थात्।[1]
वपूंषि जाता मिथुना सचेते तमोहना तपुषो बुध्न एता॥ ३. ३९.३।

"यमसूः यमौ सूते। उषोभिमानिनी देवता। सा उषःकालेऽश्विनावसूत। तपुषः। तपति अस्मिन् सूर्यं इति तपुः दिवसः।" [सायणः]। रौद्रौ [१०. ६१. १५] इति रुद्रपुत्रत्वम् अश्विनोः श्रूयते। मध्वरात्रादश्विनोः प्रवृत्तः [निरु. १२. १] पृथिव्याः अपरस्मात् पार्श्वात्, उदयार्थम्, अग्रे सरन् तमांसि रोदयन् (सूर्यः) रुद्र इत्युच्यते। स रुद्रः स्वं रेतः तेजः तमसि सिञ्चति येनाश्विनौ जायेते। तथा च मन्त्रवर्णाः—

स इद् दानाय दभ्याय वन्वञ्च्यवानः सूदैरमिमीत वेदिम्।
तूर्वयाणो गूर्तवचस्तमः क्षोदो न रेत इत ऊति सिञ्चत्॥ १०. ६१.२।

"स (रुद्रः) स्तोतॄणां दानाय, शत्रूणां दम्भाय (वधाय), संभजन् सूदैः हिंसकैः शस्त्रैः च्यवानः रक्षांसि च्यावयन् वेदिं परिमितवान्। स तूर्णगमनः,

---

देवता। [सायणः–१. ११५. ६]। सिन्धुः स्यन्दनात् [निरु. ९. २६] सिन्धुः स्रवणात् [निरु. ५. २७]। स्यन्देः संप्रसारणं धश्च [उण्. ११] इति स्यन्दतेः उः प्रत्ययः, दकारस्य धकारादेशः, यकारस्य सम्प्रसारणं च। सिन्धुः।

१—वेङ्कटमाधवोऽत्र (३. ३९. ३) विकल्पान् प्रदर्शयति।
१. यमसूः अदितिः। यमौ इन्द्रो विवस्वांश्च।
२. यमसूः बुद्धिः। यमौ वाक् च मनश्च।
३. "केचिद् इन्द्रावरुणयोः स्तुतिमेतां मन्यन्ते।"

अत्यन्तम् उद्यतवन्तः क्षोदो न, उदकमिव, रेतः उत्पादनसामर्थ्योपेतम् इतऊति सिञ्चत्। जनयामास अश्विनौ। अन्यत्र इतऊतीत्यश्विनोरभिधानात्,[1] अन्यत्र तयो रुद्रपुत्रत्वप्रसिद्धेश्चायम् अर्थो लभ्यते।" [सायणः]।

अग्रे चतुर्थ्यामृचि अश्विनोरेवागमनं प्रार्थ्यते। कृष्णा यद् गोष्वरुणीषु सीदद् दिवो नपाताश्विना हुवे वाम्। १०. ६१. ४।

२—अश्विनोः कालः क्षेत्रं च।

अश्विनौ ऋतुना सह यज्ञं वहतः (१. १५. ११)। प्रातरारभ्य यज्ञस्य प्रवर्तनात् प्रातरर्थं सूर्यस्य उद्गमनस्य ताभ्यां साध्यमानत्वात्, तयोरधि यज्ञाः प्रभवन्ति। सूर्योद्गमने तयोर्व्यापारात् सूर्योदयात्प्रागेव तयोः शस्त्रं शस्यते। एवं यस्मिन् काले इतरदेवानां स्तोतारो न सन्ति तस्मिन्नपि कालेऽश्विनोः स्तोतारो भवन्ति। तस्मिन्, रात्रेरन्तिमे भागे, ज्योतिर्वर्धयन्तौ अश्विनौ सोमसंबन्धि मधु पिबतः। रात्रौ अस्तं गतः पुनरुदीयमानः सूर्यः सोम इत्युच्यते। तस्यैव उदयस्थले सूयमानत्वात्। तस्य सोमस्य तमसि भासमानं ज्योतिः मधु इत्युच्यते। सोमसम्बन्धेन तन्मधु सोम्यं भवति। अश्विभ्यां मधुसेकाद् (मधुपानाद्) ऊर्ध्वमेव सोमोऽभिषूयते। एवं तन्मधु सोममर्हतीति सोम्यं भवति। सोमशब्दात् "सोममर्हति यः" [पा. ४. ४. १३७][2] इति यप्रत्यये सोम्यम् इति रूपम्। तत्सोम्यं मधु अश्विनौ स्वधाभिः पिबतः। सूर्योदयात् प्राग् अश्विनौ स्वधाभिरेव सोमं पिबतः, स्वधाभिरेव रथमातिष्ठतः।

स्वधाभिर्या पिबतः सोम्यं मधु ८. १०. ४
स्वधाभिरधितिष्ठथो रथम् ८. १०. ६

उदयस्थले सूर्योदयात् चिरात् प्राक् प्रक्रमेते अश्विनौ। तयोः कालः ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम् [निरु. १२. १] इति यास्कः। एवं तयोराह्वानकालः तदा भवति यदा रात्रिररुणवर्णासु गोषु निवसति, यदा उषा विमानाय रथमातिष्ठति [१०. ६१. ४]।

सूर्यस्य स्वयं प्रकाशमानत्वात्, तस्य कदापि तमसि लीनत्वाभावात्, तस्य स्वभावतोऽस्तोदयाप्रसक्तेः, भूमिष्ठानां दृष्ट्या सूर्यस्य गतिरनुमीयते, नौस्थस्य तीरगतिरिव। आदित्यस्य गतिविषये शतपथब्राह्मणे प्रतिपाद्यते, "वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवो देवेषु तर्हि सो भवति देवांस्तर्ह्यभिगोपायति। शरद्धेमन्तः

१—द्र. "अधि यद् वर्प इत ऊति धत्थः।" (७. ६८. ६)

—सोममर्हति यः। मये च। [पा. ४. ४. १३७, १३८]।

शिशिरः इत्यासुरा ऋतवोऽसुरेष्वसावेतर्हि भवति असुरांस्तर्ह्यभिगोपायति ।''[1]

ऋतुत्रये देवेषु भवतीति वर्णनेन यत्र षाण्मासिकं दिनं मेरुशिखरे तत्स्थानं प्रतीयते । ''दिवा वै नोऽभूद् इति । तद्देवानां देवत्वम्'' ।

[तै. ब्रा. २. २. ९. ९]

पुरुषेण पृथिवीस्थेन यत्र स्थित्वा स्वमस्तकस्योपरि उपरिष्टात् ध्रुवनक्षत्रं दृश्यते तत्स्थानं देवलोकः, देवनिवासः । ध्रुव उत्तरस्मिन् पार्श्वे सर्वोच्चभागस्य देवनिवासत्वं तत्र षाण्मासिकदिनस्य प्रवर्तनात् । अस्य देवनिवासत्वात् सुमेरुत्वम् । यदात्र षण्मासान् प्रकाश्य सूर्योऽस्तं याति तदासौ दक्षिणे पार्श्वे सर्वाधो भागे उदेति, तदा तत्र षाण्मासिकं दिनं करोति । तस्य असुरनिवासत्वात् स कुमेरुरित्युच्यते । एवं देवयाने उत्तरायणे सूर्यः सुमेरौ प्रकाशते, पितृयाणे दक्षिणायने स कुमेरौ प्रकाशते ।

मेरुस्थले सूर्यस्य गतिः कुलालचक्रगतिवद् भवति । मेरुमधोऽधः समांशान् यावत् दिनरात्रिमानयोर्विषमता भवति । ततोऽधोऽहोरात्रमानम् एकदिनापेक्षया (षष्टिदण्डापेक्षया, चतुर्विंशतिहोरापेक्षया) अधिकं न भवति । यत्राहोरात्रमानम् एकदिनात्मकं भवति तत्र सूर्यस्य गतिः रथचक्रगतिवद् भवति । अनयोश्चक्रगत्योः अन्तरा, यत्राहोरात्रमानयोर्वैषम्यं भवति तत्र शुनःशेपवत् सूर्यस्य गतिर्भवति । एवम् उदयस्य त्रैविध्येन अश्विनौ अपि त्रिषु स्थानेषु भवतः । अतस्तयो रथः त्रिवृत्[2] इत्युच्यते । तत्रैकं स्थानं दीर्घः प्रसद्मा यत्र मेरौ भवति [यत्र यदा षड् मासान् सूर्यो न भवति] । द्वितीयं स्थानं दिवो रोचनः, यत्राहोरात्रयोर्वैषम्यं भवति । एतच्च मेरुम् अधोऽधः । तृतीयं स्थानं यत्र सूर्यस्य दैनंदिनगतिः, यत्राश्विनौ प्रत्यहं प्रातर्यावाणौ[3] भवतः, यत्र तौ प्रत्यहम् आवर्तेते ।

''आ वां नरा पुरुभुजा ववृत्यां दिवे दिवे चिद् अश्विना सखीयन्'' [५. ४९. १] ''हे अश्विनौ ! युवां प्रतिदिनमावर्तयामि अस्मद्अभिमुखं युवयोः सखित्वम् इच्छन् ।''

१—द्र. वे. वि- पृष्ठम् ९

''वसन्तो ग्रीष्मो वर्षास्ते देवा ऋतवः ।
शरद्धेमन्तः शिशिरस्ते पितरः (ऋतवः) ॥''

[श. ब्रा. २. १. ३. १]

२—आ नो अश्विना त्रिवृता रथेन । १. ३४. १२

त्रिवृता रथेन । ''अप्रतिहतगतित्वात् त्रिषु लोकेषु वर्तमानेन ।''

३—प्रातर्यावाणा'' २. ३९. २; ५. ७७. १.

त्रिस्थानविषयीणी ऋग्यथा—

यत् स्थो दीर्घप्रसद्मनि, यद् वादो रोचने दिवः ।

यद् वा समुद्रे अध्याकृते गृहेऽत आयातमश्विना ॥ ८. १०. १

यदन्तरिक्षे पतथः पुरुभुजा, यद् वेमे रोदसी अनु ।

यद् वा स्वधाभिरधितिष्ठथो रथम् अत आयातमश्विना । ८. १०. ६

८. १०. १. (१) दीर्घप्रसद्मनि । प्रसीदन्ति एषु देवा इति प्रसद्मानो यज्ञगृहाः । दीर्घा आयताः प्रसद्मानो यस्मिन् । तस्मिंल्लोके । इदानीं कुमेरौ सूर्यः । सुमेरौ उदयार्थं दीर्घो यज्ञोऽनुष्ठीयते ।

(२) अदो रोचने दिवः । अदोऽमुष्मिन् दिवः द्युलोकस्य संबन्धिनि रोचने रोचमाने स्थाने । इदं दिवोऽन्तरिक्षं, मेरुमध्यः सप्त अक्षान् यावत् ।

(३) समुद्रेऽध्याकृते गृहे । इदं यत्र षड्वित्रण्डात्मिका देनदिनगतिः ।

८. १०. ६	८. १०. १
१. स्वधाभिरधितिष्ठथो रथम्	दीर्घप्रसद्मनि ।
२. यदन्तरिक्षे पतथः	अदो रोचने दिवः
३. इमे रोदसी अनु	समुद्रेऽध्याकृते गृहे

प्रातर्युजौ ।

प्रातर्युज्यमानावश्विनौ सोमिनो गृहं गच्छतः [१. २२. १; ४] । "प्रातर्युजौ" तौ "प्रातर्यावाणौ" भवतः । प्रातर्युज्यमानत्वात् तौ प्रातरेव यज्ञं यातः [२. ३९. २] । प्रातरेवोभयोरश्विनोर्योगसंभवात् तयोः समानस्थानकालत्वाच्च तौ प्रातर्युजौ प्रातर्यावाणौ च । जन्मना कर्मणा च प्रातरेव तयोर्योगो युज्यते । विवस्वतः सूर्यस्य पुत्रौ तौ, द्युस्थानानां देवतानां प्रथमागामिनौ । प्रथमत्वमत्र कालावच्छिन्नम् ।

अश्विनोर्द्वैधीभावः सवितुः कालेन बोध्यते । "अधोरामः सावित्रः"[1] इति पशुसमाम्नाये विज्ञायते [निरु. १२. १३] । सवितुः काले ज्योतिरुपरि, तमश्चाधो भवति, प्रकाशोऽन्धकारम् अभिभवितुं प्रारभते । इतः प्राग्यदा ज्योतिस्तमसोः समत्वं भवति, स कालोऽश्विनोः । स प्रातः, ततः आरभ्य ज्योतिषः प्रादुर्भूयात् प्रकर्षेणाऽस्तनात् । एवं द्युस्थानानां देवतानां प्रथमागामितया ज्योतिष उद्गमनमश्विनोः मुख्यं कर्म ।

"सविता सर्वस्य प्रसविता"[2] [निरु. १०. ३१] । सवितुः प्राग् उषा

१—अधोरामौ आश्विनौ [वा. सं. २४. १] ।

२—हिरण्यपाणिम् ऊतये सवितारम् उपह्वये । स चेत्ता देवता पदम् ॥

अश्विनौ रथमारुह्य दिवि विराजति [१.३४.१०; ५.८१.२]।

ननु पिता पूर्वं पश्चात् पुत्र इति न्याये कथं नु अश्विनोः सूर्यात्प्रागागमनम् इति चेत्, अत्र द्वेधा समाधीयते—[1]

१. अश्विनोर्जन्म न प्रातर्भवति। प्रातस्तु द्यावापृथिव्योः संगमः। अश्विनौ न पृथिव्यां जातौ न वा दिवि जातौ। अपि तु यत्र द्यौरपि नास्ति पृथिवी अपि नास्ति तत्रान्तरिक्षे मध्यरात्रे तयोर्जन्म भवति। तौ "दिवो नपातौ" [१.११७.१२], "दिव आजातौ" [४.४३.३] इति श्रूयेते, न तु दिवि जातौ इति।

२. मध्यरात्रात् प्रागपि अस्तं गतः सूर्यः पृथिव्या अपरस्मिन् पार्श्वे प्रकाशते। मध्यरात्रतः पृथिवी सूर्याभिमुखा भवति, तदानीम् अश्विनोर्जन्म इति कृत्वा तयोः सूर्यपुत्रत्वेऽपि सूर्यात् प्राक् तयोरागमनम्। संहितायां तु सूर्यपुत्रत्वेन तौ न श्रूयेते।

अश्विनोर्विश्वमुत्पन्नस्य व्यादानभूतत्वात्, व्यादानात् परमेव सृष्टेः प्रक्रमात्, अथवा सृष्टस्य व्यात्तभूतत्वात्—विशेषेण आसमन्तात् स्थूलीकृतत्वात्—वि–आ–√दा–क्त व्यात्त—"अश्विनौ व्यात्तम्" [वा. सं. २१. २२]—व्यात्तस्य अश्विनोः रूपत्वात् ताभ्यां सूर्यस्योन्नयनं युक्तमेव। यथा आखण्डलः इन्द्र आसमन्तात् खण्डशः सूर्यं करोति, तथाऽश्विनौ विशेषेण आसमन्तात् रसज्योतिर्भ्यां सूर्यमाददाते इत्यतः तौ व्यात्तम्।

ऋतसत्ये।

"अश्विनौ यद् व्यश्नुवाते सर्वं, रसेनान्यो ज्योतिषान्यः।" [निरु. १२. १]। ऋतं सत्यं इति द्वे एव तत्त्वे ब्रह्मणस्तपसः पूर्वं जाते। तयोः परस्परव्याप्तिः, समानयोजनत्वं कर्तृभूतयोर्द्वयोः "अजायत" इत्येकवचनान्तेनाऽऽख्यातेन समुच्चयार्थकचद्वयेन चाधिगम्यते।

ऋतं च सत्यं चाभीद्धात्तपसोऽध्यजायत [१०. १९०. १]।

यद्गतेयमृक् तस्य सूक्तस्य देवता भाववृत्तम्। अर्थात् ये च भावाः समुत्पद्यन्ते तेषां सर्वेषां वृत्तं सूक्तरूपेण सूक्तेन प्रोच्यते। अस्य वृत्तस्य ज्ञानेन अघानां पापानां मर्षणं शोधनं भवति। एवमस्य सूक्तस्यर्षिः मधुच्छन्दसः पुत्रो माधुच्छन्द-

[१.२२.५] सविता देवतापदं (यजमानेन प्राप्यं स्थानं) चेत्ता ज्ञापयिता भवति।

१—द्र. "इतरेतरजन्मानो भवन्ति। इतरेतरप्रकृतयः।" [निरु. ७. ४]। तु. "अदितेर्दक्षो अजायत दक्षाद् वदितिः परि।" [१०. ७२. ४] दक्षात्। ॐ इति। अदितिः।

सोऽघमर्षणः । अस्य सूक्तस्य पर्यालोचने आदिभूते ऋतसत्ये एव विश्वप्रपञ्चं व्याप्ते भवतः । मूले (आदौ, कारणे) द्वयीभूताभ्याम् ऋतसत्याभ्यां प्रक्रान्तानि कार्यजातानि द्वयीभावमापन्नानि भवन्ति । तत्र सूक्ते—

१. ऋतं सत्यम्	४. अहानि रात्रयः
२. रात्री समुद्रः	५. सूर्यः चन्द्रमाः
३. अर्णवः संवत्सरः (समुद्रः)	६. द्यौः पृथिवी
	७. अन्तरिक्षं स्वः

इति सप्त द्वन्द्वानि "विश्वस्य मिषतो[1] वशी धाता यथापूर्वम् अकल्पयत्" [१०. १९०. १–३]

इत उत्तरं सूक्तं [१०. १९१] संहितायामन्तिमम् । उत्तरभूतेनानेन सूक्तेन द्वयीभूतस्य अनेकीभूतस्य सृष्टस्य प्रपञ्चजातस्य साम्मनस्यं, संवननं, संमिश्रणं प्रोच्यते ।

मानुषे लोके रोदस्यां त्रिलोक्याम् ऋतमहर्द्योतकं सत्यं च रात्रिद्योतकं अनयोर्ऋतसत्ययोर्यत्र संयोगो वियोगो वा तत्राश्विनोर्विद्यमानता स्यात् ऋतस्य स्थूलरूपं सूर्यस्य ज्योतिषि, एवं सत्यस्य स्थूलरूपं चन्द्रस्य रसे च दृश्यम् इति दृष्ट्या, एकोऽश्वी ज्योतिषाऽश्नुते, अन्योऽश्वी रसेनेति यास्कः । सूर्यस्य रश्मिना सुषुम्णेन यथा चन्द्रो दीप्यते,[2] तथा सूर्यस्य ज्योतिषैव भुवि सर्वं पदार्थजातं प्रकाश्यते इत्यतः सूर्योदये प्रातः द्यावापृथिव्योः पृथग्भावात्, तस्य पृथग्भावस्य व्याप्तरूपत्वात्, अश्विनोस्तस्मिन् प्रातःकाले आगमनं श्रूयते "प्रातर्युजौ" इति ।

प्रातर्युजौ अश्विनौ [१. २२. १] । तयो रथः प्रातर्युक् [१०. ४१. २] प्रातरश्विनावेव न स्तूयेते, उषर्बुधः प्रातर्यावाणोऽन्येऽपि देवाः स्तुतिभाजः श्रूयन्ते यथा—आ सीदन्तु बर्हिषि मित्रो अर्यमा प्रातर्यावाणो अध्वरम् [१. ४४. १३]

१—विश्वस्य मिषतो वशी [१०. १९०. २] "मिषतो निमेषादियुक्तस्य विश्वस्य सर्वस्य प्राणिजातस्य वशी स्वामी ।" द्रु. वृक्षं सं च वि चाचथः [५. ७८. ६] । "वृक्षं वृक्षविकारां पेटिकां सं चाचथः मम बीजस्य नाधमानस्य सहायप्रेप्सैः निर्गमार्थं संगच्छथः । वि चाचथः च विभक्तं कुरुथः ।"

२—"अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते ।"…"आदित्यतोऽस्य दीप्तिर्भवति ।" 'सुषुम्णः सूर्यरश्मिश्चन्द्रमा गन्धर्वः ।' [वा. सं. १८. ४०]" [निरु. २. ६] ।

पिबतु सोमं वरुणो धृतव्रतोऽश्विभ्यामुषसा सजूः [१. ४४. १४]।
प्रातर्यावभिरागतं देवेभिर्जेन्यावसू । इन्द्राग्नी सोमपीतये [८. ३८. ७]।
प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।
प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोमम् उत रुद्रं हुवेम [७. ४१. १]।

व्याप्तत्वेनाश्विनोः सर्वव्यापकत्वं तयोरश्विनाविति नाम्नः प्रवृत्तिनिमित्तम् । व्युत्पत्त्यापि स एवार्थः प्रतीयते । ऋतसत्ययोर्यदा रूपं स्वष्टा तष्टं तदा तद्रूपं दधती रूपवती ऋतसत्ये अश्वौ भवतः । अत एवाश्वाभिमानिनी देवता दधिक्रा[1] इति श्रूयते ।

दधिक्रां वः प्रथममश्विनोषसम् अग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिम् आदित्यान् द्यावापृथिवी अपः स्वः ॥७.४४.१
दधिक्राम् अश्वाभिमानिनीं देवताम् [सायणः] ।

अश्विनोर्व्याप्तेरतीन्द्रियत्वात्, स्वयं ज्योतिष उन्नेतृत्वात्, तयोरमूर्त्तत्वात् रूपिद्रव्येषु पृथिव्यप्तेजःसु तयोरगोचरत्वात् तयोर्लक्षणं न सुकरं स्यात् । तथापि यत्र यत्र व्याप्तिः, गतिः, पिण्डीभावः तत्र सर्वत्राश्विनोः सत्ताऽधिगम्यते । तथा च श्रुतिः—

युवं ह गर्भं जगतीषु धत्थो युवं विश्वेषु भुवनेष्वन्तः ।
युवमग्निं च वृषणावपश्च वनस्पतींरश्विनावैरयेथाम् ॥[१. १५७. ५]
यदिन्द्रेण सरथं याथो अश्विना, यद्वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद्वा विष्णोर्विक्रमणेषु तिष्ठथः ॥ [८.९.१२]

यज्ञे मधुसेकः ।

किं बहुना कदाप्यश्विनौ विना देवानां पानं न भवति ।

उता यातं संगवे प्रातरह्नो मध्यंदिन उदिता सूर्यस्य ।
दिवा नक्तम् अवसा शंतमेन नेदानीं पीतिरश्विना ततान ॥ [५. ७६. ३]।[2]

१—"अश्वः कस्मात्? अश्नुतेऽध्वानं, महाशनो भवतीति वा । तत्र दधिक्रा इत्येतत् दधत् क्रामतीति वा, दधत् क्रन्दतीति वा, दधद् आकारी भवतीति वा ।" [निरु. २. २७] । अशू व्याप्तौ [अश्नुते] इतिधातोः क्वन् प्रत्ययः अश्वः [उण्. १४९] ।

२—"तौ नासत्यौ अश्विनौ ऋतावृधौ ऋते देवाः तत्प्रपदे न सूते ।" [६६]
[ऋते विना देवाः इन्द्रादयः पदे स्थाने सोमयागादौ तद्देवसम्बन्धित्वेन प्रसिद्धं हविः न प्रसूते वचनव्यत्ययेन न प्राप्नुवन्ति ।]
[म. भा. आदि. अ. ३. ६६. निर्णयसागरः] ।

तत्रोत्तरार्धर्चस्य विवृतिः—"न केवलमुक्तेषु एव कालेषु किं तर्हि दिवा नक्तं सर्वदा शंतमेन सुखतमेनाऽवसा रक्षणेन हविषा वा निमित्तेन आ यातम् । किमर्थमागम्यते पूर्वमेवान्यैर्देवैः स्वीकृतत्वात्, नेत्याह । इदानीमपि पीतिः इतरदेवानां पानं न आततान न तनोति अश्विना अश्विनौ विहायेति शेषः ।" [सायणः] ।

समाने अहन् त्रिरवद्यगोहना, त्रिरद्य यज्ञं मधुना मिमिक्षतम् । [१.३४.३] ।

अत्रैकस्मिन्नहनि त्रिवारमनुष्ठानगतदोषाणां संवरणं, यज्ञे त्रिवारं मधुसेकश्च प्रोच्यते । "न सायमस्ति देवया अजुष्टम्' [५. ७७. २]। सायं हविः देवयाः देवगामि न भवति । देवा न स्वीकुर्वन्ति सायं हुतम् । अत्र आश्विन्याम् ऋचि सामान्यतो देवानामजोषणं श्रूयते । यद्यपि सवनत्रयं भवति सोमयागे तथापि प्रातःसवनं माध्यंदिनं सवनम् इव, तृतीयसवनम् कालयोगेन सायं सवनमिति नोच्यते,[1] अपराह्णे एव तस्य समापनात् । परन्तु अश्विनौ प्रातरेव यजनीयौ सायं हविर्देवजुष्टं न भवति इत्याश्विने सूक्ते [५. ७७. २] निषेधश्रुतेः, प्राप्तौ सत्यां निषेधात्, सायमश्विनोः प्राप्तिरनुमीयते ।

त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा [१. ३४. २] इति च श्रूयते ।

दिवा नक्तं माध्वी त्रासीथां नः [७. ७१. २] इत्यपि । अपि च अश्विनोर्व्यापारोऽह्नीव रात्रावपि भवति । यथा—

१. भुज्योस्तारणं तिस्रो रात्रीः त्रीणि अहानि च अतिव्रजद्भिः पतङ्गैः ।
२. देशान्तरगतस्य जाहुषस्यैकया रात्र्या स्वराष्ट्रे प्रापणम् ।
३. दश रात्रीर्नवाहानि अप्सु अवनद्धस्य श्नथितस्य (हिंसितस्य) रेभस्य उन्नयनम् । [१. ११६. ४; २०; २४]

एवमश्विनावहोरात्रं प्रवर्तमानौ भवतः ।

१—माध्यन्दिनसवनसमाप्त्यनन्तरं किंचिद्विरम्य सवनमिदमारभेरन् । अस्य तृतीयसवनम् इत्येव संज्ञा, न तु सायंसवनमिति । [यज्ञतत्त्वप्रकाशः— पृष्ठ ७८] तत्र टिप्पणी—गायत्री द्युलोकात् भूलोकं प्रति सोमलतामाहरत् । आनयनसमये सा सोमं त्रिधा विभज्य, द्वाभ्यां पद्भ्यां द्वौ भागौ भागमेकं मुखेन च गृहीत्वा आनीतवती मध्यभागं मुखस्थलतायाः रसमचूषत् । तेन स नीरसस्सञ्जातः । अत एव अद्यापि तृतीयसवने गृहीतरसश्शुष्क एव सोम उपयुज्यते इति कथा ।

see तै. सं. ६.१.६.४; ऐत. ब्रा. ५.२.१३. २—३; शत. ब्रा. ३. ९.३.१.
[यज्ञतत्त्वप्रकाशः पृष्ठ ७८—७९. श्रीचिन्नस्वामिशास्त्रिणः । १९५३]

रात्रेः विभागाः।

सूर्यो यदा पृथिव्या एकस्मिन् पार्श्वेऽस्तमेति तदासौ अपरस्मिन् पार्श्वे उदेति। तत्र विषुवद् वृत्ते उदयात् पूर्वं घटीपञ्चकं सावित्रः कालः प्रकृष्टप्रकाशः। सावित्रकालतः पूर्वं पञ्च घट्यः उषःकालः, पूर्वसावित्रापेक्षया स्वल्पप्रकाशः। उषःकालतः पूर्ववर्ती दिनान्तराभिप्रायो रात्र्या भागोऽप्यल्पप्रकाशः। सुमेरुस्थले तु सावित्रः काल एकमासावधिः। उषःकालोऽपि तावान्। पूर्ववर्ती रात्रिकालोऽपि दिनान्तरसंबन्धाभिप्रायस्तावानेव।

यथोदयात् प्रागेवमस्तोत्तरमपि प्रविभागः। अस्तसविधवर्ती सावित्रः कालः (पञ्चघट्यात्मकः, मासात्मकः)। ततः पश्चादुपस्यः कालः (तावानेव)। ततः पश्चाद्वर्ती पूर्वदिनसम्बन्धाभिप्रायो रात्रिकालः तावानेव। [द्र. वे. वि. पृष्ठ २३]

इयं वेदिः परो अन्तः पृथिव्याः [१.१६४.३५] इति श्रुत्या पृथिव्याः परोन्तः, अर्थात् यत्र सूर्योऽस्तं याति स देशो वेदेः प्रारम्भः। वेद्याः वामश्रोण्यां होतुः स्थानं, वामांसेऽध्वर्योः स्थानम्। इदमध्वर्योः स्थानं पूर्वस्यां, वेद्यन्तभागे। एवं वेदिप्रारम्भे पश्चिमायां होता, वेद्यन्ते पूर्वस्याम अध्वर्युः।

"तत्र होत्रध्वर्युभ्यामादित्यस्य गत्यनुकारः कर्मणा मन्त्रेण च क्रियते प्रतिपाद्यते। तत्र होत्रा प्रयुज्यमानो मन्त्रो दर्शपूर्णमासयागे आश्वलायनेन श्रौतसूत्रे दर्शितः। "पश्चिमाध्वर्यो नवतिश्च पाथा अग्निं होतारमन्तरा विवृत्ताः। सिनन्ति पाकम् अतिधीर एति इति।" [आ. श्रौ. सू. १. ३]। अनेन मन्त्रेण स्वस्थानतो होतोत्थाय 'ऋतस्य पन्थामन्वेमि होता" [आ. श्रौ. सू. १.३.] इत्यभिव्याहृत्याध्वर्युमन्वारभेतेति।"

"अथादित्यं स्वस्थानं प्राप्तमनुकुर्वन्नसौ होता स्वस्थानमुपर्युक्तमन्त्रेण प्रतिपाद्य ततः स्वस्यादित्यरूपत्वं मत्वादित्यवाक्यत्वेन ब्रवीति "ऋतस्य पन्थामन्वेमि होता" इति मन्त्रम्। ऋतस्य यज्ञस्य पन्था पन्थानमनु अनुसृत्यैमि गच्छामि होता होतृरूप इत्यर्थस्तस्य मन्त्रस्य। तं मन्त्रम् उच्चार्य तत्स्थानतोऽध्वर्युस्थानं करेण स्प्रष्टुमिच्छन्नसौ होता स्वस्य तावद्दूरपर्यन्तं करस्य लम्बमानत्वाभावेन किञ्चिदग्रतो गत्वा करस्पर्शयोग्यं स्थानमादित्यमनुकुर्वंस्तत्स्थानतोऽध्वर्युमंसेऽन्वारभते स्पृशति पाणिना। पाणिश्च यथाध्वर्योः पार्श्वं स्पृशेदेवम्। तथा सति अध्वर्युस्पर्शनेनोभाभ्यां होत्रध्वर्युभ्यां मन्त्रः प्रोच्यते इति तत्र सूत्रे प्रतिपादितम्।"

[वे. वि. पृष्ठ. ५४–५५]

अत्र अग्निं होतारमन्तरा पश्चिच्च नवतिश्च पाथाः ६० + ९० = १५०।
"आदित्यो वा अस्तं यन्नग्निम् अनु प्रविशति" [शत. ब्रा. ३. ५. ७. ५],[1]

1—द्र. वे. वि. पृष्ठ ९.

अग्नेर्वा एष प्रातरुदेति[1] [ऐ. ब्रा. १. ३. २.] इति श्रुत्या आदित्यस्याकाशादार-स्योदयपर्यन्तमग्नेः सत्त्वं भवति । अस्तस्थलीयोऽग्निः वेदेः पश्चिमायां गार्हपत्यः । अस्माद् अस्तस्थलीयाद् गार्हपत्याद् होतृस्थानं यावद् आदित्यस्य गमने पञ्चशंव-तिश्च (१५०) पाशाः छिन्नाः भवन्ति । एवम् अस्तस्थलात् पञ्चाशदधिकशतं पाशानतीत्य होतुः स्थानं भवति यत्र, तत आरभ्य सावित्रः कालः प्रवर्तते ।

वेदे पाशा वरुणस्य प्रसिद्धाः [१. २४. १३; १५] । अस्तं गत आदित्य एव वरुणः । इमे पाशा रात्रिकालिकाः ।

या वो माया अभिद्रुहे यजत्राः पाशा आदित्या रिपवे विचृत्ताः ।
अश्वीव ताँ अति येषं रथेनारिष्टा उरावा शर्मन्त्स्याम ॥ [२. २७. १६]

"हे यष्टव्या आदित्याः ! युष्माकं या माया अभितो द्रोहं कुर्वते राक्षसादये निर्मिताः, ये च पाशाः शत्रवे विचृत्ताः प्रसारिताः, तान् पाशान् मायाश्च रथेना-तितरेयम् । तत्र दृष्टान्तः । अश्वीव । यथा शोभनाश्वः कश्चित् पुरुषः दुस्तरान् मार्गान् शीघ्रमतिक्रामति तद्वत् । तथा वयम् अरिष्टाः शत्रुभिरहिंसिताः सन्त उरौ विस्तीर्णे शर्मन् शर्म इति गृहनाम । त्वया दत्ते सुखे गृहे वा आसमन्तात् स्याम ।"
[सायणः]

बद्धानां पाशानामेकैकशश्छेदनं कृत्वाऽसावादित्योऽस्तो गच्छति । आदित्यस्य वृत्ताकारे परिभ्रमे सांवत्सरिके षष्ट्यधिका त्रिशती दिनानां भवति, दैनंदिनस्यास्य वृत्ते तावन्तः (३६०) अंशाः भवन्ति । तत्र सुमेरौ अस्तात् पुनरुदयं यावत् षड् मासाः, १८० दिनानि भवन्ति, दैनंदिनवृत्तिस्थके रात्रौ १८० अंशा भवन्ति ।

"अंशानामुपाधितया स्वीकारं कृत्वा तावन्तः पाशाश्छिन्ना इत्युक्तम् । तावता-मंशानां तेनातिक्रमः कृत इति । तावतासौ होतृस्थानं प्राप्तः । यतो मन्त्र उक्तमग्निं होतारमन्तरा[2] च्छेदस्तावतां पाशानामिति । एवं च होतृस्थानतो राज्यवसान-पर्यन्तं राज्यर्धानां वृत्तगतानामंशानां मध्ये त्रिंशदेवा (३०) अतिक्रान्तव्या अव-शिष्यन्ते । राज्यवसानस्थानमध्वर्योः । होतृस्थानं गतस्यादित्यस्य किरणा अध्वर्यु-स्थानं स्पृशन्ति इति ।" [वे. वि. पृष्ठ ५५-५६] ।

१—आदित्यो वा अस्तं यन्नग्निम् अनुप्रविशति ।"
"अग्नेर्वा आदित्यो जायते ।" [ऐ. ब्रा. ४०.५]

२—अग्निम् ईळे पुरोहितं, यज्ञस्य देवम् ऋत्विजम् । होतारं रत्नधातमम् ॥
[१. १. १]

"षष्टिश्च अध्वर्यो नवतिश्च पादाः, अग्निं होतारम् अन्तरा विवृत्ताः।" [आ. श्रौ. सू. १।३]

		रात्रिः						
		षट्काः ३० अहानि (रात्रयः) १८० अंशाः १८०°						
		९०			६०		३०	
		नवतिः			षष्टिः			
	अस्तम्	अग्निः	उषाः	अश्विनौ	अश्विनौ	उषाः	सविता	उदयः
कुमेरुः (अवाची)	रात्रयः	३०	३०	३०	३०	३०	३०	सुमेरुः (उदीची)
प्रतीची	अंशाः	३०°	३०°	३०°	३०°	३०°	३०°	प्राची
प्रतीची	षट्काः	५	५	५	५	५	५	प्राची
सायम्	गार्हपत्यः अग्निः ●			दीर्घं	तमः	होता[1] सविता।	□ →	● प्रातः अध्वर्युः
	होता							
		९० + ६० = १५० पादाः						

१. आवहनीयः अग्निः।
→ होतुः करः [किरणाः]

अश्विनोः व्यापारः

यदा सुमेरौ सूर्य उदेति तदा कुमेरौ यत्र सूर्योऽस्तं गतः, तत्र द्वौ मासौ सोप्यतेजसा तमो निरुध्य, पश्चाद् मासद्वयं यावत् प्रवृद्धं तमोऽश्विनौ वाययतः।

"ता ह त्यद् वर्तिर्यदरध्रमुग्रेत्था धिय ऊहथुः शश्वदश्वैः।
मनोजवेभिरिषिरैः शयध्यै परि व्यथिर्दाशुषो मर्त्यस्य॥" ६. ६२. ३

'तौ खलु उग्रौ अश्विनौ यद् अरध्रमसमृद्धं, त्यद् वर्तिः यजमानस्य तद् गृहं समर्धयितुं गच्छथः। किंच इत्थं धियः स्तोतॄन् इषिरैः एषणीयैः काम्यैर्मनोवेगैः श्वैः स्थौरैरश्वैः सर्वथा स्वर्गं प्रापयथः। मर्त्यस्य मनुष्यस्य दाशुषो यजमानस्य व्यथिः हिंसकः परिशयध्यै परिशयनाय दीर्घनिद्रायै युवाभ्यां क्रियताम्।" [सायणः]

पश्चादनन्तरैः (अनिरुद्धैः) वर्तिष्मता भूमता रथेन गत्वा तिरोहितेन क्रोधेन तस्य नमनः शीर्षाणि अश्विनौ वृक्णः।

"अरन्रैश्चक्रैस्तनयाय वर्तिर्द्युमता यातं नृवता रथेन।
सनुत्येन त्यजसा मर्त्यस्य वनुष्यताम् अपि शीर्षा ववृक्तम्॥" ६. ६२. १०

सनुत्येन त्यजसा तिरोहितेन क्रोधेन । वनुष्यताम् बाधमानानाम् ।

अश्विनौ पुनस्तत्र पर्याप्तं गत्वा, तत्र अन्धः (सोमं) पीत्वा, तद् गृहं तथा रक्षतः, येन संनिकृष्टो विप्रकृष्टो वा शत्रुर्न हिंस्यात् ।

"अरं मे गन्तं हवनायास्मै गृणाना यथा पिबाथो अन्धः ।
परि ह त्यद् वर्तिर्याथो रिषो न यत्परो नान्तरस्तुतुर्यात् ॥" ६. ६३. २
गृणाना स्तूयमानौ । अन्धः सोमम् । रिषः हिंसकात् ॥

अश्विनोः रथे उषसः आरोहणम् ।

उषा अश्विनोः रथं यदाऽऽरोहति तदा अश्विनोरागमनं प्रतीतं भवति [१. ४६. १] । कृष्णा (रात्रिः) यदा अरुणवर्णासु गोषु उषःकालिकप्रकाशेषु सीदति, निवसति, रूपं धत्ते, तदाश्विनोराह्वानकालः । तदा दिवं रक्षन्तावश्विनौ यज्ञे हविर्ग्रहणाय मधुसेकाय चाऽऽहूयेते । तौ वज्वरीरिषः [१. ३. १] कामयमानौ, द्रोहमस्मरन्तौ यज्ञमागच्छतः [१०. ६१. ४] ।

अश्विनोरागमने तमसि लीनाः पदार्था दिव्येन ज्योतिषा प्रकाश्यन्ते येन सर्वमभीष्टं पुरुषः साधयेत् । अत एवाश्विनोः रथे प्राप्ते कक्षीवान् दीर्घतमसः पुत्रः भूरि यशः कामयते । "तेनाहं भूरि चाकन ।" [१. १२०. १०]

अश्विनो रथं यथोषाः प्रातरारोहति एवं सायमपि । अश्विनो रथमारोहन्ती उषाः उषःसंज्ञया न श्रूयते, अपितु दुहितृशब्देन । इयं दुहिताऽपि द्वेधा प्रभवति । एका सूर्यस्य दुहिता, अन्या दिवो दुहिता । दिवो दुहिता प्रातःकालिकी, सूर्यस्य दुहिता सायंतनी । सति पितरि दुहितृत्वम् इति कृत्वा सूर्यस्य दुहिता सायंतनी, या सूर्येऽस्तं गते सायं प्रकाशते ।

दिवो दुहिता सूर्यस्य दुहितुः भिन्ना ।

संहितायाम् आश्विनमन्त्रेषु दुहितुरिदं द्वैधात्वं स्पष्टं प्रतीयते । तथाहि—
सूर्यस्य दुहिता ।

१. त्रिष्ठं वां सूरे दुहिताऽरुहद् रथम् [१. ३४. ५] ।
२. आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठत् [१. ११६. १७]
३. युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत [१. ११७. १३] ।
४. आ वां रथं युवतिस्तिष्ठदत्र जुष्ट्वी नरा दुहिता सूर्यस्य [१. ११८. ५] ।
५. रथं कमाहुर्द्रवदश्वमाशुं यं सूर्यस्य दुहितावृणीत [४. ४३. २] ।
६. अधि श्रिये दुहिता सूर्यस्य रथं तस्थौ पुरुभुजा शतोतिम् [६. ६३. ५] ।
७. युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् [७. ६९. ४] ।
श्रियं श्रयत इति श्रीः रथः—[सायणः]

दिवो दुहिता

१. दिवो दुहित्रोषसा सचेथे [१. १८३. २]।

२. अचेति केतुरुषसः पुरस्तात् श्रिये दिवो दुहितुर्जायमानः [७. ६७. २]।

३. यस्य (रथस्य) योगे दुहिता जायते दिवः [१०. ३९. १२[1]]।

संहितायाम् आश्विनसूक्तेषु आदौ "सूरे दुहिता" [१. ३४. ५] अन्ते "दिवो दुहिता" [१०. ३९. १२]।

"दिवो दुहिता" त्रिः श्रूयते, तत्र द्विः सा उषाः [१. १८३. २; ७. ६७. २]। तृतीया "दिवो दुहिता" अन्तिमा, दशमे मण्डले [१०. ३९. १२]। ऋभुभिस्तष्टोऽश्विनोः योऽनश्वो रथः [४. ३६. १], तस्य योगे इयं जायते, येन विवस्वतः उभे अहनी सुदिने भवतः।

आ तेन यातं मनसो जवीयसा रथं यं वाम् ऋभवश्चक्रुरश्विना।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः॥ [१०.३९.१२]
अहनी अहोरात्रे सुदिने शोभने जायेते।

रात्रिरप्यत्र अहःशब्देन श्रूयते—"अहश्च कृष्णमहरर्जुनं च" [६. ९. १]।
आहरति पुरुषोऽस्मिन् कर्माणि इत्यहः।……तमसा कृष्णवर्णा रात्रिः।…
सौरेण तेजसा शुक्लवर्णम् अहः। [सायणः]

अथ [१०. ३९. १२] उभयोरह्नोः सुदिनत्वं प्रोच्यते। अश्विनोः अश्वौ, अज्ञानप्रकाशने रजोज्योतिषी, तेजस्तमसी वाथ उभे अहनी। सूर्यस्योदये तस्य सहस्र-शीर्षत्वात् सहस्रपात्त्वाच्च उदयपार्श्वोऽस्तपार्श्वश्च, द्यौश्च पृथिवी च, अहश्च रात्रिश्च उभे सुदिने शोभने भवतः, यदि अश्विनौ ऋभुभिस्तष्टं रथमारोहतः। अश्विनोरस्यानश्वस्य रथस्य प्राप्तौ मनुष्यस्य निर्वेदो (दुःखं) विनश्यति। रात्रौ तमसि पुरुषो बुद्धिमलेन, शरीरमलेन अग्निमान्द्येन चोपहतो भवति। अज्ञानोपहतो विद्यमानमपि धनं भोक्तुं न प्रभवति। अश्विनोः अनश्वो रथः [१. १२०. १०] "समहः" "भुजः" च भवति [१. १२०. ११]। तेन रथेन स्वप्नविषयकः, अभोगविषयकश्च निर्वेदो विनश्यति।

अथ स्वप्नस्य निर्विदेऽभुञ्जतश्च रेवतः।
उभा ता बस्रि नश्यतः [१. १२०. १२]॥
अथ। इदानीं प्रभातसमये। निः। विदे। निर्विण्णोऽस्मि।

१—एकोऽन्यो दुहितृशब्दः—
राज्ञ ऊचे दुहिता पृच्छे वां नरा [१०. ४०. ५]
इयं राज्ञः कक्षीवतः पुत्री काक्षीवती घोषा।

ईदृशं प्रभातं यदा भवति तदा उभे अहनी विवस्वतः सूर्यात् मुदिने भवतः । विषयाणां यथार्थज्ञानं धनानां यथार्थभोगश्चाभिप्रेयेते ।

अनश्वस्य ऋभुतष्टस्य रथस्य योगे उषाः[1] स्वयं जायते । आजिधावनेन सा जेतव्या न भवति । [१. ११६. १७; १०. ३९. १२]

इयं दिवो दुहिताऽश्विनोः रथं नारोहति । सूर्यस्य दुहिता तु सदाऽश्विनो रथम् आतिष्ठति । एवं सूर्यस्य दुहिता दिवो दुहितुर्भिन्ना । सूर्यस्य दुहिताऽस्तोत्तरा, दिवो दुहिता उदयात् प्राग्भवा । अयं भेदः सूर्यसोमयोर्विभेदेन ज्ञायते । सूर्यः सुमेरौ उदीयमानः । सोमस्तु कुमेरोः सुमेरौ सूयमानः ।[2] अस्मै सोमाय प्रजापतिः स्वां दुहितरं ददाति । "प्रजापतिर्वै सोमाय[3] राज्ञे दुहितरं प्रायच्छत् सूर्यां सावित्रीम् ।"
[ऐ. ब्रा. १७. १]

अत एव सूर्यस्य (प्रजापतेः) दुहिताऽऽजिधावनेन विजिता सती अश्विनो रथमातिष्ठति । दिवो दुहिता नैवं विजिता भवति । न वा तस्या विवाहः क्रियते । सा उषाः । उषसो विवाहो न क्रियतेऽपि तु सूर्यायाः । यासु ऋक्षु सूर्यस्य दुहिता श्रूयते तत्र सा कर्तृकारकं, रथं च कर्मकारकम्[4] । यत्र दिवो दुहिता श्रूयते तत्र नास्ति रथारोहणं तथा [१०. ३९. १२] ।

यदा सुमेरौ सूर्योऽस्तं याति तदा तत्र यत्साध्यं तेजः सा सूर्यस्य दुहिता । प्रजापतिः (रश्मीनां पतिः सूर्यः) तां दुहितरं प्राच्यां दिशि प्रातः कुमेरोः सूयमानाय सोमाय दित्सति । तत्र प्रातः तं सोमं प्रति इयं सूर्यस्य दुहिता रथे नीयते ।

"आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयन्ती ।
विश्वे देवा अन्वमन्यन्त हृद्भिः समु श्रिया नासत्या सचेथे ॥" [१.११६.१७]

प्रजापति र्वै सोमाय राज्ञे दुहितरं प्रायच्छत्
सूर्यां सावित्रीम् [ऐ. ब्रा. १७. १]

नासत्यदस्रशब्दयोः विवेकः ।

अन्यदपि तत्त्वम् अश्विनोर्विषयेऽत्र स्फुरति । अत्र दुहितृविषयिकासु ऋक्षु दस्रशब्दो न श्रूयते । आजिधावनं, सूर्यस्य (दिवो वा) दुहितुः अश्विनोः रथेन

१—एकैवोषाः सर्वमिदं विभाति [८. ५८. २]

२—द्र. विप्रुतं रेभम् उदनि प्रवृक्तम् उन्निन्यथुः सोममिव स्रुवेण [१.११६.२४]

३—सोमो वधूयुरभवद् अश्विनास्ताम् उभा वरा ।
सूर्यां यत्पत्ये शंसन्तीं मनसा सविताददात् ॥ [१०. ८५. ९]

४—द्र. यः सूर्यां वहति वन्धुरायुः [७. ७७. १]

सोमः इत्येवमुभयं रात्री । अतो नासत्यौ, अश्विनौ, नरौ इति शब्दाः श्रूयेरन्, न दस्रौ इति । अनेनैकस्याश्विनो नाम "नासत्यः" अन्यस्य "दस्रः" इति । यद्यपि ऋक्संहितायां नासत्यशब्दो दस्रशब्दश्च अश्विनोर्विषये द्विवचनान्त एव श्रूयते, तथापि तयोः परस्परस्मात् पार्थक्यम् अपि श्रूयते ।

"जिष्णुर्वामन्यः सुमखस्य सूरिः, दिवो अन्यः सुभगः पुत्र ऊहे ।" १.१८१.४ "उभयोरश्विनोरेकः जयशीलः शोभनयज्ञस्य प्रेरयिता । अन्यः सुभगः (शोभनरश्मिकल्पनः) दिवः पुत्रः (आदित्यः) ।"

नासत्यशब्दो दस्रशब्दश्चाश्विनोरर्थे योगरूढौ । प्राधान्येन व्यपदेशा इति न्यायेन दस्रत्वप्राधान्यविवक्षायाम् उभौ दस्रौ, नासत्यत्वप्राधान्यविवक्षायाम् उभौ नासत्यौ[1] ।

सूर्यदुहितृविषये पूर्वम् उद्धृतेषूदाहरणेषु एकत्र सूरे दुहिता इति, अन्यत्र सूरो दुहिता इति ।

१. "त्रिवृं वां सूरे दुहिता रुहद्रथम्" १. ३४. ५

सूरे सूर्यस्य । दुहिता दुर्हिता दूरे हिता दोग्धेर्वा । [निरु. ३. ४] ।

सूरे । षू प्रेरणे इति धातोः क्रन् [उ. सू. १८२] नित्त्वाद् आद्युदात्तः । विभक्तिव्यत्ययः । [सायणः] । सूरस्य इति षष्ठ्यर्थे सूरे इति सप्तमी ।

२. "युवोः श्रियं परि योषा वृणीत सूरो दुहिता परितक्म्यायाम्" । (७. ६९. ४) । "श्रयते इति श्रीः रथः । योषा सर्वदा मिश्रयन्ती योषित् । सूरः सूर्यस्य दुहिता परि अवृणीत । कदा । परितक्म्यायां रात्रौ परितस्तकनवति संग्रामे यज्ञे वा गन्तव्ये ।"

अत्र "परितक्म्यायां" इति, पूर्वत्र "त्रिवृं रथम्" इति च श्रवणेन, "सूर्यस्य (सूरः सूरे) दुहिता" इत्यनेन युक्तेषूदाहरणेषु दस्रशब्दस्याश्रवणात्, दस्रः अहनि दर्शनीयः तमसां रोगाणां चोपक्षपयिता अश्वी, नासत्यः अन्यः अश्वी, यस्य रूपं रात्री प्रकाशमानं सत्यात्मकं तेजः । अत्रोपोद्बलकं त्रिवृं वां सूरे दुहिताऽरुहद् रथम् [१. ३४. ५] इत्यत्र रथविशेषणं "त्रिवृम्" इति पदम् । चक्रत्रयेऽवस्थितं रथं सूरे दुहिता आरुहत् (आरूढवती) । अत्राश्विनोः स्थानत्रये विद्यमानता प्रतीयते ।

१—क्वचिद् एकस्यामेवर्चि उभौ शब्दौ श्रूयेते—दस्रा युवाकवः सुता नासत्या वृक्तबर्हिषः [१. ३. ३.] [द्र. १. ११६. १०; १६; १८३.५]

"साहचर्यात्तु अन्यतरनाम्नाऽपि सर्वत्रोभयोरभिधानम् ।"

[स्कन्दः १. ११६. १]

यदा विषुववृत्ते सूर्य आयाति तदाऽहोरात्रयोः समविभागेन विषुववृत्ते उदयकाले अश्विनौ, अस्तकाले चाश्विनौ इति चक्रद्वयम् ।

"यदद्याश्विनावपाग् यत् प्राक् स्थो वाजिनीवसू ।" [८. १०. ५]।
वाजिनीवसू अश्विनौ अद्य एकस्मिन्नेवाहनि (१) अपाक् स्थः, (२) प्राक् स्थः—इति श्रुत्या दिग्भेदेन अस्तोदयवृत्त्या चक्रद्वयं द्योत्यते ।

अस्मिन्समये सुमेरावुदयस्थले दस्रः कुमेरावस्तस्थले नासत्यः इति सुमेरुकुमेरुयुगपद्वृत्ति तयोः रथस्य तृतीयं चक्रम् ।[1]

१—अत्र मम गुरुवर्याणां महामहोपाध्यायानां सीतारामशास्त्रिणां मतम् यथो दीयते "त्वं मित्रो असि सत्यराधास्तौ मेहावतं वरुणश्च राजा" [५. ७०. ७] तौ मा इह अवतम् । अस्मिन्नर्धर्चे मित्रस्य सत्यराधस्त्वं वरुणस्य राजत्वं च सूर्यस्य सुमेरावस्तं तदा कुमेरावुदयं च प्रतिपादयतः । सत्यराधस्त्वेन मित्रः सुमेरौ रात्रिसम्बद्धः, एवं राजत्वेन वरुणः कुमेरौ अहःसंबद्धः ।

एतत् तत्त्वं बोधयन्तः शास्त्रिणः स्वोपज्ञे वेदार्थविचारे लिखन्ति—

तत्र सत्यराधा इत्यनेन तस्य मित्रस्य रात्रिसम्बन्धो व्यज्यते । राधः-शब्दो धनार्थस्तेज आह । सत्यं तेजो यस्येति । रात्रिकालिकस्य तेजसः सत्यशब्देन वचनं वेदे । अतएव सन्ध्यानुष्ठाने रात्रिकालिकाचमनमन्त्रे सत्ये ज्योतिषि जुहोमि इत्युच्यते । अश्विनोः सूक्तेषु अश्विनोः प्रतिदिनं त्रिः संबन्धो बोध्यते । तत्र अह प्रवृत्तरूपेण द्विः, अस्तप्रवृत्तरूपेण सकृत् । अहप्रवृत्तं रूपं सोमयतः पार्श्वयोरुदयात् पूर्वम्, अस्तोत्तरं चेति । अस्तप्रवृत्तं च रूपम् एकस्य रात्रिमध्यावसरे परस्य दिने । तत्र तयोः स्वरूपं तन्नाम्ना व्यज्यते । एकस्तत्र नासत्योऽपरो दस्रः । दस्रो व्यक्ततेजोरूपो, नासत्योऽव्यक्ततेजोरूपः । तत्राव्यक्तत्वेन तेजसोऽसत्त्वात् तदभावे प्राप्ते तत्प्रतिक्षेपमुखेन सत्यत्वं तस्योच्यते, नासत्यशब्देन, असत्यो न भवतीति । आप्रयणाचार्येण सत्यस्य प्रवीणत्वम् उच्यते । अत एव सौरे सूक्तेऽपि "वरुणो सत्यमर्पितम् [ऋ.वे.वि.पृ.७८]" [१०. १७०. २] इति तस्य रात्रिसंबन्ध उक्तः [वे. वि. पृ. ९५–९६]।

चतुर्थोऽध्यायः

अश्विनौ अन्ये देवाश्च

इतरैः देवैः सह अश्विनोः सोमपानम् ।

मधुपानार्थं त्रिभिरेकादशैः[1] (त्रयस्त्रिंशता) देवैः सहागमनम् अश्विनौ हिरण्यस्तूप आङ्गिरस ऋषिः प्रार्थयते—

आ नासत्या त्रिभिरेकादशैरिह देवेभिर्यातं मधुपेयमश्विना [१. ३४. ११]

श्यावाश्व आत्रेयोऽश्विनौ प्रार्थयते तयोः सोमपानम्, इतरैः देवैः सहभूतयोः, उषसा सूर्येण च संगतयोः । "अग्निनेन्द्रेण वरुणेन विष्णुनाऽऽदित्यै रुद्रैर्वसुभिः सचाभुवा । सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना ॥" [८. ३५. १]

"विश्वैर्देवैस्त्रिभिरेकादशैरिहाद्भिर्मरुद्भिर्भृगुभिः सचाभुवा । सजोषसा उषसा सूर्येण च सोमं पिबतम् अश्विना ॥" [८.३५.३] । के एते त्रय एकादशा इत्यत्रैवं श्रूयते—"ये देवासो दिव्येकादश स्थ, पृथिव्यामध्येकादश स्थ । अप्सुक्षितो महिनैकादश स्थ, ते देवासो यज्ञमिमं जुषध्वम् ॥" [१. १३९. ११]

"अप्सु अन्तरिक्षे क्षियन्ति निवसन्तीति अप्सुक्षितः ।"

आम्भृणस्य महर्षेर्दुहिता वाङ्नाम्नी ब्रह्मविदुषी जगत्कारणब्रह्मरूपा भवन्ती आत्मानं तद्रूपेण स्तौति, तदा अश्विनोरपि स्वात्मभावं श्रावयति—अहं रुद्रेभिर्वसु-भिश्चराम्यहमादित्यैरुत विश्वदेवैः ।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा ॥ [१०. १२५. १]

देवपत्नीभिः सह त्वष्टा, इळा, भगः, रोदसी, पूषा, पुरन्धिः, अश्विनौ च ऋषेर्गृत्समदस्य रथं प्रेरयन्ति [२. ३१. ४] ।

१—त्रयस्त्रिंशत् सोमपाः, त्रयस्त्रिंशदसोमपाः [द्र. ऐ. ब्रा. ७. ८]

सोमपाः		असोमपाः	
वसवः	८	प्रयाजाः	११
रुद्राः	११	अनुयाजाः	११
आदित्याः	१२	उपयाजाः	११
प्रजापतिः	१		३३
वषट्कारः	१		
	३३		

वसिष्ठो रक्षणाय यान् देवान् आह्वयति तत्राश्विनावन्यतमौ ।
दधिक्रां वः प्रथमम् अश्विनोषसम् अग्निं समिद्धं भगमूतये हुवे ।
इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिम् आदित्यान् द्यावापृथिवी अपः स्वः ॥
[७. ४४. १]

ऋतुना यज्ञवाहकौ ।

अश्विनौ ऋतुदेवतया सह यज्ञं वहतः, ऋतुना यज्ञवाहसा [१. १५. ११] अग्निं संदीपयन्तौ तौ विभिन्नेषु ऋतुषु यज्ञं निर्वहतः । अस्मिन् यज्ञे इन्द्रः सोमं पिबति । मरुतः सोमं पुनन्ति । नेष्टा यज्ञं स्तौति । मित्रावरुणौ धृतव्रतौ भूत्वा यज्ञम् अश्नुवाते । प्रवर्तमानो यज्ञः ऋतुषु व्याप्तो भवति, अहोरात्राभिमानिदेवाभ्यां मित्रावरुणाभ्यां धृतेन कर्मणा । मित्रावरुणौ अहोरात्रप्रवर्तनकर्मणा यज्ञं व्याप्नुतः । मित्रावरुणौ धृतव्रतौ, यज्ञम् आशाथे च । परन्तु अश्विनौ शुचिव्रतौ यज्ञवाहकौ च । अत्राश्विनौ "दीद्यग्नी" द्योत्यमानाग्नियुक्तौ भवतः ।

मित्रावरुणाभ्यां यत् कर्म (व्रतं [1]) ध्रियते तत्कर्म अश्विभ्यामेव प्रवार्यते । मित्रावरुणौ यज्ञं व्याप्नुतः, अश्विनौ तं यज्ञं निर्वहतः । अत्राश्विनौ यज्ञाद् बाह्यौ न स्तः । यदेव व्रतं धृतं मित्रावरुणाभ्यां, तदेव व्रतं शुचि भवति अश्विनोः आगमनेन । द्योतमानाहवनीयाद्यग्नियुक्तौ शुद्धकर्माणौ सन्तौ अश्विनौ यज्ञम् अग्रे प्रेरयतः ।

युवं दक्षं धृतव्रत मित्रावरुण दूळभम् ।
ऋतुना यज्ञमाशाथे [१. १५. ६] ॥
अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता ।
ऋतुना यज्ञवाहसा [१. १५. ११]

एवं मित्रावरुणाभ्यां धृतं यज्ञं वाहयन्तौ, अग्निं दीपयन्तौ, मरुद्भिः सोमं पावयन्तौ, वायुमिन्द्रं च सोमं पाययन्तौ, ऋतून् अनु देवान् कामयमानानां यजमानानां यज्ञं नेतुम् अग्निं समर्थं कुरुतोऽश्विनौ । तथा हि—

गार्हपत्येन सन्त्य ऋतुना यज्ञनीरसि । देवान् देवयते यज [१. १५. १२] ॥

अश्विनोरद्भुतकर्मसु भुज्योर्गृहं प्रति नयनं, विमदाय अर्भगाय (अर्भकाय), बालाय जायानयनम् (जायायाः नयनं) वा अश्विनोरिदं यज्ञनिर्वाहकत्वं द्योतयति ॥

त्रयस्त्रिंशता देवैः सह मधुपानेन [१. ३४. ११] सूर्यस्य रश्मिभिः नाकम् आगत्य, अन्नं मिश्रयन्तौ अश्विनौ यज्ञे बर्हिषि आसीदतः [१. ४७. ७; ८]

१—व्रतमिति कर्मनाम वृणोतीति सतः ।
अन्नमपि व्रतमुच्यते यद् आवृणोति शरीरम् । [निरु. २. १३]

यज्ञस्य द्यां पृथिवीं चान्तरा प्रवर्त्यमानतया, अश्विनोः पूर्वबोधनाय च द्यावा-पृथिव्यौ स्तूयेते [१. ११२. १]।

अश्विनौ वायुं प्रीणयन्तौ, अग्नेर्बलेन वायुं परिज्मानं परितो गन्तारं कुर्वन्तौ, सर्वैरवनैः सह स्वकर्माणि कुरुतः । तयोर्व्यापनमेव तयोरवनम् । अश्विनोः व्याप्त्या सर्वावनसिद्धौ अहः, रात्रिः, मित्रः, वरुणः, अदितिः, सिन्धुः, पृथिवी द्यौश्च अश्विनोरवनकर्माणि सहाया भवन्ति [१. ११२. १; ४; २५]।

प्रातर्यावाणावश्विनौ । अतोऽग्निरुषाः सविता सूर्यश्च तयोः रथयोगेन प्रवर्तन्ते । यज्ञस्य निर्वहणेऽभीष्टफलदित्सया कामपूरणेन मनसा चरन्तौ अश्विनौ स्वयं वसुरूपं रुद्ररूपं च धत्तः [१. १५८. १]। अश्विनोः सख्याय कण्वपुत्रः प्रगाथः ऋषिः यज्ञेभिरश्विभ्याम् सह बृहस्पतिं इन्द्राविष्णू विश्वान् देवांश्च आह्वयति [८. १०. २-३]।

अश्विनोः रथकर्तार ऋभवः[1] । अश्विनोः कर्मणां व्याप्त्या तयो रथो भृगुभिस्तष्ट इव भवति ।

रथं यं वाम् ऋभवश्चक्रुरश्विना । [१०. ३९. १२]।

एतं वां स्तोमम् अश्विनावकर्मातक्षाम भृगवो न रथम् ॥ [१०.३९.१४]।

"भृगव[2] इव रथम् अतक्षाम । वयं स्तोमं संस्कृतवन्तः । कर्मयोगाद् ऋभवो भृगव इत्युच्यन्ते । अथवा रथकारा भृगवः ।" [सायणः]

अश्विनोः भृगुभिः सह सोमपानम् ऋभुभिः सहागमनं च श्रूयते । "भृगुभिः सचाभुवा ......सोमं पिबतमश्विना" [८. ३५. ३]।

"ऋभुमन्ता......आदित्यैर्यातमश्विना ।" [८. ३५. १५]।

अष्टमे मण्डले पञ्चत्रिंशं सूक्तं चतुर्विंशत्यृचं श्यावाश्वस्य आर्षम् । तत्र प्रथमेन तृचेन सोमपानेऽश्विनोः सहभूताः देवाः परिगण्यन्ते । पञ्चमेन तृचेन अश्विनो-रादित्यैः सहागमने सहायभूता देवाः परिगण्यन्ते । अन्तिमतृचवर्जम् इतरासु एकविंशती ऋक्षु अश्विनौ उषसा सूर्येण च सह संगतौ स्तः । तत्र सोमपाने सह भूता देवाः—

अग्निः, इन्द्रः, वरुणः, विष्णुः, आदित्याः, रुद्राः, वसवः । (१)

विश्वा धियः, भुवनः वाजी, द्यौः, पृथिवी, अद्रयः । (२)

विश्वे देवाः त्रय एकादशाः, आपः, मरुतः, भृगवश्च । (३)

१—ऋभव उरु भान्तीति वा । ऋतेन भान्तीति वा । ऋतेन भवन्तीति वा । [निरु. ११. १५]

२—अर्चिषि भृगुः संबभूव । भृगुर्भृज्यमानो न देहे । [निरु. ३. १७]।

आदित्यैः सहागमनेऽश्विनोः सहचराः—

मित्रावरुणौ, घर्मः, मरुतः । (१३) अङ्गिरसः, विष्णुः, मरुतः । (१४)

ऋभवः, वाजाः, मरुतश्च । (१५)

इत्थम् इतरसाहाय्येन, इतरसंगत्या, अहोरात्रं त्रिषु लोकेषु कर्मकरणात्, शत्रुनिवारणेन, रोगोपशमनेन, तमोनिरसनेन, आयुर्वर्धनेन, धनप्रदानेन, पुष्टिकरणेन, सूर्योद्गमनेन, यज्ञनिर्वाहेण च बहूनि रूपाणि बिभृतोऽश्विनौ ।

कुविन्दौ वस्त्राणीवाश्विनौ दर्शं हविर्विस्तारयतः । यजमानस्य पुत्रः (अयं) सूर्याचन्द्रमसाविवालंकुरुतः [१०. १०६. १] । अश्विनावत्र सध्रीचीनौ (सहाञ्चन्तौ) भवतः । यद्यपि तयो रथः समानयोजनः (उभाभ्यां तुल्ययोजनः) तथापि "सध्रीचीना" इति विशेषणमत्रैव श्रूयते । ऋषिरत्र भूतांशः काश्यपः । अस्मिन्नेकादशर्चे सूक्ते उपमाभिरश्विनोः सध्रीचीनतैव विविच्यते । अश्विनौ शकुनस्य पक्षाविव सदाऽवियुज्यमानौ "साकंयुजा शकुनस्येव पक्षा" [१०. १०६. ३] । सर्वं व्यश्नुवाते अश्विनौ । अत एव तावितरैर्देवैः सह सोमपानं कुरुतः । सर्वेषां देवानां साहचर्येण तौ साकंयुजौ सध्रीचीनौ सर्वं विश्वं व्याप्नुतः । अर्णवात् समुद्राज्जातं विश्वं चतुर्धा विभक्तम् । अर्णवेन समुद्रेण सह पञ्चभूमं विश्वं भवति ।

(१) अर्णवः समुद्रः । (२) स्वः । (३) द्यौः । (४) अन्तरिक्षम् । (५) पृथिवी [ऋ. १०. १९०. १-३] ।

विश्वस्य पञ्च विभागाः ।

पञ्चस्वेषु विभागेषु सध्रीचीनाः सहाञ्चन्तः पञ्च देवा भवन्ति । ते च क्रमशः— विद्युत्, चन्द्रमाः, सूर्यः, वायुः, अग्निः इति पञ्च ।

"अमी ये पञ्चोक्षणो मध्ये तस्थुर्महो दिवः ।
देवत्रा नु प्रवाच्यं सध्रीचीना नि वावृतुर्वित्तं मे अस्य रोदसी ॥"

[१. १०५. १०]

नि । ववृतुः । तृप्ताः सन्तो निवर्तन्ते । "देवेषु नु क्षिप्रं प्रशंसनीयं मदीयं स्तोत्रं प्रति सह अञ्चन्तो देवाः तृप्ताः सन्तो निवर्तन्ते । द्यावापृथिव्यौ मदीयमिदं स्तोत्रं जानीतम् ।"

के ते पञ्च "उक्षणः" [सेक्तारः कामाभिवर्षकाः] ?

"तन्न इन्द्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् [१. १०७. ३] इत्यर्धर्चेन प्रतिपादिताः पञ्चसंख्याका देवाः । यद्वा । अग्निर्वायुः सूर्यश्चन्द्रमा विद्युद् इत्येवं पञ्चसंख्याकाः । तथा च शाट्यायनकम्—एतान्येव पञ्च ज्योतींषि यान्येषु लोकेषु दीप्यन्ते । अग्निः पृथिव्यां, वायुरन्तरिक्षे च, आदित्यो दिवि, चन्द्रमा नक्षत्रे, विद्युदप्सु इति ।" [सायणः]

इत्थं पञ्चधा विभक्तेषु लोकेषु अश्विनोरपि पञ्चधा सध्रीचीनत्वम् अपेक्षितव्यं भवति ।

प्रकृते भूतांशस्य काश्यपस्याऽऽर्षे [१०. १०६. १-११] अश्विनोः सध्रीचीनत्वं बह्वीभिरुपमाभिः प्रदर्श्यते । तत्र पूर्वोक्तैः पञ्चभिर्देवैरपि सहाश्विनावुपमितौ स्तः । तथाहि—

१. देवान् इच्छतो यजमानस्य यज्ञेऽग्निरिव तौ दीप्तौ भवतः ।
"अग्निरिव देवयोर्दीदिवांसा" [१०. १०६. ३] ।

२. दीक्षणगतिरश्विनोः रथो वायुरिव पूरयन् धनानि आगमयति ।
"वरज्युर्वायुर्न पर्फरत् क्षयद् रयीणाम्" [१०. १०६. ७] ।

३-४. सूर्याचन्द्रमसाविव पुक्षः (अन्नम्) अलंकुरुतोऽश्विनौ ।
"सुदिनेव पृक्ष आ तंसयेथे" [१०. १०६. १] ।

"सुदिनौ अहोरात्रयोः प्रवर्तकत्वेन तद्वन्तौ सूर्याचन्द्रमसौ स्वरश्मिभिर्यथाऽन्नान्यलंकुरुतः तद्वद् युवां पृक्षः । अन्ननामैतत् । भोक्तृभिः संपृच्यन्ते इति पृक्षोऽन्नानि आतंसयेथे समन्ताद् अलंकुरुथः ।" [सायणः]

अन्नेन वाजौ (अश्वौ) इव हवीरूपेणान्नेनोच्चैरन्तरिक्षे सूर्याचन्द्रमोरूपेणावतिष्ठेते अश्विनौ । "वाजेवोच्चा वयसा घर्म्येष्ठा" [१०. १०६. ५] ।

५. अश्विनौ शब्दं कुर्वाणौ मेघाविव मधु प्रेरयतः । विद्युता मेघो गर्जति ।
"आरङ्गरेव मध्वेरयेथे" [१०. १०६. १०] ।

किरणौ यथा सर्वं प्रकाशयतः तथाश्विनौ सर्वेषां परिभोगाय भवतः ।
"किरणेव भुज्यै" [१०. १०६. ४] ।

सिन्धुमातरौ [१. ४६. २] अश्विनौ सरस्वत्या सहेन्द्रं भिषज्यतः ।
"इन्द्रं कर्मस्वावतम्" "इन्द्रावथुः काव्यैर्दंसनाभिः" [१०. १३१. ४-५] ।
सिनीवालीसरस्वतीभ्यां सहाश्विनौ गर्भं धत्तः [१०. १८४. २] ।

ऐन्द्रेण (प्राजापत्येन वा) विमदेन ईडितावश्विनौ अग्निं निरमन्थीताम् । मायाविनौ प्रज्ञावन्तौ अश्विनौ यदा अग्निं निर्मथितवन्तौ तदा इन्द्रादयो विश्वे देवाः अश्विनौ अस्तुवन् । किं च देवाः "पुनः पुनः ईदृशानि जगत्स्थितिहेतुभूतानि कर्माणि आवहतम्" इति नासत्यौ अब्रुवन् । अश्विभ्याम् उत्पाद्यमानो (निर्मथितो) अग्निः पुनः पुनः देवेभ्यो हवींषि वहति ।

विश्वे देवा अकृपन्त समीच्योर्निष्पतन्त्योः ।
नासत्यावब्रुवन् देवाः पुनरावहतादिति ॥ [१०. २४. ५] ।

युग्मदेवाः ।

इन्द्राग्नी, अग्नेन्द्रौ, इन्द्रवायू, मित्रावरुणौ, सूर्याचन्द्रमसौ, अग्नीषोमौ,

यमयम्यौ, द्यावापृथिव्यौ—इत्यादिषु अन्यतमौ युग्मदेवौ अश्विनौ न भवितुमर्हतः। तेषु अश्विनोर्विद्यमानत्वेऽपि अश्विनौ तानतीत्य वर्तेते। इन्द्राग्नी अग्नेन्द्रौ क्षोणी-रूपौ। एकः सोमं पीत्वा वृत्रं हन्ति, अपरो हविर्नयति। अनयोः परस्परं संगतिः, समानकर्मत्वं वा नास्ति। अनयोः सहस्तुतिर्भवेत्। इन्द्रो वृष्ट्या, अग्निर्हवि-षाऽन्योन्यमुपकुरुतः। तथापि सध्रीचीनत्वम्, अश्विनोरिव अनयोर्नास्ति, नाप्येतौ एकप्रभवौ। [अपि चाभ्यर्हितं पूर्वमिति न्यायेन इन्द्राग्नी इत्यत्र इन्द्रस्य प्राधा-न्यम्, अग्नेन्द्रौ इत्यत्राग्नेः। नायं प्रभेदोऽश्विनोः।]

इन्द्रवायू।

उभावन्तिरिक्षस्थानौ। तत्र वायुः सोमस्य पूर्वपाः [४. ४६. १]। सोमपाने इन्द्रस्य तुरीयो भागः, इन्द्रश्च वायोः सारथिः। नियुत्वाँ इन्द्रसारथिः [४. ४६. २]। नैतादृशो गौणमुख्यभावोऽश्विनोः।

मित्रावरुणौ।

एतौ ऋतं वर्धयन्तौ ऋतेन रोदस्यां पदार्थान् धारयतः। उभौ ऋतस्य गोपौ सिन्धुपती च [७. ६४. २]।

अश्विनौ सिन्धुमातरौ सिन्धुवाहसौ च [१. ४६. २; ५. ७५. २]। सूर्यो मित्रस्य वरुणस्य च चक्षुः [७. ६१. १]। अश्विनौ सूर्यमनुगच्छतः [१. ४७. ७; ११७. २१]।

एवं मित्रावरुणौ न अश्विनौ भवतः।

सूर्याचन्द्रमसौ।

एतावपि नाश्विनौ भवतः, नक्तंदिवम् अश्विनोर्युगपद् वर्तनात्, सूर्याचन्द्र-मसोरेकस्थानानवस्थितत्वाच्च। अपि च अश्विनोः रथः परि द्यावा पृथिवी याति सद्यः [३. ५८. ८]। सूर्याचन्द्रमसोः परस्परं भिन्नदेशकालत्वात्,[1] न तावश्विनौ भवतः। अपि च "अश्विनौ व्यात्तम्" [वा. सं. २१. २२], सूर्याचन्द्रमसौ च पिण्डीभूतौ चक्षुर्गोचरौ। सूर्याचन्द्रमसौ अश्विनोरश्वौ भवेतां, न तु तौ स्वयम् अश्विनौ भवतः।

अग्नीषोमौ।

एतौ यज्ञस्य वर्धकौ, यज्ञाय तौ विस्तृतं लोकं च कुरुतः [१. ९३. ६]। तथापि साहोदर्याभावात्, पृथक् पृथक् स्तुतिभाक्त्वाच्च, तयोरेकैकस्य देवतान्तरेण संस्तूयमानत्वाच्च, यथा इन्द्राग्नी, इन्द्रासोमौ, अग्नीवरुणौ, सोमापूषणौ इति, तौ न अश्विनौ।

१—सूर्याचन्द्रमसौ "चितर्तुरं" परस्परव्यतिहारेण तरणं पुनःपुनर्गमनं यथा भवति तथा चरतः। [सायणः—१. १०२. २]।

यमयम्यौ ।

एते यद्यपि सरण्यूप्रभवे, तथापि तयोः नासत्यौ दस्रौ इत्यादिवत् एकपदेन युगपद् व्यपदेशः, कर्मसु साहचर्यं वा न श्रूयते । यद्यपि "अजेव यमा" (छागौ इव यमलौ), "दम्पतीव क्रतुविदा" [२. ३९. २] इत्यश्विनोरौपम्यं श्रूयते, तथाप्यश्विनोरुभयोः पुंस्त्वात्, अन्यत एव तयोर्यमयमीभ्यां पार्थक्यश्रवणात्[1] च [१०. १७. २], यमयम्यौ[2] अश्विनौ न भवतः ।

द्यावापृथिव्यौ ।

द्यावापृथिव्योर्यद्यपि रोदसी[3] इत्येकं नाम, तथापि ते सदा पृथग्भूते, अन्तरिक्षम् अभितस्तयोर्विद्यमानत्वात् । अपि च तयोर्दम्पतीत्वं विद्यते । अश्विनोर्नैवं पार्थक्यं न वा दम्पतीत्वम् ।

एवम् इतरेभ्यो युग्मदेवेभ्योऽश्विनोः पृथक् सत्ता न्याय्या भवति । नान्यौ युग्मदेवौ भिन्नद्रव्याभ्यां रसज्योतिर्भ्यां एकाधिकरणे युगपद् व्याप्नुवानौ च ।

इदमेव अश्विनोर्नासत्यत्वम्, तयोरसत्यराहित्यम् । अग्नीषोमौ यद्यपि युग्मं तथापि न नासत्यौ, तयोरन्यतरवर्ज्जम् इतरस्य क्वचित् कदाचित् सत्तायाः । इयमेव कथा इतरयुग्मदेवानाम् ।

एतावेव नासत्यावश्विनौ देवानामध्वर्यू, दैव्यौ भिषजौ च । अतो वेदे देवेषु अश्विनोरनितरसाधारणम् अनुपमं स्थानं विद्यते ।

१—त्वष्टुःसुता च विवस्वत एव सकाशात् द्वौ मिथुनौ दुहितृपुत्रौ यमीयमौ सरण्यूः । [उद्गीथः १०. १७. २] ।

२—यमेन त्वं यम्या संविदाना । [वा. सं. १२. ६३] ।
"अग्निर्वै यम इयं यमी, आभ्यां हीदं सर्वं यतम् ।"
[श. ब्रा. ७. २. १. १०]

३—रोदसी रोधसी द्यावापृथिव्यौ विरोधनात् । [निरु. ६. १] ।

पञ्चमोऽध्यायः

अश्विनोरद्भुतानि कर्माणि

प्रथमे मण्डले दाशतय्याम् ऋक्संहितायां, दीर्घतमसः पुत्रः कक्षीवान् अश्विनोर्महिमानं वीर्यकर्माणि च प्रशंसति । "एतानि वाम् अश्विना वीर्याणि" [१. ११७. २५] । अश्विनोः वीर्याणि कर्माणि रोदस्योः श्रोतव्यानि । योऽश्विनोः स्तुतिं जानाति सोऽश्विनोः संनिधिं लब्ध्वा, ताभ्याम् अन्नं बलं च प्राप्नोति [१. ११७. १०] । अश्विनोः कर्माणि प्रशस्य ऋषिः स्वराष्ट्रस्याधिपत्यं, गाः, वीरान्, दीर्घमायुः, यशोऽश्विनोः भूयसीं स्तुतिं च प्रार्थयते । [१. ११६. २५; ११७. २५] ।

कर्मणां निर्देशः ।

अश्विनोः कर्माण्यथ उल्लिख्यन्ते—

१. अश्विनौ विमदाय विगतमदाय अर्भकाय जायां न्यूहतुः ।

२. भुज्युं समुद्राद् उत्तारयामासतुः ।

३. पेदवेऽश्वाय श्वेतम् अहिहनम् अश्वं ददतुः ।[1]

४. कक्षीवतेऽश्वस्य शफात् शतं कुम्भान् सुरायाः, मधुना च शतं कुम्भान् सिषिचतुः ।

५. अत्रिम् ऋबीसान्मोचयित्वा तस्मै ओमानम् ऊर्जं दधतुः ।

६. तृषिताय गोतमाय अवतम् उच्चाबुध्नं जिह्मबारं कृत्वाऽपः क्षारयामासतुः ।

७. कूपेऽपगूढं वन्दनम् उज्जह्रतुः ।

८. च्यवानस्य जरां शरीराद् द्रापिमिव अवमोच्य, तं युवानं कन्यानां पतिं चक्रतुः[2] ।

९. दधीचेऽश्व्यं शिरः प्रतिनिधाय मधुविद्यां जगृहतुः ।

१०. वध्रिमत्यै हिरण्यहस्तं पुत्रं ददतुः ।

१—यादृशाज्जायते जन्तुर्जन्मकर्मास्य तादृशम् ।
अश्विनावश्वजावश्वं ददतुः पेदवे सितम् ॥ [नीतिमञ्जरी, १७] ।

२—आदित् पतिम् अकृणुतं कनीनाम् । [१. ११६. १०] कनीनाम् । "रयेर्मतौ बहुलम्" [वा. पा. ६. १. ३७] इति बहुलवचनात् कन्या-शब्दस्यात्र सम्प्रसारणम् ।

११. विश्वकाय विष्णाप्वं ददतुः।

१२. वृक्यै शतं मेषान् खण्डीकृत्य ददवन्तम् ऋज्राश्वं पिताऽन्धं चकार। वृक्या प्रार्थितौ अश्विनौ तस्मै चक्षुषी प्रतिदधतुः।

१३. पटलपिहितचक्षुष्काय कण्वाय चक्षुषी प्रतिदधतुः।

१४. नार्षदाय श्रोत्रं अपिदधतुः।

१५. खिलचरित्रायै विश्पलायै जङ्घां प्रतिदधतुः।

१६. गोतमस्य पानाय कूपाद् नीचाद् उपरि जलं स्रावयामासतुः।

१७. शयवे गां पयसा पूरयामासतुः।

१८. दिवोदासस्य भरद्वाजस्य गृहं प्रति गच्छतोरश्विनोः रथो वृषभशिशुमाराभ्यां युक्तो धनमुवाह तस्मै।

१९. राज्यान्निष्कासितं जाहुषं शत्रुभ्यो निर्गमय्य पर्वतभेदकेन रथेन नक्तं तस्य राज्यं प्रापयामासतुः, आत्मनोऽजराम् इच्छन्तौ अश्विनौ।

२०. रेभम् अप्स्वन्तरवनद्धम् उन्निन्यतुः।

२१. त्रिधा विकृत्तं श्यावम् अविकलाङ्गं चक्रतुः।

२२. मनवे यवम् उप्त्वा, इषं दुहन्तौ ज्योतिश्चक्रतुः।

२३. पितृगृहे जीर्यन्त्यै घोषायै पतिं ददतुः।

२४. श्यावाय कुष्ठरोगेण श्यामवर्णाय रुशतीं (दीप्तत्वचं) ददतुः।

[१. ११६–११७]

अन्यैर्ऋषिभिः कक्षीवताऽनुक्तान्यपि कानिचन कर्माणि प्रशस्यन्ते।

सप्तवध्रिम् आत्रेयं वनस्पतिपेटिकातोऽश्विनौ मोचयामासतुः।

[ऋषिः सप्तवध्रिरात्रेयः ५. ७८. ५]।

अवनकर्माणि।

ऋषिः कुत्स आङ्गिरसः आश्विनोः कर्तीः (अवनानि) स्तुत्या परिगणयति। कक्षीवता प्रोक्तानि कर्माणि—यान्युपरि निर्दिष्टानि सन्ति तानि—परिवर्ज्य अन्यानि अवनकर्माणि अधो दीयन्ते। [१. ११२]।

१. त्रिमन्तुं विचक्षणं चक्रतुः[1] [ऋ. ४] [१. ११२. ४]।

२. अन्तकं कर्कन्धुं वय्यं (भुज्युं) च जिजिन्वतुः (अवनेन प्रीणयामासतुः)। [६]

१—तु. "ता विद्वांसा हवामहे वाम्" [१. १२०. ३]।
"विद्वांसाविद् दुरः पृच्छेद् अविद्वान्" [१. १२०. २]।
"यद् विद्वांसा निधिम् इवापगूळ्हम्" [१. ११६. ११]।

३. शुचन्तिं, पृश्निगुं, पुरुकुत्सं (अग्निं) च ररक्षतुः। [७]
४. परावृजं पङ्गुं गमनाय समर्थं चक्रतुः। [८]
५. सिन्धुं मधुमन्तं चक्रतुः। वसिष्ठं, कुत्सं, श्रुतर्यं, नर्यं च ररक्षतुः। [९]
६. वशम्, अश्व्यं (अश्वपुत्रं) प्रेणिं (स्तुतिकर्तारं) ररक्षतुः। [१०]
७. दीर्घश्रवसे कक्षीवते कोशेन मधु क्षारयामासतुः। [११]
[१. ११६. ७, ११७. ६]
८. रसाम् उदकेन पूरयामासतुः। त्रिशोकेन गा अभ्यवहन्तौ। [१२]
९. मन्धातारं युद्धे ररक्षतुः। विप्रं भरद्वाजं ररक्षतुः। [१३]
१०. अतिथिग्वं कशोजुवं दिवोदासं शम्बरहनने, त्रसदस्युं पुरां भेदने च ररक्षतुः। [१४]
११. वम्रं विपिपानम् उपस्तुतं कलिं व्यश्वं पृथिं च ररक्षतुः। [१५]
१२. स्यूमरश्मिम् इषुप्रेरणे] शत्रून् प्रति] ररक्षतुः। [१६]
१३. पठर्वन्तं शर्यातं च ररक्षतुः। [१७]
१४. सुदासे सुदेव्यं (सुदेवीं शोभनधनं वा) ऊहतुः। [१९]
१५. ऋतस्तुभम् ओम्यावती सुभराम् इषं (अन्नं) प्रापयामासतुः। [२०]
१६. कृशानुं संग्रामे ररक्षतुः। यूनः (तरुणस्य पुरुकुत्सस्य)
वेगेन अर्वन्तं (अश्वं) ररक्षतुः। सरड्भ्यः मक्षिकाभ्यः प्रियं मधु जभ्रतुः [२१]
१७. क्षेत्रस्य गवां च संभजनार्थं, संग्रामे नरं, रथं, अश्वान् च अश्विनौ रक्षतः। [२२]
१८. आर्जुनेयं कुत्सं, तुर्वीतिं, दभीतिं, ध्वसन्तिं, पुरुषन्तिं च ररक्षतुः। [२३]

कर्माणि षोढा विभक्तानि।

अश्विनोः कर्माणि, यैस्तौ स्तोतॄणां यजमानानाम् अभीष्टानि साधयतः, षोढा विभक्तुं शक्यन्ते।

१. वहनम्। विमदस्य जाया, पुरुमित्रस्य योषा। सूर्यस्य दुहिता। आहुवः।
२. तारणम्। भुज्युः। रेभः।
३. अलब्धस्य प्रापणम्। पेदवेऽश्वः। वध्रिमत्यै हिरण्यहस्तः। विश्वकाय विष्णापूः[1]। घोषायै पतिः।
४. चिकित्सादिभिरभीष्टस्य साधनम्। सुरा। मधु। आपः। ओम्यावती ऊर्क्। चक्षुः। श्रोत्रम्। पादः। अविकलं शरीरं। यौवनं, कन्यापतित्वम्। गोः पयःपूरणम्। ६२। ज्योतिः। विविधानि अन्नानि धनानि च।

१—विष्णाप्वनामा (?)।

५. उद्धरणम् । वन्दनः । अत्रिः । सप्तवध्रिः ।

६. विविधम् अवनम् । १. ११२–तमे सूक्तेऽस्मिन् संग्रहः कृतोऽस्ति ऋतिभिः रक्षितानाम् ।

मनुष्येभ्योऽश्विभ्यां क्रियमाणं साधारणं कर्म एकया ऋचा संगृह्यते–

यवं वृकेणाश्विना वपन्तेषं दुहन्ता मनुषाय दस्रा ।
अभि दस्युं बकुरेणा धमन्तोरु ज्योतिश्चक्रथुरार्याय ॥ [१. ११७. २१][1]

१. कर्षणेन यववापः । २. इषोदोहः । ३. दस्युवधः । ४. ज्योतिष्करणम् ।

१. यवोऽत्र ज्योतिषो बीजम् । ज्योतिः रसे विद्योतते, रसाद् विद्योतते, रसो ज्योतिष्मान् भवति । ज्योतिष्मतो रसस्य बीजमत्र यवः ।

२. यववापस्य फलम् इषो दोहः ।

इद् अत्र सुरा-दधि-मधु-पयआदयो रसमयाः पदार्थाः । अनया इषा कक्षीवते सुरां मधु च, सिन्धवे क्षोदः (उदकं), शयवे पयः, अत्रये ओम्यावती ऊर्जं, वीतहव्याय अन्नम् इत्यादीनि साधितानि ।

३. इषोऽभावेन बकुरोत्पत्तिः, येन दस्युर्हन्यते । अनेन आहुवः, भुज्युः, रेभः, वन्दनः, सप्तवध्रिः, विमदस्य जाया, कुत्सः, कण्वः, मन्धाता, त्रसदस्युः, अतिथिग्वः, स्यूमरश्मिः, पठर्वा, त्रिशोकः, कृशानुः इत्यादयो रक्षिताः ।

४. दस्युवधेन ऊरुज्योतिः । अनेन अश्वः (पेद्वः), हिरण्यहस्तः, विष्णापूः, जंघा विश्पलायै, चक्षुश्रोत्रादीनीन्द्रियाणि च दीयन्ते ।

१. यवः (चान्द्रो रसः) वृकेण सौरेण ज्योतिषा उप्यते । पार्थिवे पदार्थे इन्द्रियकस्य व्यापारोऽत्र द्योत्यते ।

२. चान्द्रो रसोऽत्र इषः । ज्योतिषः प्रसरेण रसो द्रवति । अन्नमये पदार्थेऽग्निर्दीप्यते । मनीषी इन्द्रियैर्विषयान् दोग्धि ।

३. सौर्यज्योतिषा दीप्यमाने चान्द्रमसे पदार्थे मनसो विमोचनम् अत्र । पदार्थोऽग्निमयो कठिनश्च स्यात् ।

"बकुरेणाऽऽधमन्ता" । "बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा ।" [निरु. ६. २५] । धमनेनाग्निमयं पिण्डीभूतं वस्तु वाय्वात्मा भवति । बौद्धो व्यापारोऽत्र ।

१—द्र. अर्कपत्रभक्षणेन अन्धीभूय कूपे पतितं शिष्यम् उपमन्युम् उपाध्यायः धौम्यः उपदिदेश । "अश्विनौ स्तुहि तौ देवभिषजौ त्वां चक्षुष्मन्तं कर्तारौ" इति । [म. भा. आदि. अ. ३. ५६ निर्णयसागरः] ।

१. यवस्य वापः पृथिव्यां, शूद्रकर्म, विषयसंग्रहः ।

२. इषो दोहोऽप्सु । वैश्यकर्म, विषयभोगः ।

३. दस्योर्धमनम् अग्नौ । क्षत्रियकर्म । अधमनम् ।

४. उरुणो ज्योतिषः करणं वायौ, ब्राह्मणकर्म, आत्मज्ञानम् ।

अश्विनौ बहुकर्माणौ ।

अश्विनौ विस्तीर्णभुजौ-बहूनां भोजयितारौ पालयितारौ, यज्ञेषु बहूनां रक्षितारौ-बहूनि कर्माणि धारयितारौ, बहूनां यजमानानां भावयितारौ, अर्वाग्भूतगमनकर्माणौ, शत्रूणां च्यावयितारौ, पूर्वजातौ, अमर्त्यौ, अजरौ, बहूनाम् आह्लादकौ, अतिशयेन बहुकर्माणौ, बहुसहायौ, देवेषु आपनवन्तौ, असत्यरहितौ, उपभावयितारौ, अलंकर्तारौ, नेतारौ यज्ञस्य, सर्वैर्वरणीयौ, सर्वज्ञौ, सर्वस्तुत्यौ, सदा उद्गूर्णौ श्रमरहितौ, पापालिप्तौ, दोषं गोपायन्तौ, यज्ञं परितो व्याप्नुवन्तौ, कामपूरकेण मनसा चरन्तौ, बुद्धिवेगौ, शुचिव्रतौ, बहुधनौ, धीभिश्च चेतयन्तौ च जनानामवितारौ भवतः ।

पुरुभुजा, पुरुदंससा, द्रवत्पाणी, दस्रा [१. ३. १-३] । दंसिष्ठा [१. १८२. २] । पुरुभूतमा पुरू दंसांसि बिभ्रता [५. ७३. २] । पुरुभुजा [५. ७३. १] । पुरुभोजसा [८. २२. १६] । पुरुमन्तू १. ४७. १०] । पुराजा [७. ७३. १] । पुरुमन्द्रा [८. ५. १२] । पुरुशाकतमा [६. ६२. ५] । च्यवाना [६. ६२. ७] । इन्द्रतमा [१. १८२. २] । उग्रा [१. १५७. ६] । यज्ञम् आचक्रमाणा [६. ६२. २] । दीदग्नी शुचिव्रता [१. १५. ११] । मदच्युता [८. २२. १६] । कामप्रेणेव मनसा चरन्ता [१. १५८. २] । विश्ववारा [७. ७०. १] । विश्ववेदसा [१. ४७. ४] । विश्वगूर्ती (सर्वस्तुत्यौ, सर्वदा उद्गूर्णौ वा) [१. १८०. २] । धीजवना [८. ५. ३५] । निचेतारा च कर्णैः [१. १८४. २] ।

अच्युतगमनावश्विनौ सर्वं व्यश्नुवाते । तौ यज्ञमासमन्तात् व्याप्नुतः । अतो यो यद्धविषा स्तोमेन च याचते स तल्लभते । अश्विनौ दुर्बलं बलिनं कृत्वा तस्याभीष्टं साधयतः । तौ समानेऽहनि त्रिरवगोहनौ । प्रातः सायं मध्याह्ने मध्यरात्रे च यज्ञनिर्वाहेण, अश्विनोः स्तुत्या पापापनोदनं कर्तुं शक्यते ।

अश्विनौ विपरीतं न वित्तः । तयोः रातिः दानं गतिश्च विभुः । मनीषिणस्तावभिमुखं नियच्छन्ति [१. ३४. १] । तौ मनसा रथयतः [१. ११२. १८] । कामानां वर्धकौ तौ स्तोतुर्मनीषां (वेदार्थसमर्थां बुद्धिं) कुरुतः सूर्योद्गमनात् पूर्वमेव [१. ११२. २४] । अश्वैर्विनापि अश्विनो रथो गच्छति [१. १२०. १०] । स्वश्वेन (शोभनाश्वेन) रथेन तौ सद्यः रजांसि लोकान् परियातः [४. ४५. ७] ।

षष्ठोऽध्यायः

अश्विनोर्भैषज्यम् अवनं च[1]

अश्विनोः भैषज्यम् ।

अश्विनो भैषज्यं प्रार्थ्येते । भिषजौ तौ भिषज्यतो भेषजैः, विविधेभ्यः स्थानेभ्यः आनीतैः । युवं ह स्थो भिषजा भेषजेभिः [१. १५७. ६] । "भिषज्यतं यदातुरम्" [८. २२. १०] । नष्टेन्द्रियस्य वीर्यधारणं, विकलाङ्गस्य क्षतिपूरणं तयोरेकविधं भैषज्यम् । पङ्गुत्वम् छिन्नपादत्वं वा विकलाङ्गत्वम् । तच्चिकित्सया जंघाप्रदानेन वा तौ भिषज्यतः । चक्षुःश्रोत्रयोः ज्ञानेन्द्रिययोः वैकल्यं चक्षुष्प्रदानेन श्रोत्रधारणेनाऽश्विनौ भिषज्यतः । वृद्धस्य जीर्णस्य युवत्वसम्पादनेन, त्वग्रोगपीडितस्य शरीरकान्तिप्रदानेनाश्विनौ भिषज्यतः । [१. ११६. १६; ८. ८६. १; १०. ३९. ३] ।

भेषजानि कुतः ।

अश्विनोर्भैषजं समीपे दूरे च भवति । सेनाजुवेन रथेन अर्भकाय विमदाय जायां यूहं प्रापयामासतुरश्विनौ [१. ११६. १] । विगतमदाय तस्मै दूरस्थेनान्तिकस्थेन च भेषजेन सहितं यूहं च न्ययच्छताम् । प्रकृष्टज्ञानौ अश्विनौ यथा विमदाय यूहं ददतुस्तथा वत्सायापि ।

> यन्नासत्या परावति अर्वाके अस्ति भेषजम् ।
> तेन नूनं विमदाय प्रचेतसा छर्दिर्वत्साय यच्छतम् ॥ [८. ९. १५]

शारीरं रोगं चाश्विनौ दूरीकुरुतः—स्तोतृभ्यः पृथक् कुरुतः ।

युयुतम् अस्मद् अनिराम् अमीवां दिवा नक्तं माध्वी त्रासीथां नः [७.७१.२] ।

ऋबीसाद् अत्रिम् अश्विनौ अमोचयताम् । तत्र ऋबीसे तप्तं घर्मं हिमेन प्रशमय्य पितुमतीम् ऊर्जम्, ओमानं चित्रं भोजनं च तस्मै अदत्ताम् ।

१—आ न ऊर्जं वहतम् अश्विना युवं मधुमत्या नः कशया मिमिक्षतम् ।
प्रायुस्तारिष्टं नी रपांसि मृक्षतं सेधतं द्वेषो भवतं सचाभुवा ॥
युवं ह स्थो भिषजा भेषजेभिरथो ह स्थो रथ्या राथ्येभिः ।
अथो ह क्षत्रम् अधि धत्थ उग्रा यो वां हविष्मान् मनसा ददाश ॥
[१. १५७. ४; ६]

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जम् अस्मा अधत्तम् [१. ११६. ८]।

अत्रये······ऊर्जम् ओमानम् अधत्तम् । [१. ११८. ७]।

अदितिस्वरूपौ राजानौ अश्विनौ यं पुरुषं पत्न्या सह पुरोरथं कुरुतः, स न कुतश्चन पापेन लिप्तो भवति, न वा दुर्गतिं प्राप्नोति, न वा तं भयं व्याप्नोति [१०. ३९. ११] । अश्विनोरेतस्मिन् रथे मिथुनीभूतानि त्रिविधान्यन्नानि भवन्ति । तुरीयत्वेन मधुपूर्ण एको दृतिर्विराजति [४. ४५. १] । अनेन रथेन विश्वान् पयः स्वधया (अन्नेन) अश्विनौ प्रज्ञापयतः [४. ४५. ६] ।

अत्रेः घर्मं, दहन्तमग्निम्, अश्विनौ "अरेपसं" गतोष्मं सुखकरं कृतवन्तौ । अश्विभ्यां दत्तेन "आस्ना" उदकेन अत्रिः तं घर्मं सुखकरं घृतवान् । [५.७३.६]।

अश्विनौ अत्रिम् अग्निकुण्डात् ऋबीसेऽवनीतं अमोचयताम् । तौ भुज्युं समुद्राद् उदतारयताम् । समुद्रात् तरणं नौभिः यत्र भुज्योः उदकेन संपर्को न भवति । ऋबीसाद् अत्रिं मोचयितुमश्विनौ रथं नावं वा न युङ्क्तो अपितु शीतेन पदार्थेन अग्नेस्ताप प्रशमयतः । तापेन दग्धम् अत्रिं "पितुमत्या ऊर्जा" अन्नप्रदेनाम्र-रसेन, सुखकरेणान्नरसेन वा अश्विनौ मोचितवन्तौ । हिमेन शीतलेनाग्निमत्रेः पृथक्कृत्य, अत्रये सुखकरम् अवनम् अश्विनावदत्तां, यमवनम् "ओमानम्" अत्रिः प्रियः सन् अधत्त [७. ६८. ५]।

भेषजानां स्वरूपम् उपयोगश्च ।

अश्विनोर्भेषजानि त्रिविधानि दिव्यानि, पार्थिवानि, अप्सु संभवानि (अन्तरिक्षलोकजातानि) च । तयोरोमानम् (अवनम्) त्रिधातु शर्म (वात-पित्तश्लेष्मधातुत्रयशमनविषयं सुखं) भवति यतोऽश्विनौ शुभस्पती (शोभनस्यौषधस्य पालकौ) भवतः [१. ३४. ६]। यो हविष्मान् मनसाऽश्विभ्यां ददाति, तस्याधिकं बलम् उद्गूर्णं सामर्थ्यं चाश्विनौ धत्तः । [१. १५७. ६]।

पठर्वा जठरस्य (उदरोपलक्षितशरीरस्य) मज्मना (बलेन), अज्मनि काष्ठैः संदीप्तः चित इद्धः अग्निरिव संग्रामे दीप्यते । अश्विनौ शरीराग्निं यज्ञाग्निं इव दीपयतः । [१. ११२. १७]।

दैव्यौ भिषजौ[1] सन्तौ अपि, तौ मानवानामपि रोगान् शमयतः । रोगान् प्रशमय्य, पापं पृथक्कृत्य अश्विनौ शत्रून् अपगमयतः [८. १८. ८]। योऽप्यातुरस्तमश्विनौ भिषज्यतः । तयोरधिकतरः कोऽपि नास्ति [८. २२. १०]।

---

१. दैव्या भिषजा शं नः करतो अश्विना [८. १८. ८]। अश्विनौ रुद्रौ रुद्रवर्तनी च । रुद्रविषये श्रूयते—यो विश्वस्य क्षयति भेषजस्य । [५. ४२. ११]। भिषक्तमं त्वा भिषजां शृणोमि [२. ३३. ४]।

कुष्ठरोगग्रस्तां घोषां चिकित्सितवन्तौ अश्विनौ । अशनरहितां निकृष्टामपि तां चिकित्सितवन्तौ । अश्विनौ अन्धस्य, दुर्बलस्य, अव्यक्तं जल्पतश्च भिषजौ इति श्रुतिः ।

"अमाजुरश्चिद् भवथो युवं भगोऽनाशोश्चिद् अवितारापमस्य चित् ।
अन्धस्य चिन्नासत्या कृशस्य चिद् युवामिदाहुर्भिषजा रुतस्य चित् ॥"

[१०. ३९. ३]।

अमाजुरः पितृगृहे जूर्यन्त्याः । अनाशोः अनशनस्य । अपमस्य जात्यादिनिकृष्टस्य । रुतस्य । ऋतस्य चिद् यज्ञस्यापि भिषजौ । [सायणः] ।

रुतस्य चिद् रोगेणार्तस्यापि [उद्गीथः] ।

रोगाद् रुदतश्च । [वे. मा.]

वृष्टिद्वारा अन्नं संपाद्य गर्भरेतसः पोषणेन भूतजातेषु अश्विनौ गर्भं धत्तः ।

निवृत्तप्रसवां गां पयःपूरणेन धेनुं (क्षीरप्रसवसमर्थां) कुरुतः । अग्निम्, अपः, वनस्पतीन् चाश्विनौ प्रवर्तयतः । इदमपि अश्विनोरेकविधं भैषज्यम् । पयः, अन्नं, यजमानाश्च विना यज्ञो न भवति । अत एतानि त्रीणि वीर्यवन्ति कुर्वाणौ अश्विनौ यज्ञभिषजौ भवतः । अनेन भैषज्येन अश्विनौ गतिं बलं च हविष्मते दत्तः । [१. १५७. ५–६] । केवलैः स्तोत्रैरश्विनोः पोषणं भेषजं वा न लभ्यते । तौ "हविष्मन्तं हि गच्छथः" [८. ९. ६] ।

आतुरं (रोगिणम्) अश्विनौ भिषज्यतः । तत्र त्रेधा भैषज्यं भवति । एकेन पक्थः, एकेन अध्रिगुः, एकेन बभ्रुश्च चिकित्स्यते ।[1]

1—पक्थः । पक्थाः हविषां पाचका इन्द्रमभिष्टुवन्ति । इन्द्रः तुरसुभ्यः हिंसकेभ्योः गोसंघान् आनयत् [७. १८. ७] ।

[८. ४९. १०] अस्यामृचि अश्विनोः सम्बन्ध एव नास्ति । अश्विभ्यां इति पदं दृष्ट्वा कदाचिद् भ्रान्तिर्जाता मार्कडोनेलमहोदयस्य ।

[१०. ६१. १] अत्र पक्थो न पुरुषवाचकः, न चाश्विभ्यां रक्षितः । अत्र पक्थशब्दोऽह्नो विशेषणम् । "पक्थे अहन्ना सप्त होतॄन्" । नाभानेदिष्टम् आर्षम् । अङ्गिरसः सत्त्रमासीनाः षष्ठेऽहनि मुह्यन्ति । अस्मिन् पक्तव्ये षष्ठेऽहनि बहुशीयनेन स्तोत्रेण तान् सप्त होतॄन् (अङ्गिरसः) सर्वतोऽपूरयत् नाभानेदिष्ठ ऋषिः । एवमत्र पक्थशब्दः पक्तव्येऽर्थे प्रयुक्तः । पक्थे पक्तव्ये अहन् अहनि षष्ठेऽहनीत्यर्थः [सायणः] ।

अध्रिगुः । [८. १२. २] अत्र दृशग्वम् अध्रिगुं, वेपयन्तं स्वर्णरं, अमुरं च सोमपानजनितेन मदेन इन्द्रो रक्षितवान् । "अधृतगमनः" सायणः—[८. २२. १०] अध्रिगुम् अधृतगमनं, अनिवारितगतिं,

यामिः पक्थम् अवथो याभिरध्रिगुं याभिर्बभ्रुं विजोषसम् ।
ताभिर्नो मक्षू तूयमश्विना गतं भिषज्यतं यदातुरम् ॥ [८. २२. १०] ।

अत्र याभिरिति सर्वनाम्ना किं परामृश्यते ? ऋचि भिषज्यतम् इति श्रवणात् ओषधीभिरिति पदमध्याहार्यं स्यात् । प्रकरणतोऽत्र इषो गृह्यन्ते, पूर्वस्याम् ऋचि "युञ्जाथां पीवरीरिषः" [८. २२. ९] इति श्रवणात्[1] ।

अथाश्विनोरवनम् ।

अश्विनौ पापाक्लिष्टतनूवन्तौ स्वैर्नामभिर्युक्तौ [१. १८१. ४], अवरत्वरहितौ अजरौ, अमर्त्यौ, निरपत्रपौ, सर्वज्ञौ, अभूतगमनौ, समनस्कौ, पुरुकामौ, घृतस्य उदकस्य पालयितारौ, कामानां वर्षकौ, वृषभं शिंशुमारं (ग्राहं) चैकस्मिन् रथे योक्तुं समर्थौ, रासभेनाऽऽजि जेतारौ, त्रिवृता त्रिचक्रेण रथेन सद्यो रजांसि परितो गच्छन्तौ, सर्वदेवसहभूतौ, रसज्योतिभ्यां सर्वं व्यश्नुवानौ स्तः । अतस्तौ सर्वविधाभिरूतिभिः सर्वविधं रक्षणं कर्तुं सततमुद्यतौ भवतः ।

यदा घर्मः सोमेन पयसा परिषिच्यते तदाश्विनौ आवरकं कूपं हन्तव्यतया जानीतः [८. ९. ४] ।[2]

आङ्गिरसस्य कुत्सस्यार्षं पञ्चविंशत्यृचं सूक्तं संपूर्णं प्रवर्ग्यस्य अभिष्टुतौ विनियुज्यते । अश्विनौ ऊतिभिः रक्षित्वा सर्वान् कामान् प्रापयतः । अतोऽनेन सूक्तेनाभिष्टवे सति यज्ञो यजमानस्य समृद्धो भवतः । प्रवर्ग्यसंभारे चत्वारि आश्विनसूक्तानि विनियुज्यन्ते ।

घृतस्नं चर्षिम् [सायणः ८. २२. २] । अश्विनावापञ्च देवानां शमितारौ [तै. ब्रा. ३. ६. ६. ४] ।

बभ्रुः । बभ्रुधृतान् सोमान् इन्द्रः पीत्वा पुरन्दरोऽभवत् । इन्द्रश्च बभ्रवे क्षीरम् उपस्राविणीः गाः अददात् [५. ३०. ११] । असौ चत्वारि सहस्राणि गोरूपाणि धनानि ऋणंचयादाप्नोत् [५. ३०. १२; १४] ।

मित्रावरुणौ बभ्रुणा सुतं गव्याऽऽशिरो भुङ्क्तः ।
"यौ गच्छथो नृचक्षसौ बभ्रुणा सुतं तौ नो मुञ्चतमंहसः ।"
[अ. वे. ४. २९. ४] ।

बभ्रुं विजोषसम् [८. २२. १०] । विजोषेण सोमैः प्रीणयन्तम् ।

१—द्र. इद् परिशिष्टम्—१०

२—घर्मः स्तोमेन परिषिच्यते सोमो मधुमान् येन वृत्रं चिकेतथः [ऋ. ८. ९. ४] ।
स्तोमेन स्तोत्रेण ऋक्सामरूपेण परिषिच्यते आर्द्रीक्रियते ।
यद्वा स्तोतव्येन पयसा आसिच्यते [सायणः] ।

१. काक्षीवत आर्षम्…… …१. १२०. १—९ [द्वादशर्चं सूक्तमिदम्]
२. भौमस्याऽत्रेरार्षम्………५. ७६. १—५
३. गृत्समदस्याऽऽर्षम्………२. ३९. १—८
४. कुत्सस्य आङ्गिरसस्यार्षम् १. ११२. १—२५

तत्र प्रथमं सूक्तं उदरगतावयवस्वरूपं प्रवर्ग्यस्य । कश्चनावयवः क्षुद्रः कश्चन अणीयान्, कश्चन स्थवीयान् । तद्रूपमत्र सूक्ते विच्छन्दस्कत्वम् । "एताभिर्हाश्विनोः कक्षीवान् प्रियं धामोपागच्छत् स परमं लोकमजयत्" [ऐ. ब्रा. ४. ४]

द्वितीयेन सूक्तेन घर्मः परिवृद्धो भवति । तृतीयेन सूक्तेन घर्मस्य अङ्गानि चक्षुरादीनि प्रतिनियतानि भवन्ति । चतुर्थेन सूक्तेन ऊतिभिः कामैश्च यजमानस्य समृद्धिर्भवति ।

अवनरीतिः ।

अश्विनोरूत्योऽश्विकामेन प्राप्नुवन्ति "मक्षूंगमाभिरूतिभिः" [८. २२. १६]। विश्वस्यावनकर्यो रथः तम् आवहति [१. १५७. ३]। पापरहितौ अश्विनौ शत्रूणां हन्तारौ सूनृतस्य भावयितारौ च [८. ८. ९]। सुवृक्तयः स्तोमाः वाञ्छानि च यदाश्विनौ वर्धयन्ति, तदा तौ बहूनां त्रातारौ शत्रूणां हन्तृतमौ च भवतः ।

अथ सूक्तेनैकेनाश्विनोरवनकार्यं प्रदर्श्यते । ऋषिरस्य सूक्तस्य शशकर्णः काण्वः । अष्टमे मण्डले एकविंशत्यृचं विच्छन्दः सूक्तं नवमम् [८. ९. १—२१]।

ऋ. १. अश्विनौ अवृकं (बाधकरहितं) पृथु छर्दिः (गृहं) दत्तः । अरातिम् (अदानशीलं) पृथक् कुरुतः स्तोतृभ्यः ।

ऋ. २. यद् दिवि, यदन्तरिक्षे, यत् पञ्चमनुष्यान् अनु नृम्णं (धनं) तत् त्रिविधं तौ दत्तः ।

ऋ. ३. अश्विसम्बन्धीनि यानि कर्माणि मेधाविनो यजमानाः परि मृशन्ति, काण्वोऽपि तादृशं परिचरणम् अश्विनोः करोति ।

ऋ. ४. घर्मः स्तोमेन (पयसा) परिषिच्यते, येन वृत्रं हन्तव्यतयाऽश्विनौ जानीतः ।

ऋ. ५. अप्सु, वनस्पतौ, ओषधीषु यद् भेषजं (कृतं) तेनावतः ।

ऋ. ६. अश्विनोः भरणं पोषणं च हविष्मान् प्राप्नोति, न केवलः स्तोता ।

ऋ. ७. वननीयया बुद्ध्याऽथर्वणा निर्मथितेऽग्नौ मधुमन्तं घर्मं (प्रवर्ग्यसंबन्धि हविः) सोमं सिञ्चति (क्षिपति) यजमानो, येनासौ अश्विनोः स्तोमं जानाति ।

ऋ. ८. रथवर्तनि रथं सूर्यं इव तेजोऽश्विनौ यदाश्विनौ आतिष्ठतः तदा स्तोमः तौ प्यायतीव पृथिवीमनु ।

ऋ. ९. उक्थैः, वाणीभिः (शस्त्रैः स्तुतिभिः) वा कथं तौ आगमयेद् इति तौ बोधयतः ।

ऋ. १०. कक्षीवान्, व्यश्वः, दीर्घतमाः, पृथी वैन्यः इत्येते चत्वार ऋषयो यथा अश्विनौ जुहुवुः, तथा कण्वः स्तुतिं करोति ।

ऋ. ११. गृहस्य पालकौ, अतिशयेन (परस्तात्) पालकौ, जङ्गमस्य प्राणि- जातस्य पालकौ, शरीरस्य पालकौ च भवतः तथा पुत्रस्य पौत्रस्य च गृहं यातः ।

ऋ. १२. इन्द्रेणैकं रथमारूढौ, वायुना सहैकस्मिन् गृहे निवसन्तौ, विष्णोर्विक्रमणेषु तिष्ठतः ।

ऋ. १३. वाजसातयेऽश्विनौ हूयेते । संग्रामे शत्रूणाम् अभिभवितृ रक्षणं तयोः श्रेष्ठोऽस्ति ।

ऋ. १४. हव्यानि अश्विभ्यां विहितानि । सोमाः तुर्वशे यदौ कण्वेषु च ।

ऋ. १५. दूरस्थं समीपस्थं भेषजं विमदाय प्रयच्छतः प्रचेतसौ (प्रकृष्टज्ञानौ) अश्विनौ ।

ऋ. १६. ऋषिरश्विनोर्दैव्या वाचा प्रबुद्धः । उषा ऋषेर्मतिमभिलक्ष्य तमांसि अपगमयति, रात्रिं च मर्त्येभ्यः प्रकाशयति ।

ऋ. १७. सूनृता (सुष्ठु नेत्री) उषाः प्रकाशमयी अश्विनौ प्रबोधयति । यज्ञस्य होता सततमश्विनौ प्रबोधयति । अश्विनोर्मदाय बृहत् श्रवः कल्पितम् अस्ति ।

ऋ. १८. उषा अग्रे गमनेन सूर्येण सम्यग् रोचते । तदाश्विनोः रथो नृपाय्यं वर्तिरा- याति । नृपाय्यं वर्तिः । नृभिर्नेतृभिः ऋत्विग्भिः पालनीयं यज्ञगृहम् इति सायणः ।

ऋ. १९. आपीता अंशवो दुहते (रसं) गाव ऊधभिरिव ।[1] वाण्यो देवान् कामयमानाः स्तुवन्ति ।

ऋ. २०. प्रचेतसौ अश्विनौ, द्युम्नाय (द्योतमानाय अन्नाय यशसे वा), शवसे (बलाय), नृषाह्याय शर्मणे[2] (नृभिः सोढव्याय सुखाय) दक्षाय (वृद्धये) च प्ररक्षतः ।

१—"यदा रसेन आपीता अंशवः स्वरसं दुहन्ति गाव इव पय ऊधभिः ।"

[वे. भा. ८. ९. १९]

२—नृषाह्याय शर्मणे [८. ९. २०] ।

उभा पिबतम् अश्विनोभा नः शर्म यच्छतम् ।

ऋ. २१. अश्विनौ पितुर्योनौ पालयितुर्द्युलोकस्य सम्बन्धिनि स्थाने, अथवा पालयितुः यजमानस्य यज्ञगृहे निषीदतः। स्तुत्यर्हावश्विनौ सुखैः सुखकरैः हविर्भिः वा युक्तौ भवतः।

अत्रायं विमर्शः।

१. निर्बाधो वासः। २. बलम्।

३. ज्ञानम्। ४. हविः।

५. अप्सु वनस्पतौ ओषधिषु प्रवृत्तिः। ६. अश्विनोर्भरणं भेषजं च हविषा।

७. आथर्वणेऽग्नौ सोमं सिञ्चन्नृषिरश्विनोः स्तोमं जानाति।

८. स्तोमोऽश्विनावानयति।

९. तौ तयोरागमनरीतिं वाणीभिर्बोधयतः।

१०. चत्वार ऋषयोऽश्विनौ आह्वयन्ति—कक्षीवान्, व्यश्वः, दीर्घतमाः, पृथी वैन्यः।

११. अश्विनौ क्रमशः छर्दिष्पौ, परस्पौ, जगत्पौ, तनूपौ च भवन्तौ तोकस्य तनयस्य गृहम् आ यातः।

१२. अत्र चत्वारि स्थानानि—(१) इन्द्रेण सहैकरथारोहणं। (२) वायुना सहैकनिवासः। (३) आदित्यैर्ऋभुभिः सह संगतिः। (४) विष्णुना सह विक्रमणम्।

यदिन्द्रेण सरथं याथो अश्विना यद् वा वायुना भवथः समोकसा।
यदादित्येभिर्ऋभुभिः सजोषसा यद् वा विष्णोर्विक्रमणेषु तिष्ठथः॥ [८.९.१२]

ऋचः १०; ११; १२; २०

१०	कक्षीवान्[1]	व्यश्वः	दीर्घतमाः	पृथी वैन्यः
११	छर्दिः	परः	जगत्	तनूः
१२	इन्द्रः	वायुः	आदित्याः, ऋभवः	विष्णोः विक्रमणानि
२०	द्युम्नः	वाजः	शर्म	दक्षः

अश्विद्विषाभिरूतिभिः॥ [१. ४६. १५]

त्रिधातु शर्म वहतं शुभस्पती [१. ३४. ६]।

"त्रयाणां धातूनां समाहारः त्रिधातु। पृथिव्यप्तेजोरूपधातुत्रय-विशिष्टं यथा भवति तथा।" [सा. १. १५४. ४]।

१—कक्षीवान् कक्ष्यावान् अश्विनोरश्वानां प्रग्रहवान्। व्यश्वो विगताश्वः।

१३. अश्विनोः अश्वाः।

१४. त्रिषु स्थानेषु नाम—तुर्वशे[1] यदौ, कण्वे च।

यदेन्द्रो नदीरूपेणाऽऽत्मानं प्रवर्तयति, तदा समुद्रमभ्यतिक्रम्योदकं पूरयति। अथ तुर्वशं यदुं स्वस्ति (अविनाशं) पारयति [१. १७४. ९]। पारे नदीनां तुर्वशः अप तुर्वशाय, यदवे इन्द्रो रमयति [५. ३१. ८]। अग्निना सह तु स्वासवयौ राजान आहूयन्ते—तुर्वशो यदुरुग्रदेवश्च।

अग्निस्त्रीन् अन्यांश्च राज आनयति—नववास्त्वः, बृहद्रथः तुर्वीतिः [१. ३६. १८]। धनेन तुर्वशं यदुं धनस्पृतं (धनकामं) कण्वं च मघवा प्रवितवान्ः [८. ७. १८]। यत्र मनो इन्द्रश्च प्रवर्तन्ते, तत्र इन्द्रतमौ मनसो अश्विनौ अवश्यं हविर्गृह्णीयातम् अनग्रहबुद्ध्या सोमं च पिबेताम् [१. १८ २]।

१५. दुरस्थं मनीषिः भेषजं विमदाय। अस्मै विमदाय जायां वहतोऽश्विनौ [१. ११६. १]। सा च जाया पुरुमित्रस्य योषणा कन्या।

एवं रथेन कन्यं यजमानयुवं न्यूहथुः पुरुमित्रस्य योषणाम् १ ११.७[2]।

१६. अश्विभ्यां सर्वावयवभेषजप्राप्त्याऽश्वसंबन्धिनी दिव्या च कन्या प्रबुद्धा भवति। अश्वयाः यादृशी मतिः तादृशि तमांसपतमः यत्र मर्त्यो रयिं (धनं) प्राप्नोति।

१७. अश्विनोर्वाचा नरः यज्ञस्य होता भवति, येन यज्ञस्य ... दाय कल्पते।

१८ उषाः सूर्येण सामा भवति। अश्विनोरागमनेन इदानीं वतिः गृहं नृपाय्यं[3] भवति।

अतो दीर्घतमाः। अथ द्विष्यस्य ज्योतिषः प्रथनम्। वेनवचनाद्वैद्यः। वेनासम्बन्धी ' अयः पवयो मधुवाहने रथे सोमस्य वेनामनु विश्व इद् विदुः" [१. ३. २]। सोमस्य भार्यां वेनामभिलक्ष्य धावत्याम् आश्वनोरेतादृशं रथं सर्वं देवा जानन्ति।

१ अथ तुर्वशे [१ ...] अधिके समीपे। सायणः]।

२—कमद्युवं विमदायोहथुर्युवम् [१०. ६५. १२]। कामस्य दीपनीं वेनपुत्री जायां विमदाय युवम् अहथुः प्रापयथः। (सायणः) [...]। कमद्युवम्। कामस्य दीपनीं जायाम्। [पे. मा.] कामावनत्यां युवति भाय्याम्। [उद्गीथः]।

३—नृपाय्यम्। नर नराः इन्द्रियाणि गृह मान्ति, गृहं तेषां मानं भवति। अत्र मानार्थं पाय्यशब्दो वर्तते। पाय्य-सान्नाय्य-निकाय्य-धाय्या मान-हविर्-निवास-सामिधेनीषु [पा. ३. १. १२९]। पाय्यं मानं, मयम्

१९. अंशवो दुहते । वाण्यः स्तुवन्ति । अत्रांशवो वाण्यश्च स्वयं कर्तारः ।

२०. द्युम्नाय, शवसे, नृपाह्याय शर्मणे, दक्षाय चाश्विनौ प्रचेतसौ भवतः । यज्ञे हुतः सोमः, स्तुतः स्तोमश्च यदा दिवं प्राप्नुतः तदा द्युम्नादिभिः चतुर्भिरश्विनोः अवनं भवति ।

२१. विवस्वतः समुत्पन्नौ अश्विनौ जायया सह विमदं नीत्वा स्वपितुर्योनौ सूर्यमण्डले निषीदतः । तत्रावस्थाय सुखेन शस्त्रं शृणुतः । पृथिवीतः सोमः स्तोमश्चेदानीं दिवमारूढवन्तौ ।

अन्यत् । [काशिका] । मीयतेऽनेन पाय्यं मानम् । ण्यत् धात्वादेः पत्वं च । "आतो युक्—" [पा. ७. ३. ३३] इति युक् । [सि. कौमुदी] ।

नृपाय्यं वर्तिः । नृभिर्नेतृभिः ऋत्विग्भिः पालनीयं यज्ञगृहम् ।

[सायणः—८. ९. १८] ।

सप्तमोऽध्यायः

अश्विभ्यां हवींषि अश्विनोर्दानानि च।

अश्विभ्यां हवींषि।

यज्वरीः इषः, यागनिष्पादकानि हविर्लक्षणान्यन्नानि अश्विनौ कामयेते [१. ३. १]। दासीः पूर्वीः अदमन्तौ (धनुसम्बन्धिनीः पुरीः भञ्जयन्तौ, भञ्जन्तौ, व्याप्नुवन्तौ) तौ इषः अन्नानि आवहतः [८. ५. ३१]। विरवमना वैयश्वः (विगताश्वस्य पुत्रः) रात्रेरतिक्रमे बहून्यन्नानीच्छन्तौ अश्विनौ आह्वयति [८. २६. ३]। अश्विनावन्नेन यमं योजयतः। इषा रयिं पृङ्क्तम् [८.५.३५]। वसतीवरीप्रभृतिभिः द्रव्यैः मिश्रिताः सोमाः सूयन्ते [१. ३. १.]। अश्विनौ "मधुपेभिः आसभिः" मधुपानयुक्तैर्मुखैर्मधूनि हवींषि पिबतः [१. ३४. १०]। सोम्यं (सोममयं) मधु पिबतः [७. ७४. २; ८. ८. १]। ऋतं वर्धयद्भ्यामश्विभ्यां मधुमत्तमः सोमो दीयते [१. ४७. १; ३]।

अश्विनोर्मधुपानमनु ऋतवृद्धिः। तमसि लीनं तमो मधु, यन्मादकं भवति। यदाश्विनौ तन्मधु पिबतः तदा तत् तम एव ऋतात्मना परिणमति।

अश्विनौ कामयमानः सोमो मधुमत्तमः अतिशयेन मधुरसं प्रेरयन् भवति "युवाकुः मधुमत्तमः" [३. ५८. ९]। ऋते प्रकाशमानं ज्योतिरेव सोमः। अश्विभ्यां मधुनो निधयो दीयन्ते [१. १८३. ४]। यदाऽग्रे सूर्यं उदेति तदा गोऋजीकानि (गवां पयसा मिश्रितानि) मधूनि अश्विभ्यां दीयन्ते [३.५८.४]। तिरोहिते पूर्वस्मिन्नहनि, अपरेद्युरश्विभ्यां हूयमानः सोमः तिरो अह्न्यः इत्युच्यते [१. ४७. १; ३. ५८. ७; ८. ३५. १९–२१]।

सोमस्याधारभूता पात्रविशेषाः—द्रोणकलशः, आधवनीयः, पूतभृत् च—सवनत्रयगतैर्हविर्भिः युक्ता भवन्ति [१. ३४. ८]। हविरास्तीर्णेन बर्हिषा युक्तं भवति, स्तुतिलक्षणा वाक् च भवति [१. ११७. १]। स्तुतिं कुर्वन्तो देवान् कामयमाना यजमाना हव्यानि आभिमुख्येन प्रापयन्ति [१. १३९. ३]। यदा जनेषु आङ्गूषः [देवान् प्राप्नुवन्नाघोषः, स्तोत्रं] भवति, तदा रजांसि (उदकानि, लोकान् वा) स्वतेजसा तिरस्कुर्वन्तौ मधुमन्तौ अश्विनौ मधुना निधीन् वहन्तौ देवयानैः पथिभिरायातः [३. ५८. ५]। "पीपिवांसं घर्मं" [स्वाङ्गैः परिवृद्धक्षरद्रूपं सोमरसं घृतादिना परिवृद्धं प्रवर्ग्यं हविः) अभिलक्ष्य अश्विनौ आयातः [५. ७६. १]। मधुमन्तं घर्मं (मदकरसोमयुक्तं महावीरपात्रस्थं क्षीरम्)

अश्विनौ पिबतः [८. ८७. २]। नमोवाकः[1] (नमस्कारयुक्तं वचो] अश्विभ्यां प्रोच्यते [८. ३५. २३]।

स्वाहाकृतेन सुतेन अन्धसा (अन्नेन) अश्विनौ तृप्यतः [८. ३५. २४]। कवेः पुत्रो मेधावी ऋषिर्वत्सो यदा माधुर्योपेतं वचः शंसति तदाऽश्विनौ सहस्ररूपयुतेन रथेनायातः।

अतः सहस्रनिर्णिजा रथेनायातमश्विना।

वत्सो वां मधुमद्वचोऽशंसीत् काव्यः कविः॥ ८. ८. ११।

वत्सो धीभिः गीर्भिश्च (परिचरणैः स्तुतिभिश्च) अश्विनौ वर्धयति ८.८.१९।

मन्त्राः, स्तोत्राण्यश्विनोर्वर्धनानि—

एतानि वामश्विना वर्धनानि ब्रह्म स्तोमं गृत्समदासो अक्रन् [२. ३९. ८]।

अश्विनोर्द्यावापृथिव्योरन्तरा प्रसादनहेतुभूतं साधनम् आघोषणीयं मन्त्ररूपं स्तोत्रं भवति।

'ब्रह्मा ह्रूयं सदनं रोदस्योः'' [१. ११७. १०]।

स्तोमोऽश्विनो रथ इव भवति [१०. ३९. १४]।

अश्विनोर्दानानि।

अश्विनौ यज्ञं मधुना सिञ्चतः [१. २२. ३; ३४. ३; ४७. ४; १५७.४]। यदा यज्ञगतदोषान् अश्विनौ गृह्णतः, तदा तौ यज्ञं मधुना सिञ्चतः। येन वाजवतीरिषः बलकारीणि अन्नानि यजमानो लभते [१. ३४. ३]। विश्ववेदसा सर्वज्ञौ अश्विनौ कल्याणमयेन आस्तीर्णेषु बर्हिःषु (दर्भेषु) अवस्थाय यज्ञं मधुना सेक्तुमिच्छतः। यजमानोऽत्राभिषुतसोमयुक्तोऽभिगतदीप्तिश्च भवति [१.४७. ४]। मधुमत्या कशया (वाचा, अश्वताडन्या वा) अश्विनौ सेक्तुम् इच्छतः। वृष्टया, अभिमतफलप्रदरूपया वाचा वा प्रीणयतः। मधुमती कशा रोदसी व्यासवतोरश्विनोः भवति। अनया कशया मधुसेकेन सोमस्याभिव्यक्तिर्भवेत् [१.२२. २–४]।

वसुविदौ (धनानां लम्भयितारौ) अश्विनौ [१. ४६. २), रथे वसु बिभ्रतौ यदा पृक्षः (अन्नं) वहतः, तदा पुरुस्पृहं (बहुभिः स्पृहणीयं) रयिं (धनं) अश्विनौ धत्तः। तं च रयिं समुद्राद् (अन्तरिक्षात्) उत वा दिवः पर्याहरतः [१. ४७. ६]।

स्वसा (स्वयं सारिणी उषाः) यदाश्विनौ पृणाति तदा तौ वाजम् इषं च (बलमन्नं च) दातुमुद्युक्तौ भवतः। मधुपानेनाश्विनौ ऋतप्सू (सत्यस्वरूपौ यज्ञ हविर्भक्षयितारौ) सन्तौ गवि पूर्वमवस्थितं पयः उस्रियायां पक्वं धत्तः।

१—उभयं वा एतद् यज्ञ एव यत्सूक्तवाकश्च नमोवाकश्च।

[शत. ब्रा. १. ९. १. ४]।

अश्विभ्यामुभाभ्यां व्याप्तं जगत्। तत्र प्रतिवस्तु एका गौः। अश्विभ्यां हविष्प्रदानेन सा गौः (स्वयं) दुग्धे। सा गौरामाऽपक्वाऽस्ति। अतस्तस्याः क्षीरमप्यपक्वमस्ति। अग्नौ हवनेन तत् क्षीरं पक्वं भवति। तदाऽऽमा गौरुस्रिया भवति। उस्रिया सा यस्या भोगा उत्स्राविणो भवन्ति। हविष्प्रदानेन पदार्था उत्स्राविणो भवन्ति। उषसः प्रकाशेन पदार्था उषोरूपं दधते। दिवि उषसो विराजनादेव पदार्था उषोरूपा न भवन्ति। भुवि पदार्थाः पार्थिवरजसा आप्लुताः। तत्र त्रिरश्विभ्यां दोषाणां गूहनमपेक्ष्यते, अश्विभ्यां मधुपानं मधुसेकश्च। पुनः तस्य पाकार्थमग्नौ होमोऽप्यपेक्ष्यते तदाऽऽमा गौरुस्रिया भवति।

इदानीमश्विनावृतप्सू भवतः। उषा यदाऽश्विनोः स्वसा (स्वसृस्थानीया स्वयं सारिणी) भवति तदाऽश्विनौ पूर्वं मधुपौ [१. ३४. १०], अधुना ऋतप्सू[1] भवतः। उषाः स्वसा भूत्वाऽश्विनौ ऋतेन पुष्णाति। अस्यामवस्थायां यजमानस्य सर्वं पयः पक्वं भवति। तस्य च गौरुत्स्राविणी भवति, न तु अपस्राविणी। [१. १८०. १–३]।

अत्र लब्धो रयिः इट् च पुनर्यज्ञे होतव्यौ भवतः। यतो यजमानस्य एतयोः प्रिययोः सतोरपि, अश्विनौ प्रेष्ठौ (प्रियतमौ) स्तः। अतोऽसौ अश्विनौ प्रार्थयतेऽध्वरेण इषं रयिं च नेतुम्। अश्विनौ इषां रयीणां तदा अध्वर्यतः, यदा तौ अप उन्नयतः।

कदु प्रेष्ठाविषां रयीणाम् अध्वर्यन्ता[2] यदुन्निनीथो अपाम् [१. १८१. १]।

सिन्धुमातरौ [१. ४६. २], ऋतप्सू [१. १८०. ३], स्यन्द्रा (स्यन्दनशीलौ)[3] [१. १८०. ९] अश्विनौ इषो रयीन् च अध्वरेण परिणमयतः। एतावध्वर्यन्तौ [१. १८१. १] देवानां अध्वर्यू। अत एवाऽनयोरेकः सुमखस्य सूरिः, अन्यो दिवः पुत्रः। [१. १८१. ४]।

१—ऋतप्सू। सत्यस्वरूपौ यज्ञियहविर्भक्षयितारौ वा। [सायणः १.१८०.३]।

२—अध्वर्यन्ता अध्वरं पारयितुमिच्छन्तौ [सायणः—१. १८१. १]।

द्र. कण्ड्वादिराकृतिगणः। सुख दुःख तत्क्रियायाम्। सुखयति। दुःखयति। सुखं दुःखं चानुभवतीत्यर्थः। [सि. कौमुदी "कण्ड्वादिभ्यो यक्" [पा. ३. १. २७] एवम्—अध्वर। तत् क्रियायाम्। अध्वर्यति। अध्वरं पारयति।

३—"स्पन्द्रा।" [१. १८०. ९] स्यन्दनशीलौ [वे. भा.]

"ऋग्वेदे सर्वत्र शुद्धो वैदिकः पाठः "स्पन्द्र" इत्येव वर्तते, परन्तु पं. मोक्षमूलरभट्टैः "स्यन्द्र" इत्येव सर्वत्र स्वीकृतः।"

द्र. सातवलेकरः—ऋग्वेद-मुद्रणस्य प्रस्तावे—पृष्ठम् (६)

अतः एनयोरेको मध्व इष्णन् (मधु इच्छन्) बहुधः इषः चरति भक्षयति, हवीरूपेण उपरि प्रेरयति । अन्यस्याश्विनो गमनैः इषो वाजरूपेण नद्य इव ऊर्ध्वं गच्छन्ति । यदा एकोऽश्वी इषो रसरूपतामापादयन्, षड् रजांसि व्याप्नुवन् अतीत्य तानि मधु प्रेरयति "निष्पाट् मध्व इष्णन्", तदाऽन्योऽश्वी तान् रसान् वाजरूपेण ऊर्ध्वं नयति [१. १८१. ६[1]]

अश्विनौ नासत्यौ तद् वर्तिः आगच्छतः, यद् नृपाय्यं, गोमद् अश्ववच्च भवति । अथाश्विनौ तद् धनं प्रापयतो यद् धर्षितुं दूरस्थोऽन्तिकस्थो वा मर्त्यो रिपुः न शक्नुयात्, दुःशंसः सन्नपि (नाम्नापि यस्य शमनं दुष्करं भवति) । तद्धनं, स रयिः नानारूपो धनस्य लम्भकश्च भवति [२. ४१. ७-९] ।

रयिः पुरुवीरो बृहत् (बहुपुत्रोपेतो महान्) च [४. ४४. ६] । अश्विनोः परिचारकेषु मर्त्येषु (मर्त्यान् प्रति) देवानां यदि क्रोध सजायेत, तर्हि तं क्रोधं रक्षोभिर्युक्ताय यज्वने (यज्वनः) आहन्तारं कुर्युं त्रयस्त्रिंशद्देवाः—आदित्या रुद्रा वसवो द्यौश्च पृथिवी च ।

आदित्याः	१२
रुद्राः	११
वसवः	८
द्यौः पृथिवी च	२
	३३ देवाः ।

यद् रोदसी प्र दिवो अस्ति भूमा हेळो देवानाम् उत मर्त्यत्रा ।
तदादित्या वसवो रुद्रियासो रक्षोयुजे तपुरघं दधात ॥ [६. ६२. ८] ।

अश्विभ्यां दीयमानो रयिः शतसंख्योपेतः, सहस्रसंख्योपेतः, बहुनिवासः, विश्वेषां धारकश्च भवति ।

1—प्रवां शरद्वान् वृषभो न निष्षाट् पूर्वीरिषश्चरति मध्व इष्णन् ।
एवैरन्यस्य पीपयन्त वाजैर्वेषन्तीरूर्ध्वा नद्यो न आगुः ॥ [१. १८१. ६]
"शरद्वान् । शरणवान् । मेघवृक्षपर्णादीनां विशरणवान् । वृषभः । वर्षिता । निष्षाट् शत्रूणां निःसारयिता । पीपयन्त आप्याययन्ति हविर्भिर्यजमानाः ।" (सायणः) । निष्षाट् । षड्रजांसि व्याप्नुवन्, तान्यतीत्य वर्तमानः । [द्र. मथनेनोत्पादितैर्वाजैः (अन्नैः) घोषैः (स्तुतिभिः) च रजांसि (लोकाः) अन्यस्य अश्विनः हरी (अश्वौ) आप्याययन्ति । "हरी अन्यस्य पीपयन्त वाजैर्मथ्ना रजांस्यश्विना विघोषैः ।" [१. १८१. ५] । पूर्वीरिषः । बह्वीः पुरातनीर्वा इषः अन्नानि सस्यादीनि । [सायणः १. १८१. ६] "मध्वा रजांसि" [सातवळेकरः] ।

अस्मे आ वहतं रयिं शतवन्तं सहस्रिणम् । पुरुक्षुं विश्वधायसम् [८.५.१५] ।

गोमत्याः, अश्ववत्याः, हिरण्यवत्याः, इषः प्राप्त्या बन्धनाद् मोचनं शुनःशेपस्य [१. ३०. १७] ।

"इषः पृक्ष इषिधो अनु पूर्वीः[1] ।" "धेनुं न इषं पिन्वतम् असक्राम् ।" [६. ६३. ७–८] "ता नः पृङ्क्तम् इषा रयिम् ।" [८. ५. ३६] । इषः संपर्चनीया भवन्ति । इषा रयिः संपृच्यते । पूर्वीम् इषम् अनु उत्तरा इट् भवति । एवम् इषः इषिधः एषणीयाः अन्वेष्टव्याः भवन्ति । धेनुः प्रीणयित्री इषम् इट् असंक्रमणी विधेया । अस्याः आनुपूर्व्या क्रमणम् अपेक्ष्यते । अस्याः क्रमणम् रसरूपेण भवति । इषः रसाः भूत्वाऽश्विनोः रातिम् अनु गच्छन्ति । इषा पिन्विता धेनुः अश्विनोः रातिम् अनु रसान् गमयति । "रसाश्च ये वाम् अनु रातिम् अग्मन् ।" [६. ६३. ८] ।

अश्विनौ घृतैर्गव्यूतिं [गोसञ्चारभूमिम् उक्षतः [सिञ्चतः] [८. ५. ६] । वाजिनीवसू (अन्नबलधनयुक्तौ) अश्विनौ पीवरीः इषः (प्रवृद्धान्यन्नानि) वहतः [८. ५. २०] । अहर्विदौ अश्विनौ दिव्या इषः द्वारेणेव अपवर्षतः, वा इषो नदीरूपं दधते [८. ५. २१] । यदाश्विनोः रथः सर्वावयवत्वेन हिरण्ययो भवति [८. ५. २८–२९] तदा दासीः पूर्वीः (शत्रूणां पुरीः) अश्नन्तौ (भक्षयन्तौ व्याप्नुवन्तौ वा) दूरदेशात् अश्विनौ इषम् आवहतः [८. ५. ११] । अश्विनौ यत्र अहः प्रवर्तयतः, तत्र इषो वर्षणं कुरुतः [८. ५. २१] ।

"इषं नो वोळ्हमश्विना" [८. ३५. ४–६] ।

"प्रजां द्रविणम् ऊर्जं नो धत्तम्" [८. ३५. १०–१२]

"धत्तं रत्नानि दाशुषे" [८. ३५. २२–२४] ।

प्रवृद्धानि दुह्यमानानि पयांसि गोः ऊध इव अश्विनौ सुम्नैः (सुखैः सार्धम्) यजमानान् अलंकुरुतः [१०. १४३. ६] ।

[१०. १४३. १–६]

समुद्रे रजसः पारे प्रापितो भुज्युः रजः संभक्तुं प्रवर्तते । ऋते जीर्यमाणोऽत्रिः गन्तव्यं स्थानं प्रति अश्व इव बहिर्गमनाय मोचितः । कक्षीवान् दैर्घतमसो नूतनो रथ इव कृतः । अत्रेरश्वत्वं, कक्षीवतो रथत्वम् अनयोरविभाज्यं (परस्परं) सम्बन्धं द्योतयतः । कक्षीवान् नानाश्वप्रग्रहवान्, तस्य कक्ष्याः, स एव वा स्वयं रथः कृतः ।

१—पूर्वीः । पूर्वकाल्याः । भक्षणयोग्यानि उत्कृष्टानि च पूर्वमपि यानि वयम् उपकल्पितवन्तः । एवं तानि हवींषि प्रतीत्यर्थः । [स्कन्दः—६.६३. ८] ।

भुज्युर्विषयासक्तः, अत्रिर्विषयविरक्तश्चासीत् । विषयविरक्तोऽत्रिर्ग्रन्थिभिर्बद्ध आसीत् । तान् ग्रन्थीन् अश्विनौ विश्लथय्य अत्रिं विषयेभ्यो मोचयामासतुः । समुद्रतरङ्गेषु ऊर्मिभोगेषु दोलायमानो भुज्युः समुद्रस्य पारे प्रापितः रजांसि उदकानि अश्विभ्यां विभक्तुं प्रवृत्तः । अत्र कक्षीवान् रथः, अत्रिरश्वः, भुज्युः सारथिः, रजांसि रथमार्गः ।

अधुना मुग्मीः (मुर्वैः) अश्विनौ सर्वान् भूषयतः । यतोऽधुना "विप्रुषोः इषः" गोः ऊध इव, स्वेषाम् उत्सम् अलंकुर्वन्ति । अत्रेः भुज्योः सर्वथा मोचनं, पारगमनं यदा भवति तदा समुद्रोदकानि स्वोद्गमस्थानम् आदित्यमण्डलम् अलंकुर्वन्ति ।

"उत्सं न विप्रुषीरिषः" [१०. १४२. ६] ।

"विष्णोः पदे परमे मध्व उत्सः" [१. १५४. ५] ।

वत्सविवृद्धिनिमित्तं क्षीरस्य यथा प्रवृत्तिरज्ञस्य ।
पुरुषविमोक्षनिमित्तं तथा प्रवृत्तिः प्रधानस्य ॥ सांख्यकारिका–५७

अस्मां अच्छा सुमतिर्वां शुभस्पती आ धेनुरिव धावतु [८. २२. ४] ।

—०—

अष्टमोऽध्यायः

अश्विनोः रथादीनि वाहनानि

अश्विनोः रथः ।

अश्विनौ शोभनरथयुक्तौ, रथिषु श्रेष्ठौ, द्योतमानौ दिविस्पृशौ च [१.२२.२]। ऋभवस्तयोः रथं ततक्षुः, यस्य रथस्य योगे दिवो दुहितोषा जायते, उभे च अहनी (रसो ज्योतिश्च) सुदिने भवतो विवस्वतः [१०. ३९. १२]।

अश्विनोः रथश्चक्षुर्गोचरो न[1] भवति, अत एव क्वचिद् रथगतिः क्वचिच्चक्रगतिश्च श्रूयते। असौ असाधारणो रथो यतो यतः प्रतिष्ठते तत्स्थानमपरिहाय दिवं परितो नक्षति (व्याप्नोति)। एतादृशं रथस्य गतिमत्त्वं चक्रद्वयवर्तनाभ्यां वर्णयति ऋक्। यमयोरश्विनोः समानयोजनोऽमर्त्यो रथः समुद्रे ईयते (गच्छति)। तस्य रथस्यैकं चक्रम् अघ्न्यस्य (अहन्तव्यस्य) मूर्धनि (समुच्छ्रितप्रदेशे), सूर्यमण्डले नियतं भवति, अन्यच्चक्रं द्यां परीयते [१. ३०. १८-१९][2]। एवम् एकं चक्रं मूर्धनि भ्रमति, अन्यत् चक्रं दिवं परितो गच्छति।

गन्तरि आदित्ये निहितं[3] चक्रं वपुः मूर्तभूतं भवति, चक्षुर्गोचरत्वात्। अस्माद् वपुषो (वपुष्मतः चक्रात्) अश्विनौ स्ववपुषी चक्रतुः। वपुषः आधारभूतत्वाद् अस्मिन् सूर्ये तयोरेकं चक्रं नियतं भवति। अन्यच्चक्रं मानुषाणि युगानि (कालविभागान्) परिच्छिनत्ति [५. ७३. ३]।

रथस्यैकं चक्रं परितो गच्छति। अन्यच्चक्रं प्रेरकौ अश्विनावनुवर्तते [८.२२.४]

एको रथो द्वे चक्रे। एकं चक्रं नियतमेकत्र भ्रमति, अन्यद् द्यां परितो गच्छत् कालविभागान् परिच्छिनत्ति। एवं सति अघ्न्यस्य मूर्धनि नियतं चक्रं साक्षात् सूर्यः अन्यच्च संवत्सरचक्रम्। अस्य संवत्सरस्य अहोरात्र-पक्ष-मास-ऋत्वयनैर्विभक्तत्वात् तत्र ऋतुभेदेन अप्-ओषधिवनस्पतीनां भेदात् तत्राश्विनोर्व्यापकत्वाद् रसज्योतिर्भ्यां तत्संवत्सरचक्रम् अश्विभ्यां प्रवर्त्यमानं परिवर्तते।

१—रथो यो वां त्रिवन्धुरो हिरण्याभीशुरश्विना।
परि द्यावापृथिवी भूषति श्रुतस्तेन नासत्या गतम् ॥ [८. २२. ५]

२—"अनेमि चक्रं परिवर्ततेऽजरम्।" "एकं चक्रं वर्तते द्वादशारम्।" [एकं चक्रं मध्यशङ्कुनिहितपाशवत् स्वस्थले एव परिभ्रमत्। द्वितीयं तु समन्ततश्चरतीत्याशयः।] म. भा. आदि. अ. ३. ६१-६२ निर्णयसागरः।

३—यन्नूनं धीभिरश्विना पितुर्योना निषीदथः [८. ९. २१]।

रथगतिश्चक्रगतिमपेक्षते । चक्रे निरुद्धे रथो निरुद्धो भवति । रथस्य चक्रद्वयोपेतत्वात् द्वयोश्चक्रयोर्भिन्नगतित्वाद् एकस्मिंश्चक्रे गच्छत्यपि चक्रमितरद् निरुद्धं[1] कर्तव्यम् स्यात् । अघ्न्यस्य मूर्धनि नियतेन चक्रेण तत्र रथगतिरबाधिता स्यात् । परन्तु यच्चक्रं परित ईयते तत् स्वगत्यर्थं इषमपेक्षते । यदि रथे इट् न स्यात् तर्हि तत् चक्रं रथं बाधेत । अत इषा चक्रं प्रवर्तते [८. ५. ३४] । अत एव शुनःशेपः स्वमोचनार्थं यम् आश्विनं तृचं शंसति [१. ३०. १७–१९] तत्र प्रथमर्चं त्रिविधया इषा[2] आगमनम् अश्विनौ प्रार्थ्येते । उत्तराभ्यामृग्भ्यां रथः स्तूयते ।

ऋभुभिर्मध्यपि अश्विनोः रथ एव तष्टो,[3] न तु अश्वावपि, तथाप्यश्विनोः रथः गोऽश्वमानवोपेतो भवति ।[4]

द्विचक्रोऽयं रथस्त्रिचक्रो[5] भवति रासभयोगेन [१. ३४. ९] । एतानि त्रीणि चक्राणि परस्परतो दूरस्थानि । अश्विनौ "अन्तरैः" (दूरस्थितैः) चक्रैः

—प्राणे प्रवहत्यपि, हृदये स्पन्दमानेऽपि, बुद्धौ जागरूकायामपि वाक् कदाचिन्न भवेत्, चक्षुः कदाचिन्न पश्येत् ।

—द्र. या नः पीपरदश्विना ज्योतिष्मती तमस्तिरः ।
तामस्मे रासाथाम् इषम् ॥ [१. ४६. ६] ।
पीपरत् पारयेत् तृप्तिं प्रापयेत् । [सायणः]

—अश्वासत्याभ्यां परिज्मानं सुखं रथम् [१. २०. ३] । रथम् अनश्वम् [१. १२०. १०] अश्वराहित्येऽपि सामर्थ्यातिशयेन गच्छन्तम् ।

—सुयुजा रथेन [१. ११०. १५] सुष्ठु अश्वैर्युक्तेन रथेन ।
"स्वश्वः" [१. ११०. २] ।

—अश्विनोः रथस्य क्वचित् त्रीणि चक्राणि । क्व त्री चक्रा त्रिवृतो रथस्य [१. ३४. ९] । दाशतय्यां त्रिचक्रशब्दः एकवर्जम् [८. ५८. ३] । अश्विनोरेव रथेन सम्बद्धः ।

१. त्रिचक्रेण सुवृता यातमर्वाक् [१. ११८. २] ।
२. अर्वाङ् त्रि चक्रो मधुवाहनो रथः [१. १५७. ३] ।
३. मनसो यो जवीयान्······यस्त्रिचक्रः [१. १८३. १] ।
४. रथस्त्रिचक्रः परिवर्तते रजः [४. ३६. १], [द्र. १०. ३९. १२] ।
५. रथं त्रिचक्रं······व्युष्टा उषसो हवामहे [१०. ४१. १] ।
६. त्रिचक्रेण वहतुं सूर्यायाः [१०. ८५. १४.] ।
त्रिचक्रं सुखं रथम् [वालखिल्ये ८. ५८. ३] ।

रमते यस्मिन् येन वा स रथः । रमु क्रीडायाम् इति धातोः क्थन् प्रत्ययः [उण. १५९] ।

उपेतेन अश्वयुक्तेन रथेनागत्य मर्त्यस्य बाधमानानां शीर्षाणि वृश्चतः [६.६२.१०] चक्रत्रयोपेतेऽस्मिन् रथे त्रिविधा अश्वा नियुक्ता भवन्ति । चित्रदानोपेतौ अश्विनौ एतेन रथेनाऽऽगत्य स्तुतिकर्त्रे दृढापिधानस्यापि 'गोमतो व्रजस्य' (गोयुक्तस्य गोष्ठस्य) द्वाराणि विवृणुतः ।

आ परमाभिरुत मध्यमाभिर्नियुद्भिर्यातमवमाभिरर्वाक् ।
दृळ्हस्य चिद् गोमतो वि व्रजस्य दुरो वर्तं गृणते चित्रराती ॥ [६.६२.११] ।

मधुमन्तौ अश्वयन्तौ गोधनावश्विनौ रथेन वामं (वननीयं धनं) वहन्तौ आगत्य यजमानस्य अनिराम् (अन्नाभावं दारिद्र्यम्), अमीवां (रोगं) च दूरीकुरुतः नक्तं च दिवा च रक्षां कुरुतः [७. ७१. १–२] ।

उषसि प्रत्यासन्नायाम् अश्विनो रथो रश्मिभिः स्तुतो भवति, ऋतेन अश्वाश्च रथे युज्यन्ते [७. ७१. ३] । अमृतजाः (ऋतस्य जनयिता) रथो द्यावा-पृथिव्यौ सद्यः (तदानीमेव) परियाति [३. ५८. ८] । रथस्य वेगवत्त्वे मन्त्र-वर्णः "मनसो जवीयान्" [१. ११७. २] ।

"मर्त्यस्य मनसो जवीयान्" "वातरंहाः"[1] [१. ११८. १] ।

अश्विनो रथो विस्तीर्णां द्यां परि व्याप्नोति । अर्वाङ् समुद्रात् अश्विनौ आभिमुख्येन गच्छति । अनेनैतत् प्रतीयते यद् इदानीमश्विनौ रथारूढौ न स्तः । तौ सततं, सदा रथारूढौ न भवतः । यदा अध्वर्यवः सोमरसं सिञ्चन्ति, यदा परितः पक्वाः यवाः अश्विनौ प्राप्नुवन्ति तदाऽश्विनो रथः तौ आभिमुख्येन गच्छति । परन्तु अयं रथस्तदैव जायते, यदा सिन्धुरश्वावान् रसेन सिञ्चति, दोसा रश्मयः परितो गच्छन्ति च [४. ४३. ५–६] ।

अयं रथो यदा सूर्यां वहति तदा प्रथितवेगः, गोः संगमयिता, आशायुक्तः, प्रभूततमः, वसुमांश्च भवति [४. ४५. १] । सिन्धुमातरौ, सिन्धुप्रभवौ अश्विनौ, सिन्धोः रसेन ज्योतिषा च व्यश्नुवानौ, सूर्यां रथे आरोप्य सोमं प्रति यातः । यदाऽश्विनौ समनसौ[2] भवतः तदा सूर्या तयोरथमारोहति । तदा द्विचक्रो रथस्त्रिचक्रो भवति ।

"रथो रंहतेर्गतिकर्मणः । स्थिरतेर्वा स्याद् विपरीतस्य । रममाणोऽस्मिं-स्तिष्ठतीति वा । रपतेर्वा । रसतेर्वा ।" [नि. ९. ११] ।

१—वातरंहाः अनेन अप्रतिहतगतित्वम् उच्यते (सायणः) । मनसो जवी-यान् । वातरंहाः [१. ११७. २; ११८. १] । "परिज्मान् ज्यायांसं (चक्रम्) ईयते ।" [१. ३०. १९] ।

२—"समनसा" [१. ९२. १६; ११६. १९; ७. ७४. २] ।

यज्ञे मधु सिञ्चन्तौ, रथेन सूर्यां वहन्तौ, सूर्यामिव सोमेन परिणमयन्तौ, तं सोमं सूर्ये जुहुतः, येन सूर्यः सततं दीप्तो भवति । अश्विनौ पितुर्योनौ निषीदतः [८. ९. २१ । तौ पृथिव्यां स्वे सदने श्येनाविव दृढं सीदतः [७. ७०. १] । एवं विवस्वतो जातौ अश्विनौ अर्वाक् पृथिवीमागत्य अर्वाक् समुद्रात् पुनर्दिवं व्याप्नुतः । अत एव तयो रथो द्यावापृथिव्यौ बाधमानो भवति, "आ वां रथो रोदसी बद्बधानः" [७. ६९. १] । दिवः पृथिवीं, पृथिवीतो दिवं परिगच्छन्तौ अश्विनौ पृथिव्यां मधु सिञ्चन्तौ दिवं सोमं नयतः । अयं विश्वयज्ञोऽहर्निशं सततं प्रवर्तते । अनेन विश्वयज्ञेन सह यो मर्त्यः स्वहविर्योजयितुं जानीयात् तस्याग्निरूर्ध्वस्तिष्ठति, तस्य हविराहवनीयं गच्छति, स उरु कुर्वाणः प्रकर्षेण बहुकर्मनाश्च भवति । तस्य स्तुतीः रसान् च अनु तस्मै कामान् प्रयच्छतोऽश्विनौ [६. ६२. ४; ८] ।

सिन्धोः स्यन्दनेन समुत्पन्नौ अश्विनौ स्यन्दनविरत्या विरमतः । अत एवाश्विनौ "द्रवत्पाणी शुभस्पती" [१. ३. १] । द्रवद्रूपां पाणिभ्यामुपेतौ, शुभस्योदकस्य पालयितारौ च भवतः । रथश्च तयोः "द्रवदश्वः [४. ४३. २] ।

पाण्योर्द्रवभूतत्वात् अश्विनौ हिरण्यवर्तनी भवतः । हिरण्मयेन मार्गेण व्याप्नुवतोस्तयो रथो हिरण्मयो भवति । सूर्यस्य प्रसविता सविता हिरण्यपाणिः[1] । अश्विनौ हिरण्यहस्तं वध्रिमत्यै दत्तः । सिन्धोः अपां जरयिता सूर्यः[2] । दिवि आपः ऋतम् । सूर्यज्योतिषा प्रकाशमानम् तदृतम् उषा भवति । अस्या उषसः साक्षात्करणमेव मधु । इदं मधु दिवो रसः । यावत्तमोषा यदा ऊर्जानी, सूरिः, योषा[3] इति नैषा अभिव्यज्यते तदा मधु गोचरं भवति यच्च अश्विनोः प्रियं पेयम् ।

अश्विनोस्त्रिवृतं रथमुषा आरोहति, सा सोमं नीयते, सोमेन परिणम्यते । अस्मिन् कर्मणि अश्विनौ यज्ञं मधुना सिञ्चतः कशया । अत्र यज्ञः सूर्यः यत्र रसो ज्योतिश्च पृथिव्या उद्गच्छती संपृक्तः । सूर्योऽत्र विमदस्य जायायां समुत्पत्स्यमानः पुत्रः । एतदर्थमेव विमदाय जाया नीयते [१. ११६. १] । विमदजाययोः सम्पर्कोऽश्विभ्यां मधुसेकम् अपेक्षते ।

दिवि आप ऋतं, यदश्विनौ तरतः । तत्र पन्थाः सोमो यत्र दिवः स्रुतिः [१. ४६. ११–१२] । ऋतदीप्तिरुषा मण्डलं नीयमाना मधु[4] क्षरति येन

१—हिरण्यपाणिम् ऊतये सवितारम् उपह्वये [१. २२. ५] ।

२—हविषा जारो अपाम् [१. ४६. ४] ।

३—ऊर्जानी । सूरिः । योषा [१. ११९. २; ३; ५] ।

४—युवोरुषा अनु श्रियं परिज्मनोरुपाचरत् । ऋता वनथो अक्तुभिः [१. ४६. १४] । उभा पिबतमश्विना [१. ४६. १५] ।

सोमोऽभिव्यज्यते । सूर्यतेजसा प्रकाशमानम् ऋतम् उषाः । अस्मिन्नृचोभृते ऋते विमदस्य भुज्योः यद् गोचरं भवति तदेव मधु । मधुरिकम् ऋतमेव सोमः । गन्तव्यं स्थानम् ।

अश्विनोः रथस्य गन्तव्यं स्थानं सोमिनो गृहम् । सूर्यां रथे आरोप्य यदाऽश्विनौ सोमिनो गृहं प्राप्नुतः, तदा तयो रथस्य गतिर्विरता भवति । "नहि वामस्ति दूरके यत्रा रथेन गच्छथः । अश्विना सोमिनो गृहम् ॥" [१. २२. ४] ।

सोमिनो गृहेऽश्विनौ यं सोमं पिबतः स मर्त्यस्यागोचरो भवति ।

"कं सोमं पपथुरश्विना" [१. ४७. १०] ।

"उषो भद्रेभिरागहि दिवश्चिद् रोचनादधि ।
वहन्त्वरुणप्सव उप त्वा सोमिनो गृहम् ॥" [१. ४९. १] ।

अश्विनोः रथो यदा सूर्यत्वग् भवति, तदा हिरण्यबाहुनस्याग्नेः, दिवं प्राप्नुवतो यजमानस्य वाऽहंकारो विलीयते । अश्विनोः रथोऽहंपूर्वः, अहंकारात् पूर्ववर्ती । [१. १८१. ३] ।[1]

अश्विनौ देवानां भिषजौ । विश्वानि भेषजानि सोमस्य विदितानि [१. २३. २०–२१] । सोमाभिषवेण सर्वविधभैषज्यान्युपपाद्य सूर्यम् उद्गमय्याविर्हृत्यायातः पृथिवीम्[2] अश्विनौ अन्तरिक्षेण । "अप्सु मे सोमो अब्रवीत्" [१. २३. २०] इति श्रुत्याऽपां भेषजानि सोम एवाऽधिगन्तुमर्हति । अपां सोमत्वकरणे विश्वानि भेषजानि अधिगतानि भवन्ति । अप्सु विश्वशंभुः अग्निः, विश्वभेषजाः आपश्च सन्ति ।

अग्नीषोमात्मकं जगत् । अग्नेः क्रतोः परस्ताद् नास्ति कोऽपि देवो नापि मर्त्यः[3] । देवानां मुख्यः पेयः सोमः । अश्विनौ देवानामध्वर्यू । तौ सोमिनो गृहं गच्छतः [१. २२. ४] । स्रुवेण सोमम् इव तौ रेभम् ऋषिम् अकूप उन्नयतः [१. ११६. २४] । सोमः सूर्यं समेधयति, "त्वं (सोम) ज्योतिषा वि तमो ववर्थ" [१. ९१. २२] । सोमः सूर्यस्याऽऽत्मा । सूर्यः सोमेन व्याप्नोति ।[4]

१—मनसो जवीयान् अहंपूर्वः [१. १८१. ३] ।

२—याभिस्त्या श्लोकमादिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवम् ॥ [१. ९२. १७]

३—नहि देवो न मर्त्यो महस्तव क्रतुं परः [१. १९. २]

४—हरिर्महान्……सं सूर्येण रोचते [९. २. ६] ।
"आत्मा यज्ञस्य पूर्व्यः" [९. २. १०] "त्वं ज्योतिषा वि तमो ववर्थ ।" [१. ९१. २२]

सोमस्य वेनाम् (उषसम्) अनु यदा अश्विनौ गच्छतस्तदा तयोः रथस्त्रित्व-विशिष्टो भवति । [१. ३४. २; ५; ९–१०] ।

अश्विनौ द्वौ । तयो रथो यदा द्विचक्रः तदा तस्य द्वेधा गतिः, चक्रद्वयस्य पृथक् पृथग्वर्तनात् । अघ्न्यस्य मूर्धनि निहितं चक्रं सूर्यम् उद्गमयति । द्यां परित ईयमानं चक्रम् [१. ३०. १९] अपः सोमेन परिणमयति । इदं कर्मद्वैविध्यमाख्याय एकोऽश्वी सुमखस्य सूरिः[1] (यः सोममुन्नयति), अन्यः दिवः सुभगः पुत्रः (यः सूर्यम् उद्गमयति) [१. १८१. ४] ।

सिन्धौ जलभेदेन हविर्भेदः[2] । एकैवाश्विनोस्तनूः नामानि भिन्नानि, अरेपसा तन्वा, नामभिः स्वैः [१. १८१. ४] । दिवमुपेतोऽग्निरसितो भवति, "व्यख्यज्जिह्वयाऽसितः" [१ ४६. १०] । भारबन्धनवियुक्तोऽपी विमदः (विगतमदः) इदानीम् । अश्विनौ विमदाय जायां नयतः प्रथमे मण्डले, यत्र ऋषिः कक्षीवान् दैर्घतमसः [१. ११६. १] । दशमे मण्डले पत्न्या सह विमदं पुरोरथं कुरुतोऽश्विनौ । ऋषिरत्र कक्षीवतो दुहिता काक्षीवती घोषा । प्रथममण्डलगता जाया दशमे मण्डले पत्नी भवति । यदा उषसः शश्वत्तमा भवन्ति, तदा विमदस्य जाया शुन्ध्युर्भवति, या च पुरुमित्रस्य योषा[3] । उषसः"''शश्वत्तमाः । [१०. ३९. १] युवं रथेन विमदाय शुन्ध्युवं न्यूहथुः पुरुमित्रस्य योषणाम्[4] । [१०. ३९. ७] ।

न तं राजानावदिते कुतश्चन नांहो अश्नोति दुरितं न किर्भयम् ।

यमश्विना सुहवा रुद्रवर्तनी पुरोरथं कृणुथः पत्न्या सह ॥ [१०.३९.११] ।

युवं शचीभिर्विमदाय जायां न्यूहथुः पुरुमित्रस्य योषाम् । [१. ११७. २०] ।

यावर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन [१. ११६. १] ।

रथस्य गुणविशेषः ।

ऋषिः कक्षीवान् जीवनार्थम् अश्विनो रथमाह्वयति प्रयोऽभि हविर्लक्षणम् अन्नमभिलक्ष्य—

"तमः अस्मद्दृष्टिनिरोधकमन्धकारं त्वं ज्योतिषाऽस्मीयेन प्रकाशेन वि ववर्थ विवृतं विश्लिष्टं विनष्टं कृतवानसि ।" [सायण.]

१—सूरिः । प्रेरयिता [सायणः—१. १८१ ४]

सुमखस्य सूरिः । सुमहतो बलस्य ईरयिता [निरु. १२. ३]

२—त्रिरश्विना सिन्धुभिः सप्तमातृभिः त्रय आहावास्त्रेधा हविष्कृतम् ॥

[१. ३४. ८] ।

३–४—योषणां दुहितरम् । "योषां" कुमारीम् [१. ११७. २०] "योषणां" दुहितरम् [१०. ३९. ७] "योषणां न मर्ये" यथा जायाम् [१०. ३९. १४] [सायणः] योषां कुमारीम् । [सायणः] । "याभिः पत्नीर्विमदाय न्यूहथुः ।" [१. ११२. १९] अत्र "पत्नीः" इति बहुवचनम् ।

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे ।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधाम् अभि प्रयः ॥ [१.११९.१]

अस्याम् ऋचि रथस्य नव विशेषणानि सन्ति ।

१. पुरुमायम्[1] । बहुविधाश्चर्यं, बहुविधकर्माणं वा ।
२. मनोजुवम् । मन इव शीघ्रं गच्छन्तम् ।
३. जीराश्वम् । जवयदश्वोपेतम् ।
४. यज्ञियम् । यज्ञेषु आह्वातुमर्हम् ।
५. सहस्रकेतुम् । अनेकध्वजम्, सहस्रस्य धनस्य केतयितारं ज्ञापयितारं वा ।
६. वनिनम् । वनम् इत्युदकनाम तद्वन्तम् ।
७. शतद्वसुम् । शतसंख्याकैर्धनैर्युक्तम् ।
८. श्रुष्टीवानम् । श्रुष्टीति क्षिप्रनाम । क्षिप्रं संभजमानं, यद्वा सुखवन्तम् ।
९. वरिवोधाम् । वरिव इति धननाम । वरिवसो धनस्य दातारम् [सायणः]

मनोजवसा वृषणा स्वस्ति [१. ११७. १५] । अश्विनौ मनोवद्वेगयुक्तौ । यो मर्त्यस्य मनसो जवीयान् [१. ११८. १] । अश्विनोः रथो मनुष्यस्य मनसोऽतिशयेन वेगवान् ।

मनोजुवम् [१. ११९. १] । अत्र रथो मनोजूः । मनःसदृशवेगवान् रथः । मन एवास्य वेगः । अत्र मनोजूः इति समस्तं पदम् । पूर्वत्र [१. ११८. १] मनसा सह रथस्य वैषम्यम् । अत्र तु साम्यम् ।

सहस्रकेतुः । सहस्रस्य जयेनैवास्य रथस्य प्राप्तिर्भवति । सहस्रम् ऋचः आश्विनं शस्त्रं भवति । यद् अर्वाक्सहस्रं तदनाश्विनम् ।[2]

अश्विनोर्वाहनं रासभः आजौ सहस्रं जिगाय [१. ११६. २] । अश्विनौ पेदवेऽश्वम् ऊहतुः सहस्रसाम् [१. ११७. ९; ११८. ९] । सहस्रसंख्याकस्य धनस्य सनितारं दातारम् । [सायणः]

पूर्वेषु त्रिषु सूक्तेषु [१. ११६–११८–[११६. २; ११७. ९; ११८. ९] सहस्रं जेतव्यमासीत् । अस्मिन् [१. ११९] सूक्ते जितं सहस्रं रथस्य केतुः कृतोऽ

१—पुरुमायम् । पुरुऽमायम् ।
पुरवः मायाः यस्मिन् यस्य वेति बहुव्रीहिः ।
"बहुव्रीहौ त्रिचक्रादित्वाद् अन्तोदात्तत्वम् । यद् वा तत्पूर्वाद् अर्श आदित्वाद् अच् ।" [सायणः]

२—अनाश्विनं हैव तद् यदर्वाक् सहस्रम् । ऐ. ब्रा. [१७. १]

स्ति । शतद्वसुम् ।[1] शतवसुम् । छान्दसस्तकारोपजनः । [सायणः]

वनिनम् । उदकवन्तम् । सहस्रकेतुं शतद्वसुम् अन्तरा वनिनम् इति शब्दः श्रूयते । अनेनैतद् अभिप्रेतः स्यात् यत् सर्वं विश्वम् उदकमयं यः पश्यति तस्यैव अश्विभ्यां सूर्य उद्गमितो भवेत् ।

सहस्रम् । सहस्रं सहस्वत् [निरु. ३. १०] । सहो नाम बलम् । [निघ. २. ९. १७] इन्द्रः सहसः सूनुः [निरु. ५. २५] ।

सूनो सहसो यानि दधिषे [१०. ५०. ६] ।

सहस्रेण संमितो घः [पा. ४. ४. १३५] !

सहस्रियासो अपां नोर्मयः [१. १६८. २] । सहस्रेण तुल्या इत्यर्थः [सि. कौ.] ।

उदकं वनं सहस्रोर्मि यदा भवेत् तदाऽश्विनोरयं रथ उदियात् । अयं रथः क्षिप्रं याति । अतस्तस्मिन् ध्रियमाणं वस्तु विस्तीर्णं भवति । स्थूलस्य सूक्ष्मत्वापादनेन विस्तारो भवति ।

वरिवोधाम् । वरिवो धनं तद्दधाति । वरिवसो धनस्य दातारम् । [सायणः] । [उरु + ईयसुन् > वरीयस्, वरिष्ठ] [उरु > वसु > वरिवसु > वरिवस्]

एतैर्नवभिर्गुणैः युक्तो रथः प्रयः (हविः) अभिलक्ष्य ऋषिणा हूयते । यद्धविः अश्विभ्यां हूयते तदेतैः रूपैः परिणतं भवेत् । तथाहि—

१—शतद्वसुम् । पङ्क्तिविंशतित्रिंशच्चत्वारिंशत्पञ्चाशत्षष्टिसप्तत्यशीतिनवतिशतम् [पा. ५. १. ५९] पञ्च परिमाणमस्य पञ्चद्वर्गः । दशत् । पक्षे पञ्चकः । दशकः । [सि. कौ.] ।

एवं शतद्वसुः । शतपरिमितानि धनानि यस्य । शतम् । शतक्रतुः इन्द्रः । शतेन पूर्णताऽभिप्रेयते ।

दश दस्ता । दृष्टार्था वा । विंशतिः द्विदशतः । शतं दशदशतः । [निरु. ३. १०] दश अन्तिमा संख्या । तत्र प्रत्येकं दश कृत्वः शतं भवति । तच्च पूर्णं शान्तम् । एतादृशं शतं संख्या यस्मिन् स वर्गः शतत् ।

दश । दस उपक्षये । या पुनर्न वर्धते सा संख्या दश । दशान्ता संख्या । तु. "अत्यतिष्ठद्दशाङ्गुलम्" । [१०. ९०. १] ।

या पुनः पुनः दृश्यते सा दश । दशानामुपरि पुनः पुनः दृश्यते । दश, एकादश, द्वादशेत्यादिः । अथ विंशतिः, त्रिंशत्, चत्वारिंशत्, पञ्चाशत् इत्यत्र दृश्यते ।

आ वां रथम्

१. पुरुमायम्	सहस्रकेतुम्
२. मनोजुवम्	वनिनम्
३. जीराश्वम्	शतद्वसुम्
४. यज्ञियम्	श्रुष्टीवानम्
५. जीवसे	वरिवोधाम्

हुवे अभिप्रयः ॥

अस्मिन् सूक्ते [१. ११९] वर्तिका नास्ति ।[1]

अश्वानां गुणविशेषः ।

अथाश्विनोरश्वविषयकः ऋग्वर्णः—

आ वामश्वासः शुचयः पयस्पा वातरंहसो दिव्यासो अत्याः ।
मनोजुवो वृषणो वीतपृष्ठा एह स्वराजो अश्विना वहन्तु ॥ [१, १८१. २] ।

हे अश्विनौ ! युवयोरश्वा वाम् इह आवहन्तु । कीदृशास्ते इत्यत्र ब्रूते—

१. शुचयः	शुद्धा दीप्ता वा
२. पयस्पाः	पयस उदकस्य पातारः
३. वातरंहसः	वायुवेगाः
४. दिव्यासः	दिवि भवाः
५. अत्याः	अतनशीलाः
६. मनोजुवः	मनोजवाः
७. वृषणः	वर्षका युवान इत्यर्थः
८. वीतपृष्ठाः	कान्तपृष्ठाः वपुष्मन्त इत्यर्थः
९. स्वराजः	स्वयमेव राजमानाः

एषु नवसु विशेषणेषु दिवमुत्तिष्ठतो हविषः स्थूलात् सूक्ष्मभावो दृश्यते ।

आदौ शुचिः, अन्ते स्वराट् भवति ।

अश्विनौ शुचिव्रतौ दीद्यग्नी [१.१५.११] स्तः ।

१—कक्षीवतः पञ्च सूक्तानि अश्विदेवताकानि [१. ११६–१२०] । आस्नो वृकस्य वर्तिकाम् अमुमुक्तम् [११६. १४] । अजोहवीद् अश्विना वर्तिका वाम् [११७. १६] अमुञ्चतं वर्तिकाम् अंहसो निः [११८. ८] अन्तिमे सूक्ते [१२०] कोऽपि प्राणिविशेषो न प्राप्यते । अपि तु ऋषिः आत्मनस्त्राणं प्रार्थयते । "पातं नो वृकादघायोः" [१ १२०. ७] "अयं पापफलम् अस्माकम् इच्छतो वृकात् स्तेनात् रक्षतम् ।" [सायणः]

तौ द्रवत्पाणी शुभस्पती [१. ३. १]। द्युस्थानौ दिवो नपातौ [१. ११७. १२], दिव्यौ [४. ४३. ३], मनोजवौ वृषणौ [१. ११७. १५] च स्तः।

अश्विनौ सर्वं व्यश्नुवाते। अश्विनौ राजानौ [६. ६२. ९]। अश्विनो रथः "अहंपूर्वः" [१. १८१. ३]। अहम्पूर्वः। अहंकारपूर्वः, मनस्वी वा अत्युदारः।

एषु नवसु अश्वविशेषणेषु स्थूलस्य सूक्ष्मभावः एवं द्रष्टुं शक्यते।

१. शुचयः	पृथिवी	२. पयस्पाः	आपः
३. दिव्यासः	अग्निः	४. वातरंहसः	वायुः
५. अत्याः	आकाशः	६. मनोजुवः	मनः
७. वृषणः	अहंकारः	८. वीतपृष्ठाः	महान्
९. स्वराजः	पुरुषः		

रथगतिः। षडश्वः शतपद्रथः।

त्रिभीरथैः[1] शतपद्भिः षडश्वै अश्विनौ भुज्युं समुद्राद् ऊहतुः [१. ११६. ४]।

सर्वस्मात् समुद्रात् रथैरेव भुज्युर्न तारितः। उदके रथस्य गत्यभावाद्नौभी रथैश्च भुज्युस्तारितः [१. ११६. ३–४]। रथाः समुद्रस्य धन्वनि (जलवर्जित-प्रदेशे) आर्द्रस्य समुद्रस्य पारे (उदकेन आर्द्रीभूतस्य तीरदेशे) च प्रयुक्ताः।

रथास्त्रयः। ते शतपादः। शतसंख्याकैश्चक्रलक्षणैः पादैरुपेताः। प्रतिरथं षडश्वाः नियुक्ताः।

एक एव रथस्त्रेधा नियुक्त इत्यतस्त्रयो रथाः।

१. सुमेरौ सूर्यः प्रकाशते षड् मासान् [षडश्वो रथः]।

२. कुमेरौ सूर्यः प्रकाशते षड् मासान् [षडश्वो रथः]।

३. ध्रुवयोरन्तरा उत्तरायणेन यथा षड् मासान्,
तथा दक्षिणायनेन षड् मासान् सूर्यः प्रकाशते [षडश्वो रथः]।[2]

"त्रिनाभि चक्रम् अजरम् अनर्वम्।" [१. १६४. २]

भुज्योः समुद्रात् पारणक्रियायाम् शतारित्रा नौः, शतपादः षडश्वा रथाश्च प्रयुक्ताः। अत्र "नौभिः" इति [१. ११६. ३] बहुवचनम् "नावम्" इति [१. ११६. ५] एकवचनं च श्रूयते। "रथैः" इति [१. ११६. ४] बहुवचनमेव। यदि नौरथौ अगणयित्वा तयोर्गतिविषयकसंख्या एव गृह्यते चेत्—

१—त्रिभिः रथैः। "द्वाभ्याम् आत्मनोः यानाभ्याम् एकेन भुज्योः।"
[स्कन्दः १. ११६. ४]

२—षडश्वो रथः। गवामयने संवत्सरसत्रे मासक्लृप्तिः षडहैः क्रियते। षण्णाम् अह्नां समाहारः षडहः। "ज्योतिर्गौरायुरिति स्तोमैभिः यन्ति,

१. शतपद्भिः षळश्वैः	६०० पादाः
२. शतारित्रा नौः	१०० पादाः
	७०० पादाः

सूक्तस्य उपान्तिमायाम् ऋचि उदकाद् रेभस्यर्षेः उन्नयनं कीर्त्यते । दश रात्रीर्नव दिनानि उदकेऽवनद्धः सन् दशमे दिने उन्नीतः । एवमत्र विंशतिः पादाः भवन्ति उन्नीतेन रेभेण सह ।

संवत्सरेऽहोभिः रात्रिभिश्च सूर्यस्य ७२० पादाः भवन्ति ।

रथस्य पादाः	६००
नावः पादाः	१००
रेभविषयकाः पादाः	१९
स्वयं रेभः	१
आहृत्य	७२० [पादाः][1]

भुज्योः पारणे श्रूयते "तिस्रः क्षपः त्रिरहातिव्रजद्भिः[2]" [१. ११६. ४] ।

	षळहः
६	ज्योतिः
५	आयुः
४	गौः
३	आयुः
२	गौः
१	ज्योतिः

अयं वै लोको ज्योतिः, अन्तरिक्षं गौः, असौ लोक आयुरिति । स एवैष उपर्यूळ्हः इति । अयं च लोको ज्योतिरसौ लोको ज्योतिस्तावेते ज्योतिषी उभयतः संलोकेते, इति । तेनैतेनो-भयतो ज्योतिषा षळहेन यन्ति ।"

[ऐ. ब्रा. १८. १] ।

"ज्योतिर्गौरायुरिति त्रीण्यहानि गौरायु-ज्योतिरिति त्रीणि ।" [ऐ. ब्रा. १८. १]

1—सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्राः । ऐ. आ. ३. २. १
[सायणः ऋक्. सं. १. १६४. ११]

२—अश्विनोरश्वाः तिस्रो रात्रीः त्रीणि अहानि च द्युलोकसम्बन्धीनि रोचमानानि नक्षत्ररूपाणि देवगृहाणि परितो गच्छन्ति । भुज्योः पारगमने समुद्रात् यावान् कालोऽपेक्षितः तावन्तं कालम् अश्विनोः अश्वाः दिवो रोचनानि परि गच्छन्ति । "येभिस्तिस्रः परावतो दिवो विश्वानि रोचना । त्रीँरक्तून्

"त्रिसंख्याका रात्रीः, त्रिवारमावृत्तानि अहानि च" [सायणः] ।

त्रिः अहा इत्यत्र संख्याया अभ्यावृत्तिगणने "द्वित्रिचतुर्भ्यः सुच्" [पा ५. ४. १८] इति सुच्प्रत्ययः । किन्त्वामात्राऽऽनर्त्यम् इति विचारे संनिकृष्टा "तिस्रः" इति संख्या एव भवितुमर्हति । एवं सति—

रात्रयः ३

अहानि ३ × ३ = ९

आहत्य १२ [द्वादश मासाः संवत्सरस्य]

तत्र ध्रुवे षड् मासान् सततं प्रकाश्य सूर्योऽस्तमेति । अस्तोत्तरम् अध्यर्धमासं सान्ध्यं तेजः, एवमुदयात् प्रागपि अध्यर्धमासं सान्ध्यं तेजः । परिशेषात् त्रीन् मासान् तत्र रात्रौ अन्धकारः परिगण्यते चेत्, भुज्युविषयकाणि नव अहानि तिस्रो रात्रयश्च संगच्छन्ते ।

यत्र तिस्रो रात्रयः, त्रीणि अहानि च गृह्यन्ते तर्हि अत्र त्रिसंख्यया ऋतवः त्रयो गृहीता भवन्ति ।

वसन्तग्रीष्मवर्षाः त्रीण्यहानि ।

शरद्धेमन्तशिशिराः तिस्रो रात्रयः ।

एवं सति ध्रुवे सूर्यः प्रकाशते षड् मासान् । ततः सान्ध्यं तेजः, [उभयतः उदये अस्तमये च] द्वौ मासौ । एवमष्टौ मासान् सौरं तेजः, चतुरो मासान् तमः । तत्रापि गाढं तमः मासद्वयमेव । मासद्वये ३० × २ × २ = १२० पादाः भवन्ति । तत्र भावः शतं, रेभस्य विंशतिश्च ।

सूर्यस्य प्रकाशः ३६०

सान्ध्यं तेजः २४०

गाढं तमः १२०

७२०

परि दीयथः ॥" [८. ५. ८] । त्रीन् दिवसान् तिस्रो रात्रीश्च । अत्यन्त-संयोगे द्वितीया । [सायणः] ।

वेङ्कटमाधवोऽत्र अहोरात्रार्थं न करोति । तस्य मते—

१. तिस्रः परावतः दूरे युक्ताः त्रयो लोकाः ।

२. दिवश्च विश्वानि रोचनानि ।

३. त्रीन् अग्नीन् इत्यग्निवायुसूर्यान् सर्वमिदं परितो गच्छथः यैरश्वैः ।

अश्विनोर्नौः ॥

नौरप्सु प्रवर्तते । अश्विनौ रसेन ज्योतिषा च व्यश्नुवाते । रथो ज्योतिषः प्रति, नौः रसात् प्रति । भुज्युर्दिवं नीयमानोऽग्निः सूर्यो वा । चयाणाम् आर्षेषु विशेषतः भुज्योः समुद्रात् पारणं श्रूयते । त ऋषयः—

१. कक्षीवान् दैर्घतमसः [१. ११६—१२०] संवत्सरगतिः
२. अगस्त्यो मैत्रावरुणिः [१. १८०—१८४] दक्षिणायनम्
३. वसिष्ठो मैत्रावरुणिः [७. ६७—७४] उत्तरायणम्

कक्षीवत आर्षे [१. ११६. ३–५] तिस्रः क्षपः, उदमेघः, आर्द्रः, समुद्रः, अनारम्भणः, अनास्थानः, अग्रभणः समुद्रः, नावः, शतारित्रा नौः—एते शब्दाः नौसम्बन्धिनः ।

संवत्सरे त्रिविधा रात्रयो भवन्ति ।

१. षष्टिदण्डात्मकोऽहोरात्रः, यत्र सूर्यस्य दैनंदिनगत्या द्वादश मासा भवन्ति ।
२. ध्रुवमध्योऽधः ससांधान् यावत् षष्टिदण्डेभ्योऽधिकं वर्तमानम् अहो वा रात्रिर्वा स्यात् ।
३. ध्रुवे षड् मासान् सूर्यस्यादर्शनेन जायमाना रात्रिः ।

रात्रीणां वैविध्याद् बह्व्यो नावः उपयुज्यन्ते ।

नौभिः	समुद्रे
१. आत्मन्वतीभिः	अनारम्भणे
२. अन्तरिक्षप्रुद्भिः	अनास्थाने
३. अपोदकाभिः	अग्रभणे
[१. ११६. ३]	[१. ११६. ५[1]]

शतारित्रा नौः ।

अत्र नावो विशिष्य श्रुतिः—शतारित्रां नावमातस्थिवांसम् [१. ११६. ५] । अरित्रं वां दिवस्पृथु [१. ४६. ८] ।

शतारित्रया नावा ध्रुवे गाढं दीर्घं तमो द्योत्यते, यदवरतो मासद्वयं भवति । द्वयोर्मासयोः पादा भवन्ति षष्टिरहानि षष्टी रात्रयश्च [१२०] । तत्र रेभस्य विंशति पदोऽपहाय शतं पादाः क्षिप्यन्ते । नावोऽरित्रं शतेन पद्भिः दिवं स्पृशति ।

1—१. ११६. ४ समुद्रस्य धन्वनि आर्द्रस्य पारे रथयोगः । धन्वा उदकरहितः प्रदेशः । आर्द्रस्य उदकेन क्लिन्नस्य पारे । उदकशब्देन अत्र तमो गृह्यते । एवं सति अहनि सूर्ये प्रकाशमाने रथयोगः, रात्रौ नौयोगः । सिन्धूनां तीर्थे रथः [१. ४६. ८] । तीर्थः पारगमनप्रदेशः ।

षड् मासान् ध्रुवे सूर्यो न दृश्यते ।

	१	२		३	४		५	६	
अस्तं	३०	३०	५ *	२५	२५	५ *	३०	३०	उदयः

* दशरात्रयः | गाढं तमः | * दशाऽहानि

अहानि ५०
रात्रयः ५०

आहत्य १०० पादाः [मातारिश्वा नौ] ।

दश रात्रीरशिवेना नव द्यून् अवनद्धं श्नथितम् अप्स्वन्तः ।
विप्रुतं रेभम् उदनि प्रवृक्तम् उन्निन्यथुः सोममिव स्रुवेण ॥ १.११६.२४ ।[1]

अगस्त्यस्य आर्षे—

सिन्धुषु आत्मन्वन्तं पक्षिणं प्लवं भुज्यवेऽश्विनौ चक्रतुः । अनेन प्लवेनाऽश्विनौ देवेषु मनसा शोभनपतनशीलौ भूत्वा पतन्तौ महतः क्षोदसः (उदकात्) भुज्युं निरूहतुः [१. १८२. ५] ।

अत्र उत्तरध्रुवस्थः सूर्यः दक्षिणध्रुवं प्रति नीयते । सूर्योऽत्राऽऽत्मन्वान् प्लवः । सिन्धवः स्यन्दमाना अहोरात्राः । अत एव प्लवः पक्षी (पक्षाभ्यां युक्तः) । द्यावापृथिवीरूपेण पतन्तोऽश्विनौ । कस्मिन्नपि क्षोद इति विचारे उत्तरस्यामृचि सूच्यते—

अवविद्धं तौग्र्यम् अप्स्वन्तर् अनारम्भणे तमसि प्रविद्धम् ।
चतस्रो नावो जठलस्य जुष्टा उद् अश्विभ्याम् इषिताः पारयन्ति ॥
[१. १८२. ६] ।

अनारम्भणे तमसि चतस्रो नावः ।

अत्र अप्स्वन्तः तमः । षण्मासान् ध्रुवे प्रकाश्य सूर्योऽस्तं याति । अस्ताद् ऊर्ध्वं, तथा उदयात् प्राक् मासावधि सान्ध्यं तेजो विराजति ध्रुवप्रदेशे । इदम् अस्तोदयवर्ति सान्ध्यं तेजोऽत्र अप्शब्देन गृह्यते । अनयोः सान्ध्यतेजसोः मध्यपाति तमः चातुर्मासिकम् । इदं तमोऽभितः आपः सान्ध्यं तेजः द्योतते । एवम् अप्स्वन्तरिदं तमः[2] ।

१—रेभस्य (विंशतिः १९ + १) पादाः सन्धिकालेन । द्र. परिशिष्टम् ८.
२—कक्षीवत आर्षे भुज्योः पारणे [१. ११६. ३–५] तमः शब्दो न श्रुतः ।

अर्णसो मध्ये एको वृक्षो निहितो भवति, यं वृक्षं तौग्र्यः पुनःपुनो भुज्युः परिष्वजति । वृक्षोऽत्र सूर्यस्य दैनंदिनगत्या वर्धमानमहः । अयं वृक्षः प्रतिदिनं वृश्च्यते, तथापि नवो नवो वर्धते । देवेषु मध्ये द्यावापृथिवीभ्यां पतनशीलौ अश्विनौ, पिपतिषोर्मृगस्य आलम्बनाय पर्णानीव, भुज्योरालम्बनार्थं वृक्षमिमं निहितवन्तौ स्तः । [१. १८२. ७][1]

वसिष्ठस्य आर्षे—

भुज्युं मध्ये समुद्रे सखायः दुरेवासः (दुष्टगमनाः) जहुः । तं भुज्युम् अरावा युवाकुः [तस्य शत्रुरेव अरवनाश्विनौ कामयमानः] समुद्रात् पारितवान् । [७. ६८. ७] ।

समुद्रे मध्यो विषुवान् भवति, यत्रोदयन् सूर्यः ध्रुवे क्षितिजे वर्तुलाकारेण त्रीणि परिक्रमणानि करोति । परितो वृत्तौ गमनमेव अत्र सखाया ख्यातिः ।

दुरेवासः सखायः । [दुरेवासः दुष्टगमनाः] ।
अरावा युवाकुः । [अरावा अरणवान् अभिगन्ता] ।

तिसृभिः क्षपाभिः, त्रिभिरहोभिरूर्ध्वं क्षितिजाद् उदेति ध्रुवे सूर्यः । तत्र क्षितिजमुपर्युपरि मण्डलं क्रमश उद्गच्छति, क्षितिजमधोधो मण्डलं क्रमशोऽस्तमेति च । तत्र उपर्युपरि सखित्वम् अधोधो दुरेवत्वं च ।

अपि चाश्विनौ समुद्रेऽवविद्धं भुज्युं पतत्रिभिः अर्णसः पारयतः । अस्रिधानैः (अक्षीयमाणैः) अश्वैः अव्यथिभिः, दंसनाभिः (शारीरैः कर्मभिः), पतत्रिभिः पारयतः [७. ६९. ७] ।

अक्षीयमाणत्वं दिनवृद्ध्या । श्रमराहित्यं तमोभावेन । अव्यथित्वं क्षितिजे वर्तुलवृत्त्या । दंसनात्वं द्यावापृथिव्योः गत्या । पतनात् त्रायते इति पतत्रम् पतत्रिभिरिति श्रुत्या उत्तरायणं द्योत्यते, यत्र ध्रुवे सूर्योऽस्तमगच्छन् वर्तुलाकारेण उपरि एति । ध्रुवस्याधस्तात् वर्धमानमहः क्षीयमाणा रात्रिश्चात्र पतने ।

सप्त स्रवतः परि यानम् ।

अश्विनोः समानयोजनो रथ एकस्मिन् योगे सप्त नदीः परि गच्छति । अश्विनोरश्वा धूर्षु देवयुक्ता अश्राम्यन्तः शीघ्रगन्तारो भूत्वाऽश्विनौ वहन्ति । अस्मिन् रथवहनेऽश्विनौ "भुरणौ" भर्तारौ भवतः । [७. ६७. ८] ।

१—सुपप्तनी पेतथुः" [१ १८२. ५] । ऊहथुः पतङ्गैः" [१. ११६. ४] । "पर्णा मृगस्य पतरोरिवारभे" [१. १८२. ७] पृणाति, पर्णयति, पिपर्तीति वा पर्णम् । पृण प्रीणने, पृ पालनपूरणयोः ।

सप्तनद्यः ॥

अत्र शेषा वसूतिर्भवति ।

१. यत्र रथचक्रवत् सूर्यः भ्रमति, यत्र चक्रमेकं द्यां परीयते तत्र षड्भि-र्ऋतुभिः षड् स्रोतांसि । तदानीं मेरोः शिखरे पतितकुलालचक्रगत्या सूर्यो भ्रमति । इदं सप्तमं स्रोतः ।

अश्विनोः रथ इमानि सप्त स्रोतांसि परितो गच्छति । सकृद् योगेनायं रथः सप्त स्रोतांसि परिगच्छति । अस्मिन् परिगमने देवयुक्ताः अश्विनोः अश्वाः न शुष्यन्ति, न वा श्राम्यन्ति । [७. ६७. ८; १. ३०. १९] ।

२. तिस्रो भूमीर्धारयन् त्रीँरुत द्यून् [२. २७. ८] इति श्रुत्या यथा कुमेरौ त्रयो लोका एवं सुमेरावपि, तथा समानन्यायेन मध्यवर्तिन्यन्तरिक्षे अपि त्रयो लोकाः स्युः । "त्रयो वा इमे त्रिवृतो लोकाः" [ऐ. ब्रा. १७. ३] अथ पृथिव्यां कुमेरौ लोकसप्तकं दिवि सुमेरौ लोकसप्तकं[1], समानन्यायेनान्तरिक्षेऽपि, लोकसप्तकं भवति ।

मेरुस्थाने रात्रौ नवनवति, शतं वा दिनानि दीर्घं तमो भवति । मेरुमध्यः सप्तमांशं यावत् अहोरात्रयोर्वैषम्यं भवति । ततोऽग्रेऽहोरात्रः कालः एकदिनात्मकः (षष्टिदण्डात्मकः) भवति ।

यत्राहोरात्रयोर्वैषम्यं भवति तत्र विषमं रात्रिमानम् अथर्ववेदे रात्रिसूक्ते श्रूयते—

ये ते रात्रि नृचक्षसो द्रष्टारो नवतिर्नव ।
अशीतिः सन्त्यष्टा उतो ते सप्त सप्ततिः ॥
षष्टिश्च षट् च रेवति पञ्चाशत् पञ्च सुम्नयि ।
चत्वारश्चत्वारिंशच्च त्रयस्त्रिंशच्च वाजिनि ॥
द्वौ च ते विंशतिश्च ते रात्र्येकादशावमाः ।
तेभिर्नो अद्य पायुभिर्नु पाहि दुहितर्दिवः ॥ [अ. वे. १९. ४७. ३—५] ।

अत्रस्थानभेदेन रात्रिभेदाः निर्दिष्टाः । ते चांशसप्तकस्थानपर्यन्तमेव भवन्ति । एषु स्थानेषु प्रतिस्थानं भिन्नत्वं गृहीत्वा द्योलोकसप्तकं सुमेरौ, भूलोकसप्तकं कुमेरौ । यथा सुमेरुकुमेर्वोः सप्तविधत्वं लोकगतम् एवमन्तरिक्षलोकेऽपि वैषम्य-निबन्धनं लोकसप्तकम् इति [द्र. वै. वि. पृष्ठः १०—११] ।

"त्रिरश्विना सिन्धुभिः सप्तमातृभिः" [१. ३४. ८] ।

३. अथवा सप्तनद्यः सप्ताहगतानि सप्तदिनानि । तथाहि द्वापञ्चाशता सप्ताहैः संवत्सरस्य पूर्तिर्भवति । अत्र दिनानि भवन्ति ५२ × ७ = ३६४ ।

१—सप्त वै देवलोकाः [ऐ. ब्रा. १७. ३]

अन्यत्र यद्यपि ३६० दिनान्येव संवत्सरे श्रूयन्ते—

"तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः।"

[१. १६४. ४८]

"सप्त शतानि विंशतिश्च" [१. १६४. ११]। षष्ट्यधिकशतत्रयसंख्याकान्यहानि, तावत्य एव रात्रय इत्येवं तद् विभागः। [सायणः]

संवत्सरचक्रे त्रीणि शतानि षष्टिश्च अराख्यानीयानि अहानि अर्पितानि। संवत्सरे एतावन्तः (३६०) मण्डलस्य परिक्रमाः भवन्ति।

परन्तु मण्डलस्य स्वयमुदयार्थं मेरुमध्ये चत्वारः (४) परिक्रमाः अपेक्ष्यन्ते। तथाहि मण्डलं यदा विषुववृत्ते भवति तदा सुमेरुकुमेर्वोर्मण्डलम् अर्धोदितं वा अर्धास्तं वा भवति। तत्र बिम्बस्य समग्रस्य उदयार्थं वाऽस्तार्थं वा पुनः परिक्रमद्वयमपेक्ष्यते। एवं संपूर्णबिम्बस्य उदयार्थम् अपेक्षितान् चतुरः परिक्रमान् योजयित्वा संवत्सरे ३६४ परिक्रमाः, तावन्त्यहानि च भवन्ति [द्र वे.वि. पृ. २१७]।

सप्ताहदिनानि वारशब्देन व्यपदिश्यन्ते। वारशब्दस्य मण्डलाकारवृत्तिनिबन्धनः। "वारेभिरर्षति" [९. २०. १; ३८. १] इति श्रुत्या वारैर्गमनम् आदित्यस्य प्रतीयते। एवं सप्ताहमानेनैव संवत्सरस्य क्लृप्तिर्भवति, न षड्भिः अष्टाहैर्वा। सप्ताहरूपं परिमाणं न मासमनुरुध्य भवति। मासमाने तु षडहप्रमाणमाद्रियते। यथा एकषष्ट्यधिकशतत्रयदिनसाध्ये गवामयनाख्ये संवत्सरसत्रे पृष्ठ्यषडहैः अभिप्लवषडहैश्च अहःक्लृप्तिर्भवति।

भुज्योः पारणं समुद्रात्।

अथ प्रकृतमनुस्रियते।

भुज्योः पारणे या ऋचोऽश्विनोर्ऋषिभिः प्रोक्ताः सन्ति तत्र प्रक्रियाया विवेको नास्ति। यथा बार्हस्पत्यस्य भरद्वाजस्याऽऽर्षे—

तं भुज्युं विभिरद्भ्यः समुद्रात् तुग्रस्य सूनुमूहथू रजोभिः।
अरेणुभिर्योजनेभिर्भुजन्ता पतत्रिभिरर्णसो निरुपस्थात्॥ [६. ६२. ६]

"विभिः अश्वैः। रजोभिः मार्गैः। अरेणुभिः रेणुरहितैरन्तरिक्षैः भुजन्ता रक्षन्तौ। योजनेभिः रथयुक्तैः। पतत्रिभिः पतनवद्भिः। अर्णसः उदकस्य। उपस्थात् योनेः। समुद्राद् अद्भ्यः इति प्रयोगो मातुर्गृहाद् गच्छतीतिवत्।"

[सायणः]

अत्र अर्णः, आपः, समुद्रः इत्येतेषु शब्देषु सत्स्वपि नौशब्दो न श्रूयते।

ध्रुवयोरन्तरा गतिरत्र।

अत्रेः सांख्यस्याऽऽर्षे—

युवं भुज्युं समुद्र आ रजसः पार ईङ्खितम्।
यातम् अच्छा पतत्रिभिर्नासत्या सातये कृतम्॥ [१०. १४३. ५]

भुज्युविषयिणीयमग्निमर्क् दाधातव्याम् [आश्विनसूक्ते]।

अत्र भुज्युः समुद्रे रजसः पारे (उदके निमग्नः प्रान्ते तरङ्गसमूहे) ईङ्खितः (दोलायितः) । अश्विनौ पतत्रिभिस्तमुपेत्य सातये (अश्विनोः संभजनाय समर्थं पुनर्युवानम्) अकुरुताम् ।

अस्याम् ऋचि "पतत्रिभिः" इति पदस्य किमपि विशेषणं नास्ति । पारे ईङ्खितम्, अश्विना, सातये इत्येतानि पदानि भुज्युविषये नवीनानि ।

अत्र रजसः पारं भुवो क्षितिजः । तत्र ईङ्खनं वर्तुलवृत्त्या क्षितिजसम्बद्धं त्रिः परिक्रमणम्[1] ।

अत्र अश्विनौ इति पदं न श्रूयते । "नासत्या" इति पदं भुज्युसम्बन्धेन कक्षीवतः आर्षे प्रथमं श्रुतम् [१. ११६. ४] । द्वितीयत्वेनात्र श्रूयते ।

नासत्यशब्देन रात्रौ प्रकाशमान सत्यात्मकं तेजो द्योत्यते । निशीथात्परतः प्रागुदयात् प्रवर्धमानं तेजः सत्यम् । तत् तेजः सूर्यम् अभि प्रणीयते इत्यतः "नासत्यौ सत्यस्य प्रणेतारौ इत्याग्रायणः" इति यास्कः [निरु. ६. १३] ।

अस्तं यन् सूर्यः अत्र भुज्युः यः समुद्रे प्रवाह्यते पित्रा तुग्रेण । सविता प्रातः कालिकः, तुग्रः अस्तसविधवर्ती । भुज्युः तुग्रस्य सूनुः[2] । सूर्यः अस्तपार्श्वाद् उदय-

---

१—त्रयः परिक्रमाः । स्थूलदृष्ट्येयम् । यतः परिक्रमाः पादोनचत्वारः (३¾) भवन्ति । सोभरेः काण्वस्य आर्षे भुज्युना अश्विनोः रथो बुध्यते ।
[८. २२. १-२]

२—तुग्रः अस्तसविधवर्ती । भुज्युः तुग्रस्य सूनुः ।
√तुज् (हिंसायां) + रक् > तुग्रः । न्यङ्क्वादित्वाद् जस्य गः ।
√ भुज् (पालनाभ्यवहारयोः) + युक् > भुज्युः ।
"भुजिमृङ्भ्यां युक्त्युकौ" [उ. सू. २०१]
इन्द्रः कुत्सस्याभीष्टये वेतसून् (नाम जनपदान्) प्रासाधयत् । अपि च तुग्रं स्मदिभं च पिता पुत्रायेव कुत्साय वशमनयत् [१०. ४९. ४] ।
इन्द्रः, मातुः पुत्राः यथा वशवर्तिनः, तथा द्योतमानाय (ऋषये) वेतसुं, दशोणिं, तूतुजिं, तुग्रम्, इभं च उपसृष्टान् अकरोत् ।
"स वेतसुं दशमायं दशोणिं तूतुजिम् इन्द्रः स्वभिष्टिसुम्नः ।
आ तुग्रं शश्वद् इभं द्योतनाय मातुर्न सीम् उपसृजा इयध्यै ॥ [६.२०.८]
अनेन तुग्रः कुत्सस्य द्योतनस्य च विरोधी, इन्द्रेण वश्यश्चेति बुध्यते ।
तुज हिंसायां तोजति । तुजि पालने तुञ्जति ।
तुजि हिंसाबलादाननिकेतनेषु । तुञ्जयति । तुञ्जति ।
तुजि भाषार्थः । तुञ्जयतिः । तुञ्जति ।

तूतुजानः [१. ३. ६; १२९. १] त्वरमाणः ।

तूतुजानः [१. ६१. १२] त्वरमाणः । यद् वा शत्रून् हिंसन् ।

तूतुजाना (गीः) [७. ८४. ५] प्रेर्यमाणा । (सायणः)

तुग्र्यावृधम् (८. ४५. २९; ९९. ७) उदकस्य वर्धयितारम्]

"तुग्रो ह भुज्युम् अश्विनोदमेघे ।" [१. ११६. ३]

तुग्रः (पिता) भुज्युं (सूनुं) उदमेघे (समुद्रे) अवहत् रयिं न (मरिष्यन् धनमिव) अवाहयत् । अस्तसन्निधवर्ती तुग्रः । सूर्यस्य अस्तसमये पृथिव्याः अस्तपार्श्वे "उदमेघः" साम्ध्यं (सान्ध्यात्मकं) तेजः प्रवर्तते । तस्मिन् उदमेघे प्रवर्तमाने सति, भुज्युः (सूर्यः सूनुः) प्रवाहितः, पृथिव्याः अन्यस्मिन् पार्श्वे प्रकाशनाय । नासत्यौ तं प्रवाहितं भुज्युं नौभिः रथैश्च "अस्तं" प्रापयतः [१. ११६. ३–५] ।

अस्तशब्देन अत्र गृह गृह्यते । सूर्यः उदयन् स्वगृहं प्रविशतीव । समुद्रे प्लावितः असौ नासत्याभ्यां गृहं प्राप्यते ।

"अस्तं वयो न तुग्र्यम्" [८. ३. २३]

"वक्षन् वयो न तुग्र्यम्" [८. ७४. १४]

अस्यते क्षिप्यते तस्मिन् पदार्थजातम् इत्यस्तं गृहम् । [सायणः ८.३.२३]

उदीयमाने सूर्ये चन्द्रतारकादीनां ज्योतींषि क्षीयन्ते । तानि सूर्यमण्डले प्रविशन्तीव ।

"अत्रेयम् आख्यायिका । तुग्रो नाम अश्विनोः प्रियः कश्चिद् राजर्षिः । स द्वीपान्तरवर्तिभिः शत्रुभिरत्यन्तम् उपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत् । सा च नौः मध्ये समुद्रम् अति दूरं गता वायुवशेन भिन्ना आसीत् । तदानीं स भुज्युः शीघ्रम् अश्विनौ तुष्टाव । तौ च स्तुतौ सेनया सहितम् आत्मीयासु नौष्वारोप्य पितुः तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति ।" [सायणः १. ११६. ३]

तुग्रेण भुज्युरुदमेघे समुद्रे प्रवाहितः । नासत्यौ तं भुज्युं मध्येसमुद्रात् नौभिः रथैश्च त्रिभिरहोरात्रैः पितुः तुग्रस्य समीपं प्रापयामासतुः ।

"युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।

युवं भुज्युमर्णसो निःसमुद्राद् विभिरूहथुर्ऋज्रेभिरश्वैः ॥" [१. ११७. १४]

पुनर्मन्यौ ।

"यथा भुज्योः समुद्रगमनात् पूर्वं युवां स्तोतव्यौ तथा पुनरपि इदानीं स्तोतव्यौ अभवतम् । यदा युवां समुद्रमध्ये सेनया सह निमग्नं भुज्युं तुग्रस्य

पार्श्वे सूयते इति सूनुः । प्रतीचि अस्तं गतः सूर्यः पुनः प्राचि उदयस्थलं नीयते, रात्रौ नासत्याभ्याम् इत्यतः तौ रात्रिकालिकौ ।

"ता भुज्युं विभिरद्भ्यः समुद्रात्
तुग्रस्य सूनुम् ऊहथू रजोभिः ।" [६. ६२. ६]

पुत्रं·········निरूहथुः निर्गमय्य पितृसमीपं प्रापितवन्तौ तदानीं पुनरप्यतिशयेन स्तोतव्यौ जाताविस्यर्थः ।" [सायणः]

अनेनेदं प्रतीयते यत् समुद्रम् अभितः भुज्योः प्रवाहघट्टे तरणघट्टे च, अस्तस्थले उदयस्थले च, तुग्रो विद्यते । "तुग्रशब्दो रश्मिनाम । तद्वान् तुग्रः ।" [सायणः तै. आ. प्र. प्रश्नः]

"तुग्रः" इत्यत्र "स्युग्रः" इति पाठो दृश्यते । "स्युग्रोऽस्युग्रो मूर्खः कश्चित् पुमान्" इति सायणः । [तै. आ. प्रथमे प्रश्ने]

कुत्सस्य आङ्गिरसस्य आर्षे भुज्युम् इतरान् त्रीन् च रक्षतोऽश्विनौ ।

"याभिरन्तकं जसमानम् आरणे
भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कन्धुं वय्यं च जिन्वथ—
स्ताभिरू षु ऊतिभिरश्विना गतम् ॥" [१. ११२. ६]

१. अन्तकः (शत्रूणामन्तकरः) ।

२. भुज्युः (सर्वस्य पालकः तुग्रपुत्रः) ।

३. कर्कन्धुः ।

४. वय्यः ।

१. आरणे (अगाधे कूपे–अन्धकारे) जसमानः (हिंस्यमानः) अन्तकः । अन्तं कारयत्यसौ । अहनि प्रकाश्य सायं क्षितिजम् उपयन् सूर्योऽत्र अन्तकः ।

२. अस्त गतः (उदके–तमसि प्रविष्टः) सूर्योऽत्र भुज्युः ।

३. विततं रश्मिजालं संहरन् सूर्योऽत्र कर्कन्धुः । "मध्या कर्तोर्विततं संजभार ।" [१. ११५. ४]

४. उदयस्थले रश्मीन् वितन्वन् वयन् सूर्योऽत्र वय्यः । "यदेदयुक्त हरितः सधस्थात्" [१. ११५. ४]

"यस्मिन्नेव काले रसहरणशीलान् स्वरश्मीन् हरिद्वर्णान् अश्वान् वा सहस्थानाद् अस्मात् पार्थिवाल्लोकाद् आदाय अयुक्त अन्यत्र संयुक्तान् करोति ।"
[सायणः]

"स वा एषो (सूर्यः) ऽपः प्रविश्य वरुणो भवति ।" [कौ. ब्रा.१८.९]

अश्विनोर्वाहाः ।

अश्वः, वाजी, पतङ्गः, पतत्री, विः, वृषभः, शिंशुमारः, रासभः—इत्येते अश्विनोः वाहाः । अत्र वाजी, पतङ्गः पतत्री, विः—इति पदानि विशेषणानि अश्वस्य ।

अश्वाः ।

अश्विनोरश्वा उषसि प्रबुद्धा भवन्ति । उषर्बुधो वहन्तु सोमपीतये [१. ९२. १८] । वर्षकस्याश्वस्य कारोतरस्थानीयात् खुरात् सुरायाः शतं कुम्भान् असिञ्चताम् अश्विनौ [१. ११६. ७] । अन्यत्र तस्यैवोल्लेखनम् । वाजिनो वेगवतोऽश्वस्य शफात् शतं कुम्भान् मधूनामसिञ्चताम् ॥ [१. ११७. ६]

श्येनासः (शंसनगमनाः) आशवः (व्याप्नुवन्तः), पतङ्गाः, (पतन-समर्थाः), अप्तुरः (आप इव त्वरोपेताः), दिव्यासो न गृध्राः (अन्तरिक्षे वर्तमानाः गृध्राख्याः पक्षिण इव शीघ्रं गच्छन्तः)—एतादृशा अश्वा अश्विनौ हविर्लक्षणमन्नम् अभिलक्ष्य प्रापयन्ति । [१. ११८. ४]

अश्विनोः अश्वाः सुष्ठु योजिता भवन्ति "सुयुग्भिरश्वैः" [१. ५८. ३] । क्वचिद् अश्वस्थाने विशब्दः श्रूयते । "विभिश्च्यवानमश्विना नियाथो अद्वया-विनम् ।" [५. ७५. ५] "आ वां वयोऽश्वासो वहिष्ठाः" [६. ६३. ७]। अत्र वयः (गन्तारः) अश्वविशेषणम् । वयः (अश्वाः) वपुषे (अश्विनोः शोभायै) प्रकर्षेणानुपतन्ति यदाऽश्विनौ दर्शनीयाभिः श्रीभिः उषसः पुष्टिं वहतः । [६. ६३. ६]

वसिष्ठस्यार्षे "स्थविरासः" (स्थूलाः प्रवृद्धा अश्वाः) अश्विनौ मधूनि पातुं प्रापयन्ति [७. ६७. ४] । "एतयोः अश्विनोः अति प्रवृद्धत्वात् शीघ्रगतेः अपेक्षितत्वाच्च स्थविरैरेव भाव्यम् ।" [सायणः]

अश्विनोः समानयोजनो रथो यदा एकस्मिन् एव योगे सप्त स्रवतः परि गच्छन्ति, तदाऽश्विनोः सुभ्वः (सुभवनाः) देवयुक्ताः (देवाभ्यामश्विभ्यां युक्ताः) न वायन्ति (न शुष्यन्ति, न श्राम्यन्ति) ते तरणयः (तारकाः शीघ्रगन्तारः) च रथं वहन्ति । [७. ६७. ८]

अश्विनोरश्वा अस्रिधानाः (अक्षीयमाणाः), अश्रमाः (श्रमरहिताः), अव्यथिनः (व्यथारहिताः), पतत्रिणः (पतनवन्तः गमनवन्तः) च समुद्रे उदकाद् भुज्युं वहन्ति । [७. ६९. ७]

अश्वः वाजी वेगवान् घृतपृष्ठः सुखकरपृष्ठभागः च [७. ७०. २] । उषसि आसन्नायां सुम्नायवः (सुखेन योजयन्तः) वृषणः (वर्षकाः) ऋतयुजः (उदकयुक्ताः उदकप्रदाः) अश्वाः वसुमन्तं रथम् आवहन्ति । [७. ७१. ३] ।

मक्षूयुभिः (शीघ्रगन्तृभिः) हयेभिः (अश्वैः) अश्विनावायातः [७. ७४. ४]।

प्रुषितप्सवः (स्निग्धरूपाः) पर्णिनः (पक्षोपेताः) वयः (पक्षिण इव गन्तारः) अश्वा अश्विनावावहन्ति। [८. ५. ३३]

द्रवत्पाणिभिः (शीघ्रगमनप्रदैः) अश्वैर्युक्तेन हिरण्मयेन रथेन धीजवनौ (धिय इव जवो ययोस्तौ) नासत्यौ अगच्छतः। [८. ५. ३५]

अश्विनौ सहस्रसंख्याकैः गव्येभिः (गोसमूहैः) अश्वैः (अश्वसमूहैः) च आगच्छतः। [८ ७३. १४]

उषसि प्रबोधः, सुरा-मधु-सेकः, सुखयानम्, व्यापनम्, पतनम्, त्वरा, शयनं, स्थविरत्वं, सुखभवनं, देवयोगः, ऋतयोगः, स्निग्धता, अशोषः, द्रवत्वं, द्रुतगतिः, पक्षद्वयसंयोगः—एतेऽश्वगुणाः।

यदश्विनो रथे वृषभः (अनड्वान्), शिंशुमारः (जलजन्तुग्राहः) इति विरुद्धौ प्राणिनौ नियुक्तावास्ताम्। अनेन अश्विनोः सामर्थ्यातिशयं द्योत्यते। दिवोदासस्य भरद्वाजस्य वर्तिर्यदाश्विनौ गतवन्तौ तदा वृषभशिंशुमारयुक्तः तयोः रथः धनम् उवाह। [१. ११६. १८]

रासभस्य रूपनिर्णयः।

रासभोऽश्विनोरसाधारणो वाहनः[1]। स सहस्रं जिगाय आजिधावने [१. ११६. २]। रासभस्य विशेषणं वाजीति।

कदा योगो वाजिनो रासभस्य येन यज्ञं नासत्योपयाथः। [१. ३४. ९]

वाजिनो बलवतो रासभस्य भवदीयाश्वस्थानीयस्य गर्दभस्य। [सायणः]

रासभार्थे गर्दभशब्दः श्रूयते, तथापि गर्दभशब्दोऽश्विनोर्वाहनत्वेन क्वचि न श्रूयते। समिन्द्र गर्दभं मृण नुवन्तं पापयाऽमुया। [१. २९. ५]।

"हे इन्द्र! अनया निन्दारूपया वाचा नुवन्तं स्तुवन्तम् अपकीर्तिं प्रकटयन्तं गर्दभसदृशं श्रोतुमशक्यं शब्दं कुर्वाणं शत्रुं सम्यग्मारय।" अत्र गर्दभशब्दो वाहनार्थे न प्रयुक्तः।

१—हरी इन्द्रस्य। रोहितोऽग्नेः। हरित आदित्यस्य। रासभावश्विनोः। अजाः पूष्णः। पृषत्यो मरुताम्। अरुण्यो गावः उषसाम्। श्यावाः सवितुः। विश्वरूपा बृहस्पतेः। नियुतो वायोरिति दश आदिष्टोपयोजनानि। [निघ० १. १५]। आजिधावनप्रकरणे ऐतरेयब्राह्मणे वाहननिरूपणे—
अश्वतरीरथेनाग्निराजिमधावत्। गोभिररुणैरुषा आजिमधावत्।
अश्वरथेनेन्द्र आजिमधावत्। गर्दभरथेनाऽश्विना उदजयताम्।
[ऐ. ब्रा. १७. ३]

"न गर्दभं पुरो अश्वान्नयन्ति" [३. ५३. २३] । "गर्दभं रासभम् अश्वात् पुरः पुरस्ताद् न नयन्ति ।" [सायणः] ।

शतं मे गर्दभानाम् । [८. ५६. ३] [वालखिल्ये सूक्ते]

यद्यपि रासभो गर्दभोऽश्विनोर्वाहनत्वेन परिगण्यते, तथापि रासभ इन्द्रस्य वाहनत्वेनापि श्रूयते ।

यत्रा रथस्य बृहतो निधानं विमोचनं वाजिनो रासभस्य । [३. ५३. ५]

"यत्र गृहं प्रति इन्द्रस्य गमने महतो रथस्योपरि अवस्थानं प्रयोजनम् । अत्र स्थितो रासभस्य ह्रेषारवं कुर्वतो वाजिनो (अश्वस्य) रथाद् विमोचनं प्रयोजनम् ।"

अश्वमेधे विशसितस्य अश्वस्य दिवं प्रापणे रासभवाहः श्रूयते ।

हरी ते युञ्जा पृषती अभूताम् उपास्थाद् वाजी धुरि रासभस्य । [१. १६२. २१]

"हरी एतन्नामानौ इन्द्रस्याश्वौ तव (अश्वस्य) रथे युक्तौ भविष्यतः । "पृषती" पृषत्यौ मरुतां वाहनभूतौ "युञ्जा" युक्तौ भविष्यतः । तथा "रासभस्य" अश्विवाहनस्य एतन्नामकस्याश्वस्य धुरि स्थाने वर्तमानः कश्चिद् वाजी उपस्थास्यति वहतीत्यर्थः । यद् वा रासभस्य भानोः धुरि वर्त्मनि युक्तो वाजी अश्वः उपस्थास्यति । देवत्वं गच्छतः तव गमनाय इन्द्रादयः स्वस्ववाहनानि प्रेषयन्तीत्यर्थः । यद्वा तत्तद्देवभावमापन्नं त्वा तानि तानि वाहनानि वहन्ति ।" [सायणः]

एवं दिवं गच्छन्तमश्वम् इन्द्रस्य वाहनं, मरुतां वाहनं, अश्विनोः वाहनं च वहति । अतः स्वर्गगमनेऽश्विनोरनुग्रहोऽपेक्ष्यते । तथापि स्वयं रासभो न युज्यतेऽत्र । रासभः खलु अश्वान्निकृष्टः पशुः । अत एवान्यत्र श्रूयते—

न गर्दभं पुरो अश्वान्नयन्ति [३. ५३. २३] ।

एवं भूतोऽपि रासभोऽश्वादीन् इतरान् वाहान् अतिशय्य वर्तते । यतो हि आजिधावने सहस्रस्य विजेता स एव [१. ११६. २] । अयं चाश्विनोरेवानुभावः । अत एव क्वचित् स्वसामर्थ्यातिशयप्रकटनायाश्विनौ विभिन्नस्वभावौ वृषभंशिशुमारौ रथे युञ्जाते [१. ११६. १८][1] ।

१—वृषभोऽनड्वान् शिंशुमारो ग्राहः । एकः स्थलचरोऽन्यो जलचरः । परस्पर विरुद्धावपि स्वसामर्थ्यप्रकटनाय वाहनतया संयुक्तावास्ताम् । [सायणः] ।
द्र. इमं तं पश्य वृषभस्य युञ्जं काष्ठाया मध्ये द्रुघणं शयानम् ।
येन जिगाय शतवत्सहस्रं गवां मुद्गलः पृतनाज्येषु ॥ [१०. १०२. ९]
आजावनेन भार्म्यश्व इन्द्रासोमौ तु मुद्गलः ।
अजयद् वृषभं युक्त्वा पैन्द्रं च द्रुघणं रथे ॥ [बृ. दे. ८. १२]
तत्रेतिहासमाचक्षते—
मुद्गलो भार्म्यश्व ऋषिर्वृषभं च द्रुघणं च युक्त्वा संग्रामे व्यवहृत्याऽऽजिं जिगाय [निरु.९.२३] द्रुघणो द्रुममयो घनः [निरु. ९, २३] [मुद्गरः]

नवमोऽध्यायः

॥ अथ ऋक्संहितायां मण्डलान्यनु यज्ञस्य प्रगतिः अश्विभ्याम् ॥

अश्विनौ यज्ञं निर्वहतः ऋतुना सह "ऋतुना[1] यज्ञवाहसा" [१. १५. ११]।

यज्ञानुष्ठानेन धननिवासादिभिः जनान् रक्षतोऽश्विनौ। यदाऽश्विनौ प्रेष्ठौ प्रियतमौ भवतः तदा तौ अध्वर्यन्तौ (अध्वरं पारयितुमिच्छन्तौ) "इषां रयीणाम् अपाम्" [एतान्] "उशिनौथः" [१. १८१. १]।

अश्विनौ व्यश्नुवानौ। तयोर्व्यापनेन यज्ञः स्वर्गं गच्छति। अग्निर्यज्ञं नयति "ऋतुना यज्ञनीरसि" [१. १५. १२]। पृथिवीस्थानोऽग्निः हविर्भारम् अश्विनोः रथम् आवहन्नेव नयति। अश्विनौ विमदाय जायां वहतः [१.११६.१]। इदम् अश्विनोर्यज्ञनिर्वहणस्य रूपान्तरमात्रम्। विमदोऽत्र अग्निः, जाया च हविः। इदं जायाया वहनं भुज्यो[2]र्वहनत्वेन आश्विनेषु सूक्तेषु वर्ण्यते। अत एव दशमे मण्डले श्रूयते यद् विमदेन स्तुतौ अश्विनौ संगतौ अमथ्नीताम् इति—

"विमदेन यद् ईळिता नासत्या निरमन्थतम्" [१०. २४. ४.]। वस्तुतः पृथिव्यां मानवेन यज्ञेऽक्रियमाणेऽपि द्यावापृथिव्यात्मना अहोरात्रवृत्त्या वर्तमानौ अश्विनौ यज्ञं निर्वहत एव। तेनैव सूर्याचन्द्रमसोरुदयास्तमयौ, मेघेन वृष्टिः, पृथिव्याः वसुन्धरात्वं च ऋतुना भवन्ति। अत एव देवाः जगत् स्थितिहेतुभूतानि कर्माणि पुनः पुनः निर्वोढुम् अश्विनौ ब्रुवन्ति।

विश्वे देवा अकृपन्त समीच्योर्निष्पतन्त्योः।
नासत्यावब्रुवन् देवा पुनरावहतादु इति॥ [१०. २४. ५]

देवताप्रीत्यर्थं समन्त्रकोऽग्नौ हविःप्रक्षेपेण यज्ञः पृथिव्यां निर्वर्त्यते। स च यज्ञो दिवं नीयमानो दिव्येन ज्योतिषा सोमेन च परिणम्यते। एतदर्थम् अश्विनौ शुचिभिः रजोभिः (निर्मलैः तेजोभिः) यज्ञं परिचरन्तौ, रथस्य दीप्तिं वर्धयन्तौ, अपरिमितानि बहूनि वरांसि (तमोनिवारकाणि तेजांसि) निर्मिमाणौ अपः उद्दिश्य धन्वानि (मरुप्रदेशान्) स्वकीयान् अश्वान् अतिक्रामयतः [६.६२.२]। एवं कुर्वाणौ तौ यजमानस्य प्रेष्ठौ सन्तौ अप उन्नयतः [१. १८१. १]।

१—ऋतुरर्त्तेगतिकर्मणः [निरु. २. २५]

२—भुज्युः सुपर्णः [वा. सं. १८. ४२]। "यज्ञो वै भुज्युः। यज्ञो हि सर्वाणि भूतानि भुनक्ति।" [श. ब्रा. ९. ४. १. ११]

अथ दिवं गच्छतो यज्ञस्य
मण्डलान्यनु दृश्यमानः क्रमः ।

प्रथमं मण्डलम् ।

प्रथमे मण्डले यागनिष्पादकानि अन्नानि अश्विभ्यां दीयन्ते । अत्र अश्विनौ द्रवद्भ्यां पाणिभ्यामुपेतौ, शोभनस्य कर्मणः पालकौ, विस्तीर्णभुजौ (बहुभोजिनौ वा) इति संबोध्येते । अश्विना यज्वरीरिषो द्रवत्पाणी शुभस्पती ।

पुरुभुजा चनस्यतम् ॥ [१. ३. १]

"हे अश्विनौ ! युवाम् इषः हविर्लक्षणान्यन्नानि चनस्यतम् । इच्छतं भुञ्जाथाम् इत्यर्थः । यज्वरीः यागनिष्पादिकाः । द्रवत्पाणी हविर्ग्रहणाय द्रवद्भ्यां पाणिभ्यामुपेतौ । शुभस्पती शोभनस्य कर्मणः पालकौ । पुरुभुजौ विस्तीर्णभुजौ बहुभोजिनौ वा ।

यज्वरीः । यागकरणानामप्यन्नानाम् अधिश्रितवतीतिवत् लक्षणायां कर्तृत्व-विवक्षया सुयजोर्ङ्वनिप् [पा. ३. २. १०३] इति ङ्वनिप् प्रत्ययः ।" [सायणः]

ऋक्संहितायां यज्वरीरिति पदं द्विरेव श्रूयते । द्वितीयमपि आश्विन्यामृचि, तच्च दशमे मण्डले, यत्र "यज्वरीः" इति पदं "विशः" इति शब्दस्य विशेषणम् । विशो येन गच्छथो यज्वरीर्नरा [१०. ४१. २] ।

अत्र अश्विनौ प्रातःकाले अश्वैर्युज्यमानं प्रातर्गन्तारं मधुनो वाहकं रथमधितिष्ठतः । यजनशीलाः विशः (प्रजाः) तौ गच्छतः । स्तोतुः होतृमन्तम् (ऋत्विग्युक्तं) यज्ञं च गच्छतः ।

प्रातर्युजं नासत्याधितिष्ठथः प्रातर्यावाणं मधुवाहनं रथम् ।
विशो येन गच्छथो यज्वरीर्नरा कीरेश्चिद् यज्ञं होतृमन्तमश्विना ॥ [१०.४१.२]

एतावद् अत्र स्पष्टम् । इषो भवन्ति विशः । अग्नेः प्रारभ्य होतरि पर्यवसानं च ।

"युवाकवः सुताः" [१. ३. १]
"होतृमन्तम्" [१०. ४१. २]

पष्ठिवाड्ध्वर्यो नवतिश्च पाथा अग्निं होतारमन्तरा विभूताः । [आश्व.श्रौ.१.३]

तम् (आदित्यं) षड्भिर्मासैरूर्ध्वम् उदौहन् । [जै. ब्रा. २. ५][1]

१—द्र. परिशिष्टम् ८.

यदा इषो यज्वर्यः तदा अश्विनौ द्रवत्पाणी [१. ३. १]
यदा विशो यज्वर्यः तदा अध्वर्युः मधुपाणिः [१०. ४१. २–३]
प्रथममण्डलेऽत्र ऋषिः मधुच्छन्दा वैश्वामित्रः ।
दशममण्डलेऽत्र ऋषिः सुहस्त्यो घौषेयः ।[1]

मधुसेकेन रथस्य पवयो भूमिं विपुनन्ति ।

मधुच्छन्दसो मधु आवरणम् । विश्वं तस्मै मोदते । तथापि तस्य हस्तो नास्ति । सुहस्त्यः स्तुतिकर्त्र्याः घोषायाः पुत्रः शोभनाङ्गुलियुक्तश्च । "अध्वर्युं वा मधुपाणिम् सुहस्त्यम्" [१०. ४१. ३] । "सोमपाणिं सुहस्त्यनामानम् ऋषिम्" इति सायणः ।

मधुच्छन्दसा यज्वर्य इषो हूयन्ते । अश्विनौ कामयमानाः सोमाः तेन सुताः बर्हिःषु आस्तीर्णाः सन्ति । [१. ३. १–२]

मेधातिथिः काण्वः अश्विभ्यां मधु पानाय ददाति । अश्विनौ अत्र द्योतमनाग्निमुक्तौ शुद्धकर्माणौ ऋतुना सह यज्ञनिर्वाहकौ च स्तः ।

अश्विना पिबतं मधु दीद्यग्नी शुचिव्रता । ऋतुना यज्ञवाहसा ॥ [१. १५. ११]

असौ काण्वोऽग्रे प्रातःसवनेन युक्तौ अश्विनौ सोमपानार्थं प्रबोधयति, अश्विनौ प्रार्थयते च अस्मदीयं यज्ञं मधुमत्या कशया सेक्तुमिच्छतम् इति [१.२२.१; ३] ।

हिरण्यस्तूप आङ्गिरसः त्रिषु सवनेषु हविर्ददाति । अश्विनौ च यज्ञे त्रिः मधु सिञ्चतः [१. ३४. ३] । अश्विनौ अस्य यज्ञं त्रिचक्रेण, त्रिवन्धुरेण, रासभयुक्तेन त्रिवृता रथेनाऽऽगच्छतः [१. ३४. ९] । प्रतिदिनं यष्टव्यौ अश्विनौ, प्राणिनाम् आत्मभूतः प्राणवायुः शरीराणि इव, वेदिरूपां भूमिं त्रिः व्याप्नुतः [१. ३४. ७] । एवं पृथिवीं परिव्याप्य मधुपानयुक्तैः आस्यैः मधुराणि हवींषि पिबतः [१. ३४. १०] । त्रयस्त्रिंशता देवैः सह मधुपानाय देवयजनदेशम् आगच्छतः [१. ३४. ११]

प्रस्कण्वस्य काण्वस्य यज्ञे "तिरो अह्न्यं" पूर्वस्मिन्नहनि अभिषुतम् अतिशयेन माधुर्योपेतं सोममश्विनौ पिबतः [१. ४७. १] । अश्विनौ, यदा

१—आश्विनम्—कक्षीवान् दैर्घतमसः [१. ११६–१२०] ।
घोषा काक्षीवती [१०. ३९–४०] ।
सुहस्त्यो घौषेयः [१०. ४१] ।

सुहस्त्यः । हस्ते भवा हस्त्या अङ्गुलयः शोभनाङ्गुलिकः सोमः [सायणः ९. १०७. २१] ।

शोभनाङ्गुलियुक्तः । कृताञ्जलिरित्यर्थः [सायणः १. ५७. १] ।

उषाः तयोः श्रियमुपाचरति, तदा, "अक्तुभिः" (रात्रिभिः) "ऋता" (हवींषि) सम्मजतः [१. ४६. १४]। अध्वरे "हवम्" (आह्वानम्) आदरेण शृण्वन्तौ, ऋतं वर्धयन्तौ सोमं पिबतः [१. ४७. २–३]। कक्ष्यात्रयरूपेण त्रिषु स्थानेषु आस्तीर्णे बर्हिषि स्थित्वा सर्वज्ञौ अश्विनौ मधुना यज्ञं सिञ्चतः [१. ४७. ४]। यागसेविनः तयोरश्वाः त्रिषु सवनेषु अश्विनौ आवहतः। अश्विनौ "इषं पृञ्चन्ता" (अन्नं संयोजयन्तौ) बर्हिः प्राप्नुतः [१. ४७. ८]। सूर्यत्वचा रथेन सोमपानार्थम् आगच्छतः। आगत्य कण्वानां सदसि अश्विनौ सदा सोमं पिबतः, परन्तु तत्र पीयमानः सोमः ऋषेर्गोचरो न भवति [१. ४७. ९–१०]।

कुत्स आङ्गिरसः अश्विनोः "पूर्वचित्तये" [पूर्वमेव प्रज्ञापनार्थं] द्यावापृथिव्यौ अग्निं च स्तौति [१. ११२. १]। अश्विनौ "अक्तुभ्ये" प्रकाशरहिते रात्रेः पश्चिमे यामे स्तुतौ आगत्य स्तोतुः ऋषेः वाचं अप्नस्वतीं (विहितैः कर्मभिः संयुक्तां) कुरुतः, तस्य मनीषां (बुद्धिं वेदार्थज्ञानसमर्थां) कुरुतः [१. ११२. २४]।

कक्षीवान् दैर्घतमसो नासत्याभ्यां, वायुर्मेघान् इव, अभ्राणि बर्हींषि इव, कृतान् स्तोमान् प्रेरयति [१. ११६. १]। स बर्हिषि हवींषि आस्तीर्य माधुर्योपेतसोमस्य मदाय अश्विनौ आह्वयति [१. ११७. १]। सोऽश्विनोः वीर्याणि कीर्त्तयन् यज्ञे तयोः "ब्रह्म" (मन्त्रात्मकं स्तोत्रम्) उच्चारयति [१. ११७.२५]।

परुच्छेपो दैवोदासिः देवान् कामयमानः स्तोमैः हव्यैरश्विनौ आह्वयति। अश्विनोः पवयः (रथनेमयः) अन्नं सर्वाः श्रियश्च क्षरन्ति।

युवोर्विश्वा अधि श्रियः पृक्षश्च विश्ववेदसा।
प्रुषायन्ते वां पवयो हिरण्यये रथे दस्रा हिरण्यये ॥ [१. १३९. ३]

अश्विनोः कशा (अश्वताडनी) मधुमती। तया तौ यज्ञं त्रिषु सवनेषु मधुना सिञ्चतः। अनेनैतत् प्रतीयते यद् मधुसेकेन रथः प्रवर्तते, रथस्य वेगो वर्धते।[1]

तया यज्ञं मिमिक्षतम् [१. २२.३]।
त्रिरद्य यज्ञं मधुना मिमिक्षतम् [१. ३४. ३]।
मध्वा यज्ञं मिमिक्षतम् [१. ४७. ४]।

१—युञ्जते वां रथयुजो दिविष्टिषु, अध्वस्मानो दिविष्टिषु [१. १३९. ४]।
दिविष्टिषु दिव एषणेषु [नि. ६. २२]।
अध्वस्मानः ध्वंसनरहिताः [वे. भा.]।
"दिविष्टिषु। स्वर्गस्यैषणेषु द्योतनात्मकस्य यज्ञस्यैषणेषु गमनेषु वा निमित्तभूतेषु।" [सायणः १। १३९. ४]।

मधुमत्या नः कशया[1] मिमिक्षतम् [१. १५७. ४] [द्र. १. २२. ३] ।

मधुसेकेन रथस्य पवयो भूमिं विपुनन्ति रथश्च हिरण्ययो भवति ।
"पवी रथनेमिर्भवति यद् विपुनाति भूमिम्" [निरु. ५. ५] ।

अस्याम् अवस्थायां यज्ञानुष्ठितकर्मधनौ अश्विनौ दिवानक्तं यज्ञकर्त्रेऽभिमतं दत्तः । अक्षीणे हविषि अश्विनोर्दानम् अपि अक्षीणं भवति ।

मा वां रातिरुपदसत् कदाचनाऽस्मद् रातिः कदाचन [१. १३९. ५] । दीर्घतमस औचथ्यस्य "क्षत्रं" [बलं क्षत्रियजातं वा] मधुना सिक्तं भवति यदा वृषणं वृष्ट्यादिवर्षकं रथम् अश्विनौ युञ्जाते । अश्विनौ तस्य पुत्रभृत्यादिषु ब्राह्मं तेजः प्रीणयतः । परकीयासु प्रजासु वर्तमानं अन्नं तस्य कुरुतः ।

यो मनोयोगेनाऽश्विभ्यां हविर्जुहोति, प्रभूतबलौ अश्विनौ रथेन तस्य देवयजनमागत्य तमनुगृह्य तस्य चिकित्सादिकं कुरुतः । स्वल्पेन हविषाऽपि वासयितारौ अश्विनौ सुमतिं दत्तः । कामपूरकेण मनसा चरन्तौ दीर्घतमसो गोः (वेदेः) पदे क्षीरादिघनवतीं शरीरधारिकां बुद्धिं दत्तः [१. १५७–१५८] ।

अगस्त्यो मैत्रावरुणिः अश्विनौ वाजाय (बलाय गमनाय वा) इषे (अन्नाय)

1—मधुमती कशा । मधु अस्याम् अस्तीति मधुमती । मन ज्ञाने । मन अवबोधने । मन्यते ज्ञायते अवबुध्यते वा यद् येन वा तद् मधु । "फलिपाटिनमि—" [उण्. १८] इति मनधातोः उप्रत्यये, धकारेऽन्तादेशे मधु । मधु माद्यतेः [निरु. ४. ८] । मदो हर्षग्लेपनयोः । ग्लेपनं दैन्यम् ।

मधुः धमतेर्विपरीतस्य [निरु. १०. ३१] ।

ध्मा शब्दाग्निसंयोगयोः ।

कशा । कश गतिशासनयोः । पचाद्यच् [पा. ३. १. १३४]

स्त्रियां कशा । यास्कमते कशा—

१. भयं प्रकाशयति अश्वाय (अश्वाजनी) ।

२. अर्थं प्रकाशयति (वाक्) ।

३. कृशा कृशा भवति सूक्ष्मभावात् ।

४. खे (आकाशे) शेते ।

५. क्रोशति (शब्दायते) ।

"अश्वाजनीं कशेत्याहुः । कशा प्रकाशयति भयम् अश्वाय । कृष्यतेर्वाऽणूभावात् । वाक् पुनः प्रकाशयत्यर्थान् । खशया । क्रोशतेर्वा" [निरु. ९. १९] ।

एवं कशा गतेः ज्योतिषः वा वर्धयित्री, स्थूलात् सूक्ष्मतां नेत्री, वायुना व्याप्त्री, शब्दात्मा च ।

च स्तौति । अश्विनोः रथस्य हिरण्मयाः पवयः अभिमतं क्षरन्ति । पश्व इषो मधूनि रथचक्राणि प्रति यन्ति । रथचक्रेण मधु उत्पन्नं भवति ।

"पश्व इषिः । पशुरित्यग्नेर्नाम । "अग्निः पशुरासीत्" [तै.सं. ५.७.२६] इत्यादिश्रुतेः । यद्वा । पशुप्रियत्वात् पशुरित्युच्यते । तस्याग्नेरिष्टिर्भवति । अग्नौ यागः सर्वो युष्मदर्थं प्रवर्तत इत्यर्थः । यद्वा पशुसाध्यो यागो युवाभ्यां प्रवर्तते इति शेषः । "आश्विनं धूम्रललामम् आलभते यो दुर्ब्राह्मणः सोमं पिपासेत्" [तै. सं. २. १. १०. १] । इत्यादिनाऽप्यश्विभ्यां पशुर्विहितः ।"

[सायण: १. १८०. ४] ।

स्तोतारः सत्याः (सत्यफलाः) सन्तोऽश्विनौ स्तुवन्ति । तदा पणिः (लुब्धवणिग् अयष्टा) "हितावान्" [नियतधनोऽपि] धनैर्वियुक्तो भवति । "अनिन्द्यौ" "वृषणौ" (वर्षकौ) अश्विनौ "अन्तिदेवं" [देवान् प्राप्नुवन्तं] सोमं पिबतः ।

"पाथो हि ष्मा वृषणावन्तिदेवम्" [१. १८०. ७.] ।" "रक्षथः कवितारौ अन्तिकस्थदेवं स्तोतारम्" [इति वे. माधवः] । अथ अश्विनोः रथोऽरिष्टनेमिः (अहिंसितचक्रवलयः सन् द्यां परीयते [१. १८०. १०] ।

अहंपूर्वः रथः ।

अश्विनोरध्वर्युत्वम् अपाम् उन्नयने । अथ यज्ञोऽश्विनोः स्तुतिं करोति । अश्विनोः रथो यष्टव्यो भवति यदा स विस्तीर्णावकाशः, विस्तृतपुरोभागः, मनसोऽपि जवीयान् "अहंपूर्वः च भवति [१. १८१. ३] ।

यदा रथोऽहंपूर्वो भवति तदाऽश्विनोः प्रकृतिभेदोऽपि भवति ।

१. एकः तयोः जिष्णुः सूरिः मघवा । अस्य रथोऽश्वाजवनैर्युक्तः, ऊर्ध्वैर्नी-चैश्चरन् यज्ञसदनानि गच्छति । असौ बहूपकल्पितः पूर्वीः (बह्वीः पुरातनीर्वा) इषः अन्नानि उद्दिश्य वृषभ इव (वर्षिता इन्द्र इव) प्रकर्षेण चरति ।

२. अन्यो दिवः पुत्रः सुभगः (आदित्यः) । अस्यायमौ मथनेन निष्पादितैः अन्नैः स्तुतिभिश्च लोकान् आप्याययतः । अस्याऽऽगमनेन यागाः प्रवर्तन्ते, ऋत्विजः प्रसन्ना भवन्ति ।

अगस्त्यो हविष्मान् यथाऽग्निमुषसं च तथा अश्विनौ अपि स्तौति ।

[१. १८१. ४–६; ९]

इन्द्रतमौ (ईश्वरतमौ) मरुत्तमौ (मरुद्वेगगामिनौ) दस्रा (शत्रूणाम् उपक्षपयितारौ) अश्विनौ मधुना पूर्णं सम्बद्धं रथम् आरुह्य हविर्दातुर्यज्ञम् उपयातः [१. १८२. २] ।

यज्ञार्थहवीरहितः पूज्योऽपि अश्विभ्यां पराभूतो भवति । अयष्टारं समतिक्रम्य

तस्य "पणेः असुं" नाशयतः। वचस्यवे (अश्विनोः स्तोत्रमिच्छते) विप्राय (मेधाविने) ज्योतिः (यजनविषयज्ञानं) च कुरुतः [१. १८२. ३]।

सोमयागसम्पादकात् सदसः ऋषिरगस्त्योऽन्नं बलं जयशीलदानं च लभते।
अस्मादस्य सदसः सोम्यादा विद्यामेषं वृजनं जीरदानुम् ॥ [१. १८२. ८]।

त्रिवन्धुरेण (त्रिप्रकारसारथिस्थानेन) त्रिचक्रेण, त्रिधातुना (स्थानत्रयोपेतेन) रथेन अश्विनौ सुकृतो दुरोणं (शोभनसोमाख्यकर्मवतो यजमानस्य गृहं) गच्छतः, पक्षी पक्षैरिव [१. १८३. १]।

यजमानस्य कर्माणि अनु अश्विनोः रथोवर्तते [१. १८३. ३]। यज्ञेऽश्विनोरंशाः—(१) हविषो भागः। (२) स्तुतिरूपा वाक्। (३) मधूनां निषदश्च। [१. १८३. ४]।

अथ ऋषयो हविष्मन्तोऽश्विनो आह्वयन्ति—

गोतमः, पुरुमीळ्हः, अत्रिश्च।

गोतमः (पृथिव्याम्), पुरुमीळ्हः (अन्तरिक्षे-अप्सु), अत्रिः (दिवि-अग्नौ)।

शोभनहविर्दानैरर्यो वह्निः (स्तुतेः प्रेरयिता होता) दिवो नपातारौ अश्विनौ आह्वयति। सोमस्योर्म्या मादन्तौ अश्विनौ स्तुतीः श्रोत्रैः शृण्वन्तौ संचिनुतः। अश्विनोः अप्सु जाताः स्तुतय उच्यन्ते [१. १८४. १-३]।

देवयानः पन्थाः।

अगस्त्यस्य आर्षेण प्रथमे मण्डले आश्विनानि सूक्तानि समाप्यन्ते। प्रथमं मण्डलं शार्चिनः। अत्र देवयानः पन्थाः सिद्धो भवति।

अतारिष्म तमसः पारमस्य। एह यातं पथिभिर्देवयानैः।
[१. १८३. ६; १८४. ६]।

द्वितीयं मण्डलम्।

द्वितीये मण्डले ऋषिर्गृत्समदः प्राणापानस्वरूपः अर्वाग् अश्रान्तं नृवाहणं नेत्रोरश्विनोर्वोढारं यागभूमौ अश्विनोर्विमोचयितारं रथं युञ्जाथाम् इत्यश्विनौ प्रार्थयते। अश्विनौ हवींषि मधुना मिश्रयतः सोमं च पिबतः [२. ३७. ५]।

गृत्समदोऽष्टर्चेन सूक्तेन [२. ३९. १-८] युग्मभूतैः पदार्थैः अश्विनौ उपमिमानोऽश्विनोर्वर्धकं स्तोमं च कुर्वन् यज्ञेऽश्विनौ प्रभूतं स्तौति। अत्र सूक्ते एकत्रिंशद् उपमानानि सन्ति। एतानि अश्विनोर्वर्णनानि। अश्विनौ च मिलित्वा त्रयस्त्रिंशत्संख्या पूर्णा भवति। तत्रैकवर्ज्जम् इतराणि त्रिंशद् उपमानानि युग्मभूतानि, एकं च एकवचने तथाहि—

१ ग्रावाणा इव	९ शृङ्गा इव
२ गृध्रा इव	१० शफा इव
३ ब्रह्माणा इव	११ चक्रवाका इव
४ दूता इव	१२ रथ्या इव
५ रथ्या इव	१३ नावा इव
६ अजा इव	१४ युगा इव
७ मेने इव	१५ नभ्या इव
८ दम्पती इव	१६ उपधी इव
[अष्टौ वसवः]	१७ प्रधी इव
	१८ श्वाना इव
	१९ खृगला इव
	[एकादश रुद्राः]
२० वाता इव	२१ नद्या इव
२२ अक्षी इव	२३ हस्तौ इव
२४ पादौ इव	२५ ओष्ठौ इव
२६ स्तनौ इव	२७ नासा इव
२८ कर्णौ इव	२९ हस्ता इव
३० क्षामा इव	३१ क्ष्णोत्रेण इव
	[द्वादश आदित्याः]
	१२–३१ अश्विनौ

३० क्षामा रोदसी (द्यावापृथिव्यौ)

३१ क्ष्णोत्रेणेव स्वधितिं संशिशीतम् [२. ३९. ७]

असिं तेजनशाणवत् सम्यक् तीक्ष्णं कुरुतम् । [सायणः]

गृत्समदोऽश्विनौ "नासत्यौ रुद्रौ" नृपाय्यं¹ वर्तिः आह्वयति । अश्विनोरागमनेन वर्तिरिदं गोमद् अश्ववत् च भवति [२. ४१. ७]।

तृतीयं मण्डलम् ।

तृतीये मण्डले गाथिनो विश्वामित्रस्यैकं सूक्तम् आश्विनम् [३. ५८]। अत्र गोऋजीकानि (गोः पयसा मिश्रितानि) मधूनि मित्रासो न (मित्राणि इव) अध्वर्य्यादयोऽश्विभ्यां ददति, यदा उषसोऽग्रे सूर्यं उदेति [३. ५८. ४]। अश्विनौ नासत्यौ वायुना नियुद्भिः (अश्वैः) च संगतौ प्रीत्या अस्रिधौ (अनुपक्षीणौ) तिरो अह्न्यम् (पूर्वस्मिन् दिनेऽभिषुतं) सोमं पिबतः । अश्विनोः रथः

१—नृपाय्यम् । नृभिः नेतृभिः देवैः पातव्यं सोमम् [सायणः] ।

प्रभूतं "वर्पः" (तेजः, धनं वा) कुर्वन् सोमम् अभिषुतवतो यजमानस्य संस्कृतं गृहम् "आगमिष्ठः" (अतिशयेन आगच्छन्) भवति [३. ५८. ७;९]।

चतुर्थं मण्डलम् ।

चतुर्थे मण्डले पुरुमीळ्हाजमीळ्हौ सौहोत्रौ यज्ञेऽश्विनौ "हिरण्ययेन रथेन उपयातम्" इति प्रार्थयेते । अश्विनौ सोमसम्बन्धि मधु पिबन्तौ परिचरते जनाय रत्नं दधाते । यजमानः यज्ञे समानमनस्कौ अश्विनौ स्तुत्या संयोजयति । अत्र सूक्तस्य द्वौ ऋषी, अतोऽश्विनोः समनस्त्वं युज्यत एव । [४. ४४. ४; ७]।

वामदेवस्य आर्षे [४.४५] अध्वर्युः "निक्तहस्तः" (शोधितहस्तः), कर्मणस्तारयिता, "विचक्षणः" [विविधं द्रष्टा] मधुमन्तं सोमं ग्रावभिरभिषुणोति । "धियं धाः" (कर्मणां धारकः) अश्विनौ प्रकर्षेण स्तौति । अजरेण (नित्यनूतनेन, अजरयित्रा वा) रथेन अश्विनौ "हविष्मन्तं तरणिं भोजम्" [तारकं भोजयितारं यागम्] आगच्छतः । [४. ४५. ५; ७]।

पञ्चमं मण्डलम् ।

पञ्चमे मण्डलेऽश्विस्तुष्टे—

पौरः आत्रेयः यज्ञे बहूनां (यजमानानां) भावयितारौ, बहूनि कर्माणि धारयन्तौ वरणीयौ, अद्भुतगमनकर्माणौ अश्विनौ "भुजे" (भोगाय पालनाय] आह्वयति [५. ७३. २]।

उग्रः (उद्गूर्णबलः), उच्छ्रितः, यामेषु (गमनेषु यज्ञेषु वा) सततगामी रथोऽश्विनोः । अत्रिः कर्मभिः तादृशरथयुक्तौ अश्विनौ आवर्तयति [५. ७३. ७]। यदा "चिष्पुषी" [प्याययन्ती स्तुतिः] रुद्रौ (स्तुत्या, द्रवणीयौ रुद्रपुत्रौ वा) अश्विनौ सेवते, तदा तौ "समुद्रा" (समुद्द्रवणसाधनानि अन्तरिक्षाणि) अतिसारयतः (यज्ञं प्राप्नुतः) । यजमानाः पक्वानि हविर्लक्षणानि अन्नानि च भरन्ति [५. ७३. ८]।

गृहीतयज्ञसन्तानाय पौराय पौरौ (अश्विनौ) "उदप्रुतं पौरम्" (उदकप्लावकं मेघं) प्यायथतः [५. ७४. ४.]।

सुसंपर्चना: स्तोतारः प्रशस्यानि अन्नानि (हवींषि) अश्विनोः संपर्चन्ति [५. ७४. १०]।

अवस्युरात्रेयः स्तोमेन "वृषणं" (फलानां वर्षकं) "वसुवाहनं" (धनानां वाहकं) प्रियतमम् अश्विनोः रथमलंकरोति [५. ७५. १]।

भौमस्यात्रेरार्षे [५. ७६] अश्विनौ रथ्यौ रथस्वामिनौ पीपिवांसं घर्मम् अभिलक्ष्य आयातः ।

पीपिवांसं घर्मम् । स्वाङ्गैः परिवृढं प्रदीप्तं यज्ञम् । यद्वा । आप्यायितं वसती-

चरीभिः क्षरद्रूपं सोमरसम् । अथवा घृतादिना पीपिवांसं घर्मं प्रवर्ग्यम् । प्रवर्ग्येऽस्य सूक्तस्य विनियोगः । [सायणः] ।

सूक्ते तृतीयस्याम् ऋचि अह्नो बहुकृत्वोऽश्विनावाहूयेते । तत्र सायणः—"अह्नो द्वेधा, त्रेधा, पञ्चधा, पञ्चदशधा समाना विभागाः सन्ति । इह पञ्चधा विभागः आत्तः ।" इति । तथाहि—

१ संगवे (राज्यपरकाले गोदोहसमये) ।

२ प्रातः

३ मध्यंदिने

४ उदिता सूर्यस्य-उदितौ अभ्युदये, अत्यन्तप्रवृद्धसमये अपराह्णे ।

५ एतत् [चतुर्थो विभागः] सायाह्नस्याप्युपलक्षणम् इति सायणः ।

न एषु एव समयेषु, दिवानक्तं सुखतमेन रक्षणेन अश्विनोः सन्निधिः काम्यते । यतो हि इतरेषां देवानां पानम् अश्विनौ विहाय न तनोति । [५. ७६. १.]

अश्विनौ यज्ञं प्रातरेव गन्तारौ । तौ प्रथमौ (इतरेभ्यः पूर्वभाविनौ, प्रकृष्टतमौ वा) । अतस्तौ यजनीयौ । अदातुः कदर्यात् अपि तौ अवश्यं सोमं पिबतः[1], अश्विनौ प्रातरेव यज्ञं संभजतः । देवाः प्रातरेव हविर्जुह्वति, न सायम् । य इतरेभ्यो यष्टृभ्यः पूर्वम् अश्विभ्यां हविः ददाति स एव देवैरधिकं संमान्यो भवति ।

अत्र अश्विनोः रथः "पृक्षः" (अन्नम् , अमृतम्) वहन् यष्टुः अभिमुखम् आगच्छति । हिरण्यत्वक् (हिरण्येनाऽऽच्छादितः) मनोहरवर्णः उदकस्य प्रस्रवणः (क्षरदुदकः) मनोवेगः वातसदृशगतिमान् सर्वान् दुर्गमान् मार्गान् अतिक्रम्य गच्छति ।

यो नासत्याभ्यां बहून्नं कर्म करोति, अन्नं च ददाति स आत्मनः पूर्वं कर्मभीरक्षति, ये च "अनूर्ध्वभासः" अयष्टारः तान् सदैव हिनस्ति च [५. ७७] ।

यस्य सोमम् अश्विनौ हंसौ इवागच्छतः सोऽभीष्टं लभते । अश्विनोः आगमनेन बन्धनरूपा पेटिकाऽपि स्वयं विवृतद्वारा भवति । रूपकेण पेटिकाऽत्र वनस्पतिविकारा पुरुषस्य शिरः । यावत्ताऽश्विनोरागमनम् न भवति तावता पुरुषः सा-

---

१—पुरा गृध्राद् अररुषः पिबातः [५. ७७. १.] ।

"गृध्राद् अभिकाङ्क्षतः अररुषः अदातुः रक्षःप्रभृतेः पुरा पूर्वं पिबातः पिबताम् ।" [सायणः]

अप्रयच्छतोऽपि कदर्यात् सोमपानम् अभिकाङ्क्षतो यजमानात् क्षिप्रम् अश्विनौ सोमं पिबतः [वे. भा.] ।

वध्रिरेव । यतः चिरस्थैः ससगोलकैः स दिव्यं ज्योतिः न लभते । अतः स भीतः सन् अश्विनौ प्रार्थयते पेटिकायाः संगतिं विभक्तिं च । [५. ७८]

षष्ठं मण्डलम् ।

षष्ठे मण्डले ऋषिः बार्हस्पत्यो भरद्वाजोऽश्विनौ स्तोत्रैः शस्त्रैश्च आह्वयति । अश्विनौ उरूणि तेजांसि पृथिव्याः पर्यन्तान् विस्तारयतः । अश्विनौ यज्ञं शुचिभिस्तेजोभिः व्याप्नुवन्तौ तमोनिवारकाणि अपरिमितानि तेजांसि निर्मिमाणौ अपः उद्दिश्य मरुप्रदेशान् स्वकीयान् अश्वान् क्रामयतः [६. ६२. १–२] ।

यो नरोऽश्विनौ लोकानां राजानौ "ऋतुथा" [काले काले] परिचरति तं मित्रश्च वरुणश्च जानीतः । अयं परिचारकः महाबलाय राक्षसाय घातकं शस्त्रं क्षिपति । द्रोहात्मकं मनुष्यसम्बन्धि वचोऽपि स बलेन प्रतिरुणद्धि [६. ६२ ९] ।

यस्य गृहे स्तोमेन प्रीतौ अश्विनौ सोमं पिबतः, तं संनिकृष्टो विप्रकृष्टो वाऽपि शत्रुर्न हिनस्ति । ऋषिर्भरद्वाजो मृदुतमे[1] बर्हिषि सोमं विस्तृतेन करोति । ग्रावाणः सोमरसं व्यक्तीकुर्वन्तोऽश्विनौ व्याप्नुवन्ति । यतो यो नासत्यौ स्तौति तस्याग्निरश्विनोरध्वरेषु घृताक्तेन हविषा उद्दीप्तो भवति, होता च प्रकर्षेण उद्युक्तमना भवति । उषसि यजमानानां देवानां प्रादुर्भावे नेतारौ अश्विनौ प्रज्ञानैः वाजिवाहनयुक्तेन पूरयन्तौ भवतः । वीतुतमा अथवा अश्विनौ हविर्लक्षणम् अन्नमभि प्रापयन्ति । अश्विनोर्मनोवेगो रथः पूर्वं कल्पितानि भक्षणयोग्यानि प्रार्थनार्हाणि हवींषि अनु विसृष्टो भवति । अर्थात् पूर्वं पूर्वम् उत्कृष्टं हविरनु रथो विसृष्टो भवति । अनेन मनोजवस्य रथस्य योगे हविषां कामनाऽऽनुपूर्वी विद्यते । अत एवणीयहविषोऽभावे रथगतिः रुद्धा भवति । अत एवोत्तरस्यामृचि [६. ६३. ८] धेनुं प्रीणयित्रीं असक्रां (असंक्रमणीं, निर्दिष्टपथाद् अन्यत्र क्रमणमकुर्वतीम्) इषम् अन्नं प्रार्थयते ऋषिः । अश्विनोः स्तोतारः, तयोः सुष्टुतिः, तयोर्दानमनु सोमरसाश्च देवयजने भवन्ति । यतोऽश्विनौ रयिषु माद्यन्तौ बहूनां पालकौ बहुधनस्य दातारौ च स्तः [६. ६३] ।

सप्तमं मण्डलम् ।

सप्तमस्य मण्डलस्य द्रष्टा ऋषिर्वसिष्ठः । हविर्युक्तेन यज्ञार्हेण मनसा ऋषिरश्विनौ स्तौति । सः स्तोमैरश्विनौ सेवते । स्वर्गं जानता वसुमता रथेन पूर्वकृत्यैर्मार्गैः अश्विनौ आगच्छतः । अश्विनौ अक्रुध्यता मनसार्वाग् आगत्य मानुषीषु प्रजासु हव्यम् अश्नीतः [७. ६७. १; ३; ७] ।

१—अस्तारि बर्हिः सुप्रायणतमम् । [६. ६३. ३.]
सुप्रअयनतमम् । मृदुतमम् [सायणः]

अश्विनौ कामयमानस्य हवींषि अश्विनौ शोभनाश्वौ दीप्तौ च सन्तौ भक्षयतः [७. ६८. १]

शत्रोराह्वानानि तिरस्कृत्य वसिष्ठस्य मदजनकानि हवींषि अश्विनौ पिबतः। हविर्दात्रे च्यवानाय "इत ऊति[1] वर्पः" (मृत्योरितः प्रत्यागमनाय नूतनं रूपं) धत्तः [७. ६८. २; ६]

ऋत्विग्भिः सह यष्ट्रा वसिष्ठेन स्तूयमानानि अश्विनोः कामयमानानि ब्रह्माणि (मन्त्रजातानि स्तोत्राणि) शृण्वन्तौ अश्विनौ स्वस्तिभिः सदा रक्षतः [७. ७०. ६–७] ।

शोभनमनसाऽश्विनोः स्तवेन निवृत्तप्रसवा गां (वाचं) अश्विनौ पूरयतः सा च गौः (वाक्) पयोभिर्हविर्लक्षणैरन्नैः यष्टारं वर्धयति [७. ६८. ८–९] ।

अश्विनौ देवकामं यज्ञं रक्षतः। "प्रंसं वयः" (दीप्तं सोमादिलक्षणमन्नम्) सुखेन रक्षणेन परितो व्याप्नुतः [७. ६९. ४] ।

बहुषु यज्ञेषु यजमाना अश्विनौ स्तुवन्ति । परन्तु यत्र "विद्युतं (विशेषेण दीप्यमानं सोमं) भवति, अश्विनौ तत्रैव गच्छतः, अन्ये तौ नियन्तुं न शक्नुवन्ति [७. ६९. ६] ।

अश्विनौ वसिष्ठस्य यज्ञसदने योनाविव ध्रुवं निवसतः । अत्र सदने क्रियमाणा शोभना स्तुतिः अश्विनोः "चनिष्ठा" अतिशयेन कमनीयतमा, अन्नवती वा भवति । यज्ञगृहेऽत्र घर्मः (यज्ञस्य शिरस्थानीयः) तप्यते । घर्मोऽयं रथेऽश्वाविव युज्यमानोऽश्विनोः समुद्रान् सरितः च पिपर्ति[2] [७. ७०. १–२] ।

ऋक्संहितायां "पक्व इष्टिः" इति शब्दः सकृच्छ्रूयते । स च आश्विने सूक्ते अगस्त्यस्याऽर्षे—

तद् वां नरावश्विना पश्व इष्टी रथ्येव चक्रा प्रति यन्ति मध्वः [१.१८०.४]

पश्वःऽइष्टिः ।

पशुसाध्यो यागो युवाभ्यां प्रवर्तते । मधुसदृशाः सोमरसा अपि युवाभ्याम् अभिगच्छन्ति । तत्र दृष्टान्तः । रथसम्बन्धीनि चक्राणीव । तानि यथा प्रवणदेशम् अभिगच्छन्ति तद्वत् । [सायणः] ।

अस्याः पश्व इष्टेः याज्यापुरोनुवाक्याः सप्तमे मण्डले श्रूयन्ते, यत्र ऋषिर्वसिष्ठः । अगस्त्यश्च वसिष्ठश्च मैत्रावरुणी ।

सप्तमे मण्डले द्वासप्ततं सूक्तं पञ्चर्चम् । तत्र सायणः—"आश्विने पशौ आद्यावृचावस्तो याज्यानुवाक्याः ।"

1—आश्विनेषु सूक्तेषु "इत ऊति" शब्दः इतः प्राक् नैव श्रुतः ।

2—पिपर्ति । पूरयति वृष्टि द्वारा इति सायणः । पारयति [वे. भा.] ।

"आ पश्चातात्" इति पाञ्चजन्याश्विने पशौ वपाया अनुवाक्या" इति ।
सर्वाभ्यो दिग्भ्योऽश्विनोरागमनं पाञ्चजन्यो रायश्च इतः पूर्वं न श्रुतम् ।

आ पश्चातान्नासत्या पुरस्ताद् अश्विना यातम् अधराद् उदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥

[७. ७२. ५; ७३. ५]।

अश्विनौ मदस्य मधु पिबतः तस्मै अन्तरिक्षात् पयो दुग्धः । ये स्तोतारोऽश्विभ्यामन्नं प्रापयन्ति तेभ्योऽश्विनौ ध्रुवं यशः गृहं च प्रयच्छतः । परधनमपहरन्तः, ऋत्विजो रक्षन्तः, ये हविर्भिः व्रीह्यादिपूर्णा रथा इवाऽश्विनौ प्राप्नुवन्ति, ते स्वेन बलेन वर्धन्ते, सुनिवासं च प्राप्नुवन्ति [७. ७४]।

आश्विनेषु सूक्तेषु "अतारिष्म तमसः पारमस्य" इति त्रिः श्रूयते द्विः प्रथमे मण्डले, सकृत् सप्तमे मण्डले । प्रथमे मण्डले ऋषिः अगस्त्यो मैत्रावरुणिः सप्तमे मण्डले वसिष्ठो मैत्रावरुणिः [१. १८३; ६. १८४. ६; ७. ७३. १]।

तत्र प्रथमे मण्डले द्विः श्रूयते, अगस्त्यस्य अन्तिमयोः सूक्तयोः [१. १८३. ६; १८४. ६]। उभयं सूक्तं षडृचम् प्रथमे सूक्ते रथः स्तूयते, अश्विनोः वपुश्च पुष्टं क्रियते । "वपुर्वपुष्या सचताम् इयं गीः" [१. १८३. २]।

"वपुष्या युष्मद्वपुषि हिता शारीरवर्णनी इयं गीः इदानीं क्रियमाणप्रकारा स्तुतिरूपा वाम् वपुः सचताम्" [सायणः]।

गोतमः पुरुमीळ्हः अत्रिः इति त्रयो हविष्मन्त ऋषयोऽत्राऽश्विनौ आह्वयन्ति [१. १८३, ५]।

द्वितीये सूक्ते [१. १८४] सिद्धस्य पुनरावर्तनं भवति, यतोऽत्र अश्विनौ स्तुतीनाम् "एष्टा" (अन्वेष्टारौ) "निचेतारा [संचयकर्तारौ] च भवतः [१. १८४. २]। यतो हि उषा आजिधावने विजेत्रोरश्विनोः रथं पुनरारूढा भवति, यतो हि वरुणस्य "भूरेः" (अविच्छिन्नप्रवाहस्य) युगा (युगानि यागकालाः) जूर्या[1] इव (जीर्णानि युगानीव, पुरातना यागकाला इव) भवन्ति [१. १८४. ३]।

अत्र प्रथमे मण्डले तमसः (श्रेयः प्रतिबन्धकरूपस्य दुःखस्य) पारं गम्यते । अश्विनौ प्रति स्तोमः क्रियते । देवयानैः पथिभिरश्विनौ आगच्छतः । अन्नं बलं जयशीलदानम् च यजमानः प्राप्नोति ।

१—द्र. न वां जूर्यन्ति पूर्व्या कृतानि [१. ११७. ४]।
युवयोः सम्बन्धीनि चिरन्तनानि कर्माणि न हि जीर्णानि भवन्ति ।
[सायणः]

अतारिष्म तमसस्पारमस्य प्रति वां स्तोमो अश्विनावधायि ।
एह यातं पथिभिर्देवयानैर्विद्यामेषं वृजनं जीरदानुम् ॥
[१. १८३. ६; १८४. ६]

सप्तमे मण्डले भिन्ना श्रुतिः—

अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।
पुरुदंसा पुरुतमा पुराजाऽमर्त्या हवते अश्विना गीः ॥ [७.७३.१]

"अस्य तमसोऽज्ञानस्य तत्कार्यस्य जननमरणवतः संसारदुःखस्य अथवा प्रकृतत्वात् प्रयोगविषयाज्ञानस्य पारम् अतारिष्म तीर्णाः स्मः । किं कुर्वन्तः देवयन्तः देवकामाः स्तोमं स्तुतिं प्रति दधानाः देवेषु कुर्वाणाः । पुरुदंसा (बहुकर्माणौ) पुरुतमा (प्रभूततमौ) पुराजा (पूर्वजातौ) अत एव अमर्त्या (अमरणधर्माणौ) अश्विना (अश्विनौ) गीः (गरिता स्तोता वसिष्ठः) हवते स्तौति आह्वयति वा ।" [सायणः] ।

अष्टमं मण्डलम् ।

अथ अष्टमे मण्डले भूयांसि सूक्तानि ।

ब्रह्मातिथिः काण्वो दूत इव अश्विनोर्वाचं याचते [८. ५. २] । अश्विनौ अतिशयेन बलस्य दातारौ अन्नं कुर्वन्तौ हविर्दत्तवतो गृहं गच्छतः [८. ५. ५] । अश्विनौ अनपायिनीं सुमेधां कुर्वन्तौ गोसंचारभूमिं घृतेन सिञ्चतः । त्रिभिर्दिनैः तिसृभिः रात्रिभिः विश्वानि रोचनानि यैरश्वैरश्विनौ व्याप्नुतः, तैरश्वैः तौ मानुषं यज्ञम् अपि व्यापयतः । प्रवृद्धौ हितरमणीयाध्वरौ अश्विनौ सोममयं मधु पिबतः । यागेन धनवन्तौ अश्विनौ अहिंस्यं विस्तीर्णं गृहं हविष्कुर्वद्भ्यो यजमानेभ्यो यच्छतः । शतसंख्योपेतं सहस्रसंख्योपेतं विश्वेषां धारकं रयिम् आवहतः । वृक्तबर्हिषो हविष्मन्तोऽरंकृतः (पर्याप्तकारिणोऽलंकर्तारो वा) जना अश्विनौ ह्वयन्ते । "सोम्यं मधु" अश्विभ्यां दीयते पानाय [८. ५. ११] । पुनः ऋषिः प्रार्थयतेऽश्विनौ रथे दृश्यमाने देवौ स्थापितात् दृतेः मधु पिबतम् इति ।

यो ह वां मधुनो[१] दृतिराहितो रथचर्षणे । ततः पिबतमश्विना [८. ५. १९] ।
अश्विनौ बुद्धिवेगौ, रथो हिरण्मयः, अश्वाश्च द्रवत्पाणयः [८. ५. ३५] । अश्विनौ जागरणशीलं मृगं (सोमं) आस्वादयतः । मध्वूयुवा कृतौ तौ इषा रयिं मिश्रयतः । [८. ५. ३६] ।

सध्वंसस्य काण्वस्य आर्षं [८. ८]

१—मधुनः । मधुरस्य अस्मभिर्दत्तस्य सोमस्य [सायणः ८. ५. १९] ।
२ दतिस्तुरीयो मधुनो विरप्शते [४. ४५. ३.] ।

विश्वाभिः ऊतिभिः आगत्य अश्विनौ सौम्यं मधु पिबतः । स्तुतिभिः स्तोत्रैश्च वर्धितौ अश्विनौ वृत्राणां (शत्रूणाम्) अतिशयेन हन्तारौ सुखस्य भावयितारौ च भवतः । अक्षय्याहेतूनि विश्वानि राधांसि (धनानि) दत्त्वा यजमानम् ऋतुकाले प्रजोत्पादनसमर्थं कुरुतः । सहस्रनिर्णिजं (बहुविधरूपां) घृतं क्षरन्तीम् इषं प्रयच्छतः । यो दानस्य पती अश्विनौ सुखाय धनाय च स्तुयात् तस्मै तौ घृत-श्चुतम् ऊर्जं धत्तः । प्रियमेधाः (प्रिययज्ञाः) ऋषयः अध्वराणां राजन्तौ (ईश्वरौ) अश्विनौ सर्वाभिः ऊतिभिः सहितौ आह्वयन्ति ।

सुवृक्तयः स्तोमाः (प्रगीतमन्त्ररूपाः स्तुतयः) दोषरहिताः शस्त्ररूपा वाचश्च अश्विनौ वर्धयन्ति । अश्विनौ बहूनां पातारौ, बहुलं स्पृहणीयौ वृत्रहन्तमौ च भवतः । एतादृशयोः अश्विनोः एतावन्तं कालं गुहायां वर्तमानानि

त्रीणि पदानि इदानीम् आविर्भवन्ति ।

त्रीणि पदान्यश्विनोराविः सन्ति गुहा परः [८. ८. २३] ।

शशकर्णस्य काण्वस्याऽऽर्षे [८. ९] ।

रक्षणायाऽश्विनौ आहूयेते । बाधकरहितं विस्तीर्णं गृहम् अश्विनौ यच्छतः । त्रिविधं नृम्णं (धनं) धत्तः । घर्मः स्तोमेन[1] परिषिच्यते (आर्द्रीक्रियते) । सोमं घर्मं च पीत्वाऽश्विनौ वृत्रं हन्तव्यतया जानीतः । भेषजैरश्विनौ रक्षतः । हविष्मन्तम् अश्विनौ पोषयतः, चिकित्सतश्च, न केवलः स्तुतिकर्ता अश्विभ्याम् अनुगृह्यते । अश्विनोरागमने ऋषिर्वन्दनीयया बुद्ध्या स्तोमं जानाति, अथर्वणा निर्मथिते (अहिंसके वा) अग्नौ घर्मं सिञ्चति । अश्विनौ गृहं जगत् शरीरं च अतिशयेन रक्षतः । नाना देवैः सह नाना स्थानेषु च वर्तमानौ अश्विनौ आगत्य रक्षां कुरुतः । संग्रामेषु शत्रूणां हिंसने अश्विनोः यत् सहः (अभिभवितृ रक्षणं) तदेव तयोः श्रेष्ठं रक्षणम् । यदौ तुर्वशे कण्वेषु च पृथक् सोमाः अश्विभ्यां सूयन्ते । प्रकृष्टज्ञानवन्तौ अश्विनौ दूरस्थम् अन्तिकस्थं च भेषजं गृहं च गच्छतः । द्युम्नं (दीप्यमानं यशः), श्रवः (बलं) नृषाह्यं शर्म (नृभिः सोढव्यं सुखं), दक्षं (कर्मनैपुण्यं) च अश्विनौ प्रकर्षेण रक्षतः ।

प्रगाथस्य काण्वस्याऽऽर्षे [८. १०] ।

अश्विनौ बहुभ्यः स्थानेभ्य आगत्य यज्ञं सिञ्चतः । बृहस्पतिः, विश्वेदेवाः, इन्द्राविष्णू, शीघ्रगामिनौ अश्विनौ च यज्ञं आह्वयन्ते । देवेषु मध्ये यष्टुः आसन्नं सख्यम् अश्विनोरस्ति ।

सोभरेः काण्वस्यार्षे [८. २२]

1—स्तोमेन स्तोतव्येन पयसा [सायणः ८. ९. ४] ।

सोभरिः अश्विनोः रथं स्तौति । रथश्चायं भुज्युः (सर्वस्य रक्षकः) । नासौ तुग्रपुत्रं भुज्युमश्विनौ समुद्राद् उद्धृतवन्तौ ।

अयं रथः "पूर्वापुषः" (पूर्वेषां पोषकः) "वाजेषु पूर्व्यः" (संग्रामेषु अग्रतो गन्ता) "सचनावान्" (सर्वसहायः) "विद्वेषाः" (शत्रूणां द्वेष्टा) "अनेहाः" (पापरहितः) च । तादृशरथयुक्तौ अश्विनौ नमोभिः (हविर्भिः स्तोत्रैर्वा) अर्वाचीनौ क्रियेते । अश्विनोः कल्याणी मतिः, धेनुर्वत्समिव, ऋषिम् आधावति । ऋतस्य पथिभिः महते क्षत्राय (धनाय) प्रीणयतोऽश्विनौ । अत्यायोऽद्रिभिः सोमः सुषुवे यस्य पीतयेऽश्विनौ दाशुषो गृहम् आगच्छतः । हिरण्यये कोशे रथे आवह "पीवरीरिषः" (पाचयितॄणि स्थूलानि अन्नानि) योजयतः । अश्विनौ भिन्नैर्भेषजैः पक्थम्, अध्रिगुं बभ्रुं च भिषज्यतः । अन्योऽपि योऽप्यातुरः तमपि अश्विनौ तूर्णं तैरेव भेषजैः भिषज्यतः ।

सोभरेर्हवो विश्वप्स्नुः विश्ववार्यश्च (विश्वरूपो विश्वैर्देवैर्वरणीयश्च) । तम् अभिमुखीकृत्य अश्विनौ आगत्य कूपम् आप्लावयतः । कूपपूरणेन कूपे पतितो वन्दनः उत्थापितः । एवं क्रिवेः (कूपस्य) उदकेन पूरणम् अपि अश्विनोरेवं रक्षणकर्म ।

वैयश्वस्य आर्षे [८. २६]

योऽश्विसम्बन्धिभिः गीर्भिः आवृतो भवति, यथा स्वयम् उपरि निहितवस्त्रा वधूः अपरेण वस्त्रेण आवृता भवति, परिचरन्तौ अश्विनौ तं धनयुक्तं कुरुतः ।
[८. २६. १९]

उरुव्यचस्तमम् (अतिशयेन व्याप्तं) सोमं योऽश्विभ्यां सोतुं जानाति तस्य यज्ञम् अश्विनौ अवैकल्येन समाप्तिं प्रापयतः । नदीनां मध्ये हिरण्मयकूला श्वेतयावरी (श्वेतजलप्रवाहा) सिन्धुः अश्विनोः योषुत्तमा । शोभनगमनौ अश्विनौ तया स्तुतिं प्राप्नुतः ।

श्यावाश्वस्य आत्रेयस्यार्षे [८. ३५]

अश्विनौ सर्वैर्देवैः सोमं पिबतः । अश्विनौ ऊर्जम्, हर्षं, द्रविणं, प्रजां, रत्नानि च धत्तः । ब्रह्म, क्षत्रं, विशः, धेनूः च प्रीणयतः । रक्षांसि हतः । रोगान् चिकित्सतः ।

नाभाकस्य काण्वस्यार्षे [८. ४२. ४-६]

अश्विनौ मेधाविनो यजमानस्य सोमं पिबतः । तेन तस्य सर्वे शत्रवो नश्यन्ति ।

कृष्णस्य आङ्गिरसस्यार्षे [८. ८६]

वीरम्, धनानां संभक्तारं, व्यापकस्य सोमस्य सोतारं, विष्णाप्वनामानम्[1]

१— द्र. पशुं न नष्टमिव दर्शनाय विष्णाप्वं ददथुर्विश्वकाय [१.११६. २३]

आत्मनः पुत्रम् उद्दिश्य विश्वकोऽश्विनौ आह्वयति । विश्वकोऽश्विनौ एतदपि चेतयति यत् पुत्रप्राप्त्यैव तस्य अश्विभ्यां सह सख्यं (यष्टृयष्टव्यरूपं) अशिथिलं भवेत् । अतोऽश्विभ्यां रथो योक्तव्यो भवति ।

सूक्ते [८. ८७]—तमे–

दिवि (द्योतमाने यज्ञे) द्युम्नी ऋषिः मधुमयं सोमं सुत्वा अश्विनोः प्रियः सन् कूपस्य वृद्धिरिव आत्मनो वृद्ध्यर्थम् अश्विनौ सोमपानाय आह्वयति । बर्हिषि आसद्य मदकरसोमयुक्तं घर्मं (प्रवर्ग्याख्यं हविः) अश्विनौ पिबतः, धनेन सह आयुर्वर्धयतः ऋतस्य वर्धकयोरश्विनोरश्वाः प्रुषितप्सवः (दीप्तरूपाः स्निग्धरूपाः) भवन्ति ।

जमदग्नेर्भार्गवस्य आर्षे [८. १०१. ७–८] दीप्ततमानि स्तोत्राणि कर्माणि हवींषि च प्रति अश्विनौ आगच्छतः । अश्विनोर्दानं रक्षोवर्जितं भवति ।[1]

दशमं मण्डलम् ।

अथ दशमे मण्डले—

ऐन्द्रस्य विमदस्य आर्षे [१०. २४. ४–६]—

विमदेन स्तुतौ अश्विनौ संगतौ भूत्वाऽग्निं मथ्नीतः । ऋषेः परायणं पुनरायनं [बहिर्गमनमन्तर्गमनं, श्वासोच्छ्वासौ] च मधुमद् भवति । अश्विनौ यष्टॄन् मधुमतः (प्रीतियुक्तान्) कुरुतः ।

काक्षीवत्या घोषायाः सूक्तयोः [१०. ३९–४०]—

प्रथमे सूक्ते द्वितीयस्याम् ऋचि पञ्च प्रार्थनाः श्रूयन्ते—

१. हे अश्विनौ ! सूनृताः (वाचः उषसो वा) चोदयतम् ।

२. पिन्वतं धियः । (कर्माणि पूरयतम्) ।

३. पुरंधीः (बह्वीः प्रज्ञाः) उदीरयतम् ।

४. यशसं (यशोयुक्तं) भागं (भजनीयं धनादिकम्) अस्माकं कुरुतम् ।

५. कल्याणं सोममिव अस्मान् धनवत्सु कुरुतम् ।

१. ऋतसिद्धिः । २. सत्कर्म । ३. प्रज्ञाधिगमः । ४. धनम् । ५. आत्मज्ञानम् ।

अत्र यष्टारः स्वयम् आत्मानं सोमत्वेन कल्पयन्ति । एवं यज्ञचर्याः इषः [१. ३. १] प्रस्थाय सोमे [१०. ३९. २] परिसमाप्तिः ।

चोदयतं सूनृताः पिन्वतं धिय उत्पुरन्धीरीरयतं तद् उश्मसि ।

यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥[१०.३९.२]

१—अत्र ध्रुवे सूर्योऽस्तं याति । अत एव होत्रा प्राची भवति ।

"प्राचीं होत्रां प्रतिरन्तौ ।" प्राङ्मुखां स्तुतिं वर्धयन्तौ इति सायणः

द्र. प्राञ्चं कृणोत्यध्वरम् होत्रा देवेषु गच्छति [१. १८. ८] ।

घोषा लोकेऽश्विनोः पुराणानि (जन्मप्रभृत्या कृत्यानि) वीर्याणि प्रब्रूते । जन्मनोऽनन्तरमेव तौ देवानां भिषजौ, सुखस्य भावयितारौ च बभूवतुः । तौ अश्विनौ रक्षणाय यजमानाः नव्यौ कुर्वन्ति । येन "यथा अयम् अरिः" (गन्ता, पतिः, यजमान ईश्वरो वा) श्रद् दधाति तथाऽन्येऽपि यजमानाः "श्रत्" सत्यं यथाचोदितं हविर्वा दध्युः [१०. ३९. ५]।

अष्टमे मण्डले सूर्योऽस्तं याति । नवमं मण्डलं पवमानसोमदेवताकम् । दशमे मण्डले सूर्यं पुनरुद्गमयतोऽश्विनौ ।

अत्र भृगवो यथा रथं तक्षुवन्ति तथा यजमाना अश्विनोः स्तोमं कुर्वन्ति । ऋक्संहितायां अस्मिन्नेव सूक्ते ऋभुभिस्तष्टेन रथेनाऽश्विनौ यज्ञमागच्छतः । [१०. ३९. १२; १४]।

सूर्यो यदा पृथिव्या एकस्मिन् पार्श्वे उदेति तत्र अश्विनौ "राजपुत्रौ" इव सवनानि गच्छतः, यत्र च सूर्योऽस्तं याति तत्र "ध्वस्रा" तमसो विनाशयितारौ भवतः [१०. ४०. ३]।

अश्विनौ विशं विशं गच्छतः । तत्राहोरात्रयोर्ह्रस्वदीर्घभावेन तयोः प्राप्तौ अवस्थाने च कालभेदो भवति । क्वचिद् अहोरात्रः षष्टिदण्डात्मकः । क्वचिद् अहरेव रात्रिरेव वा षष्टिदण्डात्मककालात् अपि द्राघीयः स्यात् । ध्रुवे मासं यावत् अश्विनोर्वासः स्यात् । अतोऽश्विनौ क्वचिद् प्राप्नुतः, क्वचिद् अवतिष्ठेते, क्वचिद् निवसतश्च ।

यत्र सूर्योऽस्तं याति तत्रास्तोत्तरोषा वध्रिमती भवति । (तत्र सूर्योदया-भावाद् द्यौः नपुंसकभर्तृका वध्रिमती भवति यस्यै च हिरण्यहस्तं चन्द्रं च अश्विनौ पुत्रत्वेन दत्तः ।) सूर्यस्यास्तंगमनेन सा विधवा (विगतधवा) भवति । ततो मृतभर्तृका सा देवरेण संगच्छते । अत्राश्विनौ तस्या देवरौ, अस्तगामि धवतः पश्चाद् अश्विनोरागमनात् । अन्यथाप्यश्विनौ देवरौ भवतो यतस्तावेव देवौ सूर्या-चन्द्रमसौ पृथिवीम् अभितो रतः । इदमश्विनोः कर्म ऋषिर्घोषा पृच्छति । तथा च श्रुतिः—

कुहस्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः ।
को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ ॥ [१०.४०.२]

स्वमतीनां पारमश्विनोर्नावा गत्वा [१. ४६. ७], घोषा इदानीम् अश्विनोः सुमतिं प्राप्तवती । अश्विनौ तस्याः हृदि कामान् नियम्य तौ पत्युः गृहं नयतः । मार्गे पानार्थं शोभनोदकस्य पालयितारौ तौ सुप्रपाणं तीर्थं कुरुतः । पथिरोधकं दुर्मतिं (दुर्बुद्धिम्) अपहतः [१०. ४०. १२–१३]।

घोषायाः पुत्रस्य सुहस्त्यस्य आर्षे [१०. ४१]—

अश्विनौ प्रातर्यावाणं मधुवाहनं रथम् आस्थाय अध्वर्युं, अग्नीध्रं, विप्रस्य सवनानि वा गच्छन्तौ मधुपेयम् आगच्छत एव [१०. ४१. २–३]

सुहस्त्यस्य द्वौ हस्तौ भवत एव । एकस्मिन् हस्ते मधु, अन्यस्मिन्, हस्तेऽग्निः । इदम् अश्विनोः स्वरूपम् । एको जिष्णुः सुमखस्य सूरिः । असौ मधुपाणिः अध्वर्युः[1] । अन्यः सुभगो दिवः पुत्र आदित्यः । असौ दानमना अग्नीत्[2] । एतौ मिथुनौ । एतौ सूर्यां (घोषां) पतिगृहं नयतः । पतिरत्र सोमेन दीप्यमानः सूर्यः । तत्र विप्रः सोमं सुनोति । स च विप्रो वायुः । विशेषेण प्राति पूरयतीति विप्रः । अत्र वायुना दिवं नीतौ अग्निश्च सोमश्च (विमदो भुज्युः, घोषा जाया च) सूर्यं सूयेते । अग्नीषोमयोः मिश्रणेनैव सूर्यं उद्दीप्तो दृश्यते । इदमेव अश्विनोर्मधुपानम् ।

इदमेव मधुपानं प्रथमे मण्डले ऋषिः कण्वो जिज्ञासते—"शश्वत् कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना ।" [१. ४७. १०] ।

भूतांशस्य काश्यपस्य आर्षे [१०. १०६]—

पक्षिणः पक्षौ इव "साकंयुजौ" (सदाऽवियुज्यमानौ), चित्रौ (अग्निरिव दीप्यमानौ), अश्विनौ परिज्मानौ इव (परितो गच्छन्तावध्वर्यू इव) पुरुत्र (बहुषु स्थानेषु) यजतः (देवान् पूजयतः) [१०. १०६. ३] ।

सूर्यौ (अन्नवन्तौ आढ्यौ) इव, किरणौ इव अश्विनौ पुष्ट्यर्थं भोगार्थं च स्तुत्या हूयेते [१०. १०६. ४] ।

अश्विनोः रथो वायुरिव सर्वत्र आपूरयन् रयीन् (धनानि) आगमयति । [१०. १०६. ७]

ऋषिर्भूतांशः स्तोमं (त्रिवृत्-पञ्चदशादिभिः) वर्धयन् हविः, प्रयच्छन्

1—अध्वर्युः । कव्यध्वरपृतनस्यर्चि लोपः [पा. ७. ४. ३९] ।
"एषाम् अन्त्यस्य लोपः स्यात् क्यचि ऋग्विषये ।
अध्वर्युं वा मधुपाणिम् ।" [भट्टोजिः]
सुप आत्मनः क्यच् [पा. ३. १. ८] ।
क्याच्छन्दसि [पा. ३. २. १७०] इति उः ।
अध्वर-क्यच्-उ > अध्वर्युः ।
"अध्वर्युः अध्वरयुः । अध्वरं युनक्ति । अध्वरस्य नेता । अध्वरं कामयत इति वा ।" [निरु. १. ८]

2—अध्वर्युं वा मधुपाणिं सुहस्त्यम् ।
अग्निधं वा धृतदक्षं दमूनसम् [१०. ४१. ३] ।

अश्विनौ एकरथौ आह्वयति । गवाम् ऊधःसु पक्वं पयः इव माधुर्योपेतेन अन्नेन मन्त्रेण च सोऽश्विनोः कामम् आपूरयति ।

"आ भूतांशो अश्विनोः कामम् अप्राः" [१०. १०६. ११] ।

सुकीर्तेः काक्षीवतो दृष्टे [१०. १३१. ४–५]—

सौत्रामण्यां पुरोनुवाक्या प्रथमा ऋक्, याज्या द्वितीया ऋक् ।

नमुचिवधे तस्य लोहितमिश्रं सोमं पीत्वा शोषयित्वा, शुद्धं निर्मलं सोमम् इन्द्राय ददतौ तं रक्षतोऽश्विनौ । पुत्रं पितरौ (मातापितरौ) इव[1] इन्द्रमश्विनौ प्रशस्तैः कर्मभिर्यदा रक्षतः, तदाऽश्विनोः सहायभूता सरस्वती इन्द्रम् उपसेवते ।

अत्रेः सांख्यस्य आर्षे [१०. १४३]—

बन्धनाद् मोचितोऽत्रिरश्विनौ प्रार्थयते—"हे दर्शनीयतमौ शोभमानौ अश्विनौ ! मह्यं बुद्धिं दित्सतम् । मम बुद्धिं कर्मणि संभक्तुमिच्छतम् । येन दीप्यतः स्तोतुः मे स्तोमः पुनः युवयोः हृदिस्पृग् भवेत् ।" [१०. १४३. २] ।

ऋषिः स्वकृतेन हविषा, स्वकृतया स्तुत्या चाश्विनौ त्रातुं प्रभवति । शोभनदानौ अश्विनौ तस्य पृथौ सदने यज्ञे आगत्य तम् आपूरयतः [१०.१४३.४]

मंहिष्ठौ (दातृतमौ) विश्ववेदसौ (सर्वज्ञौ) भुज्यू इव (सुखभुजौ राजानौ इव, बृहस्पतिपुत्रौ इव वा), नरौ (नेतारौ) अश्विनौ सुम्नैः (सुखैः) सार्धम्, प्रवृद्धानि पयांसि गोः ऊधः इव, यजमानान् आसमन्तात् सम्यक् अलंकुरुतः [१०. १४३. ६] ।

अत्र उरसः द्योतमानः सूर्यः । रश्मिभिः सूर्यः उन्नीयते । यज्ञेन दिवं नीतौ अग्नीषोमौ पिप्युषीः इषः परिणमय्य, ताभिः आसमन्तात् प्रसरन्तीभिः दिवि ज्योतिर्लोकं सूर्यं अश्विनौ कुरुतः ।

"यावित्था श्लोकम् आ दिवो ज्योतिर्जनाय चक्रथुः ।" [१. ९२. १७]

त्वष्टुर्गर्भकर्तुर्विष्णोर्वा प्राजापत्यस्य आर्षे [१०. १८४]—हिरण्मयौ अरणी निर्मथ्नन्तौ अश्विनौ गर्भं कुरुतः, तं च गर्भं दशमे मासे प्रसुवाते । [१०. १८४. ३]

को वात्र गर्भः को वात्र प्रसूयते इति नात्र प्रतीयते । अर्थगत्यर्थं मानुषो गर्भोऽत्राधिगम्यते ।

अश्विनौ संवत्सरं यावद्व्याप्नुतः संवत्सरं यावद् ज्योतिषः प्रवर्तनात् । अत्र दशमासान् गर्भं धृत्वा दशभ्यो मासेभ्य ऊर्ध्वम् एकादशे मासे प्रसूतिः, आहोस्वित्

१—पुत्रम् इव पितरौ [१०. १३१. ५] ।
पितुर्न नाम सुहवं (रथं) हवामहे [१०. ३९. १] ।
अच्छा सूनुर्न पितरा विवक्मि [७. ६७. १] ।

नव मासान् गर्भं धृत्वा दशमे मासे प्रसूतिः इत्यस्यापि निर्णयो न भवति, "दशमे मासि" इत्यत्र सप्तमी विषयाधिकरणे सामीप्याधिकरणे वेति सन्देहात् ।

यदि दशमे मासे विषयाधिकरणे सप्तमी गृह्यते तर्हि नव मासान् गर्भधारणं स्यात् । "दश मासाञ्छशयानः कुमारो अधिमातरि" इति पञ्चमे मण्डले [५. ७८. ९] श्रूयते । अतोऽत्र संगत्यर्थं गर्भस्य दश मासान् अवस्थितिः, एकादशमासस्य प्रारम्भे प्रसूतिश्च । एवं सति संवत्सरे शिष्टे मासद्वये एकादशद्वादशमासयोः क्व गतिरिति प्रतीतिर्न भवति ।

मानुषगर्भः—"मासमात्रात् कठिनो भवति, द्विमासाभ्यन्तरे शिरः सम्पद्यते, मासत्रयेण ग्रीवाव्यपदेशः, मासचतुष्केण त्वग्व्यपदेशः, पञ्चमे मासि नख-रोमव्यपदेशः, षष्ठे मुखनासाक्षिश्रोत्रं च संभवति, सप्तमे चलनसमर्थो भवति, अष्टमे बुद्ध्याऽध्यवस्यति, नवमे सर्वाङ्गसंपूर्णो भवति । दशमे मासि प्रजायते ।"[1]

[निरु. १४. ६]

यदि मानुषगर्भस्य प्रसूतिः दशमे मासे, तर्हि गर्भो नव मासान् [दशदिनानि च] मातुरुदरे शेते । एवं सति दश मासाञ्छशयानः कुमारो अधिमातरि [५. ७८. ९] इति श्रुतिर्न संगच्छते ।

अन्यच्च प्रथमे मण्डले ममतायाः पुत्रो दीर्घतमा दशमे युगे जीर्णो भवतीति श्रूयते । दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे [१. १५८. ६] इति ।

अतो वैदिकं तत्त्वं दुरूहं भवति ।

प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते ।

एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता [सायणः][2]

अतोऽत्र मानुषगर्भप्रसूतिर्गृह्यते चेद् वेदस्य वेदत्वं न सिद्ध्यति मानुषप्रसूतेः प्रत्यक्षानुमानाभ्यां बोधात् ।

अतः पिण्डब्रह्माण्डयोरत्र समन्वयोऽपेक्ष्यते । "एकैव वा महानात्मा देवता । स सूर्य इत्याचक्षते । स हि सर्वभूतात्मा । तदुक्तम् ऋषिणा "सूर्य आत्मा जगतस्तस्थुषश्च [१. ११५. १]" इत्यादिः कात्यायनेनानुक्रमण्यां [का. अ. २. १४-१७] परिभाष्यते । अतो रोदसी अत्र ब्रह्माण्डस्य विभक्त्याऽऽकृत्या गृह्यते । एवं सति तत्रत्यः सूर्यः मनुष्यस्य आत्मना सह समन्वितो भवति ।

१—ततो यज्ञे समाप्ते तु ऋतूनां षट् समत्ययुः ।

ततश्च द्वादशे मासे चैत्रे नावमिके तिथौ [८] ।

कौसल्याजनयद् रामं सर्वलक्षणसंयुतम् [१०] [रामा० बाल १८.८.१०]

२—"वेदोऽसि वित्तिरसि विदेयेत्याह वेदेन वै देवा असुराणां वित्तं वेद्यम् अविन्दन्त तद् वेदस्य वेदत्वम् ।" [तै. सं. १. ७. ४. ६] ।

"योऽसावादित्ये पुरुषः सोऽसावहम्" [वा. सं. ४०. १७] इति च श्रुतिः ।

नाभिः शरीरे विषुवतः प्रति । नाभेरूर्ध्वं देवयानः पन्थाः । स एव यज्ञोपवीतेनोपलक्ष्यते । ध्रुवे सूर्यः षड् मासान् प्रकाशते । तत्र षाण्मासिकम् अहरभितः सान्ध्यं तेजो द्वौ द्वौ मासौ । परिशेषेण द्वौ मासौ दीर्घं तमः । पिण्डे मानुषशरीरे ध्रुवक्षेत्रे शिरसि नासाचक्षुःश्रोत्रेण षड् मासाः सूर्यवन्तः । आस्यम् उदयात् प्राग् आश्विनात् कालाद् मासद्वयात् प्रति । एवं ललाटोऽस्तोत्तरम् आश्विनात् कालाद् मासद्वयात् प्रति । ललाटादूर्ध्वं रोमाच्छन्नो मूर्धा मासद्वयात्मकदीर्घतमसः प्रति ।

दशमे मण्डलेऽरणिमन्थनेन यद् गर्भधारणं दश मासान् तस्य रूपं ध्रुवे दश मासान् सौरः प्रकाशः, शिरसि आचिबुकाद् आललाटं वदनं च । दशभ्यो मासेभ्यः पश्चाद् गर्भस्य सूतिः ध्रुवे सौरप्रकाशस्य सर्वथा तिरोभावः, मानवशिरसि च प्रज्ञाधिगमः, ललाटादूर्ध्वं कपाले ज्योतिष आविर्भावः ।

प्रथमे मण्डले दीर्घतमाः दशमे युगे जीर्णो भवति । ध्रुवे दश मासान् प्रकाश्य सूर्यो दीर्घं तमः प्रविशति इत्यतोऽसौ दीर्घतमाः । जीर्णः सोऽपां ब्रह्मा सारथिर्भवति । मासद्वयं तमसि वारुणीष्वप्सु निविष्टः पुनरात्मानम् अद्भ्य ऊर्ध्वम् उन्नयतीत्यतोऽसौ सारथिरपि ब्रह्मा च । [१. १५८. ६] ।

मध्ये पञ्चमे मण्डले एकैव प्रसूतिर्द्वेधा निरूप्यते । अत्रिः सप्तवध्रिः, (ध्रुवं दश मासान् प्रकाशितवान् सूर्यः), वनस्पतौ [पेटिकायां द्वौ मासौ] प्रवेशितः, दीर्घे तमसि सूर्यो मासद्वयं विलीन इति यावत् । अश्विनौ प्रार्थ्यमानावसौ मासद्वयादूर्ध्वम् उन्नीयते, तदेव वनस्पतेर्मोचनम् अत्रेः सप्तवध्रेः ।

अत्रैव अत्रेः सप्तवध्रेर्निगमनानुषक्तं दश मासान् गर्भे शयितस्य कुमारस्य मोचनमपि श्रूयते । तच्च अत्रिमोचनस्य रूपान्तरमेव ।

अत्रिः द्वौ मासौ दीर्घे तमसि प्रविष्टः, तमसः उन्नीयते । अस्य द्वौ मासौ गर्भावधिः । ध्रुवे द्यावापृथिव्योरन्तरा दश मासान् सौरं ज्योतिः यत् प्रकाशते तदेव कुमारस्य मातुरुदरे शयनम् । अत्र कुमारस्य गर्भावधिः दश मासाः । अस्य मातुरुदराद् निर्गमनं ध्रुवे प्रकाशस्य तिरोभावः [५. ७८. ५–९] ।

एतत् सर्वं व्याख्यानं मायाकल्पनम् । तथापि असंगतम् इति न भवति ।

अत्रेः सप्तवध्रेर्मोचने नान्याख्यानानि शौनकादिभिः प्रपञ्च्यन्ते तैरप्यसंगतिः स्यात् । असुराः तस्य भ्रातरो वा अत्रिं सप्तवध्रिं पुत्रोत्पादनासमर्थं, "स पत्न्या संगतिं मा कार्षीद्" इति कृत्वा तं सायं वनस्पतिपेटिकायां निक्षिपन्ति । स चात्रिः अश्विनौ स्तुत्वा अश्विभ्यां पेटिकातो निर्गमितः सन् दारैः संगत्य पुनर्नीत्वा सूर्योदयात् प्रागेव पेटिकां प्रवेशयतीत्येवमादि आख्यानम् ।

दिने भ्रातृभिर्मोचनं, सायं वनस्पतौ प्रवेशनम्, अश्विभ्यां यामयामस्य मोचनं

पुनस्तत्र प्रवेशः, पुनर्मोचनम् इतीयं प्रक्रिया ध्रुवेऽस्तं गतस्य सूर्यस्य ध्रुवयोरन्तरा अहोरात्रभूत्या पृथिव्या उभयोः पार्श्वयोः गती द्योतयति ।

अधुना दाशतय्यां त्रिषु मण्डलेषु श्रूयमाणानां मोचनानां परस्परसंगतिर्विमृश्यते ।

प्रथमं मण्डलं शतर्चिनः । तत्र अश्विनोः संवत्सरं यावत् अविशेषेण व्याप्तिः, सूर्यस्य गतिश्च । संवत्सरे सातत्येन एकत्र सूर्यस्य प्रकाशो दशमासान् यावत् । अत एव दीर्घतमा दशमे युगे जीर्णो भवति । संवत्सरे सातत्येन एकत्र तमसः प्रभुता शतं मानुषान् अहोरात्रान् । अत एव—

शतं मेषान् वृक्ये चक्षदानम् ऋज्राश्वं तं पिताऽन्धं चकार [१. ११६. १६] इति श्रूयते । अत एवाश्विनोर्नौश्च शतारित्रा ।[1]

प्रथममण्डलस्य शरीरभूतत्वात्[2] एवाऽत्राश्विनोः रथः "अहंपूर्वः" इति श्रूयते [१. १८१. ३] । "अहमऽपूर्वः" इति पदम् ऋक्संहितायां सकृदेव श्रूयते, तच्चात्राश्विनोः रथविशेषणत्वेन । यद्यप्यहंपूर्वस्य रथस्य द्रष्टाऽगस्त्यो मैत्रावरुणिः, न तु दीर्घतमा औचथ्यः तथापि दीर्घतमसोऽगस्त्येन सह सम्बन्धो भवत्येव, उभयोः आश्विनसूक्तद्रष्टृत्वात् उभयोः आर्षयोरानुपूर्व्या वर्त्तितया च ।

दीर्घतमा औचथ्यो द्वयोः सूक्तयोर्द्रष्टा [१. १५७–१५८] ।

अगस्त्यो मैत्रावरुणिः पञ्चानां सूक्तानां द्रष्टा [१. १८०–१८४] ।

ततः परम् आश्विनं सूक्तं प्रथमे मण्डले न श्रूयते ।

अतो दीर्घतमा मामतेयस्तमसोऽश्विभ्यां मोचितः सन् पश्चादगस्त्यात्मनाऽश्विनोरहंपूर्वं रथं पश्येद् इति नासंगतम् । यतो जीर्णोऽपि दीर्घतमाः, अश्विनोः प्रभावेण "अपां" [स्वकर्मणाम्] "अर्थं यतीनां" (लक्ष्यं प्राप्नुवतीनां) ब्रह्मा सारथिर्भवति ।

> दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ।
> अपाम् अर्थं यतीनां ब्रह्मा भवति सारथिः ॥ [१. १५८. ६] ।

१—यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसम् [१. ११६. ५]
द्वौ मासौ, शतम् अहोरात्रा इति वैषम्यं परिहृतं पूर्वत्र । [द्र. अध्यायः ८]

२—प्रथममण्डलद्रष्टार ऋषयः शतर्चिन इत्युच्यन्ते । "स यच्छतं वर्षाण्यभ्यार्चत् तस्मात् शतर्चिनस्तस्माच्छतर्चिन इत्याचक्षत एतमेव सन्तम्" [ऐ. आ. २. २. १] ।
"यस्मादयं प्राणस्तं मनुष्यदेहं वर्षशतमभ्यर्चितवांस्तस्मात् तथैव व्युत्पत्त्या प्राणस्यावतारभूताः प्रथममण्डलद्रष्टारो मुनयः शतर्चिसंज्ञकाः सम्पन्नाः ।" [सायणः] एवं सति प्रथमं मण्डलं विश्वपुरुषस्य स्थूलं शरीरं अभ्यर्चेति ।

पञ्चमं मण्डलमाग्नेयम् । अग्निश्च तीर्णतमाः । अत एव स सप्तवध्रिः । तस्य वध्रयः सप्त । एतद् इत्थं स्यात्—

तस्य प्रजोत्पादनसमर्थाः सप्त आसन् आस्यनासाचक्षुःश्रोत्रेण सह । परन्तु यदासौ प्रत्यङ्ङात्मा भवति तदा तस्य इन्द्रियाणि विषयेभ्यो निवर्तन्ते इत्यतोऽसौ सप्तवध्रिः । अपि च दीर्घतमसः पुत्रः कक्षीवान् । कक्षीवान् नाम कक्ष्यावान्[1] । यदा कक्ष्याः सप्त भवन्ति ताभिः कक्ष्याभिः परिच्छिन्नत्वाद् अपि असौ सप्तवध्रिः ।

प्रथमे मण्डले तीर्णतमस्त्वाभावात् ज्योतिस्तमसोर्विवेको नास्ति । पञ्चमे मण्डलेऽग्नेः सप्तवध्रेस्तीर्णतमस्त्वाद् न केवलमग्नेर्वनस्पतेर्मोचनम्, अपि तु तेन मोचनेन सह कुमारोऽपि जायते । अत एव अग्निमोचनेन सह कुमारोत्पत्तिः सूक्त एकस्मिन् श्रूयते [५. ७८. ५–९] ।[2]

पिण्डे मानुषशरीरे दशभिरिन्द्रियैर्बाह्ये जगति व्याप्रियते आत्मा । तस्य मनश्च बुद्धिश्च, अथवा वाक् च प्राणश्च, अथवा शरीरात्मा अन्तरात्मा च दीर्घतमोभूतौ । तत्र आत्मनो जागरेणमेव कुमारस्य जन्म मातुर्गर्भे दश मासान् उषित्वा ।

१—कक्षीवान् । "कक्ष्यायाः सम्प्रसारणम् । कक्षीवान्नाम ऋषिः । कक्ष्यावान् अन्यत्र ।" [भट्टोजिः पा. ८. २. १२] ।
कक्ष्या रज्जुरश्वस्य [नि. २. ३] ।

२—द्र. वेदेषु उत्तरध्रुवनिवासः "द आर्कटिक् होम् इन् द वेदाज्" श्री बालगंगाधरतिलकस्य ग्रन्थः । पृष्ठम् [१०१, १००, ३१४–३१५] अपि च पृष्ठम् [५८, २१८–२१९] अपि च पृष्ठम् [५२–५३] [सप्तवध्रे] ।

दशमोऽध्यायः ।

॥ अश्विनोस्तिरोभावः ॥

सिन्धुजन्मानौ अश्विनौ, सिन्धोः स्यन्दनविरत्या विरमतः ।

सिन्धोः स्यन्दनेन समुत्पन्नावश्विनौ स्यन्दनविरत्या विरमतः । अत एवाश्विनोर्मुख्यानि कर्माणि अप्सु भवन्ति । रसेन अनुस्यूतं तयोः कर्म । पारणं, तारणम् , उन्नयनं, सिञ्चनम् , भैषज्यम् , ऊर्क् , पृक्षः, वसु इत्यादि सर्वं रससंबद्धम् ।

रसो यत्र आर्द्रस्तत्र नौयोगः, यत्र च शुष्कस्तत्र रथयोगः । सिन्धोरगाधे पदे तयोः पादौ भवतः, उपरि तले तयोः कर्णौ । बृहन्तौ प्रांशू पुरुषाविव अश्विनौ गहनेषु जलेषु प्रतिष्ठां विन्दतः । गभीरेषु दुष्प्रवेशेषु स्थानेषु अवस्थितिं जानीतः । य एतादृशं जलं तितीर्षति तस्य कृते गाधं पुरुषस्य पादौ इव जानीतः । स्तुतिकर्तुः उक्तं कर्णौ इव स्मृत्वाऽनुकूलौ भवतः । यजमानस्य अप्सु जायमानानि कर्माणि अंशौ (अवयवौ) इव भजतः ।

> बृहन्तेव गम्भरेषु प्रतिष्ठां पादेव गाधं तरते विदाथः ।
> कर्णेव शासुरनु हि स्मराथोंऽशेव नो भजतं चित्रमप्नः[1] ॥

[१०. १०६. ९]

अश्विनौ यदा लोकत्रयं व्याप्नुतः, सिन्धोः सप्त स्रवतः परि यदा तयो रथो गच्छति, तदा सिन्धूनां (स्यन्दमानानाम् उदकानां) पदे वसु (उषस्यं तेजो) भवति, सिन्धोरुपरि तले दिवि इन्दवः (सूर्यरश्मयः सोमबिन्दवः) प्रादुर्भवन्ति । अयमश्विनोः रूपस्य तिरोधानकालः ।

> दिवस्कण्वास इन्दवो वसु सिन्धूनां[2] पदे । स्वं वव्रिं कुह धित्सथः ॥

[१. ४६. ९]

१—अप्नः । आपः कर्माख्यायाम् [उ. सू. ६४७] । कर्माख्यायाम् ह्रस्वो नुट् च वा । अप्नः । अपः । बाहुलकाद् आपः । आपसी । [सि. कौमुदी] आप्लृ व्याप्तौ । तस्मात् कर्माख्यायाम् असुन् प्रत्ययो धातोर्ह्रस्वश्च । "सर्वधातुभ्योऽसुन्" [उ. सू. ६२८] प्रत्ययस्य नुडागमो वा । आप् + न् + असुन् > अप् न् अस् > अप्नस् ।

२—सिन्धूनाम् अपां वृष्टिरूपाणां स्यन्दनस्वभावानां पदे स्थानेऽन्तरिक्षे । [सायणः]

"हे कण्वासः कण्वपुत्राः ! यद्वा मेधाविन ऋत्विजः ! अश्विनौ पुष्यन्तौ— अस्मिन्नवसरे स्वं वह्निं स्वकीयं रूपं वा स्थापयितुम् इच्छथः" [सायणः]।

अस्मिन् समयेऽश्विनोस्त्रीणि पदानि "गुहा परः" गुहायाः परस्तात् आविर्भवन्ति । अश्विनोस्त्रिलोकव्यापितया त्रीणि स्थानानि भवन्ति, अतस्त्रीणि कर्माण्यपि । अत एव तयो रथः त्रिवन्धुरः त्रिचक्रश्च । [१. ३४. ९; ११८. २]।

त्रीणि[1] पदान्यश्विनोराविः सन्ति गुहा परः । [८. ८. २३]

अश्विनोः कर्म रथे उपसमारोप्य सोमं प्रति नयनेन पर्यवस्यति । अयं चाश्विनोः रथः ऋभुभिस्तष्टो भवति । अत एव काक्षीवती घोषाऽश्विनौ तेन ऋभुतष्टेन रथेनागन्तुं प्रार्थयते ।

आ तेन यातं मनसो जवीयसा रथं यं वामृभवश्चक्रुरश्विना ।
यस्य योगे दुहिता जायते दिव उभे अहनी सुदिने विवस्वतः ॥"

[१०. ३९. १२] ।

दिवो दुहितुर्जन्म, विवस्वत उभयोरह्नोः सुदिनत्वं चात्र काम्यते ।

अत्र रथेऽश्वा न सन्ति ऋभुभिस्तयोरथस्यैव तक्षणात् । वाजिनीवतोः अश्विनो रथोऽनश्वः [१. १२०. १०] ।

प्रग्रहरहितः, अश्वरहितः, ऋभुतष्टोऽश्विनोरयं त्रिचक्रो रथो यदा रजः अन्तरिक्षं परि भ्रमन् द्यां पृथिवीं च पुष्णाति, तदा ऋभूणामेतद् महनीयं कर्म वामदेव ऋषिः स्तौति ।

अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रिचक्रः परि वर्तते रजः ।
महत्तद् वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥ [४. ३६. १] ।

त्रिचक्रो रथः, त्रीणि पदानि चाश्विनोः, त्रिस्थानस्थः सोमो, लोकत्रयव्यापिनौ चाश्विनौ । एतद् त्रिभागत्वसाम्यम् रसो सोमस्य त्रिवृत्त्वं भवति । प्रति प्रयुञ्जानम् अश्विभ्याम् इषो दीयन्ते सेना इव गोमत्यः, अश्ववत्यः हिरण्यवत्यश्च । [१. ३०. १७] । प्रतिप्रयुञ्जानम् अश्वशिरोयोगेन दध्यङ्ङाथर्वणोऽश्विभ्यां त्रिः मधु प्रवक्ति[2] । यच्चरमा उषा यदा ऊर्जानी, सूरिः सोमः इति सेनाऽभिव्यज्यते तदा मधु गोचरं भवति यच्चाश्विभ्यां प्रदीयते ।

1—द्र. यद् वा विष्णोर्विक्रमणेषु तिष्ठथः । [८. ९. १२] ।

2—"तम् अभ्यनक्ति । दध्ना मधुना घृतेन । दधि हैवास्य लोकस्य रूपं घृतमन्तरिक्षस्य मध्वमुष्य ।" [श. ब्रा. ७. ५. १. ३]

रसो वै मधु । [श. ब्रा. ७. ५. १. ४.]

द्र. "मधु वाता ऋतायते" इत्यादिः तृचः [१. ९०. ६–८] ।

[वा. सं. १३. २७–२९] ।

आ वाम् ऊर्जानी रथमश्विना रुहत् [१. ११९. २] ।

यदश्विना वहथः सूरिमावरम् [१. ११९. ३]

आ वां पतित्वं सख्याय जग्मुषी योषावृणीत जेन्या युवां पती । [१. ११९. ५][1] ज्योतिरुद्गमनेन, पतिं सोमं प्रति सूर्यायाः नयनेन, अश्विनोः कर्म पर्यवस्यति ।

आजिं जित्वा सूर्यां रथमारोप्याश्विनौ सोमिनो गृहं यातः । सोमिनो गृहमत्र सूर्यः । नीयमाना सूर्या एव सोमात्मना परिणमति । सूर्यो यज्ञो, यत्र रसो ज्योतिश्च पृथिव्या उद्गच्छती सम्पृक्तः । सूर्योऽत्र विमदस्य जायायां समुत्पत्स्यमानः पुत्रः । विमदजाययोः सम्पर्कोऽश्विभ्यां मधुसेकमपेक्षते । पुष्करस्रजावश्विनौ अरणिमन्थनेन गर्भमादधाते । दशमासान् अधिमातरि शयानं कुमारं तौ निर्गमयतः । [५. ७८. ९] ।

दिवि आप ऋतं यदश्विनौ तरतः । तत्र पन्थाः सोमो यत्र दिवः स्रुतिः । सूर्यज्योतिषा सम्पृक्तम् ऋतम् उषा भवति । ऋतदीप्तिरूपा मण्डलं नीयमाना सूर्या । अत्र मधुसेकेन सोमोऽभिव्यज्यते ।

सूर्यतेजसा प्रकाशमानम् ऋतम् उषाः । अस्मिन्नुषोभूते ऋते विमदस्य भुज्योर्यद् गोचरं भवति तदेव मधु । मधुरिक्तम् ऋतमेव सोमः ।

दिवि सूयमानेन सोमेन सूर्यः समेधितो भवति । सूर्येण सोमो दीप्तो भवति । सोमो यज्ञात्मनः सूर्यस्यात्मा । [१. ९१. २२; ९. २. ६; ९. २. १०] ।

सिन्धुजन्मानावश्विनौ सिन्धुं तितीर्षोर्यजमानस्य गभीरं गाधं पद्भ्यां चितः । कर्णाविव तौ यजमानस्याभीष्टमनुस्मरतः । [१०. १०६. ९] । दृढं पृथिव्यां तिष्ठतोरश्विनोः सिन्धोरुपरितले श्रोत्रे विराजतः । अतोऽश्विनोरधिकारो पृथिवीतो वायुं यावत् । वायुवाहनः शब्दः तयोर्मधु । तयो रथे संचितं मधु तुरीयम् अन्नं भवति । [४. ४५. १] ।

यदा शब्दोऽश्विनोः वपुः समेति तदा तावुषसा संगच्छेते । तयो रथे मधुपूर्णो दृतिः शब्दायते । दृतिरयं श्रोत्रम् । नासिके, चक्षुषी, जिह्वा च मनोभावान् प्रकाशयन्ति । श्रोत्रे न किमपि दर्शयतः । अतस्ते अत्र दृतिः ।

सर्वं ज्ञानं शब्दात्मकम्[2] । दृतिश्चर्मगोणिः । चर्मात्र वायुस्थानीयं स्पर्श-

---

१—त्रयो घर्मास उषसं सचन्ते । ७. ३३. ७ ।
अग्निवायुसूर्याः दीप्यमाना उषसं समवयन्ति । [सायणः] ।

२—अ. वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते । [वाक्यप० ब्र० का० श्लोकः १०८] ।

गुणत्वात् । स्पर्शजः शब्दः । शब्दो वाय्वश्वः । वायुरेवात्र दृतिः । तत्र शब्दो मधु । अश्विनोः रथे, आध्यात्मिकदृशा, चत्वारो दृतयः—

नासिका, रसना, चक्षुः, श्रोत्रं च ।

४	दृतिः	मधु	ज्योतिः	आत्मा	श्रोत्रम्	स्वः
३	दृतिः	पृक्षः	हिरण्यम्	मनः	चक्षुः	द्यौः
२	दृतिः	पृक्षः	अश्वः	प्राणः	नासिका	अन्तरिक्षम्
१	दृतिः	पृक्षः	गौः	वाक्	जिह्वा	पृथिवी

शिरसा अश्विनोः विशिष्टः सम्बन्धः । प्रवर्ग्यसंभारेण छिन्नं यज्ञशिरः ताभ्यां संधीयते । नमुचेः शिरस उद्वर्तने तौ सरस्वत्या सहेन्द्रस्य सहायौ । दधीचेरश्व्यं शिरः तौ प्रतिदधाते । उषास्तयोः रथमारोहति । "उषा वा अश्वस्य मेध्यस्य शिरः ।" [बृहद् आ. १. १. १] ।

भुज्योस्तारणे प्रवर्तितं पक्षिणं प्लवं चतस्रो नावो जठलस्य जुष्टा अश्विभ्याम् इषिताः पारयन्ति । पुरुषः स्वत्वाष्ट्रात्मा चतुर्भिः भूतैरन्तरितः । पृथिव्यप्तेजो-वायवो यदा चतस्रो नावो भूत्वाऽश्विभ्यामिषिता भवन्ति, तदा ते आकाशोदरस्थं शब्दं जुषन्ते । तदा ताभिश्चतसृभिर्नौभिरश्विनौ त्वाष्ट्रं[1] नामोद्धरतः । यदैतानि चत्वारि भूतानि आदित्यज्योतिषा दग्धानि भवन्ति, तदा "भुज्युः," यजमानः, "अहं" "त्वाष्ट्रं नाम" स्रुवेण सोम इव सिन्धोरुत्तीर्णो भवति । [ऋ.१.११६.२४] ।

अश्विनोः कर्णौ पादावपेक्षेते । अत एव तौ विश्पलायै आयसीं जङ्घां प्रतिदधाते । आयसी हिरण्मयी जङ्घाऽत्र स्पर्शः । शब्दस्य पादः स्पर्शः । वायुः तरङ्गैः शब्दं वहति । विश्पलायै प्रदत्ता जङ्घा वायोर्वीचयः । यस्मै धनाय विश्पला धावति तत् तस्या एव नाम । आत्मनः "त्वाष्ट्र" नामाऽधिगम्यते, आत्मनः प्राणस्य वीचीनामधिगमेन । अश्विरथस्य व्यापनं पादात् श्रोत्रं यावत् । पादाश्च प्राणवीचिः । अनया दृष्ट्या नासत्यौ नासिकाप्रभवौ इति निरुक्तिरपि संगच्छते । सर्वमैन्द्रियं ज्ञानं स्पर्शजम् । इन्द्रियविषयसंयोगश्च स्पर्शः । एवं त्वचः प्रारम्भो वाय्वावसानम् । त्वगिन्द्रियं सर्वव्यापकं वल्कवत् आवरकभूतत्वात् । नासायां घ्राणेन्द्रियं निहितम् । नासैव श्वसिति । स्पर्शेन्द्रियं च त्वक् या पृथिवीव व्याप्नोति । चक्षुर्न दृश्यते, श्रोत्रं न श्रूयते, नासा न घ्रायते, त्वक् स्पृश्यते । त्वक् तु त्वचं

१—त्वाष्ट्रं नाम । [१. ११७. २२; १. ८४. १३–१५] ।

स्पृशति। त्वचः स्पर्शेन्द्रियत्वात्, वायोः सर्वव्यापकत्वाच्च वायोरारम्य[1] स्थावर-जङ्गमानां सृष्टिः। एवम् आ दिवः पृथिव्याः, आश्रोत्रं पादात्, आवायु पृथिव्याः अश्विनोरुदरं मधुपूर्णं भवति।

यदा पृथिवी गायत्रेण[2] छन्दसा भ्रमति, तदा प्राणः आत्मनस्त्वाष्ट्रं नाम गायति। वस्त्वेकैकमश्विनोरास्पदम्।

अश्विनोर्वाहनभूतोऽश्वस्थानीयो रासभः। यदरसद् इव स रासभः" । [शत. ब्रा. ६. १. १. ११] इति शतपथे शब्दनिर्वचनम्। रसधातोरौणादिकेऽभचि रासभः इति शब्दरूपम्। अरसत् इति निरुक्त्या रसधातोर्निष्पत्तिः। एवं रासभ इत्यत्र शब्दकरणं व्युत्पत्तिनिमित्तम्। अकारोऽत्र दीर्घः। उभयं वायौ संगच्छते। अश्विनो रथे मिथुनीभूतानि त्रिविधानि अन्नानि भवन्ति। तुरीयो दृतिः (रसद्रव्याधारः चर्ममयः) मधुपूर्णो विरप्शते। रपलपधातू व्यक्तायां वाचि। रपति लपति। 'विरप्शते विविधं राजते" इति सायणः। [४. ४५. १]।

सर्वव्यापकौ युग्मभूतावश्विनौ उभयोः पार्थक्यं रसज्योतिर्म्यां दधाते। अनयो रसज्योतिषोर्विकारभेदाद् अश्विनोर्नामभेदः। युग्मावपि तौ सर्वत्र समनसौ समानयोजनरथवन्तौ एकनामानौ च। यतो हि तयोर्यन्त्रम् अह्नो रात्र्या सहेव। [१. ३४. १]।

युग्मस्य तयोर्द्विचक्रो रथः सोमं प्रति तस्य वधूं सूर्यां यदा वहति तदा स रथस्त्रित्वविशिष्टो भवति, तदा तस्मिंस्त्रीणि चक्राणि, त्रयः पवयः, त्रयो बन्धुराः, त्रयः स्कम्भाः भवन्ति। स च रथो लोकत्रये वर्तनात् त्रिवृत् भवति। तदा तस्य रथस्यागमनं वातेनोपमीयते—"आत्मेव वातः स्वसराणि गच्छतम्" [१. ३४. ७]। "यथा प्राणिनाम् आत्मभूतः प्राणवायुस्तदीयानि शरीराणि गच्छति तद्वत्"। [सायणः]।

अत्र स्वसराणि इति पदं शरीरम् इन्द्रियाणि चोपलक्षयति। अन्यत्र शरीर-विषये असुः, असृक्, आत्मा इति त्रयस्य जिज्ञासा श्रूयते।

"भूम्या असुरसृगात्मा क्वस्वित्। [१. १६४. ४]।

१—अत एव गीता पुनः पुनः शीतोष्णसहत्वम् आदिशति।

"बाह्यस्पर्शेष्वसक्तात्मा विन्दत्यात्मनि यत्सुखम्।"

"ये हि संस्पर्शजा भोगा दुःखयोनय एव ते।"

[गीता. ५. २१–२२; १२. १८]।

२—सेयं (पृथिवी) सर्वा कृत्स्ना मन्यमानाऽगायत्। यदगायत् तस्माद् इयं गायत्री। [शत. ब्रा. ६. १. १. १५]।

भूम्याः सम्बन्धि पार्थिवं स्थूलशरीरम् । असुः प्राणः तदुपलक्षितं सूक्ष्मशरीरम् । असृक् शोणितम्, एतत् सप्तधातूपलक्षकम् इति सायणः ।

रासभयोगेन त्रिवृद्भूतौ मिथुनीभूतपुत्रत्रयधारकः, मधुपूर्णतुरीयदृतिधारकः अश्विनो रथोऽश्विनोर्निर्दिष्ट इत्युपपादयितुं शक्यते ।

	१	२	३	४
१	अश्विनौ	आत्मा	वातः	स्थवराणि [१.३४.७.]
२	अश्विनौ	आत्मा	असुः	असृक् [१.१६४.४]
३	सोमः	हिरण्मयम्	अश्वः	गौः
४	महः	स्वः	भुवः	भूः
५	वायुः	अग्निः	आपः	पृथिवी
६	विज्ञानम्	मनः	प्राणः	अन्नम्
७	श्रोत्रम्	चक्षुः	नासिका	जिह्वा

ऐतरेयब्राह्मणे आजिधावनं द्विःश्रूयते । एकं नवमाध्याये, अन्यत् षोडशाध्याये । प्रथमं द्विदेवत्यग्रहविधानार्थमर्थवादेन प्रस्तुतं, द्वितीयं तु आश्विनशस्त्रसंबन्धेन प्रस्तुतम् । प्रथमेन सोमस्य अग्रपेयत्वं कस्येति निर्णीयते । द्वितीयेन सूर्याविवाहे सहस्रस्य वहतोर्विजेता निर्णीयते ।

वायोः प्रथमं सोमपानम् ।

तत्र प्रथमे वायुः "मुखम्" (अवधेः संमुखं) प्रथमः[1] प्रत्यपद्यत, अथेन्द्रः, अथ मित्रावरुणौ, अथाश्विनौ । तत्र वायुना सम्बन्धम् इन्द्रोऽपि वायुना सहैव मुखं प्राप । इन्द्रश्च वायुश्च मिलित्वा सहैव आजिम् उदजयताम् । तत्र यथा उभयोः सहैव ग्रहः; परन्तु वायोर्भूयानंशः सोमस्य । वायोस्त्रयोभागाः इन्द्रस्यैक एव । एवं त्रिभाग् वायुः, इन्द्रस्तुरीयभाग् ।

इन्द्रवाय्वोः पश्चाद् मित्रावरुणौ मुखं प्राप्नुताम् । तयोश्च पश्चाद् अश्विनौ प्राप्नुताम् । एवं त्रयो द्विदेवत्यग्रहाः संभवन्ति ।

१—अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु ।
त्वं हि पूर्वपा असि [४. ४६. १] ॥

इन्द्रवाय्वोः प्रथमः — वाक् च प्राणश्चैन्द्रवायवः ।
अथ मित्रावरुणयोः — चक्षुश्च मनश्च मैत्रावरुणः ।
अथाश्विनोः — श्रोत्रं चाऽऽत्मा चाऽऽश्विनः ।

पुरस्तादैन्द्रवायवं भक्षयति, तस्मात् पुरस्ताद् वाचा वदति । पुरस्ताद् मैत्रावरुणं (भक्षयति) तस्मात् पुरस्ताच्चक्षुषा पश्यति । सर्वतः परिहारं (परितो हरणं कृत्वा शिरः प्रदक्षिणीकृत्य) (भक्षयति) तस्मात् सर्वतः श्रोत्रेण शृणोति ।

द्वितीय आजिधावनेऽग्नेः, उषसः, इन्द्रस्य कंचित् कंचिद् भागं प्रकल्प्य अश्विनावेव उदजयताम् । पूर्वत्र सोमपेयत्वम् । अत्र सोमं प्रति वहतुवहनम् । उभयत्र सोम एवान्तिमं लक्ष्यम् । वायुर्मुखं प्रथमः प्रत्यपद्यत इति श्रुत्या वायुरेव सोमात्मना परिणमति । वायुरेव सोमं सूते । तत्रेन्द्रः कारणम् । वायोः सोमस्य प्रच्यावनम् इन्द्रनिमित्तम् ।

द्वितीय आजिधावने अश्वतरीरथेन अग्निराजिम् अधावत् । अश्वगर्दभसांकर्येण जाता अश्वतर्यः । धावनेऽग्निस्ता दग्धयोनीः कृतवान् । अतस्ता न प्रजायन्ते ।

गोभिररुणैरुषा आजिमधावत् ।
अश्वरथेन इन्द्रआजिम् अधावत् ।
गर्दभरथेनाश्विनावाजिम् उदजयताम् ।

"अश्विनावाश्नुवाताम्, यदश्विनावुदजयताम् अश्विनावाश्नुवाताम् तस्मात् स सृतजवो दुग्धदोहः ।"

गर्दभेन अश्विनौ सर्वम् आश्नुवाताम् । तत्र गर्दभस्य सर्वो जवः सृतः [पर्यवसितः] । यदश्विनावुदजयतां तस्मात् स दोहरहितो जातः । एवं गर्दभो वेगरहितः क्षीररहितश्च कृतः । [गर्दभ्याः क्षीरं पानयोग्यं न भवति] ।

अश्विनोर्वाहनं रासभः । स एव तयोः रथः । सततगतिमान् वायुरेवाग्नेस्तापेन व्याप्नुवन् तूर्णं तरणिः, धावत्सु मध्येऽतिशयेन त्वरिता शीघ्रगामी भवति [१. ११२.४] । अतो गर्दभो रासभोऽत्र वायुरूप एव भवितुमर्हति ।

यदि शारीरमेव अश्विनोः रथत्वेन गृह्यते तर्हि तत्र युक्तो रासभः प्राण एव । असौ प्राण एव शरीरे सर्वम् अतिशय्य पञ्चधा वा सप्तधा वा व्यश्नुते । असौ प्राण एव वाङ्मनसभूतौ अश्विनौ वहति । आजिधावनेन "सृतजवो दुग्धदोहो" गर्दभः । शरीरे प्राणोऽपि सृतजवो दुग्धदोहवत्, तस्य वेगस्याप्रतीतेः, चक्षुरादीन्द्रियवत् तस्य दोहस्यासम्भवाच्च । परन्तु शरीरं तदैव मधुपूर्णं भवति यदैव पुरुषोऽमुं प्राणं शरीररथे युञ्जीत । चक्षुरादीन्द्रियाणि शरीररथस्य हया मन्यन्ते परन्तु प्राणात्मरासभयोगेनैव मधुसेकः, उषस आरोहणं, सोमपानं च संभवेत् । "युञ्जाथां रासभं रथे वीड्वङ्गे वृषण्वसू । मध्वः सोमस्य पीतये ।" [८.८५.७] ।

"हे वर्षणशीलधनवन्तौ अश्विनौ ! घृताक्तोपेते स्वरथे रासभं शब्दायमानम् एतान्नामकमश्वं संयोजयतम् । किमर्थम् । मध्वः सोमस्य पीतये । रासभावश्विनोः इति रासभावेव अश्विनोः रथस्य वाहनौ ।" [सायणः] । यद्यप्यश्विनोः रथो मधुपूर्णः तथापि रासभयोगेनैव तौ मधु पातुं योग्यौ भवतः ।

रासभयोगेन त्रिचक्रो रथस्त्रिचक्रो भवति । रासभेनैवाऽऽजिजयः । तेनैव बहुतुलाभः । तदैव (रासभयोगे) योषा अश्विनोः रथमारोहति । अतः तृतीयेन चक्रेण, उषस आरोहणेन च रासभस्य संबन्धः [१. ३४.९–१०; ११६. २]

चक्रत्रयविषये श्रूयते—

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा[1] विदुः ।

अथैकं चक्रं यद् गुहा तदद्धातय इद् विदुः ॥ [१०. ८५. १६]

अश्विनौ रथमारूढा पतिगृहं (सोमगृहं) नीयमाना सूर्या स्वयमेवाऽऽत्मानं संबोध्य वदति, "हे सूर्ये ! तव द्वे चक्रे प्रख्याते पुरा दृष्टे । द्वे एव चन्द्रसूर्यात्मके ऋतुथा ऋतुषु विनिर्दिष्टे चक्रे ब्रह्माणो ब्राह्मणा विदुः । अथैकं चक्रं तृतीयं संवत्सरात्मकं गुहायां निहितं यदस्ति तद् अद्धातय मेधाविन एव जानन्ति ।"

[सायणः]

ऋतुपरिवर्तनं, द्वादशभिर्मासैः संवत्सरपूर्तिश्च, सूर्यं परितः पृथिव्या भ्रमणेन भवति । तच्च भ्रमणं वाय्वधीनम् । वायुरेव सर्वं भ्रमयति ।

"अथ यः प्राणापानयोः सन्धिः स व्यानः । अतो यान्यन्यानि वीर्यवन्ति कर्माणि यथाग्नेर्मन्थनम्, आजेः सरणम्, दृढस्य धनुष आयमनम् अप्राणन्ननपानं-स्तानि करोति ।" [छा. उप. १. ३. ५] ।

आजिधावने त्रिभाग् वायुः, तुरीयभागिन्द्रः । इन्द्रेण सह एव वायुः शीघ्र-गतिमान् भवति । "या च का च बलकृतिरिन्द्रकर्मैव तत् ।" [निरु. ७. १०]

अश्विन्यो रथे रासभयोगेन वायुर्नियुत्वान् इन्द्रसारथिर्भवति । अथवा इन्द्र-सारथिर्वायुरेव रासभः । स एवाश्विनोः वोढा ।

युञ्जाथां रासभं युवम् अस्मिन् यामे वृषण्वसू ।

अग्निं भरन्तम् अस्मयुम् ॥ [वा. सं. ११. १३]

भरन्तं संहरन्तम् । अस्मयुम् अस्मान् कामयमानम् [उवटः] ।

सिन्धुजन्मानौ अश्विनौ सिन्धुं नौभिः तरतः । स्यन्दमाना सिन्धुर्यदा हिरण्य-वर्तनिर्भवति हिरण्यतटयोरन्तरा प्रवहति तदा सा "वाहिष्ठा" "यशोमावरी" च भवति ।

1—दक्षिणायनोत्तरायणे द्वे चक्रे ।

द्र. युवोर्हि यन्त्रं हिम्येव वाससः [१. ३४. १] ।

उत स्या श्वेतयावरी वाहिष्ठा वां नदीनाम् ।
सिन्धुर्हिरण्यवर्तनिः[1] ॥ [८. २६. १८] ।

"विश्वमना ऋषिः श्वेतयावरीनाम्न्या नद्यास्तीरेऽश्विनौ अस्तौत् । श्वेतजला यातीति श्वेतयावरी । हिरण्मयस्वीयमार्गा हिरण्मयोभयकूला वाहिष्ठा अतिशयेन गन्त्री ।" [सायणः]

अश्विनौ तदा "धियंजिन्वा मधुवर्णा शुभस्पती" [८. २३. ६] भवतः । "कर्माणि प्रीणयन्तौ । सर्वेषां मादनशीलशरीरकान्ती । ये युवयोः शरीरं पश्यन्ति ते तत्रैव हृष्टा भवन्तीत्यर्थः । उदकस्य पालयितारौ ।" [सायणः] । अश्विनौ राया (धनेन] विश्वं पुष्णन्तौ, शत्रुभिरनपच्युतौ[2] यज्ञमागच्छतः [८.२६.७] ।

तयोर्वाहिष्ठो रथः श्रुतः [८. २६. ४] न तु दृष्टः, यद्यपि आगतं साकं सूर्यस्य रश्मिभिः [१. ४७. ७] आगतं रथेन सूर्यत्वचा [१.४७. ९] इत्यादिः श्रूयते । अश्विभ्यां व्याप्तं वस्तु तयोरुपस्तुतौ तयो रथो भवति । स्तोतॄणां मध्ये ऋषिः विश्वमना व्यश्वस्य पुत्रो वैयश्वः स्तोमम् अश्विनोः वाहिष्ठं दूतं मन्यते । [८. २६. १६] ।

अश्विनोर्व्यापनेन दिव्येन ज्योतिषा प्रकाशमाने वस्तुनि [१. ४६. ६] अश्विनौ "धियंजिन्वा, मधुवर्णा शुभस्पती" भवतः । [८. २६. ६] । विगताश्वस्य विगतेन्द्रियस्य व्यश्वस्य पुत्रो वैयश्वो विश्वमनाः [आङ्गिरसो वा व्यश्वः] ऋषिः सूरिषु सधस्तुत्याय[3] अश्विनोः रथम् आह्वयति [८. २६. १] । अश्विनौ यद्यपि भिन्नस्थानजातौ [१. १८१. ४], नाना जातौ [५. ७३. ४] तथापि वायुः तावुभौ रथे युनक्ति । युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।

१—अश्विनौ रुद्रवर्तनी [१. ३. ३.] । हिरण्यवर्तनी [१. ९२. १८] । अश्विनोः रथो हिरण्ययः [१. १३९. ३] । [द्र. ४. ४४. ५; ७. ६९. १; ८. ५. ३५,; ८. २२. ९] ।
अश्विनोः रथः—घृतवर्तनिः [७. ६९. १] । रथुवर्तनिः [८. ९. ८] ।
आश्विनोरश्वाः हिरण्यपर्णाः [४. ४५. ४] ।

२—शत्रुभिरनपच्युतौ [८. २६. ७] । युवं हि स्थः पर्यो अति द्विषः [जुहुराणा] [८. २६. ५] । "संग्रामे रोदनशीलौ स्तुवन्तौ वा अश्विनौ द्वेषकारिणः कुटिलान् कर्मविघ्नकारिणोऽतीत्य संक्लेशयतम् । हतम् इत्यर्थः । ध्रु हिंसा संक्लेशनयोः इति औवादिकः ।" [सायणः] ।

३—सधस्तुत्याय । सधऽस्तुत्याय । स्तौतेर्भावे क्यप् । सह भवन्तौ स्तोतुम् । [सायणः] ।

आ नो वायो मधु पिबास्माकं सवना गहि [८. २६. २०]।

"हे वायो वासयितः। त्वं रथसहौ रथवहनसमर्थौ अश्विनौ पोष्यौ पोषणार्हौ मिश्रय"[1]।

भुज्योरस्तं (गृहं) नयनेऽश्विनौ नावो रथांश्च उपयुञ्जाते—नावः सिन्धुषु, सिन्धूनां तीर्थे रथान्। उषा रथमारोहति, न नावम्। यद्यप्यश्विनोः समानयोजनो रथः समुद्रं ईयते, तथापि स्यन्दमानास्वप्सु न रथस्य प्रवृत्तिः, अपितु समुद्रस्य धन्वनि आर्द्रस्य पारे च। [१. ३०. १८; ४६. ८; ११६. ४]।

रासभरथौ अश्विनौ सूर्यरश्मिभिः साकं सूर्यत्वचा (सूर्यकान्तियुक्तेन) रथेन उपसं तस्थाः पतिं सोमं नीत्वा कण्वानां सदसि सोमं पिबतः। प्रिया उषाः [१. ४६. १] नीयमानाश्विनोः प्रियं सदो भवति यत्राश्विनौ सर्वदा सोमं पिबतः।

सूर्यमण्डले विलीनौ अश्विनौ कं सोमं पिबतः इति अविज्ञेयम्।

"शश्वत् कण्वानां सदसि प्रिये हि कं सोमं पपुरश्विना॥" [१.४७.१०]।

"हे अश्विनौ! कण्वानां कण्वपुत्राणां मेधाविनां प्रिये सदसि यज्ञस्थाने शश्वत् सर्वदा सोमं पपथुः हि कं युवां पीतवन्तौ खलु।" [सायणः]। दिवि ऋतस्य पारगमने [१. ४६. ११] त्रिपथस्थं बर्हिरासद्य तत्र त्रीणि सवनानि निर्वर्त्य कण्वानां प्रियं सदः प्राप्यते [१. ४७. ४; १०]। तच्च सदोऽत्र सूर्यमण्डलम् एव भवितुमर्हति। कण्वा अत्र रश्मयः। सदसि अस्मिन् सोमपानेऽश्विनोस्तिरोभावात् तयोस्तत्र सोमपानस्य पारोक्ष्यतया "कम्" इति सर्वनाम "पपथुः" इति लिट्लकारश्च।

ज्योतिरुद्गमनेनाऽश्विनोस्तिरोभावः। अतोऽत्र वायोः रथः [८. २६. २०] सूर्यः। अश्विनौ रथसहौ। तौ सूर्यं रथं वहेते। तौ तथाविधौ करोति वायुः। अस्मिन् समये पूषाऽश्विनौ स्वपितरौ वृणीते [१०. ८५. १४]।

यज्ञोऽग्निरवमो विष्णुः परमः। सविता सूर्यं प्रसुवति। सवितुः प्रसवे (सूर्यस्य उदयात् प्राक्) अग्नये दत्तं हविः अश्विनोर्बाहुभ्यां नीयते, पश्चात् तद्धविः पूष्णो हस्ताभ्यां नीयते। बाह्वोरग्रे अग्रभागौ हस्तौ। यद् हविः पूर्वं [illegible]

1—अत्र सायणो रथसहौ अश्वौ मन्यते। पंचविंशत्यृचे सूक्तेऽन्तिमाः षडृचः वायुदेवताकाः। शिष्टा ऊनविंशतिः अश्विदेवताकाः। एवं सत्यपि अत्र "रथासहौ" [ऋ. २०] अश्विनौ मा भूताम् इत्यत्र विनिगमकं नास्ति। भूयसा व्यपदेशा इति न्यायेन अत्र अन्तिमासु षट्सु ऋक्षु अश्विनावनुस्यूतावेव।

तद् द्वाभ्याम् अश्विभ्यां नीयते । तदेव हविर्यदा अग्नीषोमाभ्यां द्वाभ्यां जुष्टं भवति तदा तत् केवलेन पूष्णा नीयते । एवं यत्राश्विनोस्तिरोभावः तत्र पूष्ण आविर्भावः ।

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् ।
अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ [वा. सं. १.१०]

यत्र क्वचन ग्रन्थे अश्विनोः रथे उषसः आरोहणं लिखितमस्ति तत्र उषः-शब्देन सूर्या ग्रहीतव्या । उषा यदा रथमारोहति तदाऽश्विनौ इषुकृतौ भवतः । द्वौ बाणाविव तौ सूर्यां वहतः । तदा पूषाऽश्विनौ स्वपितरौ वृणीते । यदाऽश्विनौ "इषुकृतेव" भवतः, तदा "पूषन्" इत्येकवचनेन संबोध्येते—

श्रिये पूषन्निषुकृतेव[1] देवा नासत्या वहतुं सूर्यायाः । [१. १८४. ३]
यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
विश्वे देवा अनु तद् वाम् अजानन् पुत्रः पितरावबृणीत पूषा ॥ [१०. ८५. १४] ।

यदा पूषाऽश्विनौ पितरौ वृणीते तदाऽश्विनोः त्वाष्ट्रम् अपिकक्ष्यं जायते । उषा अश्वस्य शिरः । तद् अश्व्यं शिरो यदाश्विनौ दधीचे प्रतीरयतः तदा स दध्यङ् अश्विनौ मधु प्रब्रवीति यत् तयोस्त्वाष्ट्रयम् अपिकक्ष्यं भवति । अश्विनौ त्वष्टुर्दुहितुः सरण्य्वाः जातौ । अतः त्वाष्ट्रयम् अपिकक्ष्यं तयोः सन्धानरूपा रज्जुर्भवति । दध्यङ् दध्नाऽञ्चति । दधि पृथिव्या रसः । ऋतं दिवि आपः । तद् आत्मन इच्छन् दध्यङ्ङश्विनौ मधु ब्रूते । दध्यङ् निः[2] अश्विनौ मधु ब्रूते । "दध्यङ्

१—इषुकृताऽइव [१. १८४. ३] आजिधावनाय इषुवच्छीघ्रम् ऋजुगामिनौ कृतावेव सन्तौ । [सायणः] द्र. रश्मीँरिव यच्छतम् अध्वराँ उप । [८. ३५. २१]

"हे अश्विनौ ! श्यावाश्वस्य ममाऽध्वरान् रश्मीन् इव यथाऽश्वप्रग्रहांस्तद्वद् उपगच्छतम् ।"

२—असौ वा आदित्यो देवमधु [छा. उ. ३. १. १] ।
दृतिस्तुरीयो मधुनो विरप्शते । [४. ४५. १] ।

बृहदारण्यकोपनिषदि द्वितीयेऽध्याये पञ्चमे ब्राह्मणे मधुविद्या श्रूयते । तत्रैकोनविंशतिर्मन्त्राः । आदौ चतुर्दशभिर्मन्त्रैः—"इयं पृथिवी सर्वेषां भूतानां मधु, अस्यै पृथिव्यै सर्वाणि भूतानि मधु" इत्यारभ्य पृथिवी, आपः, अग्निः, वायुः, आदित्यः, दिशः, चन्द्रः, विद्युत्, स्तनयित्नुः, आकाशः, धर्मः, सत्यं, मानुषम्, आत्मा—इति चतुर्दशानां मधुत्वं प्रतिपाद्य, पुनरन्तिमैश्चतुर्भिर्मन्त्रैः [१६–१९]—"इदं वै तन्मधु दध्यङ्ङाथर्वणोऽश्विभ्यामुवाच" इति चतुः मधुविद्या प्रतिपादिताऽस्ति ।

ह यन्मध्वाथर्वणो वाम् अश्वस्य शीर्ष्णा प्रयदीमुवाच ।" [१. ११६. १२] ।
इदं पृथिव्याम् । अत्र शिरःप्रतिसन्धानं न श्रूयते । शीर्ष्णा इति तृतीया करणे । कुत इदं शिर इति विवेको नास्त्यत्र । परन्तु दध्यङ् आत्मनः शिरः अश्वस्य शिरो मन्यते । यस्य शिरोऽश्वस्य भवति स एव मधु अश्विभ्यां ब्रूयात् ।

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतम् ।
स वां मधु प्रवोचद् ऋतायन् त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वाम् ॥

[१. ११७. २२]

इदमन्तरिक्षे । अन्तरिक्षस्थो दध्यङ् पदार्थान् विविनक्ति विवेचयति । तस्य शिरः कर्तितवाञ्यत्राऽश्वस्याश्याऽश्विनौ तस्मै अश्व्यं शिरः प्रतिदधाते । अत्र दध्यङ् मधु वृथा न वक्ति, मधुदानेन स आत्मन ऋतमिच्छति । अन्तरिक्षस्थमधुदानेन दिवि भवम् ऋतं लभ्यते । अश्विनौ द्युस्थानौ । अत्र ऋतलाभेन दीयमानं मधु तयोः साहोदर्यं, तयोः परस्परसंबंधविशेषः, तयोरपिकक्ष्यं भवति ।

युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ।

[१. ११९. ९] ।

इदं दिवि । अत्र दध्यङ् स्वयं मधु न वदति । दिवं प्राप्तस्याऽऽभावो विलुप्तो भवति । अत्र स्वयमश्विनौ दधीचो मनः परिचरतः । अतः शिरः स्वयमश्विनौ मधु प्रति वदति । यदाऽश्विनौ मनः परिचरतः तदा शिरोऽश्विभ्यां मधु ब्रूते ।

त्वष्टुर्जामाता वायुः [ऋक्. ८. २६. २१] अश्विनौ रथे योजयति ।

ऋतोत्पत्त्या यदाश्विनोरपिकक्ष्यं भवति, तदा तयोः परस्पराऽभेदोपपत्तिः ।

द्र. यद्वा विष्णोर्विक्रमणेषु तिष्ठथः । [८. ९. १२] ।
यस्य त्री पूर्णा मधुना पदान्यक्षीयमाणा स्वधया मदन्ति ।

[१. १५४. ४] ।

विष्णोः पदे परमे मध्व उत्सः । [१. १५४. ५] ।

१—"यन्मधु कक्ष्यम् आत्मज्ञानलक्षणम् ।"

"अपि च कक्ष्यं गोप्यं रहस्यं परमात्मसंबन्धि यद् विज्ञानं मधु ।"

[शङ्करः—बृहद् आ. उ. २. ५. १६-१७] ।

कक्ष्या रज्जुरश्वस्य । [निरु. २. ४] ।

२—दध्यङ् प्रत्यक्तो ध्यानमिति वा । प्रत्यक्तमस्मिन् ध्यानमिति वा ।

[निरु. १२. ३३] ।

द्र. तं त्वा वागभ्यवदज्जुहुधीति ········स्वाहा ।

इति स्वा होनं वागभ्यवदत् तत्स्वाहाकारस्य जन्म । [मै. सं. १. ८. १] ।

इदमेव पूष्णा तयोः पितृत्वेन वरणम् । इदमेव तयोः रथसहत्वं वायोर्योक्तृत्वं च । [८. २६. २०] ।

युवोरु षू रथं हुवे सधस्तुत्याय सूरिषु । [८. २६.१] । युधातुर्मिश्रणेऽमिश्रणे च । युवोः सधस्तुत्याय इति पदाभ्याम् अश्विनोः वायुना सूर्येण सह तादात्म्योपपादनं द्योत्यते । सूक्ते [८. २६] प्रथमर्चेऽश्विनोः रथः सधस्तुत्याय हूयते । विंशर्चेऽश्विनौ रथसहौ भवतः । त्रयोदशर्चेऽश्विनौ यजमानं शुभे चक्राते, प्रकाशं नयतः । ऊनविंशर्चेऽश्विनौ "शुभ्रयावाना" (शोभनशीलगमनवन्तौ)[1] सन्तौ स्तुतिं प्राप्नुतः । शुभ्रं यान्तौ तौ वहेते स्वयम् आत्मानम् । वहतोः वाहयिताऽपेक्ष्यते । अतो विंशर्चे वायुः अश्विनौ रथसहौ युङ्क्ते । अश्विनौ पोष्यौ वायुश्च वसुः । वायुर्मधु पीत्वा सोमाभिषवस्थानमुपैति ।

युक्ष्वा हि त्वं रथासहा युवस्व पोष्या वसो ।

आन्नो वायो मधु पिबाऽस्माकं सवना गहि ॥ [८. २६. २०] ।

पूर्वासु ऊनविंशतौ ऋक्षु अश्विनौ देवता । तत्र प्रथमर्चे अश्विनोः रथः सधस्तुत्याय हूयते । अतोऽत्र "रथासहा" [रथऽसहा[1] रथसहौ] [८. २६. २०] इति पदेन सधस्तुतौ [८. २६. १—१९] अश्विनावेव मया गृह्येते ।

त्वष्टुर्दुहिता सरण्यूः सूर्येण संगता, सवर्णां स्वस्थाने प्रतिनिधायाऽश्वा भूत्वा निर्गत्य अश्वभूतात् सूर्याद् अश्विनौ जनयामास । अत्र वायुस्त्वष्टुर्जामाता रथसहौ अश्विनौ युनक्ति, उभौ मिश्रयति च । वायुरश्विनौ आत्मना सह संयोज्य, अश्विनौ अभेदेन भावयित्वा ईशानं सूर्यम् आत्मनोऽपत्यरूपेण जनयति । [८. २६. २१–२२] ।

वायोः प्रथमं सोमपानात्[2] सोमस्योत्पत्तिर्वायौ । अतोऽत्र वायुरग्रियः[3] । सोमं यदाऽग्निना संयोजयति वायुः, तदाऽश्विनोः सूर्ये लयः, सूर्यस्य वाऽश्विभ्याम् उत्पत्तिः । वायुः पृथुपक्षसौ (विस्तीर्णपक्षौ) अश्विनौ रथे वहति, दिवः शिवं[4] च प्रयाति । वायुरधुनाऽश्वपृष्ठः (सर्वतो व्याप्तपृष्ठः) ग्रावाणं नाशवपृष्ठम् [८. २६. २४] । ग्रावेव सर्वतो व्याप्ताङ्गो भवति वायुः । सूर्यो ग्रावेव प्लवते

१—अश्विनौ अधिकृत्य "शुभं गमिष्ठौ सुयमेभिरश्वैः ।" [तै. ब्रा. ३. १२.१०] ।

२—वायोः प्रथमं सोमपानम् । "त्वं हि पूर्वपा असि" [४. ४६. १] ।

३—[८. २६. २५] ।

४—वायो याहि शिवा दिवः [८. २६. २३] शिव । आ । दिवः । "शिव । सुपां सुलुक् इति द्वितीयाया लुक् । शिवं कल्याणम् आयाहि आप्रापय । सर्वज्योतिषां त्वदाधारत्वात् तेषामाधारो भूत्वा द्युलोके तानि स्थापयेति प्रार्थ्यते ।" [सायणः] ।

दिवि । वायुरत्र "सुप्सरस्तमः" [८. २६. २४], अतिशयेन शोभनरूपवान् सः । अतोऽत्र वायुः प्लवमानः सूर्यः । अन्यथा वायोर्नीरूपत्वात् "दर्शत" [१. २. १][1] "सुप्सरस्तमम्"[2] [८. २६. २४] इति पदयोरसंगतिः स्यात् ।

वायुविषये—"अपां रसो योऽयं पवते स एष सूर्ये समाहितः सूर्यात्पवते ।" [शत. ब्रा. ५. १. २. ७] ।

संक्षयया युग्मबोधकावश्विनौ । सर्वव्यापकत्वाद् अश्विनौ तौ । सर्वकर्मसमर्थत्वात् तौ दस्रौ, सर्वज्ञत्वाद् नासत्यौ च । सोमस्योन्नयने ज्योतिष उद्गमने तयोर्व्यापारात्, तयोः सर्वदा परस्परसाहचर्याच्चाद्वैतसाधने तयोः कर्म पर्यवस्यति । एतत्तु तयो रथे उषस आरोहणे तृतीयस्य चक्रस्य प्रादुर्भावाद् द्योत्यते ।

"विभिरच्यवानम् अश्विना नि यायो अद्वयाविनम् ॥" [५. ७५. ५]
"अद्वयाविनम्" मायारहितम् । [सायणः] ।

इत्यत्र "अद्वयाविनम्" इति पदम्, "पृषन्" [१. १८४. ३] "पौर" [५. ७४. ४] इत्येकवचनेनाश्विनोः संबोधनम्, उषसो रथ आरोहणे पूष्णा तयोः पितृत्वेन वरणम्, रथसहयोः पोष्ययोस्तयोस्त्वष्टुः जामाता वायुना शोधनम् इत्यादिभिरश्विनोरद्वैतसाधने प्रवृत्तिः इति सिध्यति ।

अश्विनोः कर्म ज्योतिष्करणेन पर्यवस्यति । [१. ४६. ६; १. ११७. २१] ।
"तयोः काल ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम्" [निरु. १२. १]
इति ब्रुवता यास्केनापि एतदेवाऽभिप्रेतम् ॥

—: इति प्रथमो भागः :—

—:०:—

१—वायवा याहि दर्शत [१. २. १] दर्शत दर्शनीय !
सुप्सरस्तमम् [८. २६. २४] अतिशयेन शोभनरूपवन्तम् । सुरूपतमम् ।
[वे. भा.] ।

२. एष स्य मद्यो रसोऽव चष्टे दिवः शिशुः । य इन्दुर्वारमाविशत् ॥"
[९. ३८. ५] । वारं दशापवित्रम् ।
"एष स्य पीतये सुतो हरिरर्षति धर्णसिः ।
क्रन्दन् योनिम् अभि प्रियम् ॥" [९. ३८. ६] ।
अर्षति गच्छति । धर्णसिः धारयिता । योनिं द्रोणम् । [वे. भा.] ।

द्वितीयो भागः

प्रथमोऽध्यायः

अथ कृष्णयजुर्वेदेऽश्विनौ

सवितुः प्रसवे।

देवानां प्रसविता सविता। तत्र सवित्रा प्रसूत्यै धान्यं निर्वपति पुरोडाशकरणार्थम्। अयं धान्यवापोऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां क्रियते।

सवितुरभिज्ञया यदपि कर्म प्रवर्तते, कर्म तद् अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां भवति।

"देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् अधिवपामि धान्यम् असि धिनुहि देवान्।" [तै. सं. काण्ड. १, प्रपाठक. १, अनुवाक. ६]

एवं रक्षसाम् अभिहत्यै अभ्रिग्रहणे—"देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् आ ददेऽभ्रिरसि।" [तै. सं. १. ३. १. १]।

एवं पशुनियोजनाय रशनाग्रहणे—"देवस्य त्वा सवितुः प्रसव इति रशनामादत्ते प्रसूत्या अश्विनोर्बाहुभ्याम् इत्याहाश्विनौ हि देवानामध्वर्यू आस्ताम् पूष्णो हस्ताभ्याम् इत्याह यत्यै।" [तै. सं. ६. ३. ६. २–३]

पौनःपुन्येन अश्विपूष्णो बाहुहस्तयोः प्रयोगस्य हेतुः—१. अश्विनोः पूष्णश्च पूर्वापरसम्बन्धः। २. अश्विनोरध्वर्युत्वम्। ३ पूष्णो नियमनं च।

(१) यदाश्विनौ सूर्याया विवाहं पृच्छन्तौ सवितारम् अयातां तदा पूषाऽश्विनौ पितरौ अवृणीत। एवं पूष्णः पितरौ अश्विनौ। अश्विनौ पूर्वकालिकौ तयोः पश्चात् पूष्णः कालः। हस्तौ च बाह्वोरूर्ध्वं भवतः।

(२) छिन्नस्य यज्ञशिरसः संधानेनाऽश्विनावध्वर्यू देवानाम्। आदित्यमण्डलं कुशीद्वयेनेव अश्विनोर्बाहुभ्यां दिवि उन्नीयते। पृथिव्यां सूर्यस्य उदयपार्श्वे इव अस्तपार्श्वेऽपि अश्विनौ स्तः। तत्रैकस्मात् पार्श्वाद् अपरस्मिन् पार्श्वे सूर्यो हूयते इतिदृष्ट्या, साऽऽहुतिश्चाश्विभ्यां बाहुद्वयेन क्रियते इत्यतः (अध्वर्युभूतयोः) "अश्विनोर्बाहुभ्याम् इति श्रुतिः।

(३) बिम्बेऽर्धोदिते तत्र मण्डले भागद्वयेन हस्तदृष्टिः। "अत्यतिष्ठद् दशाङ्गुलम्" [वा. सं. ३१. १] इति च श्रुतिः। दशाङ्गुलं च हस्तद्वयमेलनेन भवति। धान्यवापो मुष्टिभिः, मुष्टिश्च हस्तेन। मुष्टिपरिमाणेन धान्यः परिच्छिद्यते। मण्डलं च

पूष्णो हस्तद्वयेन परिमितं[1] भवति। अश्विनोर्बाहुभ्यां तेजसा ज्योतमानं मण्डलं पूषा हस्ताभ्यां परिगृह्णाति।

“देवस्य त्वा सवितुः प्रसव इत्याह प्रसूत्यै। अश्विनोर्बाहुभ्यामित्याह। अश्विनौ हि देवानामध्वर्यू आस्ताम्। पूष्णो हस्ताभ्याम् इत्याह यत्यै। अधि वपामीत्याह। यथादेवतमेवैनान् अधिवपति।” [तै. ब्रा. का. १, प्र. २, अ. ६]।

सदोनिर्माणे सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् इत्येवाभ्रिमादायाऽवटं खात्वा, अवटेऽपोऽवनीय तत्राप्सु यवान्[2] प्रस्कन्दयति। अनेन यववापेन द्विषिणः पृथक् क्रियन्ते, अपि च द्युलोको धार्यते, अन्तरिक्षं पूर्यते, पृथिवी च संदृह्यते। अभ्र्या खननेऽरातीनां ग्रीवाः कृत्यन्ते।

ग्रीवाछेदैस्तत्र तत्र मण्डलस्य क्षितिजाद् उपरि उदय एव द्योत्यते। अवटखातेन उदयस्थले तमसि गर्तो निरूप्यते, यत्र आपः, अव्यक्तं तेजः, अवनीयन्ते। अप्सु च यवप्रस्कन्दनं तमसि ज्योतिषः प्रकिरणमिव।

“अभ्रिरसि नारिरसि परिलिखितं रक्षः, परिलिखिता अरातयः, इदमहं रक्षसो ग्रीवा अपि कृन्तामि।

यवोऽसि यवयास्मद् द्वेषः, यवयारातीः, पितृणां सदनम् असि, उद् दिवं स्तभानाऽन्तरिक्षं पृण पृथिवीं दृꣳह।” [तै. सं. १. ३. १–२]

द्विदेवत्यग्रहः।

अश्विनोर्द्विदेवत्यग्रहविषये आख्यानं श्रूयते संहितायां षष्ठे काण्डे चतुर्थे प्रपाठके नवमेऽनुवाके।

यज्ञस्य शिरोऽच्छिद्यत। तस्य प्रतिधानेऽश्विभ्यां यागे ग्रहो वृतः। देवैः स्वीकृतेऽश्विभ्यां शिरः प्रतिहितम्। अश्विनौ मनुष्यचरौ भिषजौ, (अतो देवानां मते) अपूतौ। अतो बहिष्पवमानेन स्तोत्रेणाश्विनौ पावयित्वा ताभ्याम् आश्विनं ग्रहम् अगृह्णन् देवाः।

अत्रैवं विमृश्यते। अश्विनौ मनुष्यचरौ भिषजौ अपूतौ। देवैरामन्त्रितौ तौ देवानामपि भिषजौ जातौ। परन्तु तयोर्निकृष्टत्वात् तयोरादराय ताभ्यां सम्मान-प्रीतिदानाय बहिष्पवमानेन तौ पूतौ कृतौ।

ऋक्संहितायाम् अश्विदेवताकेषु सूक्तेषु द्विविधं दुरोणं (गृहं) श्रूयते— सुकृतो दुरोणम् [३. ११७. २; १. १८३. १]।

१—मण्डलं नियतपरिमाणं भवति। क्वचित् चतुर्भिः पक्षैर्मण्डलमुदेति, क्वचित्त्र्यवरैर्द्विभिः।

२—तु. यवं वृकेणाश्विना वपन्ता [१. ११७. २१]।

मनुषो दुरोणे [७. ७०. २; ८. ८७. २; १०. ४०. १३]। सुकृतो दुरोणं दिवि सुमेरौ। मनुषो दुरोणं पृथिव्यां कुमेरौ।

सुमेरौ उदयार्थं यदा यागः क्रियते, तदा कुमेरुस्थः सोमात्मा सूर्यः कुमेरोः सुमेरौ हूयते। तदाऽश्विनौ मनुष्येषु चरन्तौ कुमेरुस्थेन सूर्येण मनुष्याणां रोगान् चिकित्सित्वा सुमेरुं प्रति सूर्यं नयतः।

यज्ञशिरश्छेदः।

सुमेरौ सूर्येऽस्तं गते सति, मासद्वयं सान्ध्यं तेजो राजति। "आदित्यो वा अस्तं यन् अग्निमनुप्रविशति।"

"अग्नेर्वा आदित्यो जायते।" [ऐ. ब्रा. ४०. ५]। "रात्रौ अग्निं प्रविष्ट आदित्यः परेद्युः अग्नेर्जायते।" (सायणः)।

अस्तोत्तरं मासद्वयं यावद् अग्निः (सान्ध्यं तेजः) सुमेरौ प्रकाशते, क्रमेण ह्रसत्तेजाः। ततो मासद्वयं तत्र घनोऽन्धकारो भवति। अस्तोत्तरसान्ध्यतेजसो विलोपोऽत्र यज्ञशिरसः छिन्नतया कल्प्यते। पुनः, उदयात् प्राक् तत्र मासद्वयं यावत् सान्ध्यं तेजो वर्धमानं विराजति। इदमेव छिन्नस्य यज्ञशिरसोऽश्विभ्यां पुनः सन्धानं नाम।

यज्ञशिरःसन्धानेनाश्विनौ हविरर्हतः, तदर्थं ग्रहो गृह्यते। परन्तु अपूतौ अश्विनौ पूतौ कर्तव्यौ। अश्विनोरपूतत्वं द्विदेवत्यग्रहेषु तयोः तृतीयेन स्थानेन बोध्यते। तत्र प्रथमो ग्रह ऐन्द्रवायवः, द्वितीयो मैत्रावरुणः, तृतीय आश्विनः।

अश्विनोः पावने उपायः ताभ्यां (तयोः) ग्रहग्रहणात् प्राक् बहिष्पवमानेन स्तुतिः। अग्निष्टोमे द्वादश स्तोत्राणि द्वादश शस्त्राणि च भवन्ति। तत्र प्रातः सवने पञ्च स्तोत्राणि पञ्च शस्त्राणि च भवन्ति। तत्र बहिष्पवमानं स्तोत्रं प्रथमम्। पवमानदेवताकत्वात् सूक्तं पवमानम्। इतरस्तोत्रवत् सदस्यवस्थाय तत् स्तोत्रं न गीयते। किन्तु सदसो बहिश्चत्वरदेशे गत्वा स्तुतिः क्रियते। तेन स्तोत्रेण, अश्विनौ पूतौ[1] मन्येते।

1—अश्विनोः पूतत्वसम्पादनं, प्रसङ्गतः लौकिकेन भिषजा कर्तव्यं च संहितायां श्रूयते।

"देवा अब्रुवन् अपूतौ वा इमौ मनुष्यचरौ भिषजाविति तस्माद् ब्राह्मणेन भेषजं न कार्यम् अपूतो ह्येषोऽमेध्यो यो भिषक् तौ बहिष्पवमानेन पवयित्वा ताभ्यामेतमाश्विनमगृह्णन् तस्माद् बहिष्पवमाने स्तुत आश्विनो गृह्यते तस्मादेवं विदुषा बहिष्पवमान उपसद्यः पवित्रं वै बहिष्पवमान आत्मानमेव पवयते तयोस्त्रेधा भैषज्यं विन्यदधुरग्नौ तृतीयमप्सु तृतीयं

अस्यायमाशयः । इदानीं दिनस्याप्रवर्तनात्, सूर्यस्यानुदयात्, तमसः प्राबल्याद् अश्विनोरपूतत्वम् । यागो दिनेऽनुष्ठीयते । यज्ञस्य शिरस्तु प्रतिहितम् । तथापि दिनं न प्रारब्धम् । अश्विनौ सूर्येण सहितौ सदःप्रवेशमर्हतः । अतो यत्र स्थाने, यत्र काले, दिनं प्रारम्भणीयं तत्र उत्करदेशे गत्वा बहिष्पवमानं स्तोत्रं गीयते ।

आश्विनग्रहाय मन्त्रद्वयमनुवाकद्वयेनाऽऽम्नायते । [तै.सं. १. ४. ६–७]—

या वां कशा मधुमत्यश्विना सूनृतावती तया यज्ञं मिमिक्षतम् ।

उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिर्माध्वीभ्यां त्वा ॥

[तै. सं. १. ४. ६] ।

अत्र "या वां...मिमिक्षतम्" इति मन्त्रभाग ऋग् भवति । [ऋ.सं.१.२२.३] ।

अत्राश्विभ्यां यज्ञे मधुसेकः प्रार्थ्यते । मधुपूर्णदृतियुक्तस्तयोः रथः । [ऋ. सं. ४. ४५. १] । अतस्तौ माध्वौ भवतः ।

द्वितीयो मन्त्रः—आश्विनग्रहाय विकल्पितः

प्रातर्युजौ विमुच्येथाम् अश्विनावेह गच्छतम् अस्य सोमस्य पीतये ।

उपयामगृहीतोऽस्यश्विभ्यां त्वैष ते योनिरश्विभ्यां त्वा ॥ [तै. सं. १. ४.७] ।

अत्र "प्रातर्युजौ...पीतये" इति मन्त्रभाग ऋग्भवति । परन्तु ऋक्संहितायां शाकलशाखायाम्—"प्रातर्युजा विबोधय" इति भिन्ना श्रुतिः [१. २२. १] ।

अत्र अश्विनौ "विमुच्येथाम्" [तमसो, रथाद् वा] । अत्राश्विनौ सोमपीतये आहूयेते, अतस्तावत्र न माध्वौ । [एवं मधुसेकादनन्तरमेव सोमस्य अभिव्यक्तिः ।]

अपामार्गहोमः ।[1]

प्रथमे काण्डेऽष्टमे प्रपाठके सप्तमेऽनुवाकेऽयं होमः श्रूयते । अत्र प्रसङ्गो नमुचिवधः । यद्यप्यनुवाके (संहितायाम्) नमुचिशब्दो वाऽपामार्गशब्दो वा न श्रूयते तथापि तैत्तिरीये ब्राह्मणे प्रथमे काण्डे सप्तमे प्रपाठके प्रथमेऽनुवाकेऽयं विस्तरेण प्रतिपादितोऽस्ति । परन्तु तथापि अश्विनौ वा सरस्वती वा नमुचिवधेन न श्रूयते ।

अपामार्गहोमेनेन्द्रो नमुचेः छिन्नशिरःसहितानि अवशिष्टानि रक्षांसि हतवान् ।

ब्राह्मणे तृतीयं तस्माद् उदपात्रम् उपनिधाय ब्राह्मणं दक्षिणतो निषाद्य भेषजं कुर्याद् यावदेव भेषजं तेन करोति समर्धुकम् अस्य कृतं भवति ।"
[तै. सं. ६. ४. ९] ।

१—अपामार्गः । अपमृज्यतेऽनेन व्याध्यादिरित्यपामार्गः [भट्टोजिः, "हलश्च" पा. ३. ३. १२१] ।

इन्द्रः शच्या (बलेन) नमुचिमगृह्णात् । परस्परसंहितौ तौ "हस्ताभ्यां पादाभ्याम् अन्योन्यं दृढमवष्टभ्य मल्लद्वयवद् भूमौ पतितौ ।" तत्र तयोः सन्धिर्जातः ।

"न मा शुष्केण, नार्द्रेण हनः न दिवा, न नक्तम् इति ।

स एतमपां फेनमसिञ्चत् । न वा एष शुष्को नार्द्रो व्युष्टाऽऽसीत् । अनुदितः सूर्यः ।" [तै. ब्रा. १. ७. १. ६–७] ।

एवमपां फेनेनेन्द्रो नमुचेः शिर उदवर्तयत् । तच्छिन्नं शिरः मित्रध्रुक् इति इन्द्रम् अनुगतमभूत् । तत इन्द्रोऽपामार्गान् जनयित्वा, तैर्हत्वा तच्छिरोऽवशिष्टानि रक्षांसि च हतवान् । [द्र. सायणः–तै. सं. १. ८. ७.] ।

"यदपामार्गहोमो भवति । रक्षसामपहत्यै ।" [तै. ब्रा. १. ७. १. ८.]

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याँ रक्षसो वधं जुहोमि हतँ रक्षोऽवधिष्म रक्षो, यद्वस्ते तद्दक्षिणा ।" [तै. सं. १. ८. ७.२] ।

"होमकाले यद् वस्त्रम् आच्छादयति तस्य दानं विधत्ते "यद् वस्ते" इति ।" [सायणः] ।

तु. "प्र च्यवानाज्जुजुरुषो वव्रिम् अत्कं न मुञ्चथः । [ऋ. सं. ५. ७४. ५] ।
रथं युञ्जाथाम् इह वां विमोचनम् । [ऋ. सं. २. ३७. ५] ।
ऋबीसाद् अत्रिं मुञ्चथो गणेन । [ऋ. सं. १. ११७. ३] ।

रत्निनां हवींषि ।

राजसूये राजा क्रमशोऽनुदिनं कर्तव्यानि एकादश (द्वादश) रत्निनां हवींषि विधीयन्ते संहितायां प्रथमे काण्डेऽष्टमे प्रपाठके नवमेऽनुवाके । अत्र संहितायाम् अनुक्तम् एकं हविर्ब्राह्मणे विधीयते । इति कृत्वा द्वादश हवींषि । तत्रैकं हविरदितिदेवताकम् ।

"रत्निनामेतानि हवींषि भवन्ति । एते वै राष्ट्रस्य प्रदातारः । एतेऽपादातारः ।"] तै. ब्रा. १. ७. ३. १]

"रत्नान्येषां सन्तीति रत्निनः । ब्राह्मणराजन्यमहिष्यादयो रत्निनः । तदभिमानिदेवानां प्रियाण्येतानि हवींषि । अतः तद्गृहेष्वेव गत्वा निर्वपेत् । एते रत्निनामभिमानिनो देवा एव राष्ट्रं प्रदातुम् अपादातुं च समर्थाः । अतः स्वकीयब्रह्मादिगृहेषु निर्वापेण तुष्टा अस्मै राष्ट्रं प्रयच्छन्ति ।"

[सायणः तै. सं. १. ८. ९]

अथ: एतानि हवींषि निर्दिश्यन्ते ।

क्रम-संख्या	देवता	हविः	रत्निनो गृहम्	दक्षिणा
१	बार्हस्पत्यम्	चरुम्	ब्रह्मणो गृहे	शितिपृष्ठः
२	ऐन्द्रम्	एकादशकपालम्	राजन्यस्य ,,	ऋषभः
३	आदित्यम्	चरुम्	महिष्यै ,,	धेनुः
४	भगाय[1]	चरुम्	वावातायै ,,	विचित्तगर्भा प्रष्ठौही
५	नैर्ऋतम्	चरुम्	परिवृक्त्यै ,,	कृष्णा कूटा
६	आग्नेयम्	अष्टाकपालम्	सेनान्यः ,,	हिरण्यम्
७	वारुणम्	दशकपालम्	सूतस्य ,,	महानिरष्टः
८	मारुतम्	सप्तकपालम्	ग्रामण्यः ,,	पृश्निः
९	सावित्रम्	द्वादशकपालम्	क्षत्तुः ,,	उपध्वस्तः
१०	आश्विनम्	द्विकपालम्	संग्रहीतुः ,,	सवात्यौ
११	पौष्णम्	चरुम्	भागदुघस्य ,,	श्यामः
१२	रौद्रम्	गावीधुकं चरुम्	अक्षावापस्य ,,	शबल उद्वारः

संहितायां तद्धितान्तेन (बार्हस्पत्यम् ऐन्द्रम् इत्यादिना) देवतानिर्देशः क्रियते । ब्राह्मणे च तथा । परन्तु यदनुक्तं हविः तत्र "भगाय चरुम्" इति ब्राह्मणम् ।

१—अत्र मुख्यब्राह्मण उपेक्षितं हविर्विशेषं विधत्ते—"भगाय चरुं वावातायै गृहे । भगमेवास्मिन् दधाति विचित्तगर्भा प्रष्ठौही दक्षिणा समृद्ध्यै ।" [तै. ब्रा. १. ७. ३. ३] [सायणः—तै. सं. १. ८. ९] ।

शितिपृष्ठः श्वेतपृष्ठः । कूटा भग्नशृङ्गा गौः । महानिरष्टः पीडितवृषणः । पृश्निः पृषकः अल्पतनुरित्यन्ये । उपध्वस्तः संकीर्णवर्णः । सवात्यौ समानमातरौ वत्सौ एकोदरौ इत्यर्थः । शबलश्चित्रवर्णः, उद्धारो दीर्घपुच्छः ।'

१—अथ शतपथब्राह्मणे एकादशैव हवींषि विहितानि । एकादशाक्षरा त्रिष्टुप् । त्रिष्टुब् वीर्यम् एवैतद् रत्नान्यभिसंपादयति [शत. ब्रा. ५. ३. १२] ।
अथ गृहदेवतयोः क्रमभेदो दृश्यते ।

क्रम संख्या	देवता	गृहम्
१	अग्निः	सेनान्यः गृहे
२	बृहस्पतिः	पुरोहितस्य ,,
३	इन्द्रः	सूयमानस्य (यजमानस्य) गृहे
४	अदितिः	महिष्यै गृहे
५	वरुणः	सूतस्य ,,
६	मरुतः	ग्रामण्यः ,,
७	सविता	क्षत्तुः ,,
८	अश्विनौ	संग्रहीतुः ,,
९	पूषा	भागदुघस्य ,,
१०	रुद्रः	अक्षावापस्य गोविकर्तस्य च गृहे
११	अध्वा	पालागलस्य गृहे

"अथ श्वोभूते संग्रहीतुर्गृहान् परेत्याश्विनं द्विकपालं पुरोडाशं निर्वपति, सयोनी वा अश्विनौ, सयोनी सव्येष्ठसारथी, समानं हि रथमधितिष्ठतः,' तस्माद् आश्विनो भवति । एतद् वा अस्यैकं रत्नं यत् संग्रहीता तस्मा एवैतेन सूयते तं स्वम् अनपक्रामिणं कुरुते । तस्य यमौ गावौ दक्षिणा तौ हि सयोनी यमौ ।

विचित्तगर्भा । विशेषेण चित्तो ज्ञातोऽभिव्यक्तो गर्भो यस्या इति विग्रहः । प्रष्ठौही बालगर्भिणी ।

महिषी कृताभिषेका । वावाता ततोऽर्वाचीना । परिवृक्तिः (प्रीतिरहिता) ततोऽप्यर्वाचीना राज्ञः स्त्री ।" भूरिति महिषी । भुव इति वावाता । सुवरिति परिवृक्ती । सूतः सारथिः । क्षत्ता यष्टिहस्तोऽन्तःपुराध्यक्षः । संग्रहीता धनसंग्रहकर्ता कोषाध्यक्षः ।

भागदुघः । यो राज्ञः प्राप्तं षष्ठं भागं प्रजाभ्यो गृह्णाति । अक्षावापः । द्यूतकारः । गावीधुकोऽरण्यगोधूमनिष्पन्नः ।

परिवृक्त्या गृहे कृष्णान् व्रीहीन् नखैर्निर्भिद्याऽवघातम् अन्तरेणैव तण्डुलान् निष्पाद्य चरुः क्रियते । [सायणः] ।

यज्ञविषयः ।

(१) व्याधिपीडितस्य शरीरमग्निं गच्छति । रसः सोमं गच्छति । वाक् सरस्वतीं गच्छति । वरुण एनं वरुणपाशेन गृह्णाति । तस्मायुष्कामेष्टिर्विधीयते । तया अश्विभ्यां भेषजम्, इन्द्रेणेन्द्रियं, मित्रावरुणाभ्यां प्राणापानौ, विश्वैः देवैर्वीर्यं चास्मिन्निधीयते । [द्र. तै. सं. २. ३. ११] ।

(२) प्र सम्राजं प्रथममध्वराणाम् अंहोमुचं वृषभं यज्ञियानाम् ।
अपां नपातम् अश्विना हयन्तमस्मिन्नर इन्द्रियं धत्तमोजः ॥
[तै. सं. १. ६. १२. ३-४]

"ऐन्द्रेष्टौ वैकल्पिकी याज्येयम् । हे नरः ! मनुष्या ऋत्विजः ! इन्द्रं भजत इति शेषः । हयन्तम् ऐश्वर्यस्य गमयितारम् । हे अश्विनौ ! अस्मिन् यजमाने इन्द्रियं (चक्षुरादिपाटवम्) ओजो बलं च धत्तम् ।" [द्र. सायणः] ।

(३) देवता उद्दिश्य होमविधाने तत्तद्देवतानां प्रीतिरुदाह्रियते । तत्र सजोषा-अश्विना दंसोभिः । [तै. सं. ५. ६. ४. १] ।

अश्विनौ दंसनैर्व्याधिनिराकरणव्यापारैः "सजोषौ" परस्परं समानप्रीती । अत्र अश्विनोः स्वरूपं प्रदर्शितं "इमे अश्विना" । इमे द्यावापृथिव्यावश्विशब्देन विवक्षिते । [द्र. सायणः]

(४) आश्वमेधिकप्रकरणे पशुविधाने आश्विनास्त्रयः—शुद्धवालः सर्वशुद्धवालो

यदि यमी न विन्देद् अप्यनूचीनगर्भाविव गावौ दक्षिणा स्याताम् । ता उ ह्यपि समानयोनी ।" [शत. ब्रा. ५. ३. १. ८] ।

संग्रहीता नाम रथयोजयिता । संग्रहीतुर्गृहे निर्वापे कारणमाह—सयोनी सव्येष्ठृसारथी । सव्येष्ठा संग्रहीता (रथयोजिता) । स च सारथिश्च समानस्थानौ । अश्विनावपि सहोत्पन्नौ द्विरथौ एकं रथमधितिष्ठतः । [सायणः] ।

मणिवालस्त आश्विनाः । [तै. सं. ५. ६. १३] । [शुक्लपुच्छावयवः, सर्वशुक्लवालः, शुक्लाशुक्लमिश्रवालः—सायणः ।]

(५) आश्वमेधिके विशस्तस्याश्वस्याङ्गानां होमेऽश्विभ्याम् अंसौ हूयेते । अश्विनावँऽसाभ्याम् [प्रीणयामीति शेषः] । [तै. सं. ५. ७. १३] ।

(६) यज्ञस्य वैयर्थ्याद् एते देवा यजमानं रक्षन्ति ।

धाता धातॄणां भुवनस्य यस्पतिर्देवँ सवितारम्[1] अभिमातिषाहम् । इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पान्तु यजमानं न्यर्थात् ॥ [तै. सं. ४. ७.१४.२] ।

"सवितारं [महाफलजनकं], देवं [तत्तन्मन्त्रव्यवहारयुक्तम्] अभिमातिषाहं [पापलक्षणस्याभिमातेः अरेः अभिभवितारम्] यज्ञं न्यर्थात् [फलवैगुण्यलक्षणात् वैयर्थ्यात्] उभावश्विनौ, बृहस्पतिः देवाश्च रक्षन्तु ।" [द्र. सायणः] ।

नक्षत्रेष्टका—

नक्षत्रेष्टकाभिधीयते संहितायां चतुर्थे काण्डे चतुर्थे प्रपाठके दशमेनानुवाकेन । तत्र "अश्वयुजौ नक्षत्रम्[2] अश्विनौ देवता" । अत्रानुवाके सप्तविंशतिर्नक्षत्राणि, कृत्तिकामारभ्य अपभरण्या समाप्तिः । तत्र प्रति नक्षत्रमिष्टका विधीयते या च तत्तन्नक्षत्रनाम्ना व्यपदिश्यते । तत्र कृत्तिकादिविशाखान्ता इष्टकाः "स्वयमातृण्णाया दक्षिणभागे पूर्वां दिशमारभ्य प्रत्यगवसानाः" उपाधीयन्ते ।

"अनुराधाद्यपभरण्यन्ता इष्टका स्वयमातृण्णाया उत्तरभागे प्रतीचीं दिशम् आरभ्य प्रागवसानाः" उपाधीयन्ते । एवं सति अश्विदेवताका अश्वयुगिष्टका प्राङ्मुखा भवति ।

इष्टकानां संस्पर्शेनोपधानेऽवकाशाभावात् पर्जन्यो वृष्टिरहितो भवति । असंस्पर्शे तु तन्निःसृत्य वृष्टिस्थानत्वात् मेघो वर्षणशीलो भवति । [द्र. "अप द्वारेव वर्षथः ।" ऋक्. ८. ५. २१] ।

"यत्संस्पृष्टा उपदध्याद् वृष्ट्यै लोकमपि दध्याद्, अवर्षुकः पर्जन्यः स्याद् असंस्पृष्टा उपदधाति वृष्ट्या एव लोकं करोति वर्षुकः पर्जन्यो भवति । पुरस्तादन्याः प्रतीचीरुपदधाति, पश्चादन्याः प्राचीस्तस्मात्प्राचीनानि च प्रतीचीनानि च नक्षत्राण्यावर्तन्ते ।"[3] [तै. सं. ५. ४. १. ४] ।

१—त्रातारम् अभिमातिषाहम् [ऋ. सं. १०. १२८. ७] इति ऋग्वेदे पाठभेदः ।

२—यौ देवानां भिषजौ हव्यवाहौ विश्वस्य दूतावमृतस्य गोपौ ।
तौ नक्षत्रं जुजुषाणोपयातां नमो अश्विभ्यां कृणुमोऽश्वयुग्भ्याम् ॥
[तै. ब्रा. ३. १. २. ११] ।

३—यस्मादेवं तस्माल्लोकेऽपि नक्षत्राणि गोलकस्य अपि दक्षिणे भागे पश्चिमाभिमुखानि उत्तरभागे तु प्राङ्मुखानीत्येवम् आवर्तन्ते । [सायणः—तै. सं. ४. ४. १०] ।

द्वितीयोऽध्यायः

अथ शुक्लयजुर्वेदेश्विनौ

चितिः ।

पञ्चेष्टकचितयो भवन्ति । तत्र द्वितीयायां चितौ इष्टकानाम् आसादनार्थं पञ्चाऽऽश्विन्य ऋचो यजुरन्ताः ।

प्रथमा चितिः उखायस्य अग्नेः केतुः । तां जुषाणा भवतीयं द्वितीया चितिः । द्वितीयायां चितौ पञ्चाश्विनीरिष्टका रेतःसिग्वेलायाम् उपदधाति । तत्र प्रत्यृचम् अन्ते इदं यजुः—"अश्विनाध्वर्यू सादयतामिह त्वा ।" [वा. सं. १४. १–५]

त्रयोदशेऽध्याये प्रथमा चितिरुक्ता, सा भूलोकरूपा ।
"अयं वै लोकः प्रथमा चितिरिति श्रुतेः" [शत. ब्रा. ८. २. १. १] ।

चतुर्दशेऽध्याये द्वितीयादिचितिचयं कथ्यते । भूमेरूर्ध्वमन्तरिक्षादर्वाग्भागो द्वितीया चितिः ।''''''देवैरश्विनौ प्रार्थितौ यद् युवां भिषजौ ततो द्वितीयां चितिमुपधत्तम् इति ।" [वेददीपे महीधरः—वा. सं. १४. १] ।

एतच्चित्युपधानेन अश्विनौ देवानाम् अध्वर्यू अभवताम् । [शत. ब्रा. ८. २. १. २–३] ।

तत्रप्रथमेष्टका योनेर्ध्रुवत्वाय कल्पते—ध्रुवक्षितिर्ध्रुवयोनिर्ध्रुवासि ध्रुवं योनिम् आसीद साधुया । [वा. सं. १४. १] ।

द्वितीयया ऋचा चितिरियं "कुलायिनी" कुलायं (गृहम्) इव तदाकारा भवति ।

तृतीयया ऋचा तृतीयेष्टकोपधीयते । अनेन चितिः सुखप्रवेशवत्या तन्वा (शरीरेण) युक्ता भवति–"स्वावेशा तन्वा संविशस्व ।"

चतुर्थी प्रथमायाः चितेः पूरिका भवति, अपि च अपां कारणीभूतो रसश्च भवति । अपि च त्रिवृत्पञ्चदशादिस्तोमैः पृष्ठवती भवति—"पृथिव्याः पुरीषमस्यप्सो नाम तां त्वा विश्वे अभिगृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावद् अस्मे द्रविणा यजस्वाश्विनाध्वर्यू सादयतामिह त्वा ।" [वा. सं. १४. ४] पुरीषं पूरकं वस्तु । अप्सो नाम अपां कारणीभूतो रसः ।

पञ्चम्यर्चा पञ्चमीमाश्विनीमिष्टकामुपदधाति । इयमदितेः (पृथिव्याः) पृष्ठे, (प्रथमायाश्चितेरुपरि) अन्तरिक्षस्य धारयित्री, दिशां संस्तम्भनी, भुव-

नानाम् ईशिनी च भवति । "अदित्यास्त्वा पृष्ठे सादयाम्यन्तरिक्षस्य धर्त्रीं विष्टम्भनीं दिशाम् अधिपत्नीं भुवनानाम् ।" [वा. सं. १४. ५] ।

सौत्रामणी ।

"सुत्रामा" वज्रीन्द्रः, तत्सम्बन्धेन सौत्रामणी । इष्टिरियं त्रिभिरध्यायैः [वा. सं. १९–२१] प्रक्रियते । सौत्रामण्याः प्रजापतिर्ऋषिः । "प्रजापतिर्यज्ञम् असृजत । स एतं यज्ञं क्रतुमपश्यत् सौत्रामणीम् ।" अथापरम् इन्द्रभैषज्यार्थमश्विनौ सरस्वती च सौत्रामणीं ददृशुः [द्र. उवटः—वा. सं. १९. १] ।

अध्याय ऊनविंशः ।

मन्त्रः ।

३. सोमं वायुः पुनाति (गोऽश्वकेशनिर्मितेन वालेन) पवित्रेण ।

४. सूर्यस्य दुहिता सोमं पुनाति । श्रद्धा वै सूर्यस्य दुहिता । वारेण (गोऽश्ववालवालेन) शाश्वतिकेन "तना" धनोत्पत्तिनिमित्तभूतेन ।

५. अजाविलोमपवित्रेण पयः पुनाति ।

६. "सुत्राम्णे" (इन्द्राय) । शोभनं त्राणमस्य कृतमश्विभ्यां सरस्वत्या ।

७. सुरासोमयोः स्थाने भिन्ने । "सदः नानाकृतम्" । आहवनीये सोमो हूयते । दक्षिणेऽग्नौ सुरा हूयते । सुराऽशान्ता "शुष्मिणी" रौद्रमनाः । सोमः शान्तः । [उवटः] ।

८. उपयाम[1]गृहीतोऽसि, आश्विनं तेजः, सारस्वतं वीर्यम्, ऐन्द्रं बलम् ।

१२. देवा यज्ञमतन्वत भेषजं भिषजाश्विना ।
वाचा सरस्वतीभिषग् इन्द्रायेन्द्रियाणि दधतः ।

विंशतिरनुष्टुभः सौत्रामण्यां सोमसम्पदर्शनार्थाः । अत्रैवं निदानम् । "इन्द्रस्य किल अनुपहितसोमपानात् विस्रस्तस्य नमुचिरसुरोऽपिबत् समस्तं वीर्यम् । तत्र देवैरिन्द्रस्य भेषजं कृतम् । तत्राश्विनौ भिषजौ सरस्वती च औषधं सौत्रामणी ।" अश्विनौ इन्द्रियाणि (वीर्याणि) धत्तः । "वाचा सरस्वती भिषक् ।"

"त्वष्टा हतपुत्रोऽभिचरणीयम् अपेन्द्रं सोममाहरत् । तस्य इन्द्रो यज्ञवेशसं कृत्वा प्रसह्य सोमम् अपिबत् । स विष्वङ् व्यार्च्छत् तस्य मुखात् प्राणेभ्यः ।" [महीधरः] ।

१५ क्रीतस्य सोमस्य रूपं परिस्रुत् । (तत्) पयसा परिषिच्यते । तत्र दिनत्रयं पयोदोहः । तेन पयसा परिषेकः ।

१—उपयामशब्दो व्याख्यातो महीधरेण [७. ४] । "उदितेऽन्तर्यामग्रहणम् उपयामगृहीत इति ।" सूर्योदयानन्तरम् अन्तर्यामग्रहं गृह्णीयात् । उपयामयतीत्युपयामो ग्रहः । तेन गृह्यत इत्युपयामगृहीतः ।

१ अश्विभ्यां दुग्धम्	एकगोपयः ।
२ सरस्वत्या दुग्धम्	गोद्वयपयः ।
३ इन्द्राय दुग्धम्	गोत्रयपयः ।

इदमैन्द्रं भेषजं त्रिभिर्विभिः ।

२६ अश्विभ्यां प्रातःसवनमासम् । इन्द्रेण ऐन्द्रं (इन्द्रदेवत्यं) माध्यंदिनं सवनम् आसम् । सरस्वत्या वैश्वदेवं (विश्वदेवदेवत्यं) तृतीय सवनम् आसम् ।

३३ हे सुरे ! यस्ते रसः सम्भृतः (एकीकृतः) ओषधीषु वर्तमानः सोमस्य च यद् बलं (शुष्मः) । रसेन बलेन सुरोत्थेन मदेन यजमानं प्रीणीहि, सरस्वतीम, अश्विनौ, इन्द्रं चाग्निं च ।

"अपाञ्च वा एष ओषधीनाञ्च रसो यत्सुरा ।" [शत. ब्रा. १२.८.१.४] ।

वाजसनेयिसंहितायां दशमेऽध्यायेऽन्तिमाश्चत्वारो मन्त्राः सौत्रामणीसम्बन्धिनः [१०. ३१–३४] ।

[तत्र उवटः] । इत उत्तरं चरकसौत्रामणीयम् । अश्विनोरार्षम् । सुरां संदधाति । "अश्विभ्यां पच्यस्व ।" (अथाऽश्विसरस्वतीन्द्रेभ्यः पाकः क्रियते)। पाको नामान्नविपरिणामः । व्यंहता । भैषज्यं हीन्द्रस्य कर्तव्यम् । सौत्रामण्या सुरां पुनाति ।

सोमो वायुना पूतः । सोमः प्रथमं पूतिगन्धिः आसीत् । ततो देवैर्वायुरुक्तः अपहृतविरूपगन्धं सोमं कुरु इति । ततो वायुनाऽपहृतः सोमस्य गन्धः ।…… यद् वा यो वायुरूप सोमः पूतः, यश्च पवित्रेण प्रत्यङ् सोमैरयोमुखम् अतिस्रुतः अतिक्रम्य गतः स "इन्द्रस्य युज्यः सखा" (समानयोगी समानस्थानः) ।

[तत्र महीधरः] । राजसूयप्रान्ते विहितसौत्रामणी चरकसौत्रामणी इत्युच्यते । तन्मन्त्राणामश्विनावृषी । सौत्रामण्या इन्द्रस्य भैषज्यं कर्तव्यम् अस्ति ।

१०. ३३–३४

[तत्र उवटः] । इतिहासमाचक्षते । नमुचिर्नामासुर इन्द्रस्य सखिभूत आस । स इन्द्रस्य विश्वस्तस्य सुरया वीर्यं पपौ । सोऽश्विनौ सरस्वतीं चोपाधावत् । पीतवीर्योऽहं नमुचिना । ततोऽस्मा फेनं[1] वज्रम् असिञ्चत् । तेनेन्द्रो नमुचेः शिरश्चिच्छेद । तत्र लोहितमिश्रः सुरासोमोऽतिष्ठत् ।

१—इष्टका उपदधाति (पञ्चदश) । सर्वा अप्सुजसम्बन्धिन्यः । तत्र यजुषि फेनशब्दो न श्रूयते ।

वा. सं. अ. १३. ५३

१. अपां त्वा एमन् । एमनि । वायुर्वा अपाम् एमन् । वायौ तां सादयति ।

अश्विनौ नमुचावासुरेऽवस्थितं सुरामयं सहभूत्वा पिबन्तौ इन्द्रम् अपालयताम् । तं स्वकर्मक्षमम् अकुरुताम् ।

अत्र प्रथमो मन्त्रोऽनुवाक्या, द्वितीयो याज्या ।

१९. ३४–३५

[तत्र उवटः] । पयोग्रहान् भक्षयन्ति द्वाभ्यां त्रिष्टुब्भ्याम् [३४–३५] ऋत्विग्यजमानाः ।

नमुचिरसुर इन्द्रस्य वीर्यमपिबत् । तस्य शिरसि छिन्ने लोहितामिश्रः सोम उदतिष्ठत् । तदुत्पूयापिबन्त देवाः । तदभिवादिन्येषर्क् ।

अश्विनौ नमुचेः सकाशात् सोमम् आहरताम् । सरस्वती अश्विभ्याम् आनीतं सोमम् असुनोत् ।

[तत्र महीधरः] अध्वर्युः, प्रतिप्रस्थाता, अग्नीत् च ऐते त्रय आवृत्त्या आश्विनं पयोग्रहं क्रमेण द्विर्द्विर्भक्षयन्ति सकृन्मन्त्रः । होतृब्रह्ममैत्रावरुणाः[1] सारस्वतं पयोग्रहं भक्षयन्ति । यजमान ऐन्द्रं पयोग्रहं भक्षयति ।

२. ओद्मन् । ओषधयो वा अपाम् ओद्म ।
३. भस्मन् । अभ्रं वा अपां भस्म ।
४. ज्योतिषि । विद्युद् वा अपां ज्योतिः ।
५. अयने । इयं पृथिवी अपाम् अयनम् ।
६. अर्णवे । प्राणो वा अपाम् अर्णवः ।
७ समुद्रे । मनो वै समुद्रः ।
८. सरिरे । वाग् वै सरिरम् ।
९. क्षये । चक्षुर्वा अपां क्षयो निवासः ।
१०. सधिषि । श्रोत्रं वा अपां सधिः ।
११. सदने । द्यौर्वा अपां सदनम् ।
१२. सधस्थे । अन्तरिक्षं वा अपां सधस्थम् ।
१३. योनौ । समुद्रो वा अपां योनिः ।
१४. पुरीषे । सिकता वा अपां पुरीषम् ।
१५. पाथसि । अन्नं वा अपां पाथः । अन्ने त्वां सादयति । [उवटः] नात्र क्वचन "अपां फेनः" श्रूयते ।

१—ऋत्विग्गणाः चत्वारः ।

"ते च चत्वारो गणाः । एकैकस्मिन् गणे चत्वारः इत्याहत्य ते षोडशभवन्ति । यथा—

"यदत्र" [१९. ३५] इति मन्त्रेण विहारदक्षिणे स्थिताः प्राचीनावीतिनो भक्षयन्ति ।

सर्वान् संग्रामान् "स्पृधः" यदा इन्द्रोऽजयत् तदा अपांफेनवीरेण नमुचेः शिरः सोऽच्छिनत् ।

अपां फेनेन नमुचेः शिर इन्द्रोदवर्तयः ।
विश्वा यदजय स्पृधः ॥ [वा. सं. १९. ७१]

१९. ७२

सुतः सोमः (लोहितमिश्रः ?) रसीसम्पद्यते रसीभावात् । स्थूलस्य हि सूक्ष्मताऽमृतीभावः । ऋजीषं मृत्युर्मूर्तत्वात् ।

सोमो राजामृत्ं सुत ऋजीषेणाजहान्मृत्युम् ।

ऋतेन विपानं—विविक्तं पानं लोहितात् सोमपानम् । शुक्रं रजः (अन्नात् संभूतं) इन्द्रस्य इन्द्रियं पयः अमृतं मधु (भवति) ।

अथाश्विसरस्वतीन्द्रदृष्टा अष्टा ऋचः [१९. ७३–८०] ।

७३ अङ्गानां रसः आङ्गिरसः प्राणः कुङ् (हंसः) हंसजातिस्वाभाव्यात् क्षीरोदकयोः संसृष्टयोः अद्भ्यः सकाशात् क्षीरं विमुच्यापिबत् धिया ।

७४ "हंसः शुचिषत्" (आदित्यो निर्मले गगने सीदन्) अद्भ्यः सोममपिबत् छन्दसा (वेदरूपैः किरणैः) ।

७५ प्रजापतिः ब्रह्मणा अन्नात् परिस्रुतं रसं व्यपिबत् । क्षत्रं वशीकृतवान्, पयः सोमं च पीतवान् । अत्र त्रीणि प्रजापतिः अपिबत्—रसः, पयः, सोमः ।

७६ रेतो मूत्रं विजहाति योनिं प्रविशद् इन्द्रियम् ।
गर्भो जरायुणावृत उल्बं जहाति जन्मना ॥
नानास्थाने एकद्वारे रेतोमूत्रे ।

गर्भो जरायुणावृतः (वेष्टितः), जन्मना (प्रसवेन) जरायुम् उल्बं च

---

१. अध्वर्युगणः	२. ब्रह्मगणः	३. होतृगणः	४. उद्गातृगणः
१. अध्वर्युः	१. ब्रह्मा	१. होता	१. उद्गाता
२. प्रतिप्रस्थाता	२. ब्राह्मणाच्छंसी	२. मैत्रावरुणः	२. प्रस्तोता
३. नेष्टा	३. आग्नीध्रः	३. अच्छावाकः	३. प्रतिहर्ता
४. उन्नेता	४. पोता	४. ग्रावस्तुत्	४. सुब्रह्मण्यः

एतदतिरिक्तं सदस्यनामकम् ऋत्विजं सप्तदशं कथयन्ति केचन सूत्रकाराः ।" [द्र. आप. श्रौ. १०. १. १०]

[यज्ञतत्त्वप्रकाशे—पृष्ठम्, ५८–५९] ।

त्यजति । जरायुरुल्वश्चैकस्थानावनेकद्वारौ । एकेन आवृतो गर्भः जन्मना द्वयं जहाति[1] ।

१९. ८०

सीसेन तन्त्रं मनसा मनीषिण ऊर्णासूत्रेण कवयो वयन्ति ।
अश्विना यज्ञं सविता सरस्वतीन्द्रस्य रूपं वरुणो भिषज्यन् ॥

अत्र यज्ञः पटेन रूप्यते ।

अश्विनौ (दस्रौ), सविता, सरस्वती, वरुणश्च मनसा विचार्य सौत्रामणीं यज्ञं वयन्ति (निष्पादयन्ति) इन्द्रमैषज्याय । तत्र दृष्टान्तः—सीसेन, उर्णासूत्रेण च तन्त्रमिव । सीसेन शष्पक्रयणात्, ऊर्णया तोक्मक्रयणात् ताभ्यां यज्ञनिष्पादनमित्यर्थः । [महीधरः]

१९. ८०–९५ [मन्त्राः षोडश] ।

आर्यभैः सुरैः पशूनां वसां गृहीत्वा सीसेनेति प्रतिमन्त्रं द्वात्रिंशत्संख्याकान् सुराग्रहान् जुहोति । एकेन मन्त्रेण द्वयोर्होम इत्यर्थः । [महीधरः]

८१ तिस्रोदेवता (अश्विनौ सरस्वती च) इन्द्रस्य अमरणधर्मि रूपं कर्मभिः संदधुः ।

"तदस्य रूपममृत ँ शचीभिस्तिस्रो दधुर्देवताः संरराणाः ।"
[अत्र नकारः समुच्चये आ अध्यायसमाप्तेः] । १९. ८०–९५] ।

१—गर्भाशयो जरायुः स्याद् उल्व च कललोऽस्त्रियाम् [अमरः—२.६. ३८] । गर्भ आशेतेऽत्रेति गर्भाशयः । जरामेति जरायुः । इति द्वे गर्भवेष्टनचर्मणः । उल्लीयते, ओलति, उल्यते, वल्यते वा उल्वम् । कल्यते इति कललः । द्वे शुक्रशोणितसङ्घातस्य । चत्वारि गर्भवेष्टनस्येत्यन्ये ।

द्र. "उत्तरम् वा उल्वाज्जरायु······तस्मान्मुक्ता गर्भा जरायोर्जायन्ते । सहैवोल्वेन कुमारो जायते ।" [ऐ. ब्रा. १. ३]

"गर्भो वा एष यद्दीक्षित उल्वं वासः प्रोर्णुते तस्माद् गर्भाः प्रावृता जायन्ते ।

जन्म च लोके जरायुरूपवेष्टने छिन्ने सति पश्चात्सम्पद्यते ।······ उल्वाख्यस्याभ्यन्तरवेष्टनस्य जन्मकालेऽप्यनिवृत्तिदर्शनादुल्वस्थानीयस्य वस्त्रस्यावभृथगमनकालेऽप्यनुवृत्तिर्द्रष्टव्या ।" [तत्र सायणः]

इन्द्रस्य भैषज्यम् ।

अधस्तात्तालिका दीयते इन्द्रभैषज्यस्य ।

इन्द्रस्य भैषज्यम् [१९. ८०–९५] ।

क्रम-संख्या	देवता	इन्द्रस्य भैषज्यम्
८०	अश्विनौ सविता सरस्वती वरुणः	इन्द्रस्य रूपं वयन्ति ।
८१	अश्विनौ सरस्वती च	अमृतं रूपं वपुः । शष्पैर्लोमानि, तोक्मभिस्त्वक् लाजैर्मांसम् ।
८२	अश्विनौ सरस्वती च	अन्तरं पेशः (रूपं) वयन्ति । मासरैः अस्थि, कारोतरेण मज्जानं, गवां त्वचि (सुरां स्थापयन्तः) ।
८३	नासत्यौ सरस्वती च सरस्वती वयति नासत्याभ्यां सह	मनसा पर्यालोच्य पेशलं वसु दर्शतं वपुः । रसं च रोहितं परिस्रुतः (सुरायाः) । नग्नहुना धीरेण तसरं च वेम च ।
८४	अश्विनौ सरस्वती च	पयसा अमृतं जनित्रं (जननशीलं) शुक्रम् । सुरया मूत्रं रेतः च । ऊवध्यं वातं सब्वम् ।
८५	सविता वरुणः च	सविता पुरोडाशेन इन्द्रस्य हृदयं सत्यं "जजान ।" यकृत् (कालखण्ड) क्लोमानं (जलनाडिकाम्) । वायव्यैः (सौमिक-कर्मपात्रैः) मतस्ने (हृदयोभयपार्श्वस्थे अस्थिनी) पित्तं च सृजति वरुणः ।
८६	सविता वरुणः च	स्थालीभिरान्त्राणि (स्थाल्यो मधु पिन्वमानाः सिञ्चन्त्यः) । पात्रैर्गुदा । "गुदाः पात्राणि सुदुघा च धेनुः ।" श्येनस्य पत्रेण प्लीहा । आसन्दा शचीभिः नाभिः उदरं च अभवत् ।
८७		सुरासंधानकुम्भेन वनिष्ठुः (स्थूलान्त्रम्) । कुम्भ्या (सुराधान्या) प्लाशिः (शिश्नः) ।

क्रम-संख्या	देवता	इन्द्रस्य भैषज्यम्
८८		सतेन (पात्रविशेषेण) मुखं शिरश्च। पवित्रेण जिह्वा। अश्विनौ सरस्वती चास्ये। चप्येन इन्द्रियं पायु । वालेन (सुरागलनवस्त्रेण) वैधः वस्तिः शेपश्च। (वीर्येण वेगवान् शेपः)।
८९	अश्विनौ	आच्छादयतोऽश्विनौ—ग्रहाभ्यामश्विदेवत्याभ्यां कुरुतः चक्षुः अमृतम्। हविर्भूतेन पक्वेन छागेन चक्षुः तेजस्वि संस्क्रियते। गोधूमैः पक्ष्माणि । कुवलैः (बदरैः) उतानि (नेत्रान्तविष्टानि रोमाणि)। शुक्लं कृष्णं च नेत्रगते रूपे वसाते कुर्वाते।
९०	सरस्वती	अविः, मेषः (सारस्वतः) च नासिकायाम्। उभाभ्यां नासिकायां वीर्यं कृतम्। ग्रहाभ्यां सारस्वताभ्यां प्राणस्य प्राणवायोः पन्थाः अमृतः क्रियते । "उपवाकैः (यवाङ्कुरैः) व्यानं जजान।" बहिर्बदरैर्नासिकायां लोमानि।
९१		ऋषभेण बलम्। ग्रहाभ्याम् (ऐन्द्राभ्यां) कर्णयोः श्रोत्रम्। यवेन बर्हिषा च भ्रुवोः केसराणि (लोमानि)। कर्कन्धुना सारघं मधु लालश्लेष्मादि।
९२		आत्मनि (शरीरे—कबन्धे) उपस्थे च वृकस्य लोम । मुखे श्मश्रूणि च व्याघ्रलोम। यशसे शीर्षण्याः केशाः, श्रिये शिखा, त्विषिः (कान्तिः), इन्द्रियाणि—तत्सर्वं सिंहस्य लोम।
९३	अश्विनौ सरस्वती च	आत्मनि अङ्गानि समधाताम् अश्विनौ। आत्मानमङ्गैः समधात् सरस्वती। चन्द्रेण ज्योतिषा अमृतं दधाना अश्विसरस्वत्यः इन्द्रस्य रूपम् आयुश्च अकुर्वन्।

क्रम-संख्या	देवता	इन्द्रस्य भैषज्यम्
९४	सरस्वती अश्विनौ च, अप्सु राजा वरुणश्च	सरस्वती योन्यां (शरीरे) अन्तर्गर्भं बिभर्ति । (अवयवैरवयविनं व्याप्नोति सरस्वती ।) (अर्थो हि वाचः शरीरम्) । तथासौ अश्विभ्याम् (अश्विनोः) पत्नी । (अश्विभ्यां व्यायामायाः योन्याः पालयित्री सरस्वती । वाग्देवीवः प्रत्यङ्गपोषी भवति) । वरुणोऽप्सां रसेन साम्नाय इन्द्रं श्रियै जनयति (बिभर्ति) ।
९५	अश्विनौ सरस्वती च	पशूनां तेजः, वीर्यवद् हविः, परिस्रुता सुरा, हविर्भूतं पयश्च उपादाय सारघं मधु अश्विभ्यां दुग्धम् । सुतासुताभ्यां परिस्रुत-सोमाभ्यां सोमः अमृतः इन्दुः दुग्धोऽश्विभ्यां सरस्वत्या च ।

८३—नग्नहुः किण्वः सुराकन्दः । तसरं वयनसाधनम् । तसर च वेम च कुविन्दानां प्रसिद्धम् ।

८४—ऊवध्यम् आमाशयगतमन्नम् । तत्सहचरितं सर्वं पक्वाशयगतमन्नम् । वातं नाडीगतं सक्थम् ।

८५—प्लीहा । हृदयवामभागस्थः शिथिलमांसपिण्डः गुल्मसंज्ञः ।

८९—गोः (रश्मेः) धूमः गोधूमः । कुः पृथिवी तां वलतीति कुवलः ।

९१—"यथा सारघं मधु इतश्चेतश्च आहृतं भवति एवं लाजादि सर्वस्मात् अङ्गाद् भवति ।" [उवटः]

९३—अङ्गान्यात्मन् भिषजा तदश्विनात्मानमङ्गैः समधात् सरस्वती ।
इन्द्रस्य रूपं शतमानमायुश्चन्द्रेण ज्योतिरमृतं दधानाः ॥
अश्विनौ आत्मनि अङ्गानि समधाताम् ।
सरस्वती आत्मानम् अङ्गैः समधात् ॥
आत्मनि अङ्गानि अश्विनौ । (अवयविनि अवयवाः)
अङ्गैरात्मानं सरस्वती (अवयवैरवयवी)
"सरस्वती सप्तथी सिन्धुमाता" [ऋ. सं. ७. ३६. ६]

"ये त्रिषप्ताः परियन्ति विश्वा रूपाणि बिभ्रतः ।
वाचस्पतिर्बला तेषां तन्वो अद्य दधातु मे ॥" [अ. वे. १. १. १]

विंशोऽध्याये…

३. अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां (देवस्य सवितुः प्रसवे) त्वाऽभिषिञ्चामि ।

१. अश्विनोर्भैषज्येन	तेजसे ब्रह्मवर्चसाय ।
२. सरस्वत्या भैषज्येन	वीर्य्याय अन्नाद्याय ।
३. इन्द्रस्य इन्द्रियेण	बलाय, श्रियै, यशसे ।

७. बाहू मे बलमिन्द्रियं हस्तौ मे कर्म वीर्यम् । आत्मा क्षत्रमुरो मम ॥
(अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम्)

११. अश्विसरस्वत्यौ भिषजः इन्द्राय इन्द्रियं (वीर्यं) यज्ञमार्गैर्वहन्ति ।

१२. पातं नो अश्विना दिवा पाहि नक्तं सरस्वती ।
दैव्या होतारा भिषजा (अश्विनौ) पातम् इन्द्र ँ सचा सुते ॥

१३. हे अश्विनौ ! तिस्रो देव्यः इडा, भारती, सरस्वती, त्रेधा तीव्रं सोमम् इन्द्राय सुषुवुः । तिस्रस्त्वेषा—
१. भारती आदित्यप्रभा द्युस्थाना ।
२. सरस्वती मध्यस्थाना ।
३. इडा पृथिवीस्थाना ।

१४. तिस्रः प्रयाजदेवताः—अश्विनौ, सरस्वती, त्वष्टा च ।
ते रूपं रूपं (नानाविधं रूपम्) अधुः—
१. अश्विनौ भेषजं मधु
२. सरस्वती भेषजम्
३. त्वष्टा यशः श्रियम्
इन्द्रे रूपं रूपम् अधुः सुते ।

१५. ऋतुथा (काले काले) अश्विभ्यां सहिता सरस्वती कीलालमन्नरसं मधु दुग्धे ।

१७. अश्विनौ सरस्वती च असुरान्नमुचेः हविरिन्द्रियं शुक्रं वसु मघम् इन्द्राय आजह्रुः ।

१५—सरघा भ्रमराः । ते यथाऽक्रम्य ओषधीभ्यश्च रसमादाय दुहन्ति एवमे-तेभ्यो द्रव्येभ्योऽश्विभ्यां दुग्धं सौत्रामणीलक्षणम् । सुता परिस्रुत् सुरा । सुतं पयः ।

१७—सरस्वती अश्विनोः पत्नी भूत्वा योनिमध्ये गर्भम् इन्द्रलक्षणम् सुकृतं यथा तथा (शोभनं कृतं) बिभर्ति । अपाम् ईश्वरो वरुणः, उदकर-सभूतेन साम्ना इन्द्रं श्रियै जनयन् सन् बिभर्ति ।" [महीधरः]

६८. अश्विसरस्वत्यो हविषा इन्द्रमवर्धयन् । अथेन्द्रः नमुचौ असुरे संगतं मर्म (मंहनीयं) बलं बिभेद ।

६९. पशवः (कर्माङ्गभूता गोमेषाद्याः) अश्विनौ सरस्वती च सहभूता यज्ञे इन्द्रम् अवर्धयन् ।

७३. अश्विनौ गोभिरिन्द्रियेण, अश्वैर्वीर्येण बलेन (गोनिमित्तेन्द्रियेण, अश्वनिमित्तवीर्यबलाभ्याम्), सरस्वती च हविषा इन्द्रमवर्धयन् ।

७४–७५ सुपेशसौ (कल्याणरूपौ) नासत्यौ भिषजावश्विनौ सुदुघा सरस्वती च इन्द्रायेन्द्रियं दधुः ।

८०. "अश्विनौ तेजसा सह चक्षुरिन्द्रियमिन्द्राय दधतुः । सरस्वती प्राणेन सह वीर्यम् इन्द्राय दधौ । इन्द्रः ([illegible]) बलेन सह वाचं, बलेन च सह एतत्कल्याय इन्द्रायेन्द्रियं सामर्थ्यं दधौ ।"

९०. अश्विनौ पिबतां मधुरस्वादोपलक्षितं सोमं सरस्वत्या सजोषसा (समानसोमपानौ) । इन्द्रश्च सुत्रामा, वृत्रहा मधु पिबतु । सर्वे यमः (चत्वारः) सोममयं मधु पिबन्तु ।

त्रिभिरध्यायैः [१९–२०–२१] सौत्रामणी प्रक्रियते । द्वितीयेनाध्यायेन (२०) संहितायाः पूर्वार्धः (पूर्वविंशतिः) समाप्तः । उत्तरार्धः तृतीयेन अध्यायेन (२१) प्रारभ्यते । तस्मिन्नेकविंशेऽध्याये ऊनविंशत्या यजुर्भिः [२९–४७] धान्यादिहविर्भिः पशुभिश्च यागः क्रियते । तत्र नाना देवता इज्यन्ते, मुख्यास्तु अश्विनौ, सरस्वती, इन्द्रश्च ।

छागम् अश्विभ्यां स्वाहा । मेषं सरस्वत्यै स्वाहा । ऋषभम् इन्द्राय स्वाहा । इन्द्रं सुत्रामाणं सवितारं वरुणं भिषजां पतिं स्वाहा (४०) । इत्यादिक्रमेण अङ्गान्यवदाय हूयन्ते ।

तत्र [अ. २१] षड्भिः ऋग्भिः ऋतुषु इन्द्रे वयो धीयते । यथा—

वसन्तेन ऋतुना देवा वसवस्त्रिवृता स्तुताः ।
रथन्तरेण तेजसा हविरिन्द्रे वयो दधुः ॥ [२१] [२३–२८[1]]

[1] वा. सं. अध्यायः २१. २३–२८

ऋक् संख्या	ऋतुः	देवता	स्तोमः	साम	गुणः
२३	वसन्तेन	वसवः	त्रिवृता	रथन्तरेण	तेजसा
२४	ग्रीष्मेण	रुद्राः	पञ्चदशे	बृहता	यशसा
२५	वर्षाभिः	आदित्याः	सप्तदशे	वैरूपेण	ओजसा
२६	शारदेन	ऋभवः	एकविंशे	वैराजेन	श्रिया
२७	हेमन्तेन	मरुतः	त्रिणवे	शाक्वरेण	बलेन
२८	शैशिरेण	अमृताः	त्रयस्त्रिंशे	रैवतेन	सत्येन

अश्विसरस्वत्य इन्द्रे वीर्यं वपुः ।

अध्याय: २१

४८. तेजः अक्ष्णोः चक्षुः । ४९. प्राणं नसि वीर्यम् ।

५०. बलम् आस्ये वाचम् । ५१. यशः कर्णयोः श्रोत्रम् ।

५२. ज्योतिः स्तनयोः शुक्रम् । ५३. त्विषिं हृदये मतिम् ।

५४. मध्ये नाभ्यां शूषम् । ५५. रेतो रूपममृतं जनित्रम् ।

५६. ओजो जूतिः भामम् ।

अध्याय: २८. १०–१२

१०. दक्षिणतः स्थित्वा आहुतीर्जुहोति । सर्वाः काष्ठाः (कालावयवाः) यस्यां सीदन्ति । वषट्कारानन्तरं हुतस्य घर्मस्य मधोः अश्विनौ पिबतः । हविर्दक्षिणे हूयते ।

११. यतो यज्ञः (आदित्यः) दिवि येयोऽग्निना ।
"दिवि धा इमं यज्ञम् इमं यज्ञं दिवि धाः ।"

१२. अश्विनौ घर्मं पिबतो "हार्द्वानम्", हृदयस्य प्रियं, हृदयं वा योऽनुवर्तते अश्विनौ घर्मं पिबतोऽहर्दिवाभिरूतिभिः । प्रातः सायम् उभयोः प्रवर्ग्य-दानकालयोः ऊतिभिः सह तौ घर्मं पिबतः ।
प्रवर्ग्यहविरिदं सम्पाद्यते सूर्यरश्मिभिः । अत्र रूपकेण सूर्यः "तन्त्रायी"[1]

---

[1] "तन्त्रायी" आदित्यः । लोके ये प्रसारितास्तन्तवः, तुरीशलाकाप्रोताः, ते तन्त्रम् इत्युच्यन्ते । तन्तुनाकिरिव सूत्रपूरणाय एति त्रींल्लोकान् इति तन्त्रायी आदित्यः । "अहर्दिवाभिरूतिभिः । अहःशब्दः पूर्वाह्णवचनः । दिवाशब्दः सायाह्नवचनः । स हि प्रवर्ग्याय कालः । एतत्कालोपलक्षिता-भिरूतिभिः ।" [उवटः—वा. सं. ३८. १२] ।

अश्विनौ, सविता, सरस्वती, वरुणश्च सौत्रामणीं यज्ञं वयन्ति इन्द्रभैषज्याय । [वा. सं. १९. ८०] "तन्त्रायी" आदित्यः । तत्र सौत्रामण्यां सरस्वती नासत्याभ्यां सह इन्द्रस्य रूपं वयति ।

सरस्वती मनसा पेशलं वसु नासत्याभ्यां वयति दर्शतं वपुः । रसं परिस्रुता न रोहितं नग्नहुर्धीरस्तसरं न वेम ॥ [वा. सं. १९. ८३] ।
तसरं वयनसाधनम् । तसरं च वेम च कुविन्दानां प्रसिद्धम् ।

२. तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं संजभार ।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै ॥
[ऋ. सं. १. ११५. ४] ।

इत्युच्यते । सूर्यो रश्मिभिर्द्यावापृथिव्यौ आपूरयति । तत्र रश्मीनां व्यापनं तन्तुभिर्वस्त्रस्य वयनमिव ।

स्थावरजङ्गमात्मकाश्चेतनाचेतनाः सर्वे पदार्थाः तन्तुवायस्य शलाकासदृशाः स्युः । शलाकासु तन्तून् प्रावयित्वा वस्त्रम् ऊयते । एवं सूर्यस्य रश्मिभिः प्रोता भूत्वा सर्वे पाकम् आपद्यन्ते । स पाक एवात्र घर्मः । स घर्मोऽश्विभ्यां हूयते प्रातः सायम् । ताभ्यां यज्ञशिरः सन्धानेन यज्ञस्य प्रवर्तनात्, ताभ्यां घर्मो हूयते । उदयास्तमयाभ्यां यज्ञशिरसश्छेदसन्धानयोः संभवाद् अश्विनौ तत्र आहूयेते ।

१३ द्यावापृथिव्योरन्तरा तन्त्रेणाऽऽदित्योऽयते । अतो द्यावापृथिव्यौ अश्विभ्यां घर्मस्य पानमनुमन्येते ।

पुरुषमेधे पशवः ।

वाजसनेयिसंहितायां त्रिंशेऽध्यायेऽष्टादशभिर्यजुर्भिः पुरुषमेधपशवो निर्दिश्यन्ते ३०. ५–२२ । यथा—

६ नर्माय रेभम् (शब्दकर्तारं वाचाटम्) । प्रमदे कुमारीपुत्रम् ।

९. आर्त्यै परिवित्तम् (ऊढे कनिष्ठेऽनूढम्) ।
निर्ऋत्यै परिविविदानम् (अनूढे ज्येष्ठे ऊढवन्तम्) ।

१०. अधर्माय बधिरम् । पवित्राय भिषजम् । प्रज्ञानाय नक्षत्रदर्शम् ।

११. जवायाऽश्वपम् । पुष्ट्यै गोपालम् । वीर्यायाऽविपालम् । तेजसेऽजपालम् ।

१५. यमाय यमसूम् युग्मप्रसविनीम् । अथर्वभ्योऽवतोकाम् (निरपत्याम्) ।
संवत्सराय पर्यायिणीम् (अनुक्रमप्रजाम्) । परिवत्सरायाविजाताम् (अप्रसूताम्) इदावत्सरायातीत्वरीम् (अत्यन्तकुलटाम्) ।
इद्वत्सरायातिष्कद्वरीम् (अतिस्कन्दति गच्छतीति अतिष्कद्वरी) ।
वत्सराय विजर्जराम् (शिथिलशरीराम्) संवत्सराय पलिक्नीम् (श्वेतकेशाम्) । ऋभुभ्योऽजिनसन्धम् (चर्मसन्धातारम्) । साध्येभ्यश्चर्मम्णम् (चर्माभ्यासकम्) ।

१८. मृत्यवे गोव्यच्छम् (गाः प्रतिगमनशीलम्) । अन्तकाय गोघातम् (गवां हन्तारम्) । क्षुधे यो गां विकृन्तन्तं (छिन्दन्तं) भिक्षमाण उपतिष्ठति ।

२०. नर्माय पुंश्चलूम् । [नर्माय रेभम्—यजुः ६] ।

अश्विनौ व्यासम् ।

पुरुषमेधानन्तरं संन्यासग्रहणे "अयं ते योनिः" [वा. सं. ३. १४] इति मन्त्रेण आत्मनि अग्नीन् समारोप्य "अद्भ्यः संभृतः" इति षड्ऋचेन [वा. सं. ३१. १७–२२] अनुवाकेन सूर्यम् उपस्थाय पश्चादनवलोकयन्नरण्यं गत्वा

संन्यसेत्। गार्हपत्येऽवरारणिमनुप्रहृत्याऽऽहवनीय उत्तरारणिम्, आत्मन्यग्नी समारोप्यारण्यं व्रजेत् इति शाङ्खायनोक्तेः। [द्र. महीधरः—वा. सं. ३०. २२]। तत्रानुवाकेऽन्तिमा—

श्रीश्च॑ ते लक्ष्मीश्च॒ पत्न्या॑वहोरा॒त्रे पा॒र्श्वे ।
नक्ष॑त्राणि रू॒पम॒श्विनौ॒ व्यात्त॑म् ।
इ॒ष्णन्नि॑षाणा॒मुं म॑ इषाण सर्वलो॒कं म॑ इषाण ॥ वा. सं. ३१. २२[1]।

"अस्य पुरुषस्यैतेऽवयवाः। श्रीश्च लक्ष्मीश्च पत्न्यौ भार्ये। अहश्च रात्रिश्च ते पार्श्वे। नक्षत्राणि रूपम्। अश्विनौ व्यात्तं मुखम्। इष्णन् इषाण स्वर्गस्य लोकस्य ईशानः। एतद्गुणविशिष्टो नाम मोक्षस्य ईशानः सर्वलोकस्य च स एव देवानाम् ईशानः।" इति शौनकः। [द्र. उवटः]।

"ऋषिरादित्यं स्तुत्वा प्रार्थयते। हे आदित्य! श्रीर्लक्ष्मीश्च ते तव पत्न्यौ। जायास्थानीये त्वदाश्रये इत्यर्थः। यया सर्वजनाश्रयणीयो भवति सा श्रीः। श्रीयतेऽनयेति श्रीः संपद् इत्यर्थः। यया लक्ष्यते दृश्यते जनैः सा लक्ष्मीः। सौन्दर्यम् इत्यर्थः। अहोरात्रे तव पार्श्वे पार्श्वस्थानीये। नक्षत्राणि गगनगास्ता-रास्तव रूपम्। तवैव तेजसा भासमानत्वात् "तेजसां गोलकः सूर्यो नक्षत्राण्यम्बु-गोलकाः"[2] इति ज्योतिःशास्त्रोक्तेः। अश्विनौ द्यावापृथिव्यौ तव "व्यात्तम्"

१—तैत्तिरीयारण्यक एवं श्रूयते—ह्रीश्च॑ ते लक्ष्मीश्च॒ पत्न्यौ॑। अ॒हो॒रा॒त्रे पा॒र्श्वे।
नक्ष॑त्राणि रू॒पम्। अ॒श्विनौ॒ व्यात्त॑म्। इ॒ष्टं म॑निषाण।
अ॒मुं म॑निषाण। सर्वं॑ मनिषाण। [प्रपाठकः ३, अनुवाकः १३]।
"ह्रीर्लज्जाभिमानिनी देवता। लक्ष्मीरैश्वर्याभिमानिनी देवता। हे परमात्मन्! ह्रीश्च लक्ष्मीश्च ते तव पत्न्यौ भार्यास्थनीये। ये चाहोरात्रे ते पार्श्वे पार्श्वस्थानीये। नक्षत्राणि आकाशे दृश्यमानानि रूपं तव शरीर-स्थानीयम्। अश्विनौ यौ देवौ तौ तव व्यात्तं विवृतमुखस्थानीयम्। तथाविध हे विराट्पुरुष! इष्टम् अस्मदपेक्षितम् आत्मबोधं मनिषाण अनुमन्यस्व देहीत्यर्थः। अमुं लोके दृश्यमानं गवाश्वादिकं मनिषाण प्रयच्छ। किं बहुना सर्वं मनिषाणैहिकामुष्मिकं वा सर्वम् इष्टं देहि।" [सायणः]।

२—नक्षत्राणि नक्षतेर्गतिकर्मणः। नेमानि क्षत्राणि इति च ब्राह्मणम् [निरु. ३. २०]। अमि-नक्षि-यजि-वधि-पतिभ्योऽत्रन् [उ.सू.३८५]। क्षीयतेः क्षरतेर्वा क्षत्रम्। न क्षीयन्ते न क्षरन्ति इति वा नक्षत्राणि। "नभ्राण्नपान्नवेदा"— [पा. ६. ३. ७५] इत्यादिना नञः प्रकृतिभावाद् नलोपाभावः। क्षत्रं

विकासितमुखस्थानीये । अश्नुवाते व्याप्नुतस्तावश्विनौ । "अश्विनौ द्यावापृथिव्यौ इमे हीदं सर्वम् आश्नुवाताम्" इति श्रुतेः ।¹ ते ईदृशास्त्वां याचे । इष्णन् कर्मफलम् इच्छन् सन् इषाण इच्छ इषु इच्छायाम् विकरणव्यत्ययः । यद् वा इष अभीक्ष्ण्ये क्र्यादिः अभीच्छार्थः । किमेषणीयं तत्राह । अमुं परलोकं मे मम इषाण । मम परलोकः समीचीनोऽस्तु इतीच्छ । अमोघेच्छत्वात् इष्टं भवतीत्यर्थः । सर्वं मे मम इषाण सर्वलोकात्मकोऽहं भवेयम् इतीच्छेत्यर्थः । मुक्तो भवेयमित्यर्थः । "सर्वं खल्विदं ब्रह्म" इति सामश्रुतेः । [महीधरः] ।

धनम् । [निघ. २. १०] । न धनान्येतानि, धनस्वरूपाणि । सूर्यरश्मि-नुषेणादीप्यमानानि । "तैजसो गोलकः सूर्यो नक्षत्राण्यम्बुगोलकाः ।"
[द्र. महीधरः—वा. सं. ११. १२] ।

१—इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनाविमे हीदं सर्वम् आश्नुवाताम् ।
[शत. ब्रा. ४, १. ५. १६]

तृतीयोऽध्यायः ।

॥ अथ सामवेदे आश्विन्यः ऋचः ॥[१]

सामसंहितायां एकाम् ऋचं (प्र. ४. २. ३.] वर्जयित्वा सर्वा आश्विन्य ऋच ऋक्-संहितायां श्रूयन्ते ।

तत्रेयं तालिका—

सामवेदः पूर्वार्चिकः		ऋग्वेदः
प्र. ३. १०. ५	शचीभिर्नः	१. १३९. ५
प्र. ४. २. २	इमा उ वाम्	७. ७४. १
प्र. ४. २. ३ ❀	कुष्ठः को वाम्	× ×
प्र. ४. २. ४[१]	अयं वा मधुमत्तमः	१. ४७. १
प्र. ५. ३. १०[२]	प्रति प्रियतमं रथम्	५. ७५. १
सामवेदः उत्तरार्चिकः		**ऋग्वेदः**
प्र. ८. १. ६	उत सखास्यश्विनोः	४. ५२. ३ (उषस्या)
प्र. ८. ३. ७	एषो उषा	१. ४६. १-३
प्र. ८. ३. ९[३]	अश्विना वर्तिरस्मत् ।	
	एह देवा । यावित्था[१-३-२]	१. ९२. १६-१८
प्र. ८. ३. १२	प्रति प्रियतमं रथम्	५. ७५. १-३
प्र. ८. ३. १५	आ भात्यग्निः	५. ७६. १-३
प्र. ८. ३. १७	अबोध्यग्निः	१. १५७. १-३

१, २, ३ पाठभेदः—

सामवेदे पाठः	ऋग्वेदे पाठः
१. सुतः सोमो दिविष्टिषु प्र. ४.२ ४	सुतः सोम ऋतावृधा १. ४७. १
२. स्तोमेभिर्भूषति प्रति प्र. ५.३.१०	स्तोमेन प्रतिभूषति ५. ७५. १
३. ऋकसंहिता १.९२.१६; १८; १७	ऋकसंहिता १. ९२. १६; १७; १८

❀ पूर्वार्चिकः ४. २. ३

कुष्ठः को वाम् अश्विना तपानो देवा मर्त्यः ।
घ्नता वाम् अश्नया क्षयमाणोंऽशुनेत्थमु आद्वन्यथा ॥

१—सामवेदे मन्त्रसंख्या १८१०, तत्र पञ्चसप्ततिवर्ज्जम् इतरे सर्वे ऋक्संहितागताः । "गीतिरूपा मन्त्राः सामानि ।"
"ऋक् साम्नां योनिः ।"

सामवेदः		ऋग्वेदः
प्र. ९. १. ६	जुष्टो हि दूतो असि………… …………सजूरश्विभ्याम् उषसा सुवीर्यम्…………।	१. ४४. २[आग्नेयी]
प्र. ४. २. २.७	स वायुमिन्द्रमश्विना[1]	× ×

ऋग्वेदे सूक्तानां संग्रह ऋषीन् अनु ।
सामवेदे ऋचां संग्रहो विषयान् अनु ॥

१—उत्तरार्चिकः । ४. २. २. ७
स वायुम् इन्द्रमश्विना साकं मदेन गच्छति । रणा यो अस्य धर्मणा ॥

चतुर्थोऽध्यायः

।। अथाथर्ववेदेऽश्विनौ ।।

ब्रह्म ।

यदा मन्युः संकल्पस्य गृहाद् आकूतिं जायामावहत् तदा ब्रह्म ज्येष्ठवरोऽभवद् ।

इन्द्रादिदेवेभ्यः प्राग् दश युगपद् अजायन्त—

प्राणापानौ चक्षुः श्रोत्रम् अक्षितिश्च क्षितिश्च या ।

व्यानोदानौ वाङ्मनस्ते वा आकूतिमावहन् ।। [अ. सं. ११. ८. ४]

ऋषिः कौरुपथिः [अ. सं. ११. ८] ऋतून्, धातारं, बृहस्पतिम्, इन्द्राग्नी अश्विनौ च देवेषु ज्येष्ठत्वेन ब्रूते । एतेषां तदानीमजातत्वात् प्राणापानादयो दश पूर्वजाताः तपः एव ज्येष्ठमुपासत ।

अजाता आसन्नृतवोऽथो धाता बृहस्पतिः ।
इन्द्राग्नी अश्विना तर्हि कं ते ज्येष्ठमुपासत ।।
तपश्चैवास्तां कर्म चान्तर्महत्यर्णवे ।
तपो ह जज्ञे कर्मणस्तत् ते ज्येष्ठमुपासत ।। [अ. सं. ११.८.५–६]
[अ. सं. ११.८. १–६]

महत्यर्णवे समुद्रे प्रथमं ब्रह्मणः कर्म समुत्पन्नं, यस्मात्, (कर्मणः) जातं तपः । आध्यात्मिकदृष्टया पूर्वजातानां, प्राणापानादीनां दशानां देवानां कर्मणाम् अभिमानिनो देवा एव इन्द्रादयो यज्ञिया देवाः । मन्त्रे यज्ञियानां देवानां यः क्रमो दृश्यते तत्राश्विनोरेव ज्येष्ठत्वं प्रतीयते । अश्विनौ, इन्द्राग्नी, बृहस्पतिः, धाता, ऋतव इत्यनुज्येष्ठं क्रमः ।

श्रोत्रे अश्विनौ [शत. ब्रा. १२. ९. १. १३] ।
नासिके अश्विनौ [शत. ब्रा. १२. ९. १. १४] ।
मुख्यौ वा अश्विनौ (यज्ञस्य) [शत. ब्रा. ४. १. ५. १९] ।
एवं ब्रह्मणः समुत्पन्नौ अश्विनौ प्राणरूपेण श्रोत्ररूपेण सर्वं व्यश्नुवाते ।

अश्विनोर्जन्म ।

ऋक्संहितायां द्वाभ्यामृग्भ्याम् अश्विनोर्जन्म सरण्य्वाः प्रोच्यते ।

[ऋ. सं. १०. १७. १–२] ।

अथर्वसंहितायां तु प्रथमकं अष्टादशे काण्डे प्रथमे सूक्ते [अ. सं. १८. १. ५३]. द्वितीयकं तत्रैव द्वितीये सूक्ते [अ. सं. १८. २. ३३] श्रूयते ।

अत्र स्वल्प.पाठभेदोऽपि विद्यते—

१. इतीदं विश्वं भुवनं समेति [ऋ. सं. १०. १७. १]।
तेनेदं विश्वं भुवनं समेति [अ. सं. १८. १. ५३]।

२. कृत्वी सवर्णाम् अददुर्विवस्वते [ऋ. सं. १०. १७. २]।
कृत्वा सवर्णाम् अदधुर्विवस्वते [अ. सं. १८. २. ३३]।

ऋग्वेदे देवश्रवा यामायन ऋषिः। स च सुमेरौ अस्तं गतः (कुमेरावुदितः) सूर्यः। सुमेरौ अस्तोत्तरं पुनरुदयं यावत् संभवमत्र सूक्ते विषयः।

अथर्ववेदेऽष्टादशस्य काण्डस्य विषयः पितृमेधः। तत्र प्रथमे सूक्ते सूर्यः सुमेरौ अस्तं याति। अत एव उत्तरस्याम् ऋचि [अ. सं. १८. १. ५४]—

"यमं पश्यामि वरुणं च देवम्" इति श्रूयते। द्वितीये सूक्ते सुमेरुस्थः (देवः) स्वाम् अवस्थां वर्णयति "ततः परं नाति पश्यामि किञ्चन।"

विवस्वान् अधोगतः, तस्य पुनरूर्ध्वगत्यर्थं यागः क्रियते सुमेरौ। अत्र अध्वरस्य देवो यमः। अस्तोत्तरं मासद्वयं यावत् क्रमशः क्षीयमाणं सौर्यं तेजः प्रवर्तते। ततः परं मासद्वयं गाढं तमो भवति। तथा च श्रुतिः—

यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किञ्चन।
यमे अध्वरो अधि मे निविष्टो भुवो विवस्वान् अन्वाततान॥

[अ. सं. १८. २. ३२]

अपागूहन्नमृतां मर्त्येभ्यः कृत्वा सवर्णाम् अदधुर्विवस्वते।
उताश्विनावभरद् यत् तद् आसीद् अजहाद् उ द्वा मिथुना सरण्यूः॥

[अ. सं. १८ २. ३३]

उदयात् प्राग् या उषा भवति सा अमृता। परन्तु सूर्यस्य प्रकाशे सा विलयं याति, सूर्यस्य उदयेन। कुमेरौ पृथिव्यां मर्त्या निवसन्ति, तेभ्यः सा अमर्त्या उषा अपगूह्यते देवैः। सा च सुमेरुं नीयते, अस्तोत्तरं तत्र प्रकाशनार्थं, मासद्वयं यावत् तत्र ध्रियते च। अस्तोत्तरतेजसः क्षीयमाणतया, ऊर्ध्वं मासद्वयं तमसः प्रवर्तनात् च "नाति पश्यामि किञ्चन" इति श्रुतिः।

अथर्वसंहितायाम् "अपागूहन्" इति ऋचः पूर्वार्धे अस्तोत्तरं मध्यरात्रात् प्रागवस्था प्रोच्यते, उत्तरार्धे मध्यरात्रस्य परस्तात् उदयं यावद् अवस्था प्रोच्यते। अत्र ईकारस्थाने आकारश्रवणं, दाधातोः स्थाने धाधातोः श्रुतिरपि एतत् प्रमाणयति।

कृत्वी अददुः [ऋ. सं. १०. १७. २]।
कृत्वा अदधुः [अ. सं. १८. २. ३३]।

ऋक्संहितायाम् सवर्णा दीयते। दानं प्रातरुदयापेक्षया। अथर्वसंहितायां

पितृमेधप्रकरणात्, सुमेरावुदयस्याविवक्षितत्वात् सवर्णा न दीयते, अपि तु वीयते ध्रियते अस्तोत्तरं प्रकाशार्थम् ।

इतीदं विश्वं भुवनं समेति [ऋ. सं. १०. १७. १]
तेनेदं विश्वं भुवनं समेति [अ. सं. १८. १. ५३]।

इति शब्देन हेतुमतो काचन समाप्तिः तदुपलक्षिता परप्रवृत्तिश्च द्योत्यते। अत्रास्तोत्तरं प्रवर्तमानं सांध्यं तेजः, याऽत्र त्वष्टुर्दुहिता । तस्या वहतुर्भवतीति विश्वं भुवनं समेतं विवाहदर्शनाय । विवाहस्तु वहतुलाभेन भवति । वहतुश्च आजिधावनेन अश्विभ्यां जेष्यते, येन सूर्या अश्विनोः रथमारोक्ष्यति, वरं सोमं प्रति साऽश्विभ्यां नेष्यते च । अत्र भुवनसमागमेन परप्रवर्तमानम् आजिधावनम् इति शब्देन द्योतितं भवति ।

"तेनेदम्" इति अथर्ववेदे सूर्योदयस्याविवक्षितत्वात्, दुहितरि जातायां वहतुर्निश्चितः, परप्रवृत्तिर्न विवक्षिता । अतः "तेन" सान्ध्यतेजसः प्रवर्तनमेव विवक्ष्यते ।

१. दुहितृत्वम्, तेन पत्या संगमः ।
२. पतिसंगमार्थः वहतुः ।
३. वहतुना विश्वस्य भुवनस्य समागमः ।
४. त्वष्टुर्दुहितृत्वे मर्त्येभ्यः मरणधर्मभ्यः आत्मनः पृथक् करणम् इत्येते धर्मा अत्र संभवन्ति ।

अश्विनोर्जन्मना सहैतेषां धर्माणां संभवात्, रोगनाशने, आयुर्वृद्धौ च ऋगेका विनियुज्यते—

त्वष्टा दुहित्रे वहतुं युनक्तीतीदं विश्वं भुवनं वि याति ।
व्यहं सर्वेण पाप्मना वि यक्ष्मेण समायुषा ॥ [अ. सं.३.३१.५]

अत्र त्वष्टा वहतुं युनक्ति । इति कृत्वा इदं विश्वं भुवनं वि याति (न तु समेति)। अहोरात्रयोः तमस्तेजसोः, द्यावापृथिव्योः तमस्तेजसोरत्र परस्परस्मात् पृथग्भावः । यत उत्तरार्धर्चे आत्मनः पापाद् व्याधेश्च मुक्तिः, आयुषा च संगमः प्रार्थ्यते ।

मानवो यदि त्वष्टुर्दुहितृत्वेन आत्मनः शरीरं मन्येत तर्हि स्वयं त्वष्टा तस्या दुहितुः पत्या (आत्मना जीवेन) सह संगमाय वहतुं युञ्ज्यात् । एवं सति पापस्य व्याधेश्च शमनेन शरीरस्य नूतनं रूपं, दिव्येन ज्योतिषाऽऽयुषो वृद्धिश्च भवति । त्वष्टुर्दुहिता स्वयम् अश्विनोः रथम् आरोहति पत्या सङ्गमाय । अतोऽश्विनोर्जन्म-काले रोगशमनार्थम् आयुषो वृद्ध्यर्थं च अश्विनौ स्तोतव्यौ यष्टव्यौ च भवतः ।

पृथिवी भूमिः माता मानवश्च तस्याः पुत्रः । माता पुत्रं पयः पाययति ।

परन्तु पुत्रेण माता भक्त्या सेवनीया भवति। यो मातरं नोपयाति, यो मातुर्दूरे तिष्ठति स कथं पयो लभेत। अतो मातृभूतायाः भूमेः स्वरूपं वेदः बोधयति।

भूमिरियम् अश्विभ्यां मिता। "इमे हि वै द्यावापृथवी प्रत्यक्षमश्विनौ" [शत. ब्रा. ४. १. ५. १६] इति श्रुत्या भूमिः अश्विभ्यां व्याप्ता, परिच्छिन्ना। अस्याः भूमेस्त्रेधा विभागः कृतोऽस्ति विष्णुना विक्रमणेन। इयं भूमिश्च इन्द्रेण आत्मसात् कृताऽस्ति। इन्द्रेणेयं भूमिरसपत्ना, निर्द्वेषा कृताऽस्ति। ईदृग् इयं भूमिः पुत्राय पयः सृजति।

एवमश्विनोर्व्याप्तिं, विष्णोर्विक्रमणम्, इन्द्रस्य बलं च आदाय मानवो भूमिं पयो दुहीत।

> याम् अश्विनावमिमातां विष्णुर्यस्यां विचक्रमे।
> इन्द्रो यां चक्र आत्मनेऽनमित्रां शचीपतिः।

सा नो भूमिर्विसृजतां माता पुत्राय मे पयः॥ [अ. सं. १२. १. १०]। तु. [ऋ. सं. ८. ९. १२]।

भैषज्यम् आभिचारिकं च।

(१) तृषार्तस्य रोगोपशमनम्।

सूर्योदयकाले व्याधितं पुरुषम् अव्याधितेन पुरुषेण सह एकासने उपवेशयन्ति। व्याधिताव्याधितौ पुरुषाभ्यां परस्परसंहितौ भवतः यथा प्रातरहोरात्रौ। तत्र प्राङ्मुखं व्याधितं प्रत्यङ्मुखं चाव्याधितम् उपवेशयन्ति।

अत्र व्याधिताव्याधितौ अश्विनोर्देवभिषजोः रूपं मायया परिधाय मन्थं पिबतः। तेन तृषार्तस्य रोगः शाम्यति, तस्याऽऽयुर्वर्धते, सोमनसोऽनुगतश्च स भवति।

पार्थिवस्येति सूक्तेन तृषार्तभैषज्यकर्मणि सूर्योदयकाले सूक्तप्रकारेण [कौ. सू. २७. ९-१३] व्याधितमुपवेश्य मथितं सक्तूदकमभिमन्त्र्य पाययेत्। [सायणः-अ. सं. २. २९]। तथार्थर्चः—

सवासिनौ पिबतां मन्थमेतम् अश्विनो रूपं परिधाय मायाम् [अ.सं.२.२९.६]।

सवासिनौ। समानमेकं वस्त्रं वसानौ, समानम् एकत्र वसन्तौ वा। वस आच्छादने, निवासे। "व्रते" [पा. ३. २. ८०] इति ताच्छील्ये णिनिः।

अनेन कर्मणा व्याधितस्य तृष्णाम् अव्याधिते संनयन्ति।

अनेन अश्विनोः साहचर्यं, सहवासः, समानरूपता, धर्मभेदः सख्यभावश्च प्रतीयते।

(२) वशीकरणम्।

कामिनीमनोऽभिमुखीकरणेऽश्विदेवताका एका ऋक् श्रूयते, यत्र कामी

कामनाविषयसंभूतायाः स्त्रियाः स्वसमीपानयनम् अश्विनौ प्रार्थ्यते । अश्विनौः भाग्यानां, ज्ञानानां, कर्मणां च संगतिमपि प्रार्थ्यते [अ. सं. २. ३०. २]

(३) पत्न्या आनुकूल्यम् ।

पत्न्या मनो यथा आत्मनि वश्यम् अनुरक्तं च भवति तथाऽश्विनौ पतिः प्रार्थ्यते ।

अस्मिन् "अभिसांमनस्ये" कर्मणि पतिः पत्न्या मनः रज्ज्वाकृष्टम् अश्वमिव, वात्यागतं तृणमिव खिन्नं चिकीर्षति [अ. सं. ६. १०२. २] ।

(४) जायावहनम् ।

येन पथा पतिकामां सूर्यां सावित्रीम् अश्विनावूहतुः तेन पथा पुरुषः स्वजायाम् आवहेत् इति भगो (देवः) ब्रूते । जायाकामिने इन्द्रो जायां तेन पथा आदधातु, हिरण्मयेन, धनदेन अंकुशेन ।

"येन सूर्यां सावित्रीमश्विनोहतुः पथा ।

तेन माम् अब्रवीद् भगो जायाम् आवहताद् इति ॥

यस्तेऽङ्कुशो वसुदानो बृहन्निन्द्र हिरण्ययः ।

तेना जनीयते जायां मह्यं धेहि शचीपते ॥" [अ. सं. ६. ८२. २-३] ।

(५) स्वराज्ये राज्ञः पुनः स्थापनम् ।

प्रच्युतं राजानं पुनः स्वराज्यं प्रापयतोऽश्विनौ । परराष्ट्रे शत्रुभिर्निरुद्धं तत्र वर्तमानम्, अत एव ह्वातव्यं तं राजानं श्येनः (शंसनीयगतिः द्युस्थानो देवः) परराष्ट्रादानीय स्वराष्ट्रं प्रापयतु ।

तत्र अश्विनौ आगमनमार्गं सुखेन गन्तुं योग्यं कुरुताम् । समानजन्मानो बान्धवो स्वराष्ट्रं सुखं प्रविष्टं राजानम् अभिमुखं गत्वा सेवन्ताम् ।

श्येनो हव्यं नयत्वापरस्मादन्यक्षेत्रे अपरुद्धं चरन्तम् ।

अश्विना पन्थां कृणुतां सुगं त इमं सजाता अभिसंविशध्वम् ॥ [अ.सं.३.३.४] ।

ऋक्संहितायां काक्षीवते आर्षे—

शत्रुभिः परिवृतं जाहुषं शत्रुसमूहान्निर्गमय्य पर्वतानां विभेदकेन रथेन रञ्जकैर्मार्गैः नासत्यौ अश्विनौ एकया रात्र्या ऊहतुः (तस्य राष्ट्रम्) आत्मनोऽजराम् इच्छन्तौ । [ऋ. सं. १. ११६. २०] ।

अश्विनौ राज्ञः स्वराष्ट्रप्रत्यागमने पन्थानं कुरुतः । अत्र मार्गस्त्रेधा विभक्तः । एकैकस्य भागस्य पृथग् अभिमानी देवोऽपि विद्यते । परन्तु त्रिष्वपि भागेषु पन्थानमश्विनौ कुरुतः ।

अद्भ्यस्त्वा राजा वरुणो ह्वयतु सोमस्त्वा ह्वयतु पर्वतेभ्यः ।

इन्द्रस्त्वा ह्वयतु विड्भ्य आभ्यः श्येनो भूत्वा विश आ पतेमाः ॥

[अ. सं. ३. ३. ३] ।

आभ्यो विड्भ्य इमा दिशः श्येन इव पत । परराष्ट्रात् स्वराष्ट्रम् आगच्छ शंसनीयगमनः सन् । आपः, पर्वताः, दिशः अत्र अतिक्रान्तव्याः । तत्तत्स्थाने तत्तदभिमानी राजानम् आह्वयति । परन्तु सर्वं देशमतिक्रम्य अश्विनावेव तं स्वराष्ट्रं प्रापयतः ।

यदा इत्थं परराष्ट्रात् स्वराष्ट्रं प्रापितो भवति राजा तदा अश्विनौ तमपि स्वीकुरुतः ।

अश्विना त्वाग्रे मित्रावरुणोभा विश्वे देवा मरुतस्त्वा ह्वयन्तु [अ.सं.३.४.४] ।

अश्विनोरवनम् ।

(१) कृषिरक्षणम् ।

बृहस्पतिराशुगत्वर्थं वाताय मणिम् अबध्नात् । हिरण्यस्रजमयं मणिः श्रद्धां, यज्ञं, महः (अन्नम्, उदकं वा) दधत् अतिथिर्भूत्वा गृहे वसतु । अयं मणिः फालः (क्षेत्रविदारकः) घृतश्चुत् च । इमं मणिं प्रतिमुच्य सूर्यो दिवःअजयत् ।

अयं मणिरश्विभ्यां पयो दोग्धि । अनेन मणिना उत्तरोत्तरं भानूनां वर्षो भवति । अनेन मणिनाऽश्विनौ कृषिं रक्षताम् । [अ.सं.१०.६.४; ५; ९; १२] ।

(२) धान्यरक्षणम् ।

आसमन्तात् खनन्तं, बिलं संप्रविश्य गच्छन्तं हिंसकम् आखुम् अश्विनौ नाशयताम् । आखोः शिरः तौ द्विधा कुरुताम्, तस्य पार्श्वास्थीनि च चूर्णयताम् । तस्य मुखमपि तौ पिनद्धं कुरुतां येन स धान्यं न भक्षयेत् । [अ.सं.६.५०.१] ।

(३) भर्गस्वती (दीप्तिमती) वाक् ।

सारघेण मधुना यदा अश्विनौ अङ्क्तः तदा पुरुषो "भर्गस्वती" दीप्तिमतीं वाचं जनान् अनु वदति । सरघाभिः (मक्षिकाभिः) संचीयते पुष्पौषधि-वनस्पतिभ्यः इति सारघं (मधु) । अश्विनावप्येवं मधु संचिनुतः । अत एव तयोः रथो मधुपूर्णो दृतिर्विराजते । [ऋ. सं. ४. ४५. १] ।

१. पर्वते वीरभटानां जयघोषे, हिरण्ये, गोषु यद् यशः ।

२. सुरायाम् अन्ने च यो रसः ।

३. यज्ञस्य या दीप्तिः, यद् यशः, यच्च फलम् ।

एतानि त्रीणि अश्विनोर्मधु भवन्ति ।

पौरुषेण, भौतिकसम्पत्त्या, यज्ञकर्मणा च यद् यशः, यो रसः, या दीप्तिश्च भवति तानि त्रीणि अश्विनौ मधु संचिनुतः । अनेन मधुना यदाश्विनौ पुरुषं स्वयम् अङ्क्तः तदा पुरुषो भर्गस्वतीं वाचं जनान् अनु आ वदति ।

[अ. सं. ६. ६९. १–३] ।

(४) आयुर्वर्धनम् ।

हे अग्ने ! देवानां भिषजावश्विनौ अस्मद् मृत्युमपाकुरुताम् । प्राणापानौ शरीरं मा त्यक्ताम् । शरीरं संक्रम्य सयुजौ इह स्ताम् । अनड्वाहौ व्रजमिव प्राणापानौ शरीरं प्रविशताम् ।

"प्रत्यौहताम् अश्विना मृत्युमस्मद् देवानामग्ने भिषजा शचीभिः ।"

शचीभिर्भिषजावश्विनौ मृत्युं वारयतः । शरीरस्य स्वास्थ्यं प्राणापानयोः सुयुक्त्वमपेक्षते । प्राणापानयोः सम्यक् संचारणेनाऽश्विनौ शरीरं रक्षतः । शरीरे सप्तर्षयः प्राणं स्वस्ति वहन्ति । [अ. सं. ७. ५३ (५५). १; २; ४; ५] ।

अश्विनौ प्राणापानाभ्यां यथा शरीरं धारयतः[1] तथा ऋग्वर्णाः—

१. आत्मेव वातः स्वसराणि गच्छतम् । [ऋ. सं. १. ३४. ७] ।

२. नासेव नस्तन्वो रक्षितारा । [ऋ सं. २. ३९. ६] ।

३. मधुमन्मे परायणं मधुमत् पुनरायनम् [ऋ. सं. १०. २४. ६] ।

[द्र. अ. सं. १. ३४. ३] ।

मधुकशा ।। [अ. सं ९. १] ।

अश्विनौ अश्ववन्तौ । तयोरश्वताडनी कशा मधुमयी मधुकशा इत्युच्यते यया कशया तौ यज्ञं मधुना सिञ्चतः [ऋ. सं. १. २ . ३; १. ३४. ३] ।

अथर्वसंहितायां नवमे काण्डे प्रथमे सूक्ते मधु च मधुकशा च प्रतिपाद्येते ।

स्थूलदृष्ट्या अग्नेस्तापेन वातस्य वीर्येण च मधुकशा जायते, या जाता मरुतां (सप्तानां मरुद्गणानाम्) अथवा सूर्यस्य सप्तरश्मीनां नप्तिः योजिका भवति । मरुतः मधुकशया युक्ता भवन्ति । [मन्त्रः ३] ।

सूक्ष्मदृष्ट्या मधुकशाया उपादानं पञ्च भवन्ति—१. दिवो ज्योतिः । २. पृथिव्या रसः । ३. अन्तरिक्षस्य पयः । ४. अग्नेः तापः । ५. वातस्य वीर्यम् । एतेभ्यः पञ्चभ्यो देवा मधुकशां जनयन्ति । [मन्त्रः १; ५] ।

विविधेभ्यः स्थानेभ्यः, विविधेन रूपेण जायमानं मधु अश्विनौ स्वदुतौ संभरतः । "माध्वी" अश्विनौ यदाऽनेन मधुना पुरुषम् अङ्क्तः, तदा पुरुषे वर्चः, तेजः, बलम्, ओजश्च तौ धत्तः ।

अस्य मधुनोऽधिदैवं रूपं मेघे, अध्यात्मं रूपं कोशपञ्चके, उच्चार्यमाणायां वैखर्यां वाचि वा ज्ञातुं शक्यते ।

1—प्राण मा मत् पर्यावृतो न मदन्यो भविष्यसि ।
अपां गर्भमिव जीवसे प्राण बध्नामि त्वा मयि ॥ [अ. सं. ११. ४. २६] ।

अथाधिदैवम् । अत्र मेघो मधुकशा ।

१. पृथिवि दण्डः	पृथिवीम् आश्रित्य मेघो वहति ।
२. अन्तरिक्षं गर्भः	गर्भभूतोऽन्तरिक्षे शेते ।
३. द्यौः कशा	आदित्यस्य किरणैः तस्य रूपं धीयते ।
४. विद्युत् प्रकाशः	अशनिना मेघोदरजलं प्रकाश्यते ।
५. हिरण्ययो बिन्दुः	सोमस्य (चन्द्रमसः) रसेन मिश्रितत्वात् मेघबिन्दुः
[अ. सं. ९.१.२१]	(वृष्टिजलं) हिरण्मयो भवति ।

अथाध्यात्मम् । अत्र कोशपञ्चकं मधुकशा ।

१. दण्डः	अन्नमयः कोशः ।
२. गर्भः	प्राणमयः कोशः ।
३. कशा	मनोमयः कोशः ।
४. प्रकाशः	विज्ञानमयः कोशः ।
५. बिन्दुः	आनन्दमयः कोशः ।

अथवात्र वाक् मधुकशा ।

१. पृथिवी दण्डः	शरीरम् ।
२. अन्तरिक्षं गर्भः	प्राणः ।
३. द्यौः कशा	ध्वनियन्त्रम्, विशेषतः आस्यप्रयत्नम् ।[1]
४. विद्युत् प्रकाशः	वाच उच्चारणम् अथवा ध्वनिः ।
५. हिरण्ययो बिन्दुः	शोणितरङ्गैः प्रवहन् शब्दः । ज्ञानम् ।
	सोमबिन्दवः ।[2]

सप्तमधूनि श्रूयन्ते—

यो वै कशायाः सप्त मधूनि वेद मधुमान् भवति ।

ब्राह्मणश्च,राजा च धेनुश्चानड्वांश्च व्रीहिश्च यवश्च मधु सप्तमम् ॥
[अ. सं. ९.१.२२][3]

१—आस्यं च प्रयत्नश्च आस्यप्रयत्नम् । [महाभाष्यम्—पा. १. १. ९] ।

२—वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते । [वाक्य-प्र. का. १०८] ।

पावमानीर्यो अध्येत्यृषिभिः संभृतं रसम् ।
तस्मै सरस्वती दुहे क्षीरं सर्पिर्मधूदकम् ॥ [ऋ. सं. ९. ६७. ३२] ।

३—तेजः पशूनाᳫं हविरिन्द्रियावत् परिस्रुता पयसा सारघं मधु ।
अश्विभ्यां दुग्धं भिषजा सरस्वत्या सुतासुताभ्याम् अमृतः सोम इन्दुः ॥
[वा. सं. १९.९५]

सप्त मधूनि तानि—

१ ब्राह्मणः मुखं ज्ञानम्
२ राजा बाहू क्षत्रं बलम् ।
३ धेनुः वैश्यः । अथवा वाक् ।
४ अनड्वान् शूद्रः । अथवा मनः ।
५–६ व्रीहियवौ प्राणापानौ ।
७ मधु "यशो ह वै मधु सारघम्" [शत. ब्रा.३.४.३.१४]

"अयमात्मा सर्वेषां भूतानां मधु, अस्यात्मनः सर्वाणि भूतानि मधु ।" [बृहद् आ. उ. २. ५. १४]

पूष्णः पितरौ अश्विनौ ।

सूर्यायाः विवाहप्रसङ्गे द्वे ऋचौ श्रूयेते ऋक्संहितायां तथाऽथर्वसंहितायाम् ।

ऋक् सं. १०.८५.१४–१५	अथर्व सं. १४.१.१४–१५
१४ यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः । विश्वे देवा अनु तद् वामजानन् पुत्रः पितराववृणीत पूषा ॥	१४ यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः । क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः ॥
१५ यदयातं शुभस्पती वरेयं सूर्यामुप । क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः ॥	१५ यदयातं शुभस्पती वरेयं सूर्यामुप । विश्वे देवा अनु तद् वामजानन् पुत्रः पितरम् अवृणीत पूषा ॥

अत्र उत्तरार्धर्चस्य पौर्वापर्यं विपर्यस्तं दृश्यते । ऋग्वेदस्य प्रथममन्त्रस्य उत्तरोऽर्धर्चः, अथर्ववेदे द्वितीयमन्त्रस्योत्तरोऽर्धर्चो भवति । एवम् ऋग्वेदस्य द्वितीयमन्त्रस्य उत्तरोऽर्धर्चः, अथर्ववेदे प्रथममन्त्रस्योत्तरोऽर्धर्चो भवति । किमत्र वैपर्यासे मूलम् ?

अपि च ऋग्वेदे "पितरौ" इति द्विवचनम् ।

अथर्ववेदे "पितरम्" इत्येकवचनम् ।

एतच्च कथं संगच्छते ?

अत्रैवं समाधीयते ।

अथर्ववेदो ब्रह्मवेदः । अत आध्यात्मिकं तत्त्वमत्र भूयो विराजति । अत एव 'पितरम्" इत्येकवचनेनाऽश्विनोः सूर्ये लयः प्रतीयते ।

अश्विनोरेको मध्यमः सुमखस्य सूरिर्जिष्णुः, अन्यो दिवः सुभगः पुत्र आदित्यः ।

ऋग्वेदे पूर्वं पूषा "पितरौ" अवृणीत । तदा उभावश्विनौ समानरथारूढावपि शरीरभेदेन पृथग्भूतौ । अधुना तयोस्तादात्म्यम् ऐकात्म्यं यावद् नैव जातम् । अतः "पितरौ" इति द्विवचनम् । इदानीं रथस्य त्रीणि चक्राणि, त्रयो रथारूढाः, उभावश्विनौ उषाश्च ।

द्वितीयस्यामृचि [ऋग्वेदे] अश्विनौ सूर्यं कन्यार्थम् आत्मनो दानाय प्रक्रान्तौ । तदानीं त्रयाणां चक्राणामेकस्याऽदृश्यमानतया "क्वैकं चक्रम्" इति जिज्ञासा ।

अथर्ववेदे त्रिचक्रस्य रथस्यैकं चक्रं पूर्वमेवाऽदृश्यं भवति । पश्चादेव अश्विनौ पूषा पितृत्वेन वृणीते । तदानीं तादात्म्यस्य, ऐकात्म्यस्य, क्रमस्य प्रक्रान्ततया "पितरम्" इत्येकवचनम् ।

—:०:—

पञ्चमोऽध्यायः

अथ निरुक्तेऽश्विनोः प्रतिपत्तिः

यास्को वेदाङ्गभूते निरुक्ते द्वादशोऽध्याये प्रथमे पादेऽश्विनोर्लक्षणं, स्वरूपं, कालं, जन्म, तयोः कालेऽन्या देवताश्च संक्षेपे निर्दिशति ।

सविता रात्रेर्गर्भात् सर्वान् देवान् प्रसुवतीव । तत्राश्विनोः प्रथमं जायमानत्वात्, तयोर्ज्येष्ठत्वात्, इतरेषां देवानामन्नस्य ज्योतिषश्चोत्पादने तयोरेव कर्तव्यं खलु इति कृत्वा तयोर्लक्षणं करोति–''अश्विनौ यद् व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्यः'' इति । एवं रसज्योतिर्भ्याम् उभयोः पार्थक्यं प्रदर्श्य—''वासात्योऽन्य उच्यत उषःपुत्रस्त्वान्यः''[1] इति निगमयति । एको रात्रेः पुत्रोऽन्य उषसः । रात्रौ रसदानाद्, उषसा ज्योतिषः प्रादुर्भावाच्च तयोः पुत्रौ तौ ।

अतस्तयोः काल आ मध्यरात्रात् आसूर्योदयम् । ''तयोः काल ऊर्ध्वम् अर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम् । अनुत्तमोभागो[2] हि मध्यमः । ज्योतिर्भाग आदित्यः ।'' [निरु. १२. १] ।

समानकालयोरश्विनोरत्र पार्थक्यं प्रतिपाद्यते, येन तयोः द्वित्वं युग्मता प्रतीतं भवति । तथाहि तयोरेको मध्यमः, अन्य आदित्यः । तत्र मध्यमोऽनुत्तमोभागः । न उद्गतं तमो यस्मात् स भागः अनुत्तमाः । अनुत्तमा भागो यस्य सः अनुत्तमोभागः ।समस्तं पदमिदं, बहुव्रीहिरत्र समासः, यथा ज्योतिर्भागः इत्यत्र बहुव्रीहिः ।

एवं मध्यमे तमसो भूयस्त्वं, दिवः पुत्रे आदित्ये ज्योतिषो भूयस्त्वम् ।

एवंभूतयोरश्विनोरागमनमृचा वर्ण्यते—

वसातिषु स्म चरथोऽसितौ पेत्वाविव ।
कदेदमश्विना युवम् अभिदेवाँ अगच्छतम् ॥ [निरु. १२. २]

अतिरात्रे क्रतौ आश्विनशस्त्रं समाप्य संधिस्तोत्रकाले, (बहिष्पवमानस्तोत्रकाले[3] वा), रात्रिपर्यायेषु चरन्तौ अश्विनौ तदानीं कृष्णवर्णौ मेषौ इव दृष्ट्वा ऋषिः अश्विनौ पृच्छति देवान् अभिलक्ष्य युवां कदा आगतवन्तौ इति ।

युग्मम् अश्विनौ, अतस्तयोः समाना स्तुतिः तौ एकरथारूढौ च । तथाप्यत्र

१—उषःपुत्रस्त्वन्यः [लक्ष्मणस्वरूपः] ।

२—अनुत्तमोभागो हि मध्यमः [लक्ष्मणस्वरूपः] ।

३—बहिष्पवमाने स्तुते तयोर्ग्रहो गृह्यते [श. ब्रा. ४. १. ५. १५] ।

तयोर्नानात्वेन, असंस्तवेन (परस्परमपरिचितभावेन) स्तुतिः । "तयोः समान-कालयोः समानकर्मणोः संस्तुतप्राययोरसंस्तवेनैषोऽर्धर्चो भवति ।" [निरु.१२. १]।

अन्यत्राप्येवमसंस्तवेन स्तुतिर्भवति । यथा—"इहेह जाता······।

जिष्णुर्वामन्यः सुमखस्य सूरिर्दिवो अन्यः सुभगः पुत्र ऊहे ॥"

[ऋ. सं. १. १८१. ४]

तयोः कालः सूर्योदयपर्यन्तः । तस्मिन्नन्या देवता ओप्यन्ते [निरु. १२.५] ।

अस्मिन् आश्विने काले—अश्विनौ, उषाः, सूर्या, वृषाकपायी, सरण्यूः,[1] सविता, भगः, सूर्यः—इत्यानुपूर्वी देवतानाम् आवापे ।

तत्र अरुण्यो गाव उषसः । उदीयमानस्य सूर्यस्य प्रज्ञापकः केतुरिव इमे गावः ।

"एता उ त्या उषसः केतुमक्रत" [ऋ. सं. १. ९२. १]।

उषा एव उदयकालं प्रति अभिसृष्टा सूर्या भवति । "सूर्या सूर्यस्य पत्नी । एषैव । अभिसृष्टकालतमा ।" [निरु. १२. ७] ।

उदयकाले भूयोऽभिसृष्टा सूर्यैव वृषाकपायी भवति । "वृषाकपायी—वृषाकपेः पत्नी । एषैव । अभिसृष्टकालतमा ।" [निरु. १२. ८] ।

अवश्यायान् रश्मीन् वा वर्षन् क्षितिजं प्राप्नुवन् उदीयमानः सूर्य एवात्र वृषाकपिः । वृषाकपाय्या ऊर्ध्वं सरण्यूः ओप्यते ।

अथ अश्विनौ सरण्य्वां विवस्वतो जायेते इति सप्रमाणं प्रतिपाद्यते यास्केन ।

सूर्यं प्रति सरणात्सरण्यूः । त्वष्टुः पुत्री सरण्यूः विवस्वतो यमं यमीं च जनयामास । ततः सवर्णामन्यां तत्र स्वप्रतिनिधिं निधायाऽश्वं रूपं कृत्वा अप-चक्राम सा । विवस्वान् सवर्णायां मनु जनयित्वा सरण्युमन्विष्यन् आश्वमेव रूपं कृत्वाऽश्वाकृतां सरण्यूं समेत्याऽश्विनौ जनयामास । अश्वरूपाभ्यां मातापितृभ्यां जातौ अश्विनौ इति ऐतिहासिकं मतं प्रस्तुवन् तत्समर्थनाय ऋग्द्वयं [ऋ. सं. १०. १७. १–२] च उद्धरति यास्कः ।

"अत्रेतिहासमाचक्षते—त्वाष्ट्री सरण्यूर्विवस्वत आदित्याद् यमौ मिथुनौ जनयांचकार । सा सवर्णामन्यां प्रतिनिधायाश्वं रूपं कृत्वा प्रदुद्राव । स विवस्वान् आदित्य आश्वमेव रूपं कृत्वा ताम् अनुसृत्य संबभूव । ततोऽश्विनौ जज्ञाते । सवर्णायां मनुः ।" [निरु. १२. १०]।

उषाः सूर्यस्य पत्नी बुभूषन्ती, अश्विभ्यां सूर्याभिमुखं नीयमाना सरणात्

१—तत्र सरण्व्वा सह निरुक्ते प्रथमः पादः [१२. १] समाप्यते । अश्विनोः सरण्यूजातत्वात् तस्या एवात्र अश्विनोर्जन्मविषयेण विचारः क्रियते ।

सरण्युर्भवति । सा च सरण्युः आत्मा त्रिशिरसा[1] युक्ता यद् दीप्यते तदेव सूर्यस्य जन्म । तत्र दीप्त्या सरन्ती सरण्यूर्वर्णयुक्ता "सवर्णा" भवति । अयमेव "कृत्वी सवर्णाम् अददुर्विवस्वते" [१०. १७. २] इत्यृगंशस्य आशयः । यदा एतद् भवति तदाऽश्विनोः प्रारब्धं कर्म विश्वस्यैकस्मिन्नर्थे पर्यवस्यति । अत एव श्रूयते तस्यामृचि "उताश्विनावभरद् यत् तद् आसीत्" इति । अभरत् इति पदस्यार्थं न करोति यास्कः । केवलं मन्त्रार्थविवरणार्थम् ऐतिहासिकम् आख्यानम् प्रस्तौति, यत्र "उताऽश्विनौ जज्ञाते" इति प्रतिपाद्यते ।

यदा तद् जायापतिभ्याम् अश्वरूपात्मना संभोगकाले रेतः पतितमासीत् तदाऽश्विनौ जनयामासेत्यर्थः । [सायणः]–[ऋ. सं. १०. १७. २]

अभरत् । भृञ् भरणे डुभृञ् धारणपोषणयोः । भरणं (हृ-हरणं)-भरणं धारणं, पोषणम् , इत्यर्थोऽत्र संगच्छते । सूर्यस्य उदयेन पृथिव्या एकस्मिन् पार्श्वे, भृतौ पुष्टौ भवतोऽश्विनौ, कर्मसमाप्त्या मण्डलरूपेण तयोर्दृश्यमानत्वात् । पृथिव्या अपरस्मिन् पार्श्वे, यत्र सूर्योऽस्तं गतः तत्र तयोर्धारणं भवति पुनस्तत्र सूर्यस्य उदयार्थम् । एतस्मिन् पोषणधारणकाले सरण्यूर्द्वौ मिथुनौ अजहात् । अत्र मिथुनौ ऐतिहासिकानां मते यमयम्यौ । अहोरात्रभूतयोर्यमयम्योरेवेतिहासः [इति-ह-आस] भवति, तयोरानुपूर्व्या चक्रवत्प्रवर्तनात् ।

मध्यमं च माध्यमिकां च वाचमिति नैरुक्ताः । [निरु. १२. १०] । मध्यमो वायुः सुमध्यस्य सूरिः । मध्यमे भवा माध्यमिका वाक् विद्युत् स्तनयित्नुः । वागत्र भूतसृष्टेरुपलक्षणम् ।

"अश्विनौ व्यात्तम्" [वा. सं. २१. २२] इति श्रुत्या सृष्टेः प्रारम्भतोऽश्विनोः प्रवृत्तिरुपकल्प्यते । एवं सति दिवं पृथिवीं चान्तरा यथा अश्विनोः रथः प्रवर्तते तथा दिवः परस्ताद् अपि अश्विनोः अपरं रूपं कल्पनीयं भवति[2] । विवस्वतोऽश्विनौ जातौ परन्तु साक्षान्न विवस्वतो रूपात् । अत्र हेतुः कः ? सरण्य्वाः विवस्वतश्च अश्वरूपधारणे को हेतुः । अपि च सरण्यूः विवस्वांश्च कुतो जातौ ? अत्रैवं प्रतिपाद्यते ।

"त्वष्टा रूपाणि पिंशतु" [ऋ. सं.१०.१८४. १] । विश्वस्य उभयोरर्धयोः सूर्यस्य अधस्तात् तथा उपरि सर्वाणि रूपाणि त्वष्टृकृतानि । रूपसर्जनार्थं दुहितुः

१—त्रिशिराः [ऋ. १०. ८. ८.]

"अभवन् मिथुनं त्वष्टुः सरण्यूस्त्रिशिराः सह ।" [बृ. दे. ६. १६२]

२—"या रोचने परस्तात् सूर्यस्य याश्चावस्ताद् उपतिष्ठन्त आपः ।"

[वा. स. १२. ४९] ।

सरण्यूवाः सरणमपेक्ष्यते । परन्तु मर्त्यलोकेऽमृता सरण्यूर्नैव द्रष्टुं शक्यते । अतः—
“अपागूहन्नमृतां मर्त्येभ्यः, कृत्वी सवर्णाम् अददुर्विवस्वते” ऋ.सं. १०.१७.२ ।

इत्यत्रैतिहासिकमतं “सवर्णायां मनुः (जज्ञे)” इति । मनुरत्र सूर्य एव । यदा सरण्यूः सवर्णायां मनुं (सूर्यं) जनयामास, तदा सूर्यतेजसा विक्लिन्ना साऽश्वः प्रससार । इदं प्रसरणमेव तस्या आश्वं रूपम्[1] । विवस्वान् सूर्यः स्वपत्नी-मन्विष्यन् आश्वमेव रूपं धृत्वा तामुपसृत्य तया संबभूव, येन अश्विनौ जज्ञाते रोदस्याम् (द्यावापृथिव्योरन्तरा)[2] ।

विवस्वत्सरण्योः आश्वरूपधारणं न क्वापि श्रूयते । “महो जाया विवस्वतो ननाश” [ऋ. सं. १०. १७. १] इति श्रुतिः । यास्कोऽत्र जायां रात्रिं मनुते “रात्रिरादित्यस्य आदित्योदयेऽन्तर्धीयते” इति । [निरु. १२. ११]

“पर्युह्यमाना विवस्वता उह्योढव्या, यमस्य यम्याश्च माता, महतो विवस्वतो जाया भार्या सरण्यूः ननाश उत्तरान् कुरून् प्रति नष्टाऽगच्छद् इत्यर्थः” इति सायणः [ऋ. सं. १०. १७. १] ।

अश्विनौ दिव उपरि अवसथ । अत एव सरणवत्या सरण्यूवा तौ उदरे न धृतौ । पतितं शुक्रम् आघ्राय तौ जनयामास । एवं नासिकाप्रभवत्वात्तौ नासत्यौ[3] । यथा नासिकाभ्याम् उच्छ्वासनिःश्वासौ भवतः, तथा दिवमभितोऽश्विनौ प्राणितः तौ व्यश्नुवाते उभयत ।

अन्तश्चरति रोचनाऽस्य प्राणादपानती । व्यख्यन् महिषो दिवम् ॥
[ऋ. सं. १०. १८९. २]

१—अश्वः । “वरुणो ह वै सोमस्य राज्ञोऽभीवाऽक्षि प्रतिपिपेष तदश्वयत् ततोऽश्वः समभवत् तद् यच्छ्वयथात् समभवत् तस्माद् अश्वो नाम ।” [श. ब्रा. ४. २. १. ११]

“अथ यदश्रु संक्षरितमासीत् सोऽश्रुरभवत् । अश्रुर्ह वैतम् अश्व इत्याचक्षते परोक्षं परोक्षकामा हि देवाः ।” [श. ब्रा. ६. १. १. ११]

२—ऋभुभिरश्विनोः रथः तष्टः । एकस्यामृचि श्रूयते यतोऽश्विनावेव ततक्षुः । “ये अश्विना ये पितरा य ऊती धेनुं ततक्षुर्ऋभवो ये अश्वा ।” [ऋ. सं. ४. ३४. ९]

द्र. आत्मैवैषां रथो भवति, आत्मा अश्वः, आत्मा आयुधम् , आत्मा इषवः, आत्मा सर्वं देवस्य देवस्य । [निरु. ७. ४.]

३—नासत्यौ । सत्यौ एव नासत्यौ इत्यौर्णवाभः । सत्यस्य प्रणेतारौ इत्याग्रायणः । नासिकाप्रभवौ बभूवतुरिति वा । [निरु. ६. १३]

अश्ववन्तौ अश्विनौ । अश्नोतेरश्वः । नित्ययोगे मत्वर्थे इनिप्रत्ययः । सततगामी वायुः, य एव सोमं पूर्वं पिबति । रोदस्यां सूर्यरश्मीनां तापेन प्रसरन्ती सरण्यूः वाय्वात्मना परिणमति । यज्ञविताने वेदिद्वयं भवति । एका ऐष्टिकवेदिरपरा महावेदिः या उत्तरवेदिरित्यप्युच्यते । तत्रोत्तरवेदिर्नासिकयोपमीयते ।

"नासिका ह वा एषा यज्ञस्य यदुत्तरवेदिः । अथ यद् एनामुत्तरां वेदेरुपकिरति तस्माद् उत्तरवेदिर्नाम ।" [शत. ब्रा. ३. ५. १. १२]

तत्र वेदेरुत्तरत्वमुन्नतत्वम् इति सायणः । "नासिकाया मुखप्रदेशाद् अपि समुच्छ्रितत्वात् उत्तरवेदेर्मृदोच्छ्रितता कर्तव्या·········वेदेः प्रागवयवभूतस्य प्रदेशस्योन्नततरत्वाद् उत्तरवेदिरिति नाम सम्पन्नम् ।" [सायणः]

उत्तरवेदिसंभूतत्वाद् एव तयोरमर्त्यतया, असत्यराहित्याच्च तयोः नासत्यौ इति संज्ञा । इतरेषां देवानां तयोरेव परिणामरूपता । इतरे त्रयस्त्रिंशद् देवास्तयोरेव सम्भूताः । अतः पुष्करस्रजौ[1] अश्विनौ एव असत्यरहितौ नासत्यौ ।

—:०:—

1—पुष्करस्रजौ [ऋ. सं. १०. १८४. २]
व्योम पुष्करमम्बरम् [अमरः १. २. १] व्योम्न्येव व्यापनं सर्जनं च ।

षष्ठोऽध्यायः

॥ अथ शौनकीयबृहद्देवतायाम् अश्विनौ ॥

मूर्त्तानि अमूर्त्तानि च सत्त्वानि वेदे ऋषिभिः स्तूयन्ते । तत्र स्तुत्येषु देवेषु अन्यतमत्वेनाश्विनौ परिगणितौ स्तः ।

यैस्त्वग्निरिन्द्रः सोमश्च वायुः सूर्यो बृहस्पतिः ।
चन्द्रोऽथ विष्णुः पर्जन्यः पूषा त्वष्टा भवोऽश्विनौ । १. ८२ ।
स्तुताः पृथक् पृथक् स्वैः स्वैः सूक्तैर्ऋग्भिश्च नामभिः ॥ १. ८५

बृ. दे. १. ८२–८५

शौनकीयमते सूर्यः प्रजापतिरेव सर्वस्य प्रभवः । त्रिषु लोकेषु त्रिधात्मानं विभज्यासौ तिष्ठति ।

भवद्भूतस्य भव्यस्य जङ्गमस्थावरस्य च ।
अस्यैके सूर्यमेवैकं प्रभवं प्रलयं विदुः । १. ६१ ।
असतश्च सतश्चैव योनिरेषा प्रजापतिः । १. ६२ ।
कृत्वैव हि त्रिधात्मानमेषु लोकेषु तिष्ठति ।
देवान् यथायथं सर्वान् निवेश्य स्वेषु रश्मिषु ॥ १. ६३ ॥
द्युस्थानदेवगणेऽश्विनोर्मुख्यत्वम् ॥
यः परस्तु गणः सौम्यो द्युस्थानस्तं निबोधत ॥ २. ७ ॥
तस्य मुख्यतमौ देवावश्विनौ सूर्यमाश्रितौ ।
वृषाकपायी सूर्योषाः सूर्यस्यैव तु पत्नयः ॥ २. ८ ॥
सर्वेषां नाम्नां प्रवृत्तिनिमित्तं कर्मैव—
यादृच्छिकं तु नामापि दीयते यत्र कुत्रचित् ।
औपम्यादपि तद् विद्याद् भावस्यैव हि कस्यचित् ॥ १. ३० ॥
नाकर्मकोऽस्ति भावो हि न नामास्ति निरर्थकम् ।
नान्यत्र भावान्नामानि तस्मात् सर्वाणि कर्मतः ॥ १. ३१ ॥

रसात्मकश्चन्द्रो ज्योतीरूपोऽग्निश्च स्थावरजङ्गमानां सर्वेषां मूर्त्तानां सृष्टौ उपादानभूतौ । तत्र रूपस्याऽऽधायकस्त्वष्टा । एतत्त्रितयं विना किमपि मूर्त्तद्रव्यं रूपं न धत्तेऽत एते त्रयः प्रजापतिना सूर्येणाधिष्ठिता भवन्ति ।

अश्विनौ द्युस्थानदेवगणेषु मुख्यौ[1] सूर्यमाश्रितौ च । तौ त्वष्टुर्दुहितरि सरण्य्वां विवस्वतोऽजायेताम् । त्वष्टा दिवि सोमस्य रक्षकः । सोमः सूर्येण द्रावितश्चन्द्ररूपं धत्ते । अस्य सोमस्योपलब्धिः मधुलाभाद् ऊर्ध्वं भवति । परं मधु च सूर्यो वेत्ति । तच्च मधु त्वष्टरि च स्थापितमस्ति ।

इदं परं मधु ब्रह्म । तेन कथं दध्यङ् दीपितः, कथं च दधीचोऽश्विनौ तद् ब्रह्म मधु प्रापतुः इत्येतत् शौनकेन प्रोच्यते ।

यः सहस्रतमो रश्मी रवेश्चन्द्रमुपाश्रितः ।
सोऽपि त्वष्टारमेवाग्निं परं चेह च यन्मधु ।। ३. १७ ।।
प्रादाद् ब्रह्मापि सुप्रीतः सुताय तदथर्वणः ।
स चाभवद् ऋषिस्तेन ब्रह्मणा दीप्तिमत्तरः ।। ३. १८ ।।
तमृषिं निषिषेधेन्द्रो मैवं वोचः क्वचिन्मधु । ३. १९ ।
आश्व्येन शिरसा तौ तु दध्यङ्ङाह यदश्विनौ ३. २२ ।
दधीचश्च शिरश्चाश्व्यं कृत्तं वज्रेण वज्रिणा ।
पपात सरसो मध्ये पर्वते शर्यणावति ।। ३. २३ ।।
तदद्भ्यस्तु समुत्थाय भूतेभ्यो विविधान् वरान् ।
प्रादाय युगपर्यन्तं तास्वेवाप्सु निमज्जति ।। ३. २४ ।।

सुमेरौ अस्तं गतः कुमेरौ उदेति सूर्यः । सोऽयमथर्वा । तस्य पुत्रो दध्यङ् सुमेरौ अस्तोत्तरं सांध्यं तेजः । इन्द्रो मण्डलमध्यवर्ती । सूर्येऽस्तं गते सति दध्यङ् आथर्वणो मधु ब्रह्म लभते । इन्द्रस्तं निषेधति अन्यस्मै मधुप्रवचनात् ।

अश्विनौ (सांध्यतेजसः प्रवर्तकौ) दधीचेऽश्व्यं शिरः (उषसं) प्रत्याधाय मधुविद्यां तस्माद् जगृहतुः । इन्द्र आगत्य तच्छिरश्छिनत्ति । तच्छिरः शर्यणावति सरसि पतति ।

सान्ध्यं तेजोपि मण्डलस्यैव । अतस्तस्य तेजसः प्रवर्तको निवर्तकश्चेन्द्र एव । अस्तोत्तरं मासद्वयं यावत् सान्ध्यं तेजः क्रमशः क्षयत् प्रवर्तते । तत् सान्ध्यं तेज एव मधु । तमसि विराजत् तेजो मधु । तस्य सर्वथा तमसि लये इन्द्रेण तस्य छेद इति वर्णनम् ।

१—प्रकारान्तरेणाऽपि अश्विनोः प्रामुख्यं प्रतीयते । केचन देवास्तथा प्रधाना यत्तयां देवतात्वं सूक्तभाजो न व्याहर्तुं शक्नुवन्ति । तेषु अन्यतमौ अश्विनौ ।

सावित्रसौम्याश्विनमारुतेषु ऐन्द्राग्नेये रौद्रसौर्यौषसेषु ।
आदावन्ते सूक्तमध्ये स्तुतास्तु न व्याप्नन्ति देवताः सूक्तभाजः ॥
[बृ. दे. ४. १९]

सप्तमोऽध्यायः

॥ ऐतरेये ब्राह्मणेऽश्विनौ ॥

अथैतरेयब्राह्मणगताः अश्विनोः सम्बद्धाः केचन विषया अत्र लिख्यन्ते ।

प्रातरनुवाकः ।

सप्तमेऽध्याये पञ्चमषष्ठसप्तमाष्टमैश्चतुर्भिः खण्डैः प्रातरनुवाकः प्रतिपाद्यते ।

सोमयागे यस्मिन् दिने सोमवल्ल्या रसं निष्कास्य त्रिषु सवनेषु सोमो रसो हूयते तद् सुत्यादिनमित्युच्यते । सुत्यादिने प्रातःकाले ये देवा यज्ञभूमिं गच्छन्ति ते "प्रातर्यावाणः" इत्युच्यन्ते ।

एते वाव देवाः प्रातर्यावाणो यदग्निरुषा अश्विनौ त एते सप्तभिः सप्तभिश्छन्दोभिरागच्छन्ति, इति । [ऐ. ब्रा. ७. ५] ।

प्रातरुच्यमानत्वाद् अस्य प्रातरनुवाकत्वम् । प्रातरनुवाकस्य देवानाम् आगमनार्थत्वात्, इतरेषां प्राणिनां शब्दश्रवणात् प्राक् प्रातरनुवाकोऽनुष्ठेयः । पक्षिणामारावतः प्राक् तत्र देवाः शंसनीयाः । अतः "पुरा शकुनिवादादनुब्रूयात्, इति ।" [ऐ. ब्रा. ७. ५] । प्रातरनुवाके त्रयो भागाः, प्रथम आग्नेयः, द्वितीयः उषस्यः; तृतीय आश्विनः । प्रथमं प्रातर्याव्णोऽग्नेः प्रीत्यर्थम् आग्नेयानि छन्दांसि शस्यन्ते । ततः प्रातर्याव्ण्या उषसः प्रीत्यर्थम् उषस्यानि छन्दांसि शस्यन्ते । ततः प्रातर्याव्णोरश्विनोः प्रीत्यर्थम् आश्विनानि छन्दांसि शस्यन्ते । तत्र प्रतिदेवतं सप्तसु छन्दःसु ऋचः शस्यन्ते । ता ऋच आश्वलायनेन श्रौतसूत्रे संगृहीताः सन्ति ।

"सप्ताऽऽग्नेयानि छन्दांस्यन्वाह । सप्त वै देवलोकाः ।" "सप्तोषस्यानि छन्दांस्यन्वाह । सप्त वै ग्राम्याः पशवः ।" "सप्ताऽऽश्विनानि छन्दांस्यन्वाह । सप्तधा वै वागवदत् । तावद् वै वागवदत् । सर्वस्यै वाचः, सर्वस्य ब्रह्मणः परिगृहीत्यै, इति ।" [ऐ. ब्रा. ७. ७] ।

एवं देवलोकस्य, पशुलोकस्य, सर्वासां वाचां च उपरि विजयो भवति अनेन प्रातरनुवाकशंसनेन ।

तत्र वाचः सप्तधात्वं सप्तभिश्छन्दोभिः, सप्तभिर्वा स्वरैः, सप्तभिर्वा विभक्तिभिः ।

"शिरो वा एतद् यज्ञस्य यत्प्रातरनुवाकः । प्राणापानावुपांश्वन्तर्यामौ ।" [ऐ. ब्रा. ८. २] । तस्मादध्वर्युणोपांश्वन्तर्यामग्रहयोर्हुतयोः सतो पश्चाद्धोता वाचं विसृजेत् ।

आश्विनं शस्त्रम् ।

सप्तदशेऽध्याये प्रथमैः पञ्चभिः खण्डैः इदं प्रतिपाद्यते ।

प्रजापतिः स्वस्या दुहितुः वहतुं (वरस्य पुरतो वहनीयं माङ्गल्यं) ऋक्सहस्रं प्रतिपेदे । तदेतद् ऋक्सहस्रं कस्य इति प्रतिपत्तिम् अकुर्वाणा देवास्तत्प्रतिपत्त्यर्थम् आजिम् अयुः । तेऽग्नेर्धावनं प्रारभ्य आदित्यं समापनस्यावधिं चक्रुः ।

यो न उज्जेष्यति तस्येदं भविष्यतीति तेऽग्नेरेवाधिगृहपतेरादित्यं काष्ठाम् अकुर्वत । तस्माद् आग्नेयी प्रतिपद्[1] भवति आश्विनस्य "अग्निर्होता गृहपतिः स राजा" [ऋ. सं. ६. १५. १३] इति [ऐ. ब्रा. १७. १] । एवम् आश्विन-शस्त्रे प्रारम्भरूपा ऋगाग्नेयी ।

गार्हपत्यादारभ्याऽऽदित्यपर्यन्तं धावनम् । तेन धावनेन सहस्रस्योज्जये इतरे सर्वे देवा अश्विभ्यामवर्तिक् । आश्विनौ, काष्ठामादित्यं प्रथमं प्रतिपद्यमानम् अग्निं शस्त्रे कंचिद् भागं प्रकल्प्य तं दूरेऽपसार्य, एवं कंचिद् भागं प्रकल्प्योषसम् अपि दूरे कृत्वा, काष्ठां प्राप्नुवन्तमिन्द्रमपि शस्त्रभाक्त्वेन अनुकूलं कृत्वा आजिम् उदजयताम् ।

"तदाहुः, यच्छस्यत आग्नेयं, शस्यत उषस्यं, शस्यत ऐन्द्रम् अथ कस्मादेतद् आश्विनमित्याचक्षत इति, अश्विनौ हि तदुदजयताम्, अश्विनावाश्नुवातां, यद् आश्विना उदजयताम् अश्विनावाश्नुवातां तस्मादेतद् आश्विनमित्याचक्षते, इति ।"
[ऐ. ब्रा. १७. २] ।

इदमाश्विनं शस्त्रम् अतिरात्रे क्रतौ रात्रिपर्यायेभ्य ऊर्ध्वं शस्यते । तत्र आग्नेयम् उषस्यम् आश्विनं च काण्डं समाप्य, सौर्याणि त्रीणि छन्दांसि शंसित्वा, तत ऊर्ध्वम् ऐन्द्राः प्रगाथाः शस्यन्ते । एवम् आश्विनशस्त्रं सर्वं परिसमाप्य रथंतर-साम्ना संधिस्तोत्रं गीयते । [ऐ. ब्रा. १७. ४] ।

इयमाख्यायिका, आजिधावनस्य, आश्विनशस्त्रप्रशंसार्थम् ऐतरेयब्राह्मण उपन्यस्ता ।

तत्र—अग्निः "अश्वतरीरथेन आजिम् अधावत्" ।

उषाः "गोभिररुणैराजिम् अधावत्" ।

1—आश्विनशस्त्रे प्रतिपदाग्नेयी ऋक् । अत एवाग्निहोत्रे सायं याहुतिरग्नये दीयते तथा आश्विनं शस्त्रमुपाकृतं भवति ।

गवामयनस्य प्रायणीयमहोऽतिरात्रसंस्थम् । अतिरात्रे आश्विनं शस्यते । अतो गवामयने सायं होमः शस्त्रोपक्रमः । तत्र सायमग्नये हूयते । स होमो गवामयनसंबद्धम् आश्विन शस्त्रम् उपाकरोति । "अग्नये वा एष सायमाहुत्याऽऽश्विनमुपाकरोति ।" [ऐ. ब्रा. २५. ३] ।

इन्द्रः "अश्वरथेन आजिम् अधावत्" ।
अश्विनौ "गर्दभरथेन उदजयताम् ।" [ऐ. ब्रा. १७. १] ।
अत्र साक्षाद् अश्वौ इन्द्रस्यैव । "ऋक्सामे वा इन्द्रस्य हरी ।"
[ऐ. ब्रा. ८. ६] ।

शस्त्रपाठक्रमे प्रथममाग्नेयं, द्वितीयमुषस्यं, तृतीयं चाश्विनम् । अग्नेर्वाहनं अश्वतरी । "अश्वगर्दभसांकर्येण जाताः स्त्रीव्यक्तयोऽश्वतर्यः" [सायणः] । तत्र धावनेऽग्निस्तासाम् अश्वतरीणां योनिं दग्धवान्, येन "ता न विजायन्ते" अपत्योत्पादनं न कुर्वन्ति । अश्विनोर्वाहनं गर्दभः । अश्व इन्द्रस्य । अश्विनौ द्वौ । असौ गर्दभोऽपि द्विरेताः । अतिवेगेन धावनाद् असौ गर्दभः "मृतजवो दुग्धदोहः" अभवत् । अतोऽसौ लोकेऽत्यन्तवेगरहितो जातः । अपि तस्य रसस्य क्षयात् तस्य (गर्दभ्याः) क्षीरमपि नोपयुज्यते । एवमत्यन्तवेगरहितोऽप्यसौ द्विरेताः । अश्विनौ "तस्य वीर्यं नाहरतां, तस्मात् स द्विरेता वाजी ।" स गर्दभ्यां गर्दभजातीयम्, अश्वायाम् अश्वतरजातीयं च जनयति । [ऐ. ब्रा. १७. २] ।

एवमैतरेयस्य मतेऽग्नेर्वाहनम् अश्विनोर्वाहनस्यापत्यभूतम् । अतोऽग्निरश्विभ्याम् अवरः । युक्तं चैतत् । अहोरात्रात्मना पृथिवीं व्याप्नुवन्तौ सूर्यचन्द्राभ्याम् ओषधि-वनस्पत्यादीन् उत्पादयन्तौ यज्ञं निर्वहतोऽश्विनौ । अत एव अश्विनौ देवानां भिषजौ अध्वर्यू च । अश्विभ्यां चिकित्सितः, संभारैः संभृतोऽग्निः देवेभ्यो हविर्वोढुं समर्थः कृतः । पृथिव्यां मूर्तद्रव्येषु गर्भितोऽग्निः हविर्विना ऊर्ध्वं गन्तुं न शक्नोति । द्युस्थानानां देवतानां प्रथमागामिनौ अश्विनौ । तयोरेको मध्यमस्थानो वायुरूपः, अन्यो दिवः पुत्रो ज्योतीरूपः । एवमश्विनौ दिवि अश्वम् (आदित्यम्) अन्तरिक्षे गर्दभं (रासभं) (वायुं) जनयतः । पृथिव्याम् अन्तरिक्षद्वारा अग्निना संयुज्य तौ अश्वतरीं (वाचं) जनयतः । तथा च पूर्वं ब्राह्मणे प्रतिपादितं यद् आश्विनं शस्त्रं तत् सर्वस्या वाचः सर्वस्य वेदस्य परिग्रहाय भवति इति । [ऐ ब्रा.७. ७] ।

एतदाश्विनं शस्त्रं "चितिपम्" इत्युच्यते । चिता एधाः (काष्ठसमूहाः, दाहार्थं) यस्मिन् स्थाने तच्चितिपम् इत्युच्यते । यथा चितेपात् भीतिर्भवति एवम् अस्मादाश्विनशस्त्रात् तत् पठितुर्होतुर्भीतिर्भवति । यतः पाशहस्ता मृत्युदेवता निर्ऋतिः शस्त्रपाठसमाप्तावेव तस्मिन् होतरि पाशं प्रतिमोक्तुम् उत्सुका तिष्ठति । अतस्तस्या निर्ऋत्या रोषशमनार्थं शस्त्रशंसनाद् ऊर्ध्वं होता—"विश्वस्य देवी मृचयस्य जन्मनो न या रोषाति न ग्रभत् ॥"[1]

१—विश्वस्य सर्वस्य मृचयस्य गतिमतः प्राणिनो यज्जन्म, तस्य जन्मनो देवी स्वामिनी काचिन्निर्ऋतिरूपा मृत्युदेवता विद्यते । या मृत्युदेवताऽस्मासु न रोषाति न कुप्यति, न ग्रभन्नैव गृह्णाति इति द्विपदाया ऋचोऽर्थः । [सायणः]

इति द्विपदां शंसति, येन द्विपदायां पठ्यमानायां निर्ऋतेर्हस्तात् पाशाः पतिता भवन्ति । "पाशिन्याः अधराचः पाशान् अपास्यति स्वस्त्येव होतोन्मुच्यते ।" [ऐ. ब्रा. १७. ४]

द्विदेवत्यग्रहः ।

नवमेऽध्याये प्रथमैस्त्रिभिः खण्डैः द्विदेत्यग्रहा विधीयन्ते । तत्रापि आख्यायिकाऽऽजिधावनमुखेनोपन्यस्यते ।

सोमस्य पानेऽग्रपेयत्वाय स्पर्धमाना देवा आजिमयुः । तत्र युग्मे नयेऽधावन् तेऽक्रमन्ताग्रपानम् । तत्र त्रीणि युग्मानि क्रमश आजिम् अजयन् । प्रथमम् इन्द्रवाय ततो मित्रावरुणौ, तत अश्विनौ । तत्राश्विनोस्तृतीयं स्थानम् । तत्त्वतस्तु इन्द्रवायू मित्रावरुणौ चाभिव्याप्याश्विनौ वर्तेते । इन्द्रः सूर्यस्य प्रकृष्टः प्रकाशः, वायुर्मध्यस्थानः सूत्रात्मा यः "तनयस्य मज्मना परिज्मा" [ऋ. सं १. ११२. ४], योऽग्नेस्तापेन गतिमान् भवति । मकरागतः प्रभृति यदा पृथिवी सूर्याभिमुखा, भवति तदाऽग्नेस्तापवृद्धया वायुः गतिमान् भवति । मित्रावरुणौ अहोरात्राभिमानिनौ देवौ । तत्र अश्विनोः रथगत्यैव इन्द्रवाय्वोर्मित्रावरुणयोश्च प्रवर्तनात्[1], सोमपाने तृतीयत्वेऽपि, तयोरश्विनोरेव प्राधान्यं, यतो हि तृतीयता नाम सोमस्य पक्वता पूर्णता च ।

सविता देवानां प्रसविता, अश्विनावध्वर्यू । सवितुः प्रसवे अश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हविर्दीयते । अतोऽग्रपेये तृतीयता नाम पूर्णता । एतत् पूर्णत्वं, व्यापकत्वं नाम एतेषां त्रयाणां युग्मानां ग्रहैरपि बोध्यते । युग्मेन जयाद् युग्मेन सोमपानाच्च एभ्यो देवेभ्य आहुतिर्द्विदेवत्या क्रियते ।

हविरेकेन पात्रेण गृह्यते, पात्रद्वयेन हूयते । तत्र ग्रहणहोमयोः पात्रवैषम्यं ग्रहाणां प्राणरूपतया । तत्रैन्द्रवायवो वाक्प्राणः, मैत्रावरुणः चक्षुष्प्राणः आश्विनः श्रोत्रप्राणः । वाक्चक्षुः श्रोत्ररूपाः प्राणाः यथैकनामानः तथा द्विदेवत्यानां ग्रहणकाले एकपात्रता । परन्तु एते प्राणाः बहिः स्वस्वगोलकेषु द्वन्द्वं (द्वौ द्वौ) भूत्वा वर्तन्ते, अतो होमकाले द्विपात्रता । तथा च ब्राह्मणम्—"ते वा एते प्राणा एव यद् द्विदेवत्याः, इति ।"

"वाक् च प्राणश्चैन्द्रवायवः, चक्षुश्च मनश्च मैत्रावरुणः, श्रोत्रं चाऽऽत्मा चाऽऽश्विनः, इति ।" [ऐ. ब्रा. ९. २]

१—"प्रपूर्वगौ पूर्वजौ चित्रभानू गिरा वाऽऽशंसामि तपसा ह्यनन्तौ ।
दिव्यौ सुपर्णौ विरजौ विमानौ, अधिक्षिपन्तौ भुवनानि विश्वा ॥"
[म. भा. आदि. ३·५७]

"प्राणा वै द्विदेवत्या एकपात्रा गृह्यन्ते, तस्मात् प्राणा एकनामानो द्विपात्रा हूयन्ते, तस्मात् प्राणा द्वन्द्वम्, इति ।" [ऐ. ब्रा. ९. १]

प्रवर्ग्यसंभारः ।

घर्मे महावीरसंज्ञे पात्रे तप्तं अजपयोगव्यादिकं हविर्येन हूयते तद् यज्ञकर्म प्रवर्ग्यं इत्युच्यते । घर्मः प्रवर्ग्यहविः तदुष्णं महावीराख्ये पात्रे संपाद्यते । एतद्घर्मसम्पादनं देवमिथुनत्वेन निरूप्यते ।" तदेतद्देवमिथुनं यद्घर्मः" [ऐ. ब्रा. ४. ५]।

एतत्प्रवर्ग्याख्यं कर्म ऐतरेये ब्राह्मणे चतुर्थेऽध्याये प्रथमैः पञ्चभिः खण्डैः, प्रतिपाद्यते ।

यज्ञो देवेभ्योऽपरक्त उदक्रामत् । तं देवा अमन्वन् । देवैरन्विष्य ह्रियमाणो यज्ञस्तेभ्योऽन्नं वोढुं न प्राभवत् । तदा देवास्तं "विहृतं" यज्ञं महावीरादिसंभारैः "संजभ्रुः" पोषितवन्तः । तत्र देवैः प्रार्थितौ अश्विनौ भिषजौ भूत्वा देवैः संभृतसंभारेण यज्ञम् अभिषज्यताम्, अध्वर्यू भूत्वा त यज्ञं समपूरयितां च ।

"तं सम्भृत्योचुः, 'अश्विनौ ! इमं भिषज्यतम्' इति । अश्विनौ वै देवानां भिषजौ, अश्विनावध्वर्यू तस्मादध्वर्यू घर्मं संभरतः, इति ।" [ऐ. ब्रा. ४. १]

तत्र प्रवर्ग्यकर्मणि एकविंशत्या ऋग्भिर्यज्ञस्य शरीरं संक्रियते । "ता एकविंशतिः भवन्ति, इति । एकविंशोऽयं पुरुषो दश हस्त्या अङ्गुलयो दश पाद्या आत्मैकविंशः, तमिममात्मानमेकविंशं संस्कुरुते ।" [ऐ. ब्रा. ४. २]

अथ प्राणा नव संक्रियन्ते । नासाशीर्षण्याः द्वौ अवाञ्चौ इति नव प्राणाः शरीरे ।

अस्मिन् प्रवर्ग्येऽश्विदेवत्यानि चत्वारि सूक्तानि विनियुक्तानि सन्ति ।

१ काक्षीवत आर्षम् १. १२०. १–९ [द्वादशार्चं सूक्तम्]

२ भौमस्यात्रेरार्षम् ५. ७६. १–५

३ गृत्समदस्यार्षम् २. ३९. १–८

४ कुत्सस्याऽऽङ्गिरसस्याऽऽर्षम् १. ११२. १–२५

तत्र प्रथमेन सूक्तेन यज्ञशरीरस्योदरावयवाः संस्क्रियन्ते । उदरे कश्चन अवयवोऽणीयान् कश्चन स्थवीयान् । सूक्तगतानाम् एतासां नवानां [१. १२०. १–९] ऋचां विषमच्छन्दस्कत्वाद् उदरगतावयवसंस्करणम् एतासां भवति ।

कक्षीवान् ऋषिरेताभिर्ऋग्भिरश्विनोः प्रियं धाम प्राप्नोत् ।

"एताभिर्हाश्विनोः कक्षीवान् प्रियं धामोपागच्छत् स परमं लोकम् अजयत् इति ।"[ऐ. ब्रा. ४·४]

द्वितीयेन सूक्तेन [५. ७६. १–५] प्रवर्ग्यमभिलक्ष्य अश्विनौ स्तूयेते येन घर्मः परिवृढो भवति ।

तृतीयेन सूक्तेन [२. ३९. १–८] यज्ञशरीरस्य चक्षुरादीनि इन्द्रियाणि प्रतिनियतानि भवन्ति ।

"अक्षीव चक्षुषा यातमर्वाक् ।"

"नासेव नस्तन्वो रक्षितारा कर्णाविव सुश्रुता भूतमस्मे ।" २. ३९. ५—६

इत्येवमादिः अङ्गसमाख्या सूक्ते श्रूयते ।

चतुर्थेन सूक्तेन [१. ११२. १–२५] अश्विनोरूतिभिः सह सर्वे कामा अस्मिन् प्रवर्ग्ये (यजमाने च) संपाद्यन्ते ।

इदं प्रवर्ग्याख्यं कर्म कालद्वयेऽनुष्ठीयते, पूर्वाह्णे, अपराह्णे च । तत्र उभयत्र याज्याद्वयं भवति । पूर्वया याज्यया होता वषट् करोति, उत्तरयाऽनुवषट् करोति । सवषट्कारम् होत्रा प्रथमयाज्यापाठे कृते सति, अध्वर्युः "अश्विना घर्मं पातम्" इति मन्त्रेण जुहोति । द्वितीयायां याज्यायां सवषट्कारम् "अग्ने वीहि" इति होत्रा पठितायाम् "स्वाहेन्द्रावट्" इत्यध्वर्युर्जुहोति ।

उभयत्र प्रथमा याज्या शाकलसंहितायां न दृश्यते । सा च शाखान्तरगता आश्वलायनेन पठिता ।

प्रायश्चित्तिः ।

आहिताग्नेः पुरोडाशनिष्पादककपालनाशे प्रायश्चित्तिर्विधीयते, यत्राश्विनौ पुरोडाशदेवता । एककपालनाशे द्विकपालपुरोडाशं निर्वपति ।

"तदाहुर्य आहिताग्निर्यदि कपालं नश्येत् का तत्र प्रायश्चित्तिरिति सोऽश्विभ्यां द्विकपालं पुरोडाशं निर्वपेत् तस्य याज्यानुवाक्ये—

"अश्विना वर्तिरस्मद्" [१. ९२. १६], "आ गोमता नासत्या रथेन [७. ७२. १] इत्याहुतिं वाऽऽहवनीये जुहुयाद् अश्विभ्यां स्वाहेति सा तत्र प्रायश्चित्तिरिति ।" [ऐ. ब्रा. ३२. ८]

अत्र कपाले (एकस्मिन्) नष्टे कपालद्वयमश्विभ्याम् । एतेन "अश्विनौ व्यात्तम्" [वा. सं. ३१. २२] इति विश्वपुरुषस्य व्यादानभूतावश्विनौ पृथिव्यां मर्त्यस्य स्थूलदृष्टौ द्यावापृथिव्यात्मना भजनीयौ भवतः ।

"ईळे द्यावापृथिवी पूर्वचित्तये" [ऋ. सं. १. ११२. १]

—:०:—

अष्टमोऽध्यायः

॥ अथ शतपथब्राह्मणेऽश्विनो रूपम् ॥

सविता देवानां प्रसविता । प्रसवस्तु गर्भाद् बहिरानयनम् । अत्र सवितुः प्रसवः प्रत्यहं प्रातर्भवति । रात्रावन्धकारे विलीनान् देवान् सविता तमसो गर्भाद् बहिर्निर्गमयति । गतिश्च पद्रूपा क्रियते । गत्या (अग्नेः पाकेन) रूपं ध्रियते, येन द्रवस्य प्रवाहो भवति । गत्या ऊढो रसमय पदार्थः हस्ताभ्यां संगृह्य संघटय्य पिण्डीक्रियते, यस्य च प्रसूतस्य पिण्डस्य रूपम् उदीयमाने मण्डले गोचरीभवति ।

एवं गतिः, प्रवाहः, रूपम् इति त्रिभिर्योजनैः सविता प्रसुवति । तत्र गतिरश्विनो रूपम्, प्रवाहः सरस्वत्या रूपम् । साक्षात् प्रसूतं च इन्द्रस्य रूपम् ।

सौत्रामणीयज्ञात् पुरुषो जायमानस्त्रेधा विधीयते—

१. यद् अवाङ् नाभेस्तद् आश्विनम् ।

२. यदूर्ध्वं नाभेरवाचीनं शीर्ष्णस्तत् सारस्वतम् ।

३. शिर ऐन्द्रम् ।

इयं गतिः प्रवाहश्च अभेददृष्ट्या बाहुभ्यां गृह्यते । गतिप्रवाहाभ्यां (बाहुभ्याम्) उह्यमानस्य यद् रूपं ध्रियते तत्र हस्तयोर्व्यापारः । बाहू सर्वथा परस्परवियुक्तौ, यद्यपि तौ सयोनी । हस्तौ तु संयुक्तौ कार्यं कुरुतो येन सर्वाणि रूपाणि गृहीतानि भवन्ति । तथापि बाहू विना हस्तौ स्वयं न युज्येते कर्मणि । यथा पुरुषस्य हस्तौ बाहू च पूर्वापरयोगेन व्यवस्थितौ सर्वं कर्म कुरुतः, तथा सविता प्रसूतिकर्म अश्विभ्यां पूष्णा च करोति । अशनात् (व्यापनात्) अश्विनौ, पोषणाच्च पूषा । यज्ञे देवानाम् अनुकृतिः क्रियते पृथिव्यां मनुष्येण । तथाहि हविर्ग्रहणे मन्त्रः—"देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्याम् । अग्नये जुष्टं गृह्णाम्यग्नीषोमाभ्यां जुष्टं गृह्णामि" ॥ [वा. सं. १. १०] इति । तत्र ब्राह्मणम् "सविता वै देवानां प्रसविता तत्सवितृप्रसूत एवैतद् गृह्णाति अश्विनोः बाहुभ्याम् इति अश्विनावध्वर्यू पूष्णो हस्ताभ्यामिति पूषा भागदु[1]घोऽशनं पाणिभ्याम् उपनिधाता ।" [शत. ब्रा. १. १. २. १७] ।

१—भागं दोग्धीति भागदुघः, भागप्रद इत्यर्थः ।

दुहः कब्घश्च [पा. ३.२.७०] इति कप्रत्ययः । भागदुघः एष पाणिरूपाभ्यां सर्वस्य जनस्य "अशनम्" भोज्यमन्नम् "उपनिधाता" उपनिधातुम् उपस्थापयितुं शीलवान् । [सायणः] ।

इन्द्राश्विसरस्वतीनां साहित्यम् ।[1]

सौत्रामण्या इष्ट्या अश्विसरस्वतीभिः इन्द्रस्यावनं कृतम् । त्वष्टुः पुत्रः "त्रिशिराः" इन्द्रेण हतः । तेन क्रुद्धस्त्वष्टा अपेन्द्रं सोमम् आजहार । इन्द्रः अनुपहूत एव द्रोणकलशस्थं सोमं पपौ । पीतः सोमः मुखवर्जं नासिकादिच्छिद्रेभ्यो दुद्राव । सर्वेभ्यश्छिद्रेभ्यः सोमस्य प्रस्रवणात् इन्द्रो "मङ्कुः" (विगलगतिः पङ्गुः) इव चचार । तमश्विनौ अभिषज्यताम् । [वा. सं. २०. ६७–६९] ।

[ऋ. सं. १०. १३१. ४–५] ।

अत्र भैषज्यकर्माणि अश्विनौ, सरस्वती यज्ञदेवता इन्द्रश्च ।

सौत्रामणीशब्दं ब्राह्मणं निर्ब्रूते—"ते देवा अब्रुवन् । सुत्रातं बतैनम् अत्रासाताम् इति तस्मात् सौत्रामणी नाम ।" [शत. ब्रा. ५. ५. ४. १२] ।

सुत्रामा गोत्रभिद् वज्री [अमरः १. १. ४२] ।

सुत्रामा इन्द्रस्तत्सम्बन्धेन सौत्रामणी ।

अस्मात् सौत्रामणीयज्ञात्[1] पुरुषः पुनः जायते । तस्य जायमानस्य चक्षुषी आश्विनौ ग्रहौ, नासिके सारस्वतौ ग्रहौ, श्रोत्रे ऐन्द्रौ ग्रहौ ।

अत्र अश्विसरस्वतीन्द्राणां रूपमेवं प्रदर्श्यते ।

शतपथ ब्राह्मणम्	अश्विनौ	सरस्वती	इन्द्रः	रूपम्
१२. ९. १. ५	चक्षुषी	नासिके	श्रोत्रे	ग्रहाः
१२. ९. १. ९	चक्षुषी	नासिके	श्रोत्रे	प्राणाः
१२. ९. १. ७	नाभेरधः[2]	शिरा नाभि चान्तरा	शिरः	शरीरम्
१२. ९. १. १३	श्रोत्रे	वाक्	मनः	कर्म
१२. ९. १. १४	नासिके	जिह्वा	प्राणः	गतिः
१२. ८. २. ३२	पृथिवी	अन्तरिक्षम्	द्यौः	लोकः
१२. ८. २. ३४	वसन्तग्रीष्मौ	वर्षाशरदौ	हेमन्तशिशिरौ	ऋतुः

१—वाजसनेयिसंहितायां सौत्रामणी त्रिभिरध्यायैः [१९–२१] प्रक्रियते ।

"स सोमातिपूतो मङ्कुरिव चचार । तमेतयाऽश्विनावभिषज्यताम् ।"

[शत. ब्रा. ५. ५. ४. ११] ।

"सोमातिपूतः अपानद्वारादिभ्यः स्रुतसोमः । एतया सौत्रामण्या ।" [सायणः] "देवसृष्टो वा एषेष्टिः यत्सौत्रामणी ।" [शत. ब्रा. ५. ५. ४. १४] ।

२—विस्रस्तावयवस्य प्रजापतेः अग्न्यादयो देवा एकैकम् अवयवमादाय निष्क्रान्ताः । पुनः प्रजापतिनाऽनुरुद्धावश्विनौ ताभ्यां गृहीतं भागं पुनः

आश्विनग्रहः।

उपांश्वादयो दश ग्रहा भवन्ति। गृह्यतेऽनेनेति करणव्युत्पत्त्या ग्रहः। ते दश ग्रहाः—

१. प्राणः उपांशुग्रहः। २. उदानः अन्तर्यामग्रहः।
३. व्यानः उपांशुसवनग्रहः। ४. वाक् ऐन्द्रवायवः ग्रहः।
५. क्रतुदक्षौ मैत्रावरुणः ग्रहः। ६. श्रोत्रम् आश्विनः ग्रहः।
७. चक्षुषी शुक्रामन्थिनौ ग्रहौ। ८. आत्मा आग्रयणः ग्रहः।
९. अनिरुक्त आत्मा उक्थ्यः ग्रहः। १०. आयुः (प्राणः) ध्रुवः ग्रहः।

[शत. ब्रा. ४. १. १–४. २. ४[1]]।

तत्राऽऽश्विनो ग्रहः चतुर्थे काण्डे प्रथमेऽध्याये पञ्चमे ब्राह्मणे प्रोच्यते। अत्र च्यवनस्य शार्यातपुत्र्याः सुकन्यायाः च आख्यानमुपन्यस्यते। अतएव अश्विनौ सुसखौ भवितुं च्यवनं ह्रदेऽवगाह्य तम् अभीष्टवयसा युवानं चक्रतुः।

अथ यज्ञे आत्मने ग्रहाभावाद् आत्मनोऽपर्वत्वम् अभिज्ञाय, कुरुक्षेत्रं गत्वा तत्र देवयजने छिन्नशिरसो यज्ञस्य शिरः प्रतिधाय तावश्विनौ ग्रहं लेभाते। परन्तु भिषक्-कर्मणा तयोरपूतत्वाद् बहिष्पवमाने स्तुते तयोर्ग्रहो गृह्यते।

[शत. ब्रा. ४. १. ५. १५]

यज्ञशिरःसन्धानेन अध्वर्युपदलाभाद् यज्ञेऽश्विनौ मुख्यं स्थानम् ईयतुः। "मुख्यौ वा आवां यज्ञस्य स्वः, यौ अध्वर्यू इह नौ इमं पुरस्ताद् ग्रहं पर्याहरत अभि द्विदेवत्यान् इति।" भैषज्यकर्मकरणात्, ग्रहणकाले तयोः स्थाने दत्तेऽपि होमकाले तौ तृतीयं स्थानं प्रापतुः।

प्रत्यधत्ताम्। तेन स भागोऽश्विदेवत्यो जातः। 'प्रजापतिं त्रिककुदं देवता आदाय व्युदक्रामस्तस्य चतूर्ध्वं प्रतिष्ठाया अवाचीनं मध्यात् तदश्वाश्विनावादाय उदक्रम्यातिष्ठताम्।" प्रजापतिस्तावब्रवीत् "प्रतिधत्तम् उप मा इदम्।" "किं नौ ततो भविष्यति इति।"

"युवयोरेवेदमेव म एतदात्मनो भविष्यति इति।" "तथेति।" तदश्विनौ प्रत्यधत्ताम् [शत. ब्रा. ८. २. १. ११–१२]।

१—तैत्तिरीयब्राह्मणे त्रयोदशानि दारुमयाणि पात्राणि विधीयन्ते। तत्र शुक्रामन्थिनोः द्वे। द्वादशं त्रयोदशं च प्रतिष्ठायां चतुष्पात्रे द्वे।

कति पात्राणि यज्ञं वहन्ति। त्रयोदशेति ब्रूयात् [तै. ब्रा. १. ५. ७]।

"दक्षक्रतुभ्यां मैत्रावरुणम्" इत्यत्र पाठः। "क्रतूदक्षौ ह वा अस्य मित्रावरुणौ।" [श. ब्रा. ४. १. ४. १]

"एष दशमो ग्रहो गृह्यते तृतीय एव वषट् क्रियते ।"

[शत. ब्रा. ४. १. ५. १६]

अथात्राश्विनोः स्वरूपमुच्यते—

"अथ यदश्विनाविति । इमे ह वै द्यावापृथिवी प्रत्यक्षमश्विनौ[1] । इमे हीदं सर्वम् आश्नुवाताम् । पुष्करस्रजाविति । अग्निरेव अस्यै पुष्करम् आदित्योऽमुष्य ।" [शत. ब्रा. ४. १. ५. १६]

अश्विनोः पुष्करस्रक्त्वं कस्मिंश्चिन्मन्त्रे आम्नायते—"मेधां मे अश्विनावुभावाधत्ताम् पुष्करस्रजौ" इति [पा. गृ. सू. १. ३. १९] इति सायणः ।

[द्र. ऋ. सं. १०. १८४. २]

"इदं सर्वमाश्नुवाताम्" इति वर्णनेन अश्विनोरमूर्तत्वं बोध्यते । "इमे हि प्रत्यक्षमश्विनौ" इति कथनमपि अत्रोपोदबलकम् । पुष्करस्रजौ इति विशेषणं तस्य व्याख्या च अश्विनोः रसज्योतिर्भ्यां नानाविधव्याप्तिं बोधयतः ।

अश्विनोर्ग्रहं मधुमत्या ऋचा गृह्णाति । "या वां कशा मधुमतीति ।" [वा. सं. ७. ११], [ऋ. सं. १. २२. ३] । तत्र हेतुः यज्ञशिरःसन्धाने मधुविद्याप्रयोगः ।

अश्विनौ हि यज्ञशिरःसन्धानविद्यां दधीचो गृहीतवन्तौ । इदं मधु इत्युच्यते । अनेन मधुना (मधुविद्यया) देवानां यज्ञः संपन्नः, अश्विनौ च यज्ञे मुख्यस्थानं लब्धवन्तौ । अत इदं मधु अश्विनोः प्रियं धाम । "तस्मान्मधुमत्यर्चा गृह्णाति, माध्वीभ्यां त्वेति सादयति ।" [शत. ब्रा. ४. १. ५. १८] ।

अत्र द्विदेवत्यग्रहपात्राणां कश्चन विशेषो विधीयते । ऐन्द्रवायवग्रहपात्रं परितो रशनया वेष्टितं भवति, यच्च द्वयोरैकरूप्यं बोधयति ग्रहस्य च द्विदेवताकत्वम् ।

मैत्रावरुणग्रहपात्रम् । अजागलस्तनयुक्तं भवति । तत्तस्य द्वितीयं रूपं भवति ।

आश्विनं ग्रहपात्रम् ओष्ठाकारसहितं भवति । एकेन ओष्ठेन पातुमशक्यतया तद्रूपं पात्रस्य द्विदेवत्यं बोधयति ।

१—तत् कावश्विनौ । द्यावापृथिव्यावित्येके ।

अश्विनौ यद् व्यश्नुवाते सर्वं, रसेनान्यो, ज्योतिषाऽन्यः । [निरु. १२. १]

तु. "अश्विनौ व्यात्तम्" [वा. सं. ३१. २२] ।

"ओष्ठाविव मध्वास्ने वदन्ता ।" [ऋ. सं. २. ३९. ६] ।

"रास्नापात्रम् ऐन्द्रवायवपात्रम्, अजकावं मैत्रावरुणपात्रम्, औष्ठम् आश्विनपात्रम्।" [शत. ब्रा. ४. १. ५. १९][1]।

प्रवर्ग्यः।

अग्निः, इन्द्रः, सोमः, मखः, विष्णुः विश्वेदेवाश्च अश्विभ्यां विना कुरुक्षेत्रे सत्रमासत[2]। तत्र उद्दृचम् (अभिज्ञातम्) पूर्वोऽवगम्य विष्णुस्तेषु श्रेष्ठोऽभवत्। स विष्णुः त्रिषुधन्वेन यशं धनूरूप्यं शिरसाऽवष्टभ्य तस्थौ। यदा उपदीकाभिर्ज्या जग्धा छिन्ना च, तदा उत्क्रान्तया धनुष्कोट्या विष्णोः शिरः छिन्नं पतितं च। पतितं शिर आदित्योऽभवत्। "घृङ्" इति पतितम्, अतः स (आदित्यो) "घर्मः" इत्युच्यते। छेदे "व्राङ्" इति यत् प्रवृक्तं तेन स "प्रवर्ग्यः" इत्यप्युच्यते [शत. ब्रा. १४. १. १. १०]।

अथ तेन अपशीर्ष्णा यज्ञेन यजमाना देवा न "सुवर्गम्" अजयन्।

तदानीम् आथर्वणो दध्यङ् एव यज्ञशिरःप्रतिसन्धानविद्याम् अवेत्। इन्द्र एतज्ज्ञात्वाऽन्यस्मै कस्मैचिदपि तस्या विद्यायाः प्रदानाद् दध्यञ्चं वारयामास शिरश्छेदभीषया।

अश्विनौ दस्रौ कर्मकुशलौ यज्ञस्य भेषज्याय देवैः प्रार्थितौ दध्यञ्चं शिष्यौ भूत्वोपागच्छताम्। गुरोर्दधीच इन्द्राद् भीतिं ज्ञात्वा, पूर्वं दधीचः शिरश्छित्त्वाऽन्यत्र गोपायित्वा, एकमश्व्यं शिरो दधीचि प्रतिदधतुः। तेन आश्व्येन शिरसा दधीचः मधुविद्यां तौ आददाताम्। ज्ञात्वैतत्कुपित इन्द्रो दधीचः स्कन्धात् तदश्व्यं शिरोऽच्छिनत्। तदाश्विनौ दधीचः स्वीयं शिरस्तस्मिन् प्रतिदधतुः।

एवं दधीचो मधुविद्यामादाय देवानां यज्ञस्य शिरः प्रतिधाय तं यज्ञं कृत्स्नम् अकुरुतामश्विनौ।

अश्वशिरःसंधानेनेदं मधुविद्याग्रहणम् अश्विनोरद्भुतं कर्म मन्यते। कक्षीवान् दैर्घतमस ऋषिस्तद् आविष्करोति [ऋ. सं. १. ११६. १२]। दधीच इदं मधुविद्यादानं शतपथे ब्राह्मणे चतुर्दशे काण्डे पञ्चमे ब्राह्मणे उदाहृतमस्ति।

घर्मः, प्रवर्ग्यः, यज्ञशिरः इति शब्दाः आदित्यस्य (अदितेः पुत्रस्य) पर्यायाः। इन्द्रं विना आदित्योदयस्यासम्भवात् यज्ञे इन्द्र एव देवता। "या च

१—"अथ यदश्विनावित्ति। मुख्यौ वा अश्विनौ। औष्ठं वा इदं मुखम्, तस्मात् औष्ठम् आश्विनपात्रं भवति।" [श. ब्रा. ४. १. ५. १९]।
"औष्ठम् ओष्ठाकारसहितम्। अश्विनोर्मुखत्वात् मुखस्य ओष्ठाकारसहितत्वं तत्पात्रस्य युज्यत इत्यर्थः।" [सायणः]

२—देवा ह वै सत्रं निषेदुः। अग्निरिन्द्रः सोमो मखो विष्णुर्विश्वे देवा अन्यत्राश्विभ्याम् [शत. ब्रा. १४. १. १. १]।

काच बलकृतिरिन्द्रकर्मैव तत्" [निरु. ७. २०]। इन्द्रस्य मण्डलमध्यवर्तितया,[1] अश्विनोश्च मण्डलाद् बाह्यतयाऽश्वशिरःसन्धानमश्विनोः कर्म। मधुविद्यां गृहीत्वाऽश्वशिरसोऽपसारणेऽश्विनोरवसरो न लब्धः। अतो मधुविद्याग्रहणमात्रेण, अर्थाद् मधुनः पानेन वा सेकेन वा समासौ, मण्डलोदयः इन्द्रेणाश्वशिरश्छेदश्च युगपद् भवतः।

"इन्द्रो वै यज्ञस्य देवता। सा यैव यज्ञस्य देवता तयैवैतद् अश्विनौ यज्ञस्य शिरः प्रत्यधत्ताम्।" [शत. ब्रा. १४. २. १. १३]

इन्द्रश्चाश्विनौ च वसवः। "एते हीदं सर्वं वासयन्ते।" [शत. ब्रा. १४. २. १. २०]

प्रवर्ग्ये रौहिणौ पुरोडाशौ। ताभ्यां यजमानः स्वर्गं रोहति। अतस्तौ रौहिणौ अग्न्यादित्यात्मना [शत. ब्रा. १४. २. १. २], अहोरात्रात्मना च स्तौति।

"अथो अहोरात्रे वै रौहिणौ। आदित्यः प्रवर्ग्यः। अमुं तदादित्यम् अहोरात्राभ्यां परिगृह्णाति तस्मादेषोऽहोरात्राभ्यां परिगृहीतः।

अथो इमौ वै लोकौ रौहिणौ। आदित्यः प्रवर्ग्यः। अमुं तदादित्यं आभ्यां लोकाभ्यां परिगृह्णाति। तस्माद् एष (दिवि वर्तमान आदित्यः) आभ्यां लोकाभ्यां परिगृहीतः।" [शत. ब्रा. १४. २. १. ३–४]

—:०:—

1—इन्द्रं न वृत्रतुरम् अर्धदेवम् [ऋक् ४. ४२. ८]
"अर्धदेव देवानाम् अर्धे समीपे वर्तमानम्। यद् वा। देवानामर्धभूतम्···।
यत् सर्वेषां देवानाम् अर्धम् इन्द्रः तस्मादिन्द्रो देवानां भूयिष्ठ इति"
इति तैत्तिरीयकम् [तै. सं. ५. ४. ८]।
[द्र. वाह्नि.—नीतिमञ्जरी श्लो. ७७]

नवमोऽध्यायः ।

॥ अथ तैत्तिरीयारण्यके ॥

[प्रथमः प्रश्नः]

अश्विनौ आपः च ।

आपः वाय्वश्वाः वायवस्तासां वोढारः । ताश्च रश्मिपतयः । आदित्यरश्मयः तासां पातारः । मरीचयः तासां आधारभूतं शरीरम् । एता आपः सर्वाणि भूतानि जनयन्ति ।

"वाय्वश्वा रश्मिपतयः मरीच्यात्मान अद्रुहः, देवीः भुवनसूवरीः ।"

द्यावापृथिव्यौ अश्विरूपेणात्र स्तूयेते ।

"सहस्रवृद् इयं भूमिः । परं व्योम सहस्रवृत् । अश्विना भुज्यू नासत्या । विश्वस्य जगतस्पती ।"

सहस्रसंख्याकैः देवैः, सहस्रसंख्याकैः मानवादिप्राणिभिः द्यावापृथिव्यौ वृते, प्रार्थ्यते ।

"ते एते द्यावापृथिव्यौ 'अश्विरूपौ यथाऽश्विनौ सर्वेषामुपकुरुतः एवं द्यावापृथिव्यावपीत्यर्थः । कीदृशावश्विनौ प्राणिनां रोगनिवर्तनेन भुज्यू भोगहेतू कदाचिदपि असत्यरहितौ अत एव विश्वस्य पालयितारौ ।" [सायणः]

"वासात्यौ चित्रौ जगतो निधानौ द्यावाभूमी चरथः सँ सखायौ ।
तावश्विना रासभाश्वा हवं मे शुभस्पती आगतँ सूर्यया सह ॥"

द्यावापृथिव्यौ सखित्वमिव संचरथः संभूय वर्तेथे । वासात्यौ । देवानां मनुष्याणां च निवासं प्रयच्छथः । विलक्षणभोगप्रदानेन चित्रौ नानाविधौ । सर्वस्यापि प्राणिजातस्य निवासस्थानीयौ । रासभाश्वौ अश्विरूपौ । शोभनस्य कर्मणः पालकौ ।

ऋक्संहितायां कक्षीवतः आर्षे एकेन सूक्तेन भुज्योः समुद्रात् पारनयनं प्रोच्यते [१. ११६. ३–५] । अस्य सूक्तस्य प्रथमाभ्याम् ऋग्भ्याम् आरण्यके वृत्तिः प्रतिपाद्यते तृतीया ऋग् नात्र उद्धृता । "युवः" इत्यत्र "स्युवः" इति पाठ आरण्यके ।

"हेऽश्विनौ ! उदकसहितमेघेऽवस्थितं भुज्युं पालकं समुद्रकसंघं बहुधः संपादयथः । कीदृशमुदकसंघं···नौभिस्तरणीयम् । आत्मन्वतीभिः दृढस्वरूप-

युक्ताभिः । अन्तरिक्षप्रुद्भिः भूमिस्पर्शमन्तरेण जलस्योपरि अन्तरिक्षे प्लवनशीलाभिः । अपोदकाभिः उदकप्रवेशरहिताभिः, निश्छिद्राभिरित्यर्थः ।"

"अश्विनोरुदकस्य वहने दृष्टान्तः । त्युग्रोऽत्युग्रो मूर्खः कश्चित्पुमान् मरणं प्राप्यमाणोऽपि धनं न प्रयच्छति किन्तु आवहत्येव । यद्वा स्वयमेवावहरति । यथा स लुब्धोऽत्यादरेण धनं संपादयति एवमश्विनावप्यादरेण वृष्टिं सम्पादयत इत्यर्थः ।"

"नासत्यौ असत्यरहितौ अश्विनौ देवौ रात्रित्रयम् अहस्त्रयं च नैरन्तर्येण अतिशयेन गच्छद्भिः पक्षिसदृशैः इतस्ततः संचारिभिर्मेघैः भुज्युं पालकं जलसमूहं युवां वहथः । कुत्र देशे इति तदुच्यते—जलपूर्णस्य समुद्रस्य पारे परभागे, निर्जलमरुदेशे । कीदृशैर्मेघैः । त्रिभिः तत्तद्देशमागत्य उत्तममध्यमाधमभावेन त्रिविधैः रथसदृशैः । यथा रथा उपरि महान्तं भारं वहन्ति तथा बहुजलभारवाहिनः इत्यर्थः । शतसंख्याका पदाः जलधाराः पादसदृशाः येषां तादृशैरनन्तधारैः । षट्प्रकारव्याप्तियुक्तैः । उत्तमादीनां त्रयाणाम् आगमनार्थाः तिस्रो व्याप्तयः, पुनर्गमनार्थास्तिस्र इति एवं षड् व्याप्तयः ।" [सायणः]

"अन्वेति तुग्रो वक्रियां तम्" तुग्र आदित्यः । तुग्रशब्दो रश्मिनाम । तद्वांस्तुग्रः । स च वक्रियां वक्रं कुटिलं वृष्टिविमुखं तं मेघमन्वेति वर्षयितुम् अनुगच्छतीत्यर्थः ।

"इमे वै लोका अपा ꣡ रसाः । तेऽमुष्मिन्नादित्ये समाभृताः ।"

"ये एते पृथिव्यादयो लोकास्ते सर्वेऽप्यपां मध्ये सारभूताः सर्वलोकगर्भिताः । ब्रह्माण्डगोलकरूपा पृथिवी क्षीरमध्ये मण्डमिव जलमध्ये घनीभूता । तथा च वाजसनेयिन आमनन्ति—" यदपां शर आसीत् तत्समाहन्यत सा पृथिव्यभवत् इति ।" ते चोदकसारभूता अमुष्मिन् दृश्यमान आदित्यमण्डले समाभृताः सम्यगाश्रिताः । आदित्यस्य वृष्टिद्वारेण सर्वलोकस्थितिहेतुत्वात् ।" [सायणः]

"चतुष्टय्यः आपो गृह्णाति । चत्वारि वा अपाॅं रूपाणि । मेघो विद्युत् । स्तनयित्नुर्वृष्टिः ।"

अणुभिश्च महद्भिश्च समारूढः प्रदृश्यते ।
सर्वं वत्सरः प्रत्यक्षेण । नाधिसत्त्वः प्रदृश्यते ॥

सत्त्वात् सर्वप्राणिनाम् अस्तित्वेन प्रतीयमानात् संवत्सररूपात् कालाद् अधिको नित्यो निरवयवः परमात्मरूपः व्यावहारिककालस्याप्युत्पादकः कालात्मा अधिसत्त्वः । सोऽयं शास्त्रदृष्टिमन्तरेण न प्रदृश्यते । तत्र हेतुमाह—

"पटरो विक्लिधः पिङ्गः । एतद्वरुणलक्षणम् ।
यत्रैतदुपदृश्यते । सहस्रं तत्र नीयते ॥"

शास्त्रदृष्टिवर्जितैस्तस्यादर्शने कारणमाह । पटो वस्त्रसदृशश्चर्मविशेषोऽस्यास्तीति पटरः । विविधक्लेदनयुक्तः । पिङ्गः पिङ्गलवर्णः । एतत् शुक्लकृष्णादेरप्युपलक्षणम् । एतैः सर्वैर्विशेषणैर्मांसमयोऽक्षिगोलको विवक्ष्यते । अस्ति हि तस्य पक्ष्मपटलाख्यश्चर्मखण्डः पटसदृशः । विक्लेदनमप्यस्ति यदा तदा चक्षुषि जलस्रवणात् । पिङ्गलः शुक्लादिवर्णः स्पष्ट एव । एतादृशं यदक्षिगोलकम् एतदेव वरुणस्य पारमार्थिककालतत्त्वावरकस्य लक्षणं स्वरूपं वरणलक्षणं, मांसदृष्टिरेव तत्त्वविषयां शास्त्रदृष्टिमावृणोतीत्यर्थः । यत्र यस्यां मांसदृष्टौ एतद् जगत्प्रतीयते तत्र क्षणो मुहूर्तो दिवस इत्यादिरूपभेदेन कालभेदानाम् सहस्रं नीयते । व्यवह्रियते अवगम्यते इत्यर्थः ।"

तैत्तिरीयारण्यकं कृष्णयजुर्वेदीयम् ।
आनन्दाश्रममुद्रणालये प्रकाशितम् ॥
॥ इति द्वितीयो भागः ॥

—:०:—

तृतीयो भागः

॥ अथ पुराणेषु कतिपयेषु वर्ण्यमानम् अश्विनोर्जन्म ॥

विष्णुपुराणे ।

विष्णुपुराणे सावर्णिकमन्वन्तरप्रसङ्गेन अश्विनोर्जन्म प्रतिपाद्यते । वर्तमानं सप्तमं मन्वन्तरं वैवस्वतम् । अस्याधिपतिर्विवस्वतः पुत्रो मनुः । अष्टमो मनुरपि विवस्वत एव पुत्रः । केवलमुभयोर्मातरौ भिन्ने । अनयोरुभयोः मन्वोर्मातृभेदकथा-प्रसङ्गेनाऽश्विनोरपि जन्म प्रतिपाद्यते ।

विचित्रेयं कथा विष्णुपुराणे तृतीयेंऽशे द्वितीयेऽध्यायेऽस्ति संक्षेपेण प्रतिपाद्यते । अन्येषु केषुचन पुराणेषु कथेयं विस्तरेण प्रोच्यते । अभूतपूर्वेयं कथा । एकैव पत्नी रूपत्रयं धत्ते । प्रतिरूपं च पत्या संयुज्य साऽपत्यान्युत्पादयति । सर्वाणि अपत्यानि स्वस्मिन् कर्मणि अस्मिन् वैवस्वते मन्वन्तरे व्यापृतानि सन्ति । केवलं सावर्णिः स्वात्मनाऽष्टमस्य मनोर्बुभूषया मेरुपृष्ठेऽद्यापि तपस्यति ।

विश्वकर्मणः सुता संज्ञा सूर्यस्य पत्नी बभूव । सा सूर्याद् मनुं, यमं, यमीं च जनयामास । अथ सा भर्तुः सूर्यस्य तेजोऽसहमाना स्वां छायां भर्तृशुश्रूषणे नियोज्य तपसे वनं जगाम[1] । छायायां संज्ञाबुद्ध्या सूर्यः "शनैश्चरं, मनुं चाऽन्यं, तपतीं चाऽप्यजीजनत्" । कदाचित् कुपिता सा संज्ञापुत्रं यमं शशाप । ततो यमः सूर्यश्च तां संज्ञाया अन्यां जज्ञाते । तस्या यथावृत्तं श्रुत्वा विवस्वान् (सूर्यः) अरण्यसंस्थितां संज्ञां "समाधिदृष्ट्या ददृशे तामश्वां तपसि स्थिताम् ।

वाजिरूपधरः सोऽपि तस्यां देवावथाश्विनौ ॥" जनयामास । [श्लो. ६-७]

रभसा मैथुनाय विचेष्टमानयोस्तयोः विकीर्णाद् रेतसो रेवन्तं पुत्रमन्ते जनयामास "भास्करः" ।

ततो रविः पुनः संज्ञां स्वगृहमानिन्ये । अत्रान्तरे विश्वकर्मा स्वपुत्र्याः संज्ञायाः प्रीत्यर्थं सूर्यं भ्रमिमारोप्य तस्य तेजसः शमनं चकार । तत्र शातितेन तेजसा त्वष्टा विश्वकर्माऽथोनिर्दिष्टानि वस्तूनि निर्ममे—

१. विष्णोश्चक्रम् । २. रुद्रस्य त्रिशूलम् ।
३. धनदस्य कुबेरस्य शिबिका । ४. गुहस्य शक्तिः ।

१—१. ऋ. सं. १०. १७. १–२

"देवानामन्येषां च यदायुधं तत्सर्वं तेजसा तेन (शातितेनाष्टमेन भागेन) विश्वकर्मा व्यवर्धयत् ।"

अन्येषु पुराणेषु सूर्यस्य द्वितीया स्त्री छाया "सवर्णा" इति नाम्ना व्यपदिश्यते । सवर्णाया अपत्यं सावर्णिरिति द्वितीयस्य मनोर्नाम । अत्र तूच्यते—

छायासंज्ञासुतो योऽसौ द्वितीय. कथितो मनुः ।
पूर्वजस्य सवर्णोऽसौ सावर्णिस्तेन सोच्यते ॥ श्लो. १३
[वि. पु. अं. ३, अ. २, श्लो. २–१३]

विष्णुधर्मोत्तरपुराणे शनैश्चरजन्मकथनेनाऽश्विनोर्जन्म । मार्कण्डेयो वज्रमुवाच शनैश्चरस्य जन्म ।

सूर्यो वाजी भूत्वा तपस्यन्तीम् अश्वारूपां संज्ञामुपेयाय । तदा तमन्यं पुरुषं मत्वा सा व्यचेष्टत ।

मुखे च भावयामास तां सूर्यो दीप्तदीधितिः ॥ ८४

तस्या नासापुटौ पूर्णौ तदा शुक्रेण पार्थिव ।
तथा तस्यास्तदा जातौ नासत्यावश्विनावुभौ[1] ॥ ८५

भूमौ च पतितं यच्च ताभ्यां शुक्रं विमर्दितम् ।
तस्मात् सोऽश्वात् समुत्पन्नः कुमारः सूर्यसन्निभः ॥ ८६

रेवन्तेति तदा तस्य नाम चक्रे जगद्गुरुः ॥ ८९
[वि. ध. पु. खण्ड १, अ. १०६, श्लो. ८४–८६, ८९]

अत्र नासत्यौ इति नाम्नः प्रवृत्तिनिमित्तम् उच्यते—

१ मुखे भावयामास ।
२ नासापुटौ शुक्रेण पूर्णौ ।
३ तदा तस्यास्तथा जातौ उभावश्विनौ यथा तौ नासत्यौ बभूवतुः ।
४ ततो यच्छुक्रं पतितमासीत् तस्माद् रेवन्तोऽजायत ।

---

१. प्रसूर्वंगौ पूर्वजौ चित्रभानू ।" [५७]
[पूर्वजौ । अश्ववाश्वयोर्हि पूर्वं मुखसंयोगः । ततः संयोगाद् गर्भोत्पत्तिः । तत्र गर्भोत्पत्तेः पूर्वं मुखसंयोगमात्राज्जातौ ।]
"मुखेन गर्भं लभतां युवानौ ।" [६७]
[म. भा. आदि. अ. ३. ५७; ६७ निर्णयसागरः]

ब्रह्मपुराणे अध्यायः षष्ठः

लोमहर्षण उवाच ।

विवस्वान् कश्यपाज्जज्ञे दाक्षायण्यां द्विजोत्तमाः ।
तस्य भार्याऽभवत् संज्ञा त्वाष्ट्री देवी विवस्वतः ॥१॥
सुरेणुरिति विख्याता त्रिषु लोकेषु भामिनी ।
सा वै भार्या भगवतो मार्तण्डस्य महात्मनः ॥२॥
भर्तृरूपेण नातुष्यद् रूपयौवनशालिनी ।
संज्ञा नाम सुतपसा सुदीप्तेन समन्विता ॥३॥
न खल्वयं मृतोऽण्डस्य इति स्नेहादभाषत ।
अजानन् काश्यपस्तस्मान्मार्तण्ड इति चोच्यते ॥ ४
त्रीण्यपत्यानि भो विप्राः संज्ञायां तपतां वरः ।
आदित्यो जनयामास कन्यां द्वौ च प्रजापती ॥ ७
मनुर्वैवस्वतः पूर्वं श्राद्धदेवः प्रजापतिः ।
यमश्च यमुना चैव यमजौ संबभूवतुः ॥ ८
श्यामवर्णं तु तद्रूपं संज्ञा दृष्ट्वा विवस्वतः ।[1]
असहन्ती तु स्वां छायां सवर्णां निर्ममे ततः ॥ ९

सवर्णोवाच ।

आ कचग्रहणाद्देवि आशापान्नैव कर्हिचित् ।
आख्यास्यामि ··· ·· ··· ··· ···· ··· ॥ १४

एवं विवस्वते "आत्मनोऽतथारूपं मा वोचम्" इति तां वचसि आस्थाप्य संज्ञा स्वपितृगृहं प्रति निर्जगाम ।

ततो विवस्वान् छायायां जनयामास पुत्रद्वयम् ।
"पूर्वजस्य मनोर्विप्राः सदृशोऽयमिति प्रभुः ।
मनुरेवाभवन्नाम्ना सावर्ण इति चोच्यते ॥ ११
द्वितीयो यः सुतस्तस्याः स विज्ञेयः शनैश्चरः ।
संज्ञा तु पार्थिवी विप्राः स्वस्य पुत्रस्य वै तदा ॥ २०
चकाराभ्यधिकं स्नेहम्····················॥" २१

तदा—"पदा सन्तर्जयामास संज्ञां वैवस्वतो यमः ।" २२

तदा तव पादः पतिष्यतीति संज्ञारूपिण्या सवर्णया शप्तो यमः पित्रे निवेदयामास शापमोचनाय । ततो विवस्वान्—

1—"सा विवर्णं तु तद्रूपं दृष्ट्वा संज्ञा विवस्वतः ।" [हरिवंशे १. ९. ९]

कृमयो मांसमादाय यास्यन्त्यवनिमेव च । २९
कृतमेव वचस्तथ्यं मातुस्तव भविष्यति ।
शापस्य परिहारेण त्वं च त्रातो भविष्यसि ॥ ३०

अथ—तां शप्तुकामो भगवान् नाशाय मुनिसत्तमाः ।
मूर्धजेषु निजग्राह स तु तां मुनिसत्तमाः ॥ ३२

ततो यथावृत्तं छायाया विज्ञाय संज्ञामन्विष्यन् विवस्वान् श्वशुरगृहं जगाम ।

श्वशुरस्त्वष्टा—

भ्रमिमारोप्य तत्तेजः शातयामास वै तदा ॥३९॥
तेन निर्भासितं रूपं तेजसा संहृतेन वै ।
कान्तात्कान्ततरं द्रष्टुमधिकं शुशुभे तदा ॥४०॥

ततस्त्वष्टुः सकाशात् संज्ञाया अरण्यनिवासं श्रुत्वा तां द्रष्टुकामो विवस्वान् वनं ययौ । सा तु तपसा नियमेन च अकुतोभया तपस्यन्ती आसीत् ।

वडवावपुषा[1] विप्राश्चरन्तीम् अकुतोभयाम् ।
सोऽश्वरूपेण भगवांस्तां मुखे समभावयत् ॥४२॥
मैथुनाय विचेष्टन्तीं परपुंसोऽपशङ्कया ।
सा तन्निरवमच्छुक्रं नासिकाभ्यां विवस्वतः ॥४३॥
देवौ तस्यामजायेताम् अश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥४४॥
मार्तण्डस्यात्मजावेतावष्टमस्य प्रजापतेः ।
तां तु रूपेण कान्तेन दर्शयामास भास्करः ॥४५॥

अथ—

१ यमः पितॄणामाधिपत्यं लोकपालत्वं लेभे ।
२ मनुः प्रजापतिरभवत् ।

---

1. स्त्रीभ्यो ढक् [पा. ४. १. १२०] इत्यत्र भाष्यम्—
"वडवाया वृषे वाच्ये ढक् वक्तव्यः । वडवाया वृषः वाडवेयः ।"
"वृषो बीजाश्वः । अपत्यं वाडवः ।" [कैयटः]
"देवताविशेषस्य सूर्यस्यैकरूपस्य गृहीताश्वाकारस्य वाचकवडवाशब्दस्यैवात्र ग्रहणात् । बीजाश्वशब्देनापि गृहीताश्वाकारस्तत्पुमान् सूर्य एव ।"
[नागेशः] "वडवा अश्विनीनक्षत्रम् इति ज्योतिषम् ।" [शब्दकल्पद्रुमः]
"स्वर्वैद्यावश्विनीपुत्रावश्विनौ वडवासुतौ ।" [हेमचन्द्रः]

वाडवेय—du. the two A'svins as the sons of vadaba (or A'svini, q. v.) L. [M. williams]

३ सावर्णस्तपश्चरति मेरुपृष्ठे, यः सावर्णिके मन्वन्तरे भाव्यो मनुः ।

४ यमी यमुना सरिद् अभवत् ।

५ शनैश्चरो ग्रहोऽभवत् ।

६ शातितं तेजो विष्णोश्चक्रमभवत् ।

य इदं जन्म देवानां शृणुयान्नरसत्तमः ।
आपदं प्राप्य मुच्येत प्राप्नुयाच्च महद्यशः ।।४५।।

इदमाख्यानं पुनर्द्वाविंशतितमेऽध्याये आवर्त्यते, न तु पूर्णतया ।

मार्तण्डमाहात्म्यवर्णनं तत्र विषयः । भ्रमिमारोप्य तस्य तेजः शातितम् । शातितेन तेजसा नानाविधायुधनिर्माणं च तत्र सविस्तरं प्रोच्यते ।

अत्रैवं विमर्शः ।

१ संज्ञायाः भर्तुः सकाशात् पलायने हेतुः—

सुदीप्तेन सुतपसा समन्विता, रूपयौवनशालिनी सा भर्तुः रूपेण नातुष्यत् । [श्लोक ३]। भर्तुः श्यामवर्णं दृष्ट्वाऽसहमाना स्वां छायां भर्तृशुश्रूषणे नियोज्य सा पितृगृहं जगाम ।

२ यमः पादमुत्थाप्य सन्तर्जयामास सपत्नीमातरं, न तु मनुः ।

३ संज्ञायाः एकः पुत्रः मनुः । सवर्णाया अपि एकः पुत्रो मनुः ।

४ संज्ञा छायां भर्तृशुश्रूषणे नियोज्य वडवारूपमापन्ना । पतिं सा सर्वथा न तत्याज । पतिं पुनः प्राप्तुकामा सा तपस्तेपे ।

५ विवस्वान् श्यामवर्णः सन् त्वष्टुर्गृहं न गतः । विवस्वतः तीक्ष्णं तेजो दृष्ट्वा, तस्य तेजसः उग्रतामेव पुत्र्याः पतित्यागे हेतुं ज्ञात्वा, भ्रमिमारोप्य विवस्वन्तं तस्य तेजः शातयित्वा तस्य रूपं कान्तमकरोत् त्वष्टा ।

६ ततो विवस्वान् अश्वरूपमादाय वडवामुपेत्य तां मुखे समभावयत् ।

७ नासिकायां प्रविष्टं शुक्रं परपुरुषशङ्कया सा निरवमद् येन नासत्यौ जातौ ।

८ कृमिभिः पादमांसस्य भुवं नयनेन यमस्य शापमोचनम् ।

९ मूर्धजेषु कचेषु ग्रहणेन छायया यथावृत्तकथनम् ।

अथात्रैवं विवेचना क्रियते ।

सूर्यः सुमेरौ अस्तं याति कुमेरौ च तदानीमुदेति । कुमेरावुदितोऽसौ मनुः । सुमेरावस्तं गतश्च यमः[1] । अस्तभागे राजमानं सान्ध्यं तेजोऽत्र यमः । तस्य तेजसा दृश्यमानं द्रवत्तमोऽत्र सरिद्रूपा यमस्वसा यमी यमुना ।

१— 'यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किञ्चन ।
यमे अध्वरो अधि मे निविष्टो भुवो विवस्वान् अन्वाततान ।"
[अ. सं. १८. २. ३२]

क्रमशः क्षीयमाणे तेजसि, तमसि वर्धमाने च श्यामता भवति । येन रूप-शालिनी तेजस्विनी संज्ञा छायारूपम् आपद्यते । श्यामतां दृष्ट्वा संज्ञायाः पलायनं नाम तत्र तेजसः क्षयस्तमसो वृद्धिश्च । इयमवस्था मासद्वयं यावद् अस्तोत्तरं मेरौ भवति[1] ।

छायारूपिणी संज्ञाऽवरं मनुं, शनैश्चरं च जनयति । यमस्य पदा सन्तर्जनं नाम तेजसः सर्वथा विलोपः, येन विवस्वान् छायायाः रूपेषु गृह्णाति, अर्थात् स तमसि मासद्वयं यावद् लीनो भवति । मेरौ मासद्वयं यावद् गाढं तमो भवति ।

यमस्य शापाद् मोचनं भवति, यदा कृमयो मांसं भुवं नयन्ति । शातनात् प्राक् मासद्वयं यावत् क्रमशो वर्धमानं सान्ध्यं तेजः प्रवर्तते । तेन तेजसैव यमस्य पूयशोणितविस्रवस्य पादस्य चिकित्सा भवति ।

विवस्वान् संज्ञामन्विष्य त्वष्टुर्गृहं गच्छति, यत्र तस्य तेजसः शातनं भवति । यस्मिन् ध्रुवः पार्श्वे सूर्यः प्रकाशते तत्र मध्याह्नात् परं सूर्यस्य तेजसः क्षयो भवति । इदमेव शातनं नाम । मेरोः शिखरे सूर्यः २१½ अंशान् ऊर्ध्वं वृत्तेन भ्रमन्नारुह्य पुनरवरोहति । इदमेव भ्रमिमारोप्य तस्य तेजसः शातनम् ।

तेजःशातनात् परं स कान्तेन तेजसा युक्तोऽश्वरूपेण वडवारूपां संज्ञामुपैति । विवस्वतः स्वयमश्वत्वं नाम रश्मीन् मण्डलं च विना केवलेन तेजसा व्याप्तिः । इयमुदयात् प्राग्भवति । प्राङ्मुखी वडवा प्रत्यङ्मुखश्चाश्वः । अतोऽनयोः मुखेन परस्परं संभावना भवति । अश्विनोर्जन्म चाश्ववडवयोर्मेलने, तेजस्तमसोः सम-भावे भवति ।

मत्स्यपुराणे अध्यायः एकादशः

विवस्वतस्तिस्रः पत्न्यः संज्ञा, राज्ञी, प्रभा च ।
रैवतस्य सुता राज्ञी रेवतं सुषुवे सुतम् ।
प्रभा प्रभातं सुषुवे, त्वाष्ट्री संज्ञा तथा मनुम् ॥ [३]
यमश्च यमुना चैव यमलौ तु बभूवतुः ।
ततस्तेजोमयं रूपमसहन्ती विवस्वतः ॥ [४]
नारीमुत्पादयामास स्वशरीरादनिन्दिताम् । [५]

इयं नारी छाया, संज्ञायाः सवर्णा ।

भास्करः छायायां जनयामास—

1—"यमः परोऽवरो विवस्वान् ततः परं नाति पश्यामि किञ्चन ।
यमे अध्वरो अधि मे निविष्टो भुवो विवस्वान् अन्वाततान ।"
[अ. सं. १८. २. ३२]

१ मनुः सावर्णिः । २ शनिः । ३ तपती[1] । ४ विष्टिः ।

स्वपुत्रवात्सल्यदोषेण यमेन संतर्जिता छाया यमं शशाप ।

शशाप च यमं छाया सक्षतः कृमिसंयुतः ।
पादोऽयमेको भविता पूयशोणितविस्रवः ॥ [१२]

यमेन प्रार्थितो विवस्वान् पुत्रं तं सान्त्वयामास—

कृकवाकुर्मया दत्तो यः कृमीन् भक्षयिष्यति ।
क्लेदं च रुधिरं चैव वत्साऽयमपनेष्यति ॥ [१७]

विवस्वान् वाजी भूत्वा यदा वडवाभूतां संज्ञामुपेयाय तदा ।

संज्ञा च मनसा क्षोभमगमद् भयविह्वला । [३५]
नासापुटाभ्यामुत्सृष्टं परोऽयमिति शंकया ।
तद्रेतसस्ततो जातावश्विनाविति निश्चितम् ॥ [३६]
दस्रौ सुतत्वात् संजातौ, नासत्यौ नासिकाग्रतः । [३७]

भ्रमिमारोप्य विवस्वन्तं भ्रमिमारोप्य तस्य शातितात्तेजसः चक्रं विष्णोः, त्रिशूलं रुद्रस्य, वज्रम् इन्द्रस्य च निरमायिषत । परन्तु विवस्वतः पादयोस्तेजसः शातनं त्वष्टा न चकार । रूपं चाप्रतिमं चक्रे त्वष्टा पद्भ्यामृते महत् । [३०]

पादयोः शातनाभावात् तौ (पादौ) दुर्दर्शौ भवतः ।

न शशाकाथ तद् द्रष्टुं पादरूपं रवेः पुनः ।
अर्चास्वपि ततः पादौ न कश्चित् कारयेत् क्वचित् ॥ [३१]

अतो रवेः पादयोः पूजा निषिध्यते—

यः करोति स पापिष्ठां गतिमाप्नोति निन्दिताम् ।
कुष्ठरोगमवाप्नोति लोकेऽस्मिन् दुःखसंयुतः ॥ [३२]
तस्माच्च धर्मकामार्थी चित्रेष्वायतनेषु च ।
न क्वचित् कारयेत् पादौ देवदेवस्य धीमतः ॥ [३३]

अत्र तिस्रः पत्न्यो विवस्वतः

संज्ञा	राज्ञी	प्रभा

1—तपती । कुरुवंशजाः तापत्याः । कुरोर्माता बभूव तपती । तपतीम् उपयेमे संवरणो नृपतिः । चित्ररथो गन्धर्वोऽर्जुनं तपत्युपाख्यानमाचष्टे ।

[म. भा. आदिपर्व अध्याय १७०–१७२]

तस्यां संजनयामास कुरुं संवरणो नृपः ।
तपत्यां तपतां श्रेष्ठ तापत्यस्त्वं ततोऽर्जुन ॥ [म. भा. आदिपर्व. १७२. ५०]

मनुः	रेवतः	प्रभातम्	⊙ ← उदयः

१. मनुः मध्यरात्रतः परोऽग्निः ।

२. रेवतः अग्नेः प्रसरेण प्रवर्धमानं सान्ध्यं तेजः ।

३. प्रभातम् उज्ज्वला कान्तिः ।

उदयात् प्रागेतानि त्रीणि । उदयस्थले सरण्यूः । अस्तस्थले छाया सवर्णा । अस्तस्थले मनुः सावर्णिः, शनिः, तपती, विष्टिश्च ।

शनैश्चरस्य द्वौ पादौ । उदयपार्श्वे एकोऽस्तपार्श्वेऽन्यः । अस्तं गतस्य पादः सपत्नीमातरं प्रति उद्यतः, तया शप्तश्च । शापमोचनं पादस्य उदयस्थले । उदये मनुः, रेवतः प्रभातम् इति क्रमः ।

प्रभातम्	रुधिरम्	कृकवाकुः
रेवतः	क्लेदः	सावित्रः
मनुः	कृमयः	[निरु. १२.१३]

वायुपुराणे ।

अध्यायः चतुरशीतितमः

अत्र विरोचनस्य भगिनी विरोचना त्वष्टुः पत्नी । अनयोः पुत्रस्त्रिशिराः, पुत्री च सरेणुः ।

त्वाष्ट्री तु सवितुर्भार्या पुनः संज्ञेति विश्रुता ॥ [२१]
असूत तपसा सा तु मनुं ज्येष्ठं विवस्वतः ।
यमौ पुनरसूतासौ यमं च यमुनां च ह ॥ [२२]
सा तु गत्वा कुरून् देवी वडवारूपधारिणी ।
सवितुश्चाश्वरूपस्य नासिकाभ्यां तु तौ स्मृतौ ॥ [२३]
असूत सा महाभागा त्वन्तरिक्षेऽश्विनौ किल ।[1]
नासत्यं चैव दस्रं च मार्तण्डस्यात्मजावुभौ ॥ [२४]

1—त्वाष्ट्री तु सवितुर्भार्या वडवारूपधारिणी ।
असूयत महाभागा सान्तरिक्षेऽश्विनावुभौ ॥ म. भा. आदिपर्व ६६. ३५
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनावपि ।
मार्तण्डस्याऽऽत्मजावेतावष्टमस्य महात्मनः ॥
[शान्तिपर्व मोक्षधर्म अ. २०८. १०]

विजज्ञे सवितुः संज्ञाभार्यायां तु त्रयं पुरा । [३०]
मनुर्यवीयान् सावर्णिः संज्ञायां च तथाश्विनौ ।
शनैश्चरश्च सप्तैते मार्तण्डस्यात्मजाः स्मृताः ॥ [३१]
इतः परम् अध्याये पुनः आख्यानं विशदेन प्रोच्यते । यथा—
शातवर्णं तु तद्रूपं दृष्ट्वा संज्ञा विवस्वतः ।
असहन्ती स्वकां छायां सवर्णां निर्ममे पुनः ॥ [३९]
आ केशग्रहणाद् वि आशयं नैव कर्हिचित् ।
आख्यास्यामि………………… ॥ [४४]

छायासंज्ञायां सवर्णायां जातो यवीयान् मनुः सावर्णिः ।

अथ—तां शप्तुकामो भगवान् नाशाय कुपितः प्रभुः ।
सा तत्सर्वं यथातत्त्वम् आचचक्षे विवस्वतः ॥ ६५ ॥

अथाऽश्ववडवासंयोगः—

देवौ तस्माद् अजायेताम् अश्विनौ भिषजां वरौ ।
नासत्यश्चैव दस्रश्च स्मृतौ द्वावश्विनाविति ॥ ७७

विवस्वतोऽत्र सप्ताऽपत्यानि—

१ मनुः
२ यमः
३ यमी } सरेण्वां संज्ञायां जाताः ।

४ मनुः सावर्णिः]—छायासंज्ञायां सवर्णायां जातः ।

५ नासत्यः
६ दस्रः } अश्विनौ वडवायां जातौ ।

७ शनैश्चरः]—छायासंज्ञायां जातः ।

अष्टमोऽत्रादित्यः—

भगोंऽशश्चार्यमा चैव मित्रोऽथ वरुणस्तथा ।
सविता चैव धाता च विवस्वांश्च महाबलः ॥ १५॥
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ।
इत्येते द्वादशादित्याः कश्यपस्याऽऽत्मसंभवाः ॥ १६ ॥

[म. भा. शान्तिपर्व अ. २०८, १५–१६]

द्वादशादित्याः ।

१ भगः	२ अंशः	३ अर्यमा	४ मित्रः
५ वरुणः	६ सविता	७ धाता	८ विवस्वान्
९ त्वष्टा	१० पूषा	११ इन्द्रः	१२ विष्णुः

अत्र तपती, विष्टिः, रेवतः इति नामानि न सन्ति ।

१. मनुः वैवस्वतः श्राद्धदेवः—सुमेरौ उदितः सूर्यः ।

२. यमः—सुमेरौ अग्निः, यस्मिन्नस्तं गच्छन् सूर्यः प्रविशति ।

३. यमी—मासद्वयं क्रमशः क्षीयमाणं सान्ध्यं तेजः सुमेरौ ।

एते त्रयः संज्ञाया अपत्यानि । संज्ञा विरोचनायां जाता त्वष्टुः पुत्री । विरोचना प्रकाशं कुर्वाणा । त्वष्टा रूपं कुर्वाणः । अनयोः पुत्री संज्ञा प्रकाशावच्छिन्नं रूपिद्रव्यम् ।

एवं सति मनुः सूर्यः, यमः प्रकाशः, यमी च प्रकाशितं वस्तु । यत्र सूर्यः प्रकाशते तत्र द्वितीयं न भवितुमर्हति । अतो मनुः पृथिव्या एकस्मिन् पार्श्वे, यमयम्यौ चापरस्मिन्पार्श्वे । तौ च प्रकाश-द्रव्यरूपेण, अहोरात्ररूपेण वा बुध्येते ।

४. मनुः सावर्णिः (सवर्णायां जातः) । असौ कालान्तरभावी अष्टमो मनुः । स छायायाः (तमसः) पुत्रः । अतः प्रकाशलाभाय स तपश्चरतीदानीम् ।

केशग्रहणाद् ऊर्ध्वं छायायाः (सवर्णायाः) कथा न श्रूयते । केशग्रहणेन मासद्वयं प्रकाशमानं सान्ध्यं तेजो विलीनं, गाढं तमो व्याप्तं मासद्वयं यावत् । इदमेव सावर्णेः रूपम् ।

५. नासत्यः } अश्विनौ वडवाजातौ ।
६. दस्रः }

तमसः कालाद् मासद्वयाद् ऊर्ध्वं, उदयं यावत् मासद्वयं क्रमशो वर्धमानं सान्ध्यं तेजः प्रकाशते । इदमेव वडवाश्वयोः रूपम् । अत्र वडवा तमः, अश्वस्तेजः ।

तेजसः, उदयकालिकस्याग्नेः तापेन वायुः परिज्मा (परितो गन्ता) भवति । सूर्याभिमुखी पृथिवी (वडवा) अभिमुखम् आगच्छन्तं सूर्यस्य तेजोरूपमश्वं संगच्छति ।

इदानीं तेजसो विवर्धमानतया तस्य (केशग्रहेण) व्याघाताभावात् तदसत्यं न भवतीति नासत्य इत्युच्यते । एवमत्र नासत्यशब्दो तमसि विवर्धमानस्य तेजसो द्योतकः । तमसि यदा तेजसः सेको भवति तदा विदीर्यमाणं तमो रासते । तेजस्तमसोः संगमे वर्धमानेन तेजसा विदीर्यमाणं द्रवत् तमो रासते इत्यतोऽश्विनो-र्वाहनं रासभ इत्युच्यते ।

अश्ववडवयोः संगमेन वडवा प्रथमापि, विवस्वतो यथास्वरूपादर्शनेन परपुंसोऽवशंकया शुक्रं यदेव शरीरे प्रविष्टं तत् सा नासिकाभ्यां निरवमत् ।

नासिकाशब्दयोगेन परिज्मानं परितोगन्तारं ब्रह्मणा सूत्रेण भ्रामकं वाय्वात्मानं द्योतयति । शरीरे च सदा गतिमान् प्राणात्मा वायुरेव ।

नासत्यस्तमसि अव्यक्तस्य तेजसोऽवस्थां द्योतयति । दस्रः तमोहन्तृ, विषयाणां ग्राहकं, पदार्थानां निरूपकं सुव्यक्तं तेजो द्योतयति ।

अश्विनोर्जन्म यद्यपि षष्टिदण्डात्मकस्य दिनस्य प्रारम्भेऽपि प्रतिदिनं भवति तथापि वैशिष्ट्येन सर्वोपपत्त्या अश्विनोर्जन्मविषयको बोधः मेरुस्थले भवति । तत्र क्षितिजादूर्ध्वं बिम्बस्योदये स्थूलमानेन तस्य त्रयः परिक्रमा भवन्ति । तत्र पृथिवी वडवा सूर्योश्वः । मण्डलस्योर्ध्वाधरभावेन परितो गत्याऽश्ववडवयोर्विचेष्टनं, वडवायाः परपुरुषशङ्का च प्रकल्प्येते ।

मण्डलं त्रीणि दिनानि सदा परितो भ्रमति कुटिलगत्या इत्यतो मण्डलं तत्र नसते । णस धातुः कौटिल्ये, भौवादिकः । सुमेरावुदयपार्श्वे मण्डलम् आनुपूर्व्या उत्तरोत्तरं वर्धमानम् उपर्येति, तावताऽधोभागे दक्षिणे कुमेरौ अस्तपार्श्वे मण्डलं क्रमशोऽस्तं याति । इदमुदयस्थलीयं तत्त्वं नासत्येत्यत्र नकारोत्तरदीर्घाकारेण द्योत्यते । द्यावापृथिव्योः संगमे, अश्ववडवयोर्मैथुने यो रवो भवति सोऽप्यत्र नासधातुना (रासधातुना च) द्योत्यते ।[1]

एवं नसनात्, नासनात् जातो नासत्यः । वडवाश्वयोर्विचेष्टनं कुटिलगत्या, तत्र जायमानो रवश्च नसनासधातुभ्यां व्युत्पन्नेन नासत्यशब्देन द्योत्यते । अस्या वृत्तेरुदयकालिकतया, उदये सूर्यस्य प्रकाशात्मना ज्योतिर्भागेण जायमानतया ज्योतिषः प्राधान्यत्वेन विवक्षया दस्रशब्दः प्रयुज्यते । उभयोर्यौगपद्येन अश्वाभ्यां जातत्वात् उभौ अश्विनौ । तत्रोपाधिभेदेनैको नासत्योऽन्यो दस्रः । तथा च यास्कः अनयोरश्विनोः कालं भेदं च प्रदर्शयति—"तयोः काल ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्यानुविष्टम्भम् । अनुतमोभागो हि मध्यमः, ज्योतिर्भाग आदित्यः ।"

[निरु. १२. १]

एवमधिदेवदृष्ट्या नासत्यो मध्यमः "अनुद्गततमोभागः", दस्रश्चादितेः पुत्र आदित्यः "ज्योतिर्भागः ।"

७. अथ सप्तममपत्यं शनैश्चरः ।

मेरौ रात्रौ दीर्घतमसः सत्त्वात्, प्रकाशस्य च शनैर्वृद्ध्या, वृत्राणां नवनवतेर्वधाद्

१—णास् रास् शब्दे । नासते । प्रणासते । णस कौटिल्ये । नसते ।

[सि. कौ. भ्वादिः धातुः ६२५–६२७]

यदरसद् इव स रासभोऽभवत् [शत. ब्रा. ६. १. १. ११] ।

यत्तदरसद् इवैष रासभः [शत. ब्रा. ६. ३. १. २८] ।

वैश्यं च शूद्रं चानु रासभः [शत. ब्रा. ६. ४. ४. १२] ।

ऊर्ध्वं सूर्यस्योदयाच्च अत्र मण्डलस्य शनैश्चरत्वेन कल्पना। अस्तात् परमुदयं यावत् षाण्मासिककालावधिकतया तत्र तावता कालेन चिराद् उदयात् सूर्यस्य गतिं मन्दां मत्वा स तत्र शनैश्चरः।

विवस्वतो येऽत्र सप्त पुत्राः परिगणिताः तेषां ग्रहैः सह संख्यासाम्यं विद्यते। ज्योतिःशास्त्रे ग्रहा नव प्रसिद्धाः। राहुकेत्वोरदृश्यतया राहुकेतू वर्जयित्वा सप्तग्रहा भवन्ति। संवत्सरोऽपि सप्तदिनात्मकेन सप्ताहेन परिमितो भवति। सूर्योऽपि सप्तरश्मिः। अश्विनोः रथोऽपि सप्तस्रोतांसि परितो गच्छति। एवं सति विवस्वतः संज्ञा—सवर्णा—वडवासु जातैः सप्तभिः पुत्रैः सह ग्रहाणां सप्तानां काचन संगतिरस्ति वेत्यत्र विमृश्यते।

तत्र पृथिवीमभिप्रेत्य ग्रहाणां चन्द्र-बुध-शुक्र-रवि-मंगल-गुरु-शनीनां कक्षाः क्रमिका भवन्ति।

तथा हि विष्णुधर्मोत्तरपुराणे—

उत्तानपादपुत्रस्तु ध्रुवो विष्णुः प्रकीर्तितः।
निबद्धो भ्राम्यते यत्र महतां ज्योतिषां गणः॥
सप्तर्षिमण्डलं नित्यं तस्याधस्तात्प्रकीर्तितम्।
मरीचिश्च वसिष्ठश्च अङ्गिराश्चात्रिरेव च॥
पुलस्त्यः पुलहश्चैव क्रतुः सप्तर्षयोऽमलाः।
वसिष्ठमाश्रिता साध्वी तेषां मध्याद् अरुन्धती॥
तस्याधस्ताद् भचक्रं च, तस्याधस्ताच्छनैश्चरः।
तस्याधस्तात्तथा जीवस्तस्याधस्तात् कुजः स्मृतः॥
तस्याधस्ताद् दिनेशश्च, तस्याधस्ताच्च, भार्गवः।
तस्याधस्ताद् बुधः प्रोक्तस्तस्याधस्ताच्च चन्द्रमाः॥

[वि. ध, पु. खण्ड १, अ. १०६, श्लोक. २१-२५]

अत्रायोध: क्रमः—

१. शनैश्चरः (शनिः) २. जीवः (बृहस्पतिर्गुरुः)
३. कुजः (मंगलः) ४. दिनेशः (रविः सूर्यः)
५. भार्गवः (शुक्रः) ६. बुधः
७. चन्द्रमाः

षाण्मासिकी रात्रिः सुमेरौ

सुमेरुः	सरण्यूः	सवर्णा	उत्तरकुरुः बडवा		बडवा	विवस्वान् अश्वः	सुमेरौ उदयः
	संज्ञा	छाया	सार्वणिः		नासत्यः	दस्रः	
अस्तम्	यमः	यमी	गाढं तमः		×	×	उदय
	अग्निः	उषाः	अश्विनौ	अश्विनौ	उषाः	अग्निः	
	३०	३०	३०	३०	३०	३०	

कुमेरुः

उदयः कुमेरौ ।

सरण्यूवाः पुत्रः मनुः ।

कुमेरौ प्राङ् अयम् आदित्यः ।[1]

सुमेरुस्यस्य शनैश्चरः ।

	१	२	३	४	५	६	
सोमः २	बुधः	शुक्रः	×	×	गुरुः	मङ्गलः	रविः १[2]
	४	६			५	३	

शनैश्चरः (शनिः)—(७)

१—बडवायां जातावश्विनौ देवयानेन गच्छन्तौ षड्मासान् एव तस्मिन् याने भवेताम् । एह यातं पथिभिर्देवयानैः [ऋ. सं. १. १८३.६]

"गर्ग उवाच—बडवा हस्तिनी गौर्वा यदि युग्मं प्रसूयते ।
विजातं विकृतं वापि षड्भिर्मासैर्म्रियेत वै ।"

[वि.ध.पु.ख. २, अ. १४१, श्लो. १]।

२—१ शनिः (७) | २. जीवः (५) | ३. कुजः (३) | ४. रविः (१)
५ शुक्रः (६) | ६. बुधः (४) | ७. सोमः (२)

शुक्रगुरू । शुक्रो योऽस्तोत्तरं, स एव गुरुरुदयात् प्राक् ।

योगाचार्यो महाबुद्धिर्दैत्यानामभवद् गुरुः ।
सुराणां चापि मेधावी ब्रह्मचारी यतव्रतः ॥

[म. भा. आदिपर्व—संभवपर्व—अ. ६६, श्लो. ४३]

अथ भागवतपुराणे

अष्टमस्कन्धे त्रयोदशोऽध्याये

विवस्वतश्च द्वे जाये विश्वकर्मसुते उभे ।
संज्ञा छाया च राजेन्द्र ये प्रागभिहिते तव ॥
तृतीयां वडवामेके, तासां संज्ञासुतास्त्रयः ।
यमो यमी श्राद्धदेवश्छायायाश्च सुताञ्छृणु ॥
सावर्णिस्तपती कन्या भार्या संवरणस्य या ।
शनैश्चरस्तृतीयोऽभूद् अश्विनौ वडवात्मजौ ॥
अष्टमेऽन्तर आयाते सावर्णिर्भविता मनुः ॥

[भाग. पु. ८. १३. ८–११]

अत्र विवस्वतः तपत्या (छायासुतया) सह अष्टाऽपत्यानि ।

विष्णोर्भगवतः स्थूलरूपध्याने–"नासत्यदस्रौ परमस्य नासे" [२.१.२९]

इति निरूपणेन अश्विनोः सदागतिमत्वं, वायुना साहचर्यम्, अन्तरिक्षे जन्म च विज्ञायते ।

अस्य हिन्दी-अनुवादः [गीता प्रेस गोरखपुर]

"महाबुद्धिमान् शुक्र ही योग के आचार्य और दैत्यों के गुरु हुए । वे ही योगबल से मेधावी, ब्रह्मचारी एवं व्रतपरायण बृहस्पति रूप में प्रकट हो देवताओं के भी गुरु होते हैं ।"

"अन्यौ तु खलु देवानां सूर्याचन्द्रमसौ स्मृतौ ।
अन्यौ दानवमुख्यानां सूर्याचन्द्रमसौ तथा ॥"

[म. भा आदिपर्व. अ. ६५, श्लो. ३७]

१—अथातः श्रूयतां वंशो योऽदितेरनुपूर्वशः ।
यत्र नारायणो देवः स्वांशेनावतरद् विभुः ॥ ३८
विवस्वान् अर्यमा पूषा त्वष्टाऽथ सविता भगः ।
धाता विधाता वरुणो मित्रः शक्र उरुक्रमः ॥ ३९
विवस्वतः श्राद्धदेवं संज्ञाऽसूयत वै मनुम् ।
मिथुनं च महाभागा यमं देवं यमीं तथा ।
सैव भूत्वाथ वडवा नासत्यौ सुषुवे भुवि ॥ ४०
छाया शनैश्चरं लेभे सावर्णिं च मनुं ततः ।
कन्यां च तपतीं या वै वव्रे संवरणं पतिम् ॥ ४१

[भाग. पु. ६. ६. ३८–४१]

अस्मिन् ध्याननिरूपणे द्यावापृथिवीभ्याम् अहोरात्राभ्यां चाश्विनोर्भेदः प्रतिपाद्यते–."द्यौरक्षिणी चक्षुरभूत् पतङ्गः ।
पक्ष्माणि विष्णोरहनी उभे च ।" [३०]

अश्विनोर्मुख्यं कर्म ज्योतिष उद्गमनं येन सूर्य उदितो भवेत् । स च सूर्योऽत्र चक्षुःस्थानीयः पतङ्गः ।

प्राणे निगृहीते मनो निगृहीतं भवति, मनसि निगृहीते चक्षुर्निगृहीतं भवति । एवमश्विनोरभावे उषसोऽभावः, तस्याश्चाऽभावे सूर्यस्याभावः ।

यदि रूपिद्रव्यं सूर्यः, तस्य प्रकाशमानं रूपम् उषाः, तर्हि चक्षुषो ज्योतिरग्निः, तेनाग्निना रूपिद्रव्यस्य प्रत्यक्षीकरणम् अश्विनोरश्वित्वम् । चक्षुषोऽग्निरपि अश्विभ्यामेव निर्मथित इति तु अन्यत् ।

नासिकया प्राणापानौ लक्ष्येते, अत एव दीर्घमायुरश्विनोरेव प्रदेयम् ।

"आयुष्कामोऽश्विनौ देवौ पुष्टिकाम इलां यजेत् ।

प्रतिष्ठाकामः पुरुषो रोदसी लोकमातरौ ॥ [भाग. पु. २. ३. ५]

देवासुरयोर्द्वन्द्वयुद्धे—"अश्विनौ वृषपर्वणा युयुधाते ।" [भा. पु. ८.१०. ३०]

भिषक्त्वेन सोमपानाद् बहिष्कृतावश्विनौ, शर्यातस्य यज्ञे च्यवनेन सोमपानस्य अर्हौ कृतौ । तथाहि नवमे स्कन्धे तृतीयेऽध्याये च्यवनसुकन्याख्यानं प्रपञ्च्यते ।

ग्रहं ग्रहीष्ये सोमस्य यज्ञे वामप्यसोमपोः ।
क्रियतां मे वयोरूपं प्रमदानां यदीप्सितम् ॥
बाढमित्यूचतुर्विप्रमभिनन्द्य भिषक्तमौ ।
निमज्जतां भवानस्मिन् ह्रदे सिद्धविनिर्मिते ॥
इत्युक्त्वा जरयाग्रस्तदेहो धमनिसन्ततः ।
ह्रदं प्रवेशितोऽश्विभ्यां वलीपलितविप्रियः ॥
पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ।
पद्मस्रजः कुण्डलिनस्तुल्यरूपाः[1] सुवाससः ॥
तान् निरीक्ष्य वरारोहा सरूपान् सूर्यवर्चसः ।
अजानती पतिं साध्वी अश्विनौ शरणं ययौ ॥

१—तु. "उत त्यद्वां जुरते अश्विना भूच्च्यवानाय प्रतीत्यं हविर्दे । अधि यद् वर्प इत ऊति धत्थः ॥" [ऋक् ७. ६८. ६]
इत ऊति वर्पः (मृत्योरितः प्रत्यागमनाय नूतनं रूपम्)
"इत ऊति" इत्यश्विनौ अभिधीयेते । द्र. सायणः [ऋक्–१०. ६१. २]

दर्शयित्वा पतिं तस्यै पातिव्रत्येन तोषितौ ।
ऋषिमामन्त्र्य ययतुर्विमानेन त्रिविष्टपम् ॥

[भाग, पु. ९. ३. १२–१७]

ह्रदेऽवगाहनम् । अत्राश्विभ्यां च्यवनोऽवगाहितः । च्यवनः स्वयं न प्रविष्टः वार्धक्येन दौर्बल्यात्, अपि तु अश्विभ्यां प्रवेशितः । स्वयमश्विनोः प्रवेशो नात्र प्रोक्तः[1] । परन्तु ह्रदाद् उत्थानसमये त्रय उत्थिताः ।

अश्विभ्यां प्रवेशितः । अत्र अश्विनौ प्रयोजकौ च्यवनः प्रयोज्यः । परन्तु पुरुषास्त्रय उत्तस्थुरपीच्या वनिताप्रियाः ।

जराग्रस्तः वलीमुखः पलितशिराः पुरुषो वनितायाः प्रियो न भवति । अत्र ह्रदे स्नानात् परं च्यवनोऽश्विभ्यां सह तुल्यरूप उत्तस्थौ तदा ते त्रयः सरूपा वनिताप्रिया अभवन् । तान् अपीच्यान् पद्मस्रजः कुण्डलिनश्च दृष्ट्वा यद्यपि सुकन्यायाः प्रीतिर्जाता तथापि तेषां तुल्यवयोरूपत्वात् स्वं पतिम् इतराभ्यां विवेचयितुम् अशक्नुवती सा अश्विनौ शरणं ययौ, तौ च तस्याः पातिव्रत्येन प्रसन्नौ भूत्वा तां पतिं दर्शयामासतुः ।

ऐतिहासिकदृष्ट्याऽऽख्यानमिदं सुसंगतं न भवति । कथं नाम एकस्य ह्रदेऽवगाहनेन त्रयाणां रूपसम्पत्तिः ? अपि च त्रयाणां समानरूपता, त्रयोऽपि अपीच्याश्च ।

आधिदैविकदृष्ट्याऽत्र सर्वं सुसंगतं भवति । तथाहि—"त्रिधा बद्धो वृषभो रोरवीति" [ऋ. सं. ४. ५८. ३] इति श्रुत्या एक एव सूर्योऽस्तं गच्छन्न् उदीयमानः त्रिधाबद्ध इव भवति । मेरौ उदये बिम्बेन चत्वारः परिक्रमाः क्रियन्ते । सूर्यो नक्षत्रादिभिः २३½ अंशान् अथवा पूर्णत्वसंख्यया २४ अंशान् उपर्येति विषुवदश्च । मण्डलस्य व्यास एकोंऽशो गृह्यते । एवं सति अंश-

---

१—महाभारतेऽश्विनौ सुकन्यायै पत्युश्च्यवनस्य यौवनं प्रतिशुश्रुवतुः समयेन, यत् तुल्यवयोरूपाणां त्रयाणां (च्यवनतृतीयानाम् अश्विनाम् ?) अन्यतमं पतिरूपेण सा वृणीतेति । "ततोऽब्रवीच्च्यवनः शीघ्रं रूपार्थी प्रविवेश ह ।
अश्विनावपि तद् राजन् सरः प्राविशतां तदा ॥"
[म. भा. वनपर्व, अ. १२३. श्लो. १६–१७]

"च्यवनो वै दाधीचोऽश्विनोः प्रिय आसीत् । सोऽजीर्यत् । तमेतेन साम्नाऽप्सु व्यौह्लयताम् । तं तु पुनर्युवानम् अकुरुताम् । तदेवाव तौ तर्ह्यकामयेताम् ।" [तां. ब्रा. १४. ६. १०]
(व्यौह्लयताम्: व्यचालयताम्)　　[द्र. ऋक् १. ११६. १०]

मेकमुपर्येतुं ९० ÷ २४ = १५ ÷ ४ = ३$\frac{३}{४}$ पादोनचत्वारि दिनान्यपेक्ष्यन्ते[1] । तत्र यावता परिमाणेन मण्डलमुपर्येति (सुमेरौ) तावता परिमाणेन अस्तमेत्य-परपार्श्वे (कुमेरौ) ।

"एवं सति उदयस्थानं प्राप्तस्य, उदयेऽप्रवर्तमानस्य पूर्वस्य पूर्णस्य बिम्बस्य कृते दिनचतुष्टयम्, उदयतो दिनचतुष्टयम्, उदयोत्तरं पूर्णस्य बिम्बस्य कृते दिन-चतुष्टयम् इति द्वादशदिनपर्यन्तम् उदयावसरे बिम्बत्रयस्य कृतेऽपेक्षितम् । तदानीं किरणैरसम्बद्ध इति गृहीत्वा ऋभूणामादित्यगृहे द्वादशदिनपर्यन्तमातिथ्यग्रहणे "स्वापः"[2] इत्यादि वर्णनं संगच्छते । [द्र. वे. वि. पृष्ठ २२४] ।

तत्रोदयास्तपार्श्वद्वयेन द्वावश्विनौ, मण्डलं च स्वयं च्यवन इति कृत्वा त्रित्वं, त्रयाणां च तुल्यरूपता । वृत्ताकारेण परिभ्रमणेन वलीत्वम्, तेजसो मान्द्यात् पलितत्वम्, मण्डलमेव पद्मरूपमिति तस्य परितो गमनात् पद्मस्रक्त्वम् इत्यादिः संगच्छते ।

च्यवनो धमनिसन्तत आसीत् । धमनिषु[3] स सम्यक् तत आसीद् जरा-ग्रस्ततया ।

"नाडी तु धमनिः शिरा" इत्यमरः [२. ६. ६५] । धमनी गलशिरा भवत्यत्र । उदयपार्श्वे मेरुमध्योऽधः सप्तमांशपर्यन्तं वैषम्येण प्रवर्धमानेनाह्ना, शुनःशेपवृत्त्या यत्र मण्डलं वर्तयति तत्रासौ धमनिसन्ततः ।

इन्द्रः सोमपानम् अश्विनोरननुजानन् सोमग्रहात् च्यवनं वारयितुं वज्रम् आददे । च्यवनः स्वतेजसा इन्द्रस्य सवज्रं हस्तं स्तम्भयामास ।

१—द्र. "कौसल्या तं हयं तत्र परिचर्य समन्ततः ।
कृपाणैर्विशशासैनं त्रिभिः परमया मुदा ॥ [३३]
पतत्रिणा तदा सार्धं सुस्थितेन च चेतसा ।
अवसद् रजनीमेकां कौसल्या धर्मकाम्यया ॥ [३४]
होताध्वर्युस्तथोद्गाता हयेन समयोजयन् ।
महिष्या परिवृक्त्या च वावातामपरां तथा ॥ [३५]
प्राचीं होत्रे ददौ राजा दिशं स्वकुलवर्धनः ।
अध्वर्यवे प्रतीचीं तु ब्रह्मणे दक्षिणां दिशम् ॥ [४३]
उद्गात्रे च तथोदीचीं दक्षिणैषा विनिर्मिता ।
अश्वमेधे महायज्ञे स्वयंभुविहिते पुरा ॥ [४४]
[रामायण. बाल. १४. ३३–३५, ४३, ४४] ।

२—द्वादश द्यून् यदगोह्यस्यातिथ्ये रणन्नृभवः ससन्तः । [ऋ. ४. ३३. ७]

३—गल्दा धमनयो भवन्ति, गलनम् आसु धीयते [निरु. ६. २४] ।

अथेदम् अधिदैवम्। "बाहू राजन्यः कृतः"[1] [ऋ. सं. १०. ९०. १२] इति श्रुत्याऽस्तपार्श्वे उदयपार्श्वे च बिम्बस्याभावे तमोनाशकं साम्ध्यं तेजः इन्द्रस्य बाहुत्वेन गृह्यते। "या च का च बलकृतिरिन्द्रकर्मैव तत्" [निरु. ७. १०]।

ज्योतिषो वर्धनेन व्यापनेन च, मण्डलस्योपरि गमनाय पन्थानं गतिं च कुरुतोऽश्विनौ। मण्डले पूर्णे उदिते सति, उदयपार्श्वे साम्ध्यतेजसो विलोपात्, तेनाश्विनोः सूर्ये विलयः, तत्र मण्डले सोमपानं वा तयोर्भवति।


"शश्वत् कण्वानां सदसि प्रिये हि कं सोमं पपथुरश्विना।"

[ऋ. सं. १. ४७. १०]

मण्डलस्य पूर्णतया उदये सति, इन्द्रकर्मणः समाप्त्या उदयपार्श्वस्थस्य भुजस्य इन्द्रस्य स्तम्भनं पुराणे प्रतिपाद्यते।

सोमेन याजयन् वीरं ग्रहं सोमस्य चाग्रहीत्।
असोमपोरश्विनोश्च्यवनः स्वेन तेजसा॥
हन्तुं समाददे वज्रं सद्योमन्युरमर्षितः।
सवज्रं स्तम्भयामास भुजमिन्द्रस्य भार्गवः॥

1— बाहू राजन्यः कृतः—



ब्राह्मणोऽस्य मुखमासीद् बाहू राजन्यः कृतः।
ऊरू तदस्य यद् वैश्यः पद्भ्यां शूद्रो अजायत॥

ऋ. सं. १०. ९०. १२

"वैश्यं च शूद्रं चानु रासभः।" शत. ब्रा. ६. ४. ४. १२

रासभोऽश्विनोर्वाहनम्। उषा अश्विनोः रथमारोहति।

देवगणानां चातुर्वर्ण्यं विधीयते—

आदित्याः क्षत्रियास्तेषां, विशश्च मरुतस्तथा।
अश्विनौ तु स्मृतौ शूद्रौ तपस्युग्रे समास्थितौ॥
स्मृतास्त्वङ्गिरसो देवा ब्राह्मणा इति निश्चयः।
इत्येतत् सर्वदेवानां चातुर्वर्ण्यं प्रकीर्तितम्॥

[म. भा. शान्तिपर्व अ. २०८, श्लो. २३-२५]

अन्वजानंस्ततः सर्वे ग्रहं सोमस्य चाश्विनोः ।
भिषजाविति यत्पूर्वं सोमाहुत्या बहिष्कृतौ ॥

[भाग. पु. ९. ३. २४–२६]

दधीचोऽस्थीनि ।

भुवनत्रयं ग्रसतस्त्वाष्ट्रस्य वृत्रस्य हननाय त्रिदशैः प्रार्थितो विष्णुरिन्द्रम् उपदिदेश । यूयं दध्यञ्चमाथर्वणं तस्य अङ्गानि शरीरस्य याचध्वम् । तस्याङ्गानाम् अस्थिभिर्वृत्रवधः संभवति । अश्विनौ दधीचः प्रियौ शिष्यौ । अतस्ताभ्यां प्रार्थितः स धर्मज्ञो युष्मभ्यं स्वान्यङ्गानि दास्यति इति ।

दधीचा निष्कलं (शुद्धं) ब्रह्म अधिगतमासीत् । इन्द्रो भिषजावश्विनौ तद् ब्रह्म नार्हत इति बुद्ध्या, अश्विभ्यां विद्यादानाद् दध्यङ् वारित आसीत् । अश्विनौ दधीचे इन्द्राद् अभयं दत्वा तस्य शिरसः स्थानेऽश्वशिरः सन्धाय ब्रह्मविद्याम् अधिजगाते । अतोऽश्विनौ दधीचः प्रियौ शिष्यौ । अश्विभ्यां भिषग्भ्यां विद्यादानेन कुपित इन्द्रोऽश्विभ्यां संहितमश्व्यं शिरोऽच्छिनत् । एवं शिरसश्छेत्ता इन्द्रो दध्यञ्चं याचेतेत्यस्यासङ्गत्या, तद्दोषवारणायाऽश्विभ्यां याचनं प्रतिपादयति पुराणम् ।

स वा अधिगतो दध्यङ्ङश्विभ्यां ब्रह्म निष्कलम् ।
यद्वा अश्वशिरो नाम तयोरमरतां व्यधात् ॥
युष्मभ्यं याचितोऽश्विभ्यां धर्मज्ञोऽङ्गानि दास्यति ।
ततस्तैरायुधश्रेष्ठो विश्वकर्मविनिर्मितः ।
येन वृत्रशिरोहर्ता (इन्द्रः) मत्तेज उपबृंहितः ॥[1]

[भाग. पु. ६. ९. ५२; ५४]

ब्रह्मपुराणे इदमाख्यानमन्यथा प्रतिपाद्यते । शत्रून् विजित्य जातसंहर्षा देवा अस्त्राणि दधीचेराश्रमे विन्यस्य निर्गताः ।

"तत्र देवाः समाजग्मू रुद्रादित्यास्तथाश्विनौ ।
इन्द्रो विष्णुर्यमोऽग्निश्च, जित्वा दैत्यान् उपागतान् ॥"

दधीचिरसुरा आगत्य अस्त्राण्यपहरेयुरिति भीत्या अस्त्राणां तेजांसि पपौ । देवाः पुनरायुधान्यपेक्षाञ्चक्रुः । अस्त्राणां पीतानि तेजांसि दधीचेरस्थिषु अवस्थितान्यासन् । अतः पुनरस्त्रनिर्माणाय स्वशरीरत्यागं कृत्वा देवेभ्योऽस्थीनि ददौ दधीचिः । परन्तु मृताच्छरीराद् अस्थ्नां बहिरानयनं देवैः दुःशकमासीत् । ततो देवैः प्रार्थिता गावः दधिचिदेहं विदार्य, अस्थीनि संलिह्य शुद्धानि ददुर्देवेभ्यः ।

१—"ततोऽब्रवीत् सुरान् शक्रो न मे शक्या महासुराः ।
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ॥"

[म. भा. शल्यपर्व. अ. ५१ श्लो. २७–२८]

अत्र दध्नाऽऽह्वन् दध्यङ् अस्तोत्तरं सान्ध्यं तेजः । अस्त्राणि रश्मयः । अस्त्राणां तेजसः पानं तमसि तेजसः क्रमशो विलयः । दधीचेर्मृत्युर्गाढं तमो मासद्वयं यावत् । मृताच्छरीरादस्त्राणां शोधनं गोभिः उदयात्प्राक्कालिकैः तेजःपुञ्जैः क्रियते ।

सुराः समागत्य दधीचिमूचुर्महाभयं ह्यागतं वाञ्छ्वं नः ।
ददस्व चास्त्राणि मुनिप्रवीर यानि त्वदन्ते निहितानि देवैः ।
दधीचिरप्याह सुरारिभीत्या, अनागत्या भवतां चाचिरेण ।
अस्त्राणि पीतानि शरीरसंस्थान्युक्तानि, युक्तं मम यद् वदन्तु ॥
विप्रस्तदोवाच मदस्थिसंस्थान्यस्त्राणि गृह्णन्तु न संशयोऽत्र ।
देवा गाः समूचुः—वज्रं मुखं वः क्रियते हितार्थं गावो देवैरायुधार्थं क्षणेन ।
दधीचिदेहं तु विदार्य यूयम् अस्थीनि शुद्धानि प्रयच्छताऽत्र ॥
ता देववाक्यात्त्व तथैव चक्रुः, संलिह्य चास्थीनि ददुः सुराणाम्' ॥
[ब्रह्मपुराणे अ. ११०. श्लो. १०–५५]

इन्द्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः । जघान नवतीर्नव ॥
[ऋ. सं. १. ८४. १३]

॥ इति तृतीयो भागः ॥

—:०:—

१—गोभिः संलेहेन अस्थ्नां शोधनं महाभारते नास्ति ।

स एवमुक्त्वा द्विपदां वरिष्ठः (दधीचिः) प्राणान् वशी स्वान् सहसोत्ससर्ज ।
ततः सुरास्ते जगृहुः परासोरस्थीनि तस्याथ यथोपदेशम् ॥
[वनपर्व अ. १००. २२]

[ब्रह्मण उपदेशम् अनुसृत्य] ।

तस्यास्थिभिर्महाघोरं वज्रं संक्रियतां दृढम् ।
महच्छत्रुहणं घोरं षडश्रं भीमनिःस्वनम् ।
तेन वज्रेण वै वृत्रं वधिष्यति शतक्रतुः ॥
[वनपर्व—अ. १००. १०. ११]

ततोऽब्रवीत् सुरान् शक्रो न मे शक्या महासुराः ।
ऋतेऽस्थिभिर्दधीचस्य निहन्तुं त्रिदशद्विषः ॥
[म. भा. शल्यपर्व. अ. ५१. श्लो. २७–२८]

चतुर्थो भागः

प्रथमोऽध्यायः

।। आधुनिकम् ईक्षणम् ।।

१ वैदेशिकानां दृष्टिकोणः ।

सविवेकं सश्रद्धं निविष्टचित्ततया ध्यात्वा धार्मिकभावनया मानवः परमात्मानं नमति । इयं बुद्धेरेका वृत्तिः । परन्तु लोके भगवतो वाचामगोचरां लीलां प्रकृतौ दृष्ट्वा मानवस्तत्र कौतुकपूर्णां लीलामयीं बहुविधां कल्पनां करोति या बुद्धौ निःसन्दिग्धां प्रमाणकोटिं नाऽपद्यते । इयं बुद्धेरपरा वृत्तिः ।

पुराणेषु देवानां जन्मकर्मनामधामादिनिरूपणे बुद्धेर्द्वितीया वृत्तिः सुतरां स्फुरति । इयं पौराणिकी कल्पना देवानां विविधाः कथा असृजत् याः पुरुषस्य असंस्कृतां प्राकृतां मतिं समाश्रिता भवन्ति । तत्र विवेकस्याऽगौरवेऽपि सामान्यतः पुरुषस्योपादानार्थं मानवजीवसंवादिन्यः, तर्कसंगताश्च घटनाः संघट्यन्ते । परन्तु तत्राद्भुतरसेन विषयास्तथा प्रतिपाद्यन्ते यतेऽलौकिका अमानवीयाः प्रतिभान्ति; येषां च तर्कपूर्णविवेचनं दुष्करं भवति । आङ्ग्लभाषायाम् इयं पौराणिकी कल्पना मैथोलोजीति [Mythology] नाम्ना व्यवह्रियते ।

"सर्वसमुदायानां (देवं) पौराणिकम्" इति नाम ग्रन्थे लिखति कीथमहोदयः ।

"मिटनि"–लेखेषु पठ्यमानेषु देवेषु अन्यतमौ नासत्यौ । इदं तयोः प्राचीनतां प्रमाणयति । इदं देवयुग्मं कालान्तरेऽपकृष्यासुरत्वं नीतं, यद्रूपं नाओङ्हैत्यं" इति नाम्ना, "अवेस्ट"–ग्रन्थे उपलभ्यते । ऋग्वेदे तयोः सामान्यं नामाऽश्विनौ (अश्ववन्तौ) इति । तयोस्तत्रापरं नाम दस्रौ (अद्भुतकर्माणौ) इति । परवर्तिषु आख्यानेषु तयोरेको "दस्रः" इति, अन्यो "नासत्यः" इति नामभेदेन निर्दिश्यते ।

तयोर्जन्मविषयेऽनिश्चयः—दिवः पुत्रौ, समुद्रस्य पुत्रौ, सरण्य्वा जातौ विवस्वतः पुत्रौ, अथवा पूषणः (?) पुत्रौ इति बहुधा तयोर्जन्मोच्यते । यद्यपि प्रकृत्या तौ अपृथग्भूतौ यथा चक्षुषी हस्तौ वा, तथापि सकृत् द्विर्वा तयोः पृथग्जन्म नानाजातत्वं च प्रोच्यते ।

सूर्यस्य दुहितुः सूर्यायाः तौ वरौ । संभवतस्तस्या वध्वाः कृते तयोः रथे तृतीयं चक्रम् आसनं च भवति । विवाहकर्मणि तावाहूयेते वध्वाः पतिगृहं प्रति स्वेन रथेन नयनाय । नवोढाम् अपत्योत्पादनसमर्थां च विधातुं तौ प्रार्थ्येते ।

इदं तु स्पष्टं यदश्विनौ डिओस्कुरिभ्यां, लेट्टिकदेवपुत्राभ्यां कस्टोरपोल्लक्सा-भ्याम् अभिन्नौ। यथा लेट्टिकदेवपुत्रौ अश्वारोहिणौ सन्तौ सूर्यस्य दुहितरं चन्द्रं वाऽऽत्मनो वधूं कामयमानौ गतौ, तथा अश्विनावपि सूर्यां वधूं पृच्छन्तौ गतौ। अपि च डिओस्कुरौ इव अश्विनावपि समुद्रे विपन्नान् तारयतः।

ग्रीकपुराणे—

लीडा टिन्डेरोसस्य पत्नी बहून्यपत्यानि असूत, तेषु चत्वारि मुख्यानि।

१. कस्टोरः [Kastor]

२. पोलिडेयुक्सः [Polydeukes–Pollux in Latin]

३. क्लिटेमेस्ट्रा [Klytaimestra]

४. हेलेना [Helen–Helena]

तत्र पोलिडेयुक्सः हेलेना च जिउसस्य पुत्रः पुत्री चास्ताम्। कस्टोरः टिन्डेरोसस्य पुत्रः।

होमरस्य काव्ये कस्टोरः पोलिडेयुक्सः च टिन्डेरोसस्य पुत्रौ। अतः पितृनाम्ना "टिन्डेरिदौ" इति तौ प्रसिद्धौ आस्ताम्। क्वचिद् आख्याने उभौ जिउसस्य पुत्रौ, यौ स्वस्रा हेलेनया सह युगपदेकस्मादण्डात् समुत्पन्नौ। क्वचिद् अन्यस्मिन्नाख्याने हेलेना अण्डजा, इतरौ च जरायुजौ।

जिउसो हंसरूपं धृत्वा लीडायामण्डमुत्पादयामास यस्माद् हेलेना समुत्पन्ना। अथवा तदण्डं "नेमिसिसा" उत्पाद्य लीडायै ददौ।

कस्टोर-पोलिडेयुक्सयोः कस्टोरो मर्त्यः, पोलिडेयुक्सोऽमर्त्यः। यदि कस्टोरः टिन्डेरोसस्य पुत्रः, तर्हि तेनैवासौ मर्त्यः।

होमरस्य काव्ये उभौ पुत्रौ मर्त्यौ। परन्तु होमरेण रचिते तयोः सूक्ते उभौ अमर्त्यौ।

कस्टोर-पोलिडेयुक्स-हेलेनानां जन्मविषये किमपि क्वापि ऐकमत्यम् आधुनिकानां गवेषकाणां नास्ति।

"डिओस्कुरी" नाविकानां समुद्रयायिनां च संरक्षकौ, तत्र समुद्रे एल्मोज्योतीरूपेण प्रसिद्धौ चास्ताम्। स्पार्टानगर्यां तयोर्मूर्ती पूज्येते स्म।

कदाचिद् हेलेनाऽपि एल्मोज्योतीरूपेण दृश्यते स्म। यदि एकैव ज्योतिःशिखाऽदृश्यत तर्हि सा हेलेनाया रूपं, तच्चाऽशुभम् अमन्यत। यदि द्वे शिखे अदृश्येताम् तर्हि ते युग्मभूतयोः कस्टोरपोलिडेयुक्सयोः रूपं, तच्चाशुभनिवारकम् अमन्यत।

कस्टोरपोलिडेयुक्सयोर्जीवने तिस्रो मुख्या घटनाः समभवन्।

(१) स्वसुः हेलेनायाः अटिकनगराद् मोचनार्थम् एथेनदेशं प्रति अभियानम्। तत्र मेन्सेथ्युसः राज्यम् अलभत। स कस्टोरपोलिडेयुक्सौ पुत्रत्वेन स्वीचकार, येन तौ तत्र योगविद्यामभ्यस्य तत्रत्यानां देववत् सम्मानम् अलभेताम्।

(२) हिरण्यत्वचोऽन्वेषणे आर्गोनतानाम् अभियाने सहयोगः। तत्र समुद्रयात्रायां वात्यया बाधितायां समोथ्रेसियान् देवान् प्रार्थयामास ओर्फियसः वीणावादनेन। तदानीं वात्या रुद्धा, डिऔस्कुर्योः शिरसोरुपरि नक्षत्राणि च चकाशिरे।

(३) कस्टोरपोलिडेयुक्सौ, अफेरियुसस्य पुत्राभ्यां प्रतिज्ञातं वधूद्वयम् अपाहरताम्। अस्य हेतोः, आहोस्वित् गवां स्तेयस्य हेतोः तयोरुपरि आक्रमणं कृतम् अफेरियुसस्य पुत्राभ्यां, यत्र च संघट्टे अफेरियुसस्य पुत्रौ, कस्टोरः च हताः।

तदानीं पोलिडेयुक्सः स्वस्यामर्त्यतायाः अर्धमंशं कस्टोराय प्रदातुं जिउसं प्रार्थयामास। अनुमतं च तद् जिउसेन। तदा प्रभृति उभौ सहैवैकस्मिन् दिने स्वर्गे निवसतः, अन्यस्मिन् दिने तौ मृत्युलोके वसतः। अथवा पर्यायेण तयोरन्यतरो म्रियते, येन एकः सदैव रसातले वसति, अन्यस्तस्माद् बहिर्भवति।

अर्वाचीना लेखकाः मिथुनराशिस्थतारकाभ्याम् अनयोस्तादात्म्यं प्रतिपादयन्ति।

इयं कस्टोरपोलिडेयुक्स-युग्म-संस्कृतिः रोमदेशे प्रसृता। यत्र कस्टोरः इयतीं ख्यातिं गतो यत् प्रायः "कस्टोरौ" इत्येकेनैव नाम्नोभयोर्ग्रहणं भवति।

वीरौ तौ युवानौ स्पार्टाया राजानौ आस्ताम् इत्यपि मन्यते। दक्षिणग्रीसाद् आरभ्य समग्रं ग्रीसं, सिसिलि-द्वीपं, प्रायोद्वीपम् इटॉलि च व्याप्ताऽभवदनयोः पूजा।

तयोर्भ्रातृस्नेहेन प्रसन्नः पोसेदोनः [पर्जन्यः वरुणः] वातानां तरङ्गाणां च प्रभुतां ताभ्यामददात् येन तौ पोतभङ्गे सति यात्रिकाणां रक्षामकुरुताम्। अनेन समुद्रेभ्यस्तारणेन, सामान्यतः सर्वत्र यात्रिकाणां तौ रक्षकौ अमन्येताम्। फलतः आतिथ्यस्यापि तौ रक्षकौ, यस्य (आतिथ्यस्य) च व्यतिक्रमे शासितारौ च तौ अभवताम्।

महान्तौ अश्वौ आरुह्य तौ अदृश्येताम्। सामुदायिकक्रीडानां तौ अध्यक्षौ अमन्येताम्। स्पार्टानगरे वाजिधावनभूमेः प्रवेशद्वारे तयोर्मूर्ती प्रतिष्ठिते आस्ताम्। युद्धनृत्यं युद्धसंगीतं च ताभ्यामाविष्कृते इत्यमन्यन्त जनाः। कवयो वन्दिनश्च तयोरनुग्रहमकामयन्त।

तयोः सामरिकवृत्त्या प्रथेयं प्रचलिता यद् यदैव स्पार्टानृपतिः युद्धाय बहिरगच्छत् तदा तयोः प्रतीके सहनीते आस्ताम्।

ग्रीसदेशे डिओस्कुर्योर्देवालया आसन्। मूर्तिषु तौ प्रायः शूलहस्तौ,

अण्डाकारोष्णीषधारिणौ अथवा शिरस्त्राणधारिणौ, युवानौ, अश्वारोहिणौ च अदृश्येताम् ।

रोमनगरे ख्रिस्तोः प्राक् तृतीयशतकतः प्रतिसंवत्सरं जुलाईमासस्य पञ्चदशे दिने प्रमुखा अश्वारोहिणो डिओस्कुरिभ्यां महान्तं बलिं प्रददत आसन् ।

एरिनिसा ।

वेदे सरण्यूः, अश्विनोर्माता, ग्रीकपौराणिककथायां एरिनिसया सह संवदति । एरिनिसा पृथिवीदेवता या वडवारूपम् अधत्त ।

सरण्युर्मर्त्येभ्योऽपगूहता भवति, अर्थात् प्रातः सूर्यस्य पत्नी (रात्रिरूपा, उषा वा) सूर्यं जहाति । सा पत्युः शय्यां विहाय छायां सवर्णां तत्र नियोजयति । सवर्णा छाया सूर्येण सह वसति, तेजस्तमसोः सन्धिकाले ।

वेदे या सरण्यूः (सरमा) सैव ग्रीकपुराणे डिमेटरा एरिनिसा । अश्विनौ उषाश्च, ग्रीकपुराणे डिओस्कुरी हेलेना च ।

वेदे इव ग्रीक्कथायामपि वडवारूपा देवी युग्मं जनयति । वेदे युग्मम् अश्विनौ । ग्रीकपुराणे युग्मस्य एको रणाश्वः, अन्यैका बाला इत्येवं प्रभेदः ।

सरण्यू-एरिनिसयोः इतिवृत्तं कथं केवलं भारते ग्रीसे च प्रादुरभवत् इति जिज्ञासायाः समाधानं नोपलभ्यते ।

पूर्वमुभौ ग्रीक-भारतीयसमुदायौ (उभयेषां ग्रीकाणां वैदिकानां पूर्वजा यावत्) सहैकत्र न्यवसताम् । उभयोः उभयसाधारणः पामरजनानां कथाकोशः आसीत् । उभयोरपि साधारणी सजातीया वा कापि भाषाप्यासीत् । कालान्तरे तौ सहवासं विहाय पृथग्देशान्तरे विकीर्णौ । तदा तयोराख्यानेषु विभिन्नानि विरुद्धानि च वृत्तानि प्रविष्टानि । इदमेव समाधानं भवितुमर्हति सरण्यू-एरिनिसयोः आख्यानेषु दृश्यमानयोः संगताऽसंगतयोः वृत्तयोः ।

असभ्यानाम् असंस्कृतानां मानवानां पुराणेषु देवाः पशुरूपा भवन्ति; येषां चापत्यानि क्वचिद् मनुष्यरूपा भवन्ति; यत्र च देवा आकृतिं परिवर्त्य रूपान्तरं दधते ।

युग्मदेवौ सार्वत्रिकौ ।

क्वचिद् युग्मदेवयोर्मूर्ती दृश्येते । तत्रैको देवः ऊर्ध्वमुखां ज्वलन्तीम् उल्मुकां हस्ते धारयति, अन्यः प्रशमिताम् अधोमुखाम् उल्मुकां हस्ते धारयति । ते उल्मुके जीवनमरणयोः प्रतीके भवतः । क्वचिद् एको वृषशिराः, अन्यो वृश्चिकशिराः । इदमपि जीवनमरणे द्योतयति । इमौ देवौ सूर्यस्य यथास्वं वृत्तिं पर्यायेणोदयास्तमयौ द्योतयतः ।

सर्वासु सभ्यसंस्कृतिषु आदौ युग्मदेवयोः प्रतीके उपलभ्येते । तच्च युग्मम् अश्विनौ, मित्रावरुणौ, लिबेरौ, रेमु-रोमुलु, इसि-ओसिरि, अपोलो-अर्टेम्यौ, कस्टोर-पोल्लक्सौ, अंफिओन-जेथुसौ, अरियन-ओरियनौ इत्यादिभ्यां नामभ्यां पुराणेषु गोचरीभवति । क्वचिद् भ्राता वा स्वसा वेत्येकस्य तृतीयस्य योगेन साहचर्यस्य क्षेत्रं वर्तते यथा कस्टोरः हेलेना च, ओसिरिः सेटश्च ।

पुराणकल्पिता एते देवा अमर्त्यात् पितुः मर्त्यायां मातरि समुत्पन्नाः । मातापित्रोः स्वभावौ अपत्ययोः न संयुज्येते । अपत्ये स्वभावेन पृथगेव भवतः । यदि एकः क्रूरो व्याधः, तर्हि अन्यः शान्तोऽविपालः । गोत्रिय-पशव्य-प्रतीकतया एते देवा भूयसा पशुपक्षिरूपेण दृश्यन्ते । अत एव अण्डजत्वं बहुधा श्रूयते । क्वचित् सिंहौ एकः क्रूरः अन्यो दांतः—अहोरात्रयोः प्रतीकौ । क्वचिद् अश्वौ—एकः श्वेतस्ताम्रो वा, अन्यः कृष्णः । वेदेऽश्विनौ अनेन रूपेणोपलक्षितौ, एकस्य रूपं ज्योतिर्मयम्, अन्यस्य रूपं तमोमयम् । रथश्च, यं तौ वहतः, अहर्मुखस्य सामारेखायां सदा धावन्निव भवति ।

प्रायो युग्मदेवतयोरेको मानवस्य शाश्वतिकं तत्त्वं द्योतयति, तच्च तस्य पित्र्यं दिव्यम् । अथवा स मानवस्य जीवात्मनः प्रतीकः । तस्य सहचरः (युग्मगतः इतरः) मानवस्य मर्त्यभावं द्योतयति । क्वचिच्छुभाशुभयोः परस्परप्रतियोगितां च तौ द्योतयतः । ईजिप्टस्य पुराणे ओसिरि-सेटयोः मूलभावे, तथा यवनस्य पुराणे अहुरमज्द-अङ्ग्रिरमैन्य्वोः मूलभावे च शुभाशुभप्रतियोगिता विद्यते ।

जीवनस्य याथात्म्यं शुभाशुभसम्मिश्रम् । अतः शुभं तत्त्वं दिव्यतपोनिष्ठं भवति । मोक्षलाभाय आत्मनिग्रहः कर्मफलत्यागश्च विधेयौ भवतः । इदं द्वन्द्वं भारते आत्मब्रह्मनामभ्यामुदाहृतं भवति । आत्मा जीवपरः, ब्रह्म च विश्वात्मा । अयं विश्वात्मभावो रहस्यमयस्त्यागे निष्ठितश्च ।

फ्रेडरिक-निटशे-महोदयोऽपि मानवस्य दिव्यत्वस्य उन्मोचनार्थम् आंशिकनिषेधम् उपदिशति । "आत्मानम् उद्दिधीर्षुः विस्मरतु······। विस्मरणं दिव्यो योगः । यद् भारतमं प्रतीयते तद् गभीरे गर्ते, समुद्रे वा मानवः पातयतु, येन स उच्चैःशिखरमधितिष्ठतु ।"

मिथुनराशिः ।

राशिचक्रे तृतीयं स्थानं मिथुनस्य । नक्षत्रयोः युग्मं मिथुनं दिव्यं सर्वेषां युग्मानां प्रतीकभूतम् । ज्योतिश्चक्रवलयगतत्वाद् मिथुनराशिः परिवर्तमानकालचक्रस्य द्योतकत्वेन महत्त्वपूर्णं स्थानमापन्नमस्ति । पूर्वयोर्मेषवृषभयोः राश्योः ऐक्यं द्योतयन् क्रियाशक्तेर्दिव्यभावं द्योतयति । उत्तरवर्त्तिषु राशिषु क्रियाशक्तेर्नानात्वं, वैषम्यं, विरोधं च द्योतयति ।

एवं मध्यपाती अयं राशिः नानात्वे ऐक्यं संवत्सरचक्रस्याऽविभाज्यतां च द्योतयति । अपि च द्वैतमापन्नं मिथुनं सृष्टं प्रतिवस्तु व्याप्तं दृश्यते । प्रतिवस्तु एकं तत्त्वं निर्विकारम् अपरं तु विकारात्मकम् । एकं जातिम् अन्यद् व्यक्तिं च द्योतयति ।

रोमस्य जेमिनिमूर्त्तौ द्वौ नग्नौ सुरूपौ युवानौ स्तः । एकः उत्थितः सुधीरः, प्रतिहस्तेन उल्कां धारयन् तिष्ठति । वामभागेऽन्यः किञ्चिन्नत इतरमनु, स्ववामहस्तमितरस्य वामस्कन्धे स्थापयंस्तिष्ठति । दक्षिणपुरुषस्य पृष्ठे स्त्रीमूर्त्तिरेका, तस्य कटिदघ्ना अनग्ना तिष्ठन्ती अस्ति ।

ग्रीकपुराणे डिओस्कुरौ मिथुनराशिस्थनक्षत्राभ्यां तादात्म्यम् आपन्नौ स्तः । कस्टोरे मृते, तस्य भ्राता पोलिडैयुकसः, कस्टोराय स्वीयमर्त्यममरत्वं दित्सुः तद्दानाय जिउसं प्रार्थयामास । जिउसः तयोर्भ्रातृस्नेहेन अतीव प्रसन्नो भूत्वा शाश्वत् जेमिनि–(मिथुन)–नक्षत्रयोः पदं ताभ्यां प्रददौ ।

ज्योतिःसम्बन्धिदेवतासु अश्विनोर्विशिष्टं स्थानं विद्यते । वेदेऽभिकल्पितौ, स्वभावतो दुर्विज्ञेयौ चाश्विनौ । तथापि अश्विदेवताकानि बहूनि सूक्तानि विद्यन्ते यत्र कवयः ऋत्विजश्च तौ सश्रद्धं सोत्साहं प्रशंसन्ति आह्वयन्ति च । तत्र मुख्यो हेतुरयमेव भवति यत्तौ प्रातर्यावसु देवेषु अग्रण्यौ भूत्वा रजांसि तमांसि च तिरस्कृत्य अहर्जन्मयतः ।

इदमाधिदैविकं तत्त्वमङ्गीकृत्यापि "मुइर" महोदयः आख्यानगतपुरुषान् ऐतिहासिकानेव मन्यते । अपि च अधिदेवे कथं नु अश्विनौ हविर्दीपुषे ज्योतिष्कुर्वाणौ, हविरदातुर्ज्योतिरपहरेताम् ।

मुइरमहोदयः तेजो वा तमो वा हवीरूपेण न गृह्णीयात् न वा तदानीं तनानां वैदिकानाम् अर्थसञ्चयानाम् अध्यात्मं भावं मन्येत ।

समीक्षा ।

आधुनिकसमीक्षकाः आत्मग्रस्ता ऊर्णनाभा इव दृश्यन्ते । अश्विनौ इति नाम केवलं वेदे श्रूयते, नायं शब्दो ग्रीकपुराणे श्रूयते, न वा अवेस्ताग्रन्थे । एवं वेदस्य केवलौ अश्विनौ वेदाद् बहिष्कृत्य जेमिनिनक्षत्राभ्यां, कस्टोरपोलक्सनक्षत्राभ्यां च उपमीयेते । परन्तु अश्विभ्यां सहैतेषां युग्मानां संगतिः न दृश्यते ।

वेदेऽश्विनोर्जन्मविषये कस्यापि सन्देहो नास्ति । तौ विवस्वतः सरण्य्वां जातौ [ऋ. सं. १०. १७. १–२] । तौ नित्ययुवानौ, अजरौ अमर्त्यौ च । तयोः रथो मधुवाहनः । तौ यज्ञम् आगत्य अहनि त्रिः मधु पिबतः । अश्वशिरः सन्धाय दधीचो मधुविद्याम् आददाताम् । नमुचिवधे तौ इन्द्रं, पुत्रं पितरौ इव, अरक्षताम् ।

इदमश्विनोः स्थूलं सामान्यं वर्णनम्। परन्तु अत्र निर्दिष्टेषु एकमपि वस्तु पाश्चात्यपुराणेषु न विद्यते। तथापीमौ वैदिकौ अश्विनौ प्रसभं बाह्यैर्युग्मैः सह तादात्म्यम् आपाद्येते। न्यायाद् अपेतोऽयं, दुराग्रहः, विषयम् आकुलीकरोति, येन पुरुषायुषपरिश्रमेणापि असन्दिग्धनिर्णयो न भवति।

ग्रीकपुराणेऽपि वडवाऽपत्यद्वयं जनयति यस्मिन् युग्मे एकः श्रेष्ठो रणाश्वः, अपरा एका बाला। सूर्यः उषाश्च इदं युग्मं भवितुमर्हतः, परन्तु अश्विभ्यां सहाऽस्य युग्मस्य कोऽपि सम्बन्धो न भवति।

समुद्रयात्रिकाणां प्रार्थनया डिओस्कुरी दिव्य-एल्मो-ज्योतीरूपेणाऽभिव्यज्य समुद्रे मज्जनात् त्रायेते इत्येतादृशमवनकर्माऽश्विनोरवनकर्मणा सह न संगच्छते। वेदेऽश्विनौ समुद्रे विपन्नं रथैश्च नौभिश्च तारयतः।

पाश्चात्यपुराणेषु वैदिकयज्ञस्य गन्धोऽपि नास्ति, क्व पुनर्मधुसेकः।

अवेस्टग्रन्थे इन्द्रः नासत्यः इत्युभौ असुरौ। वेदेऽश्विनौ इन्द्रतमौ (अतिशयेनैश्वर्यवन्तौ) स्तः। इन्द्रनासत्यौ तौ देवौ सचनस्तमौ अतिशयेन सर्वैः सेव्यमानौ देवैः सार्धं यज्ञम् आगच्छतः [ऋ. सं. ८. २६. ८] अतोऽवेस्टग्रन्थासुरनासत्येन वैदिकाश्विनोः काऽपि संगतिर्न भवितुमर्हति।

कथं वेदस्य इन्द्रो नासत्यश्च अवेस्टग्रन्थेऽसुरत्वमापन्नौ, कथं वा अवेस्टग्रन्थे वैवस्वतमनोर्लोपः वैवस्वतयमस्य प्राधान्यं इत्यादि तत्त्वम् अधिजिगांसूनाम् ऊर्णनाभजालग्रस्तानां दुर्विपाकतया नाधिगतं भवति।

यत्तु कस्टोरे मृते, तस्य भ्रातुस्त्यागेन प्रीतो जिउसः आदर्शभ्रातृस्नेहस्य स्मारकार्थमिव उभौ भ्रातरौ, मृतं चामृतं च कस्टोरपोलिडेयुकसौ जेमिनिनक्षत्रयोः पदे स्थापितवान् इत्यद्भुतं वृत्तमपि अश्विनोः केनापि वृत्तेन संगतं न भवति।

यदा सर्वतः चङ्क्रमणं कृत्वाऽपि प्रश्नानां समीचीनमुत्तरं न लभन्ते तदाऽनाथः सर्वेषां नाथं परमात्मानमिव, एते कुण्ठितमतयः सूर्यं शरणं यान्ति। तत्रापि वैदिकयज्ञप्रक्रियायाम् अश्रद्धतया, अग्निहोत्र-दर्शपूर्णमास-इष्टि-पशु-सोमयागानाम् अननुष्ठानेन वा याज्ञिकदेवतानां, वैदिकदेवानां च यथास्वं तत्त्वं मीमांसितुं न शक्नुवन्ति।

यदि इदं वचनम् अन्याय्यं मन्यते तर्हि इयत्या महत्या गवेषणया, इयता ग्रन्थानामवगाहनेन, इयत्या तत्त्वमीमांसया च अद्यापि कस्यापि देवतातत्त्वानुसन्धातुर्यज्ञेऽश्विनौ मधुमत्या कशया मधु न सिञ्चतः।[1]

1—त्रिरश्विना यज्ञं मधुना मिमिक्षतम्। [१. ३४. ३]। मधुमत्या नः कशया मिमिक्षतम् [१. १५७. ४]।

“राजानौ पुण्यकृतावित्यैतिहासिकाः” इति यास्कप्रदत्तं विकल्पं समाश्रित्य ‘गेल्डनरः’, अश्विनौ शुद्धभारतीयौ पुण्यात्मानौ मनुते ।

“वासात्योऽन्य उच्यते उषः पुत्रस्त्वान्यः” इति निरुक्तोदाहृतम् “इहेह जाता” [ऋ. सं. १. १८१. ४] इति यास्केनोद्धृतं मन्त्रं च समाश्रित्य एकम् अश्विनं प्रातस्तारकाम् अन्यं च सायंतारकां मन्यन्ते केचन । परन्तु इदमपि

यो यजतेऽश्विभ्यां स यज्ञेन रक्षितो भवति । यज्ञैः प्रीतौ अश्विनौ यजमानं वर्धयन्तौ तं शुभं नयतः ।

‘यो वां यज्ञेभिरावृतोऽधिवस्त्रा वधूरिव ।
सपर्यन्ता शुभे चक्राते अश्विना ॥” [८. २६. १३]

अश्विनौ इषा वाजैश्च सह यज्ञमागच्छतः । तौ सुवीरं रयिमावहतः । तौ दाशुषे रत्नानि धत्तः । मधुमन्तं सोमं पीत्वा तौ सूर्यं (हृष्टव्यतया) बोधयतः [१. ३४. १२; १. ४७. १; ८; १. ११७. १; ८. ९. ७]

अश्विनौ यदा अध्वर्यन्तौ (अध्वरं पारयितुमिच्छन्तौ) इषः रयीन् अपः च उन्नयतः तदा तौ “प्रेष्ठौ” (प्रियतमौ) भवतः [१. १८१. १] ।

यस्मै विमदाय तौ सेनायुजेन रथेन जायां निवहतः, तेन विमदेन ईडितौ तौ अग्निं निर्मन्थतः । अरणिभ्याम् अश्विनोः इदम् अग्निमन्थनकर्म पुनः पुनर्भवति [१. ११६. १; १०. २४. ४–५; १०. १८४. ३] ।

अक्षीणे हविषि अश्विनोर्दानमक्षीणं भवति [१. १३९. ५] । सोमयागसम्पादकात् सदसः कर्मपरगस्त्योऽन्नं, बलं, अमर्त्यदानं च लभते [१. १८२. ८] ।

यः काले काले (ऋतुथा) अश्विनौ परिचरति तं मित्रावरुणौ जानीतः । स “गम्भीराय रक्षसे” शस्त्रं शिशाति । द्रोहात्मकं वचः स प्रतिरुणद्धि [६. ६२. ९] ।

हविर्दात्रे च्यवानाय अश्विनौ “इत ऊति वर्पः” धत्तः [७.६८.६] । अश्विनौ यज्ञसदने योनौ इव ध्रुवं निषसतः [७.७०.१] । हविष्मन्तम् अश्विनौ पुष्णीतः चिकित्सतश्च । केवलः स्तुतिकर्ता अश्विभ्यां नानुगृह्यते [८.९.६] । व्रतसिद्धिः, सत्कर्म, प्रज्ञाधिगमः, धनम्, आत्मज्ञानं च यज्ञस्य फलत्वेन श्रूयन्ते ।

“चोदयतं सूनृताः पिन्वतं धिय उत्पुरन्धीरीरयतं तदुश्मसि ।
यशसं भागं कृणुतं नो अश्विना सोमं न चारुं मघवत्सु नस्कृतम् ॥”
[१०. ३९. २]

सर्वथा यास्कविरुद्धम् एव । यतो हि यास्कस्य स्वीयं मतं तु "अश्विनौ यद् व्यश्नुवाते सर्वं, रसेनान्यो ज्योतिषाऽन्यः" [निरु. १२.१] इति ।

भारतीयानां यदि स्वीयं किमपि बुद्धिसंगतं विज्ञानविवर्धकं च, तत्तु पाश्चात्यैः कार्त्स्न्येन न स्वीकर्तुं शक्यते, यतो हि तदानींतना भारतीया अर्धविकसिता आसन्, नो चेत् कथं यास्कोऽश्विनोर्वडवायाम् अश्वाज्जातत्वं प्रतिपादयेत् । परन्तु अन्यस्य कस्यापि मतस्य अश्विनोर्विषयेऽसंगतया यास्कोपज्ञस्य परित्यक्तुमशक्यतया तन्मतमयथात्वेन आश्रयन्ति ।

प्रातः सायं तारके उभे नैकत्र कदापि वा युगपद् दृश्येते । अश्विनौ तु सदा सध्रीचीनौ, एकरथारूढौ विशेषतः प्रातर्यावाणौ च । अत्र कीथमहोदयस्येयं युक्तिर्यद् यज्ञस्य विवर्धनेन मौलिकः प्रातः सायं भेदो विस्मृत इति । यास्कम् अर्वाचीनं यास्कप्रोक्तमतं च यज्ञानुस्यूतं मन्वानाः पाश्चात्या मनीषिणः वेदाङ्गप्रणेतृभ्योऽपि मुनिभ्य आत्मानं पण्डितंमन्यमानाः अन्यथा प्रकल्प्य जेमिनितारके प्रातः सायं तारके वाऽश्विनोः मौलिकं रूपं मन्यन्ते ।

द्वयोः पाश्चात्ययोः मनीषिणोरत्र मतैक्यं न भवति । तत्र द्वौ हेतू भवतः । भारतीया ग्रन्थाः "पाश्चात्याः" पश्चात् सकलिता विरचिता वेति पाश्चात्यानां मूलसिद्धान्तः । परन्तु अत्र कालनिर्णये ते विवदन्ते । अतः कालभेदात् पाश्चात्यपुराणानामाख्यानैः सह वैदिकाख्यानानां संगत्युपपादने तेषां मतिवैषम्यं भवति । अयमेको हेतुः । अपि च पाश्चात्यपौराणिकाख्यानानां तत्त्वनिर्णये एव ते विवदन्ते । अयं द्वितीयो हेतुः ।

भारतीयाः सर्वे ग्रन्था निरुक्तमतानुकूला एव । भारते कस्यापि यास्केन सह कलहो नास्ति ।

तेजस्तमसोः सन्धिः समभावः, तेजस्तमसोः सन्धिकालो वा अश्विनौ मन्येते तर्हि तयोरश्वारोहित्वं, रात्रौ त्रिः, अहनि त्रिः तयोरागमनं वा न सिद्धयति । "त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा" [ऋ. सं. १. ३४. २] ।

श्रीमान् म्याकडोनेलः लेटिकयुग्मदेवाभ्यां सहाश्विनोः तादात्म्यम् आपादयति । वेदे यथाऽश्विनौ सोमाय वधूयवे सूर्यां पृच्छन्तौ रथेन गतौ, तथा लेटिकसाहित्ये लेटिकदेवौ अश्वारोहिणौ सन्तौ सूर्यस्य दुहितरम् आत्मनेऽथवा सोमाय (चन्द्राय) पृच्छन्तौ आगतौ । अश्विनोर्यथा स्वसा उषाः तथा तयोः जिउसस्य पुत्रयोः स्वसा हेलेना । यथा लेटिकदेवौ समुद्रयात्रिणां रक्षकौ तथा अश्विनावपि भुज्युं समुद्रात् तारितवन्तौ, रेभं चोदकादुद्धृतवन्तौ । अश्विनोरिदं त्राणकर्म प्रातस्तारकां समाश्रित्य सभाजितं भवेत् यतः प्रातस्तारकैव तमःक्लेशाद् उन्मोचनेऽग्रणीः । अतस्तेजस्तमसोः समत्वं प्रातस्तारका च वेदेऽश्विनोः मौलिकम् आस्पदम् ।

भारतीयसमुदायस्य यूरोपीयार्यसमुदायस्य च सहवासकालात् प्रभृति

अश्विनौ प्रवर्तमानौ अभविष्यतां यद्यपि "अश्विनौ" इति नाम न तदानीतनम् ।

२ भारतीयानां दृष्टिकोणः ॥

(१) कुन्हन्राजः ।

अश्विनोर्गमनमनु (ताभ्यामतीतः) पन्थाः मधुवर्णो हिरण्यवर्णो वा भवति । तौ माध्वी मधुप्रियौ । तयोः रथो मधुपूर्णो दृतिर्विराजति । शतं कुम्भान् मधुनस्तौ सिञ्चतः । तयोर्वाहनमश्वताडनी कशा च मधुयुक्ते भवतः । मक्षा इव तौ मधु पिबतः ।

त्रिदेवैः ऋभुभिस्तयो रथस्तष्टः । "यद्यपि तौ अश्विनौ अश्ववन्तौ इति संबोध्येते तथापि तौ कदाप्यश्वारोहिणौ अस्तां नवेत्यत्र मम सन्देहः । बहुधास्तयो रथः श्रूयते, परन्तु तयोरश्वारोहणं निर्दिश्यते इत्यत्र मे सन्देहः । तयोः रथवाहकाः वयः (पक्षिणः), महिषाः (?), रासभो वा ।

नान्यो देवो विद्यते यस्योपरि इयन्ति आख्यानानि वैदिकसाहित्ये विद्यन्ते । इदमेव तयोर्वीरयोरतिप्राचीनतां दर्शयति । ऋक्संहितायाम् अश्विनोः विषये बहूनि गीतानि विद्यन्ते ।"

(२) योगी अरविन्दः । [खी. १८७२–१९५०]

भूमध्यसागरीयपुराणप्रोक्तौ अश्वारोहिणौ कस्टोर-पोलिडेयूकेसौ, जेमिनिगत-तारायुग्म चाश्विनोर्मौलिकं रूपम् ।

ऋक्संहितायां तयोर्वर्णनमादौ [१. ३. १–३] लभ्यते । तौ अश्विनौ द्रुतपादौ, आनन्दप्रदौ देवौ, बहुभोजिनौ च "द्रवत्पाणी, शुभस्पती, पुरुभुजा ।" [१. ३. १]

शुभस्पतीत्यत्र शुभशब्दः चन्द्रशब्दवदुभयार्थकः, प्रकाशं वा भोगं वा बोधयेत् । परन्त्वत्र "शुभस्पती"–शब्दः "पुरुभुजा" इति विशेषणयोगेन, "चनस्यतम्" (प्रीयेथाम्) इति क्रियायोगाच्च कल्याणम् आनन्दं वा द्योतयति ।

अश्विनौ नरौ (दिव्यात्मानौ), बहुकर्माणौ, धियं धारयन्तौ, मन्त्रगतशब्देषु रममाणौ च भवतः । तौ बुद्धिमन्तौ, तयोर्धीरोजस्वती ज्योतिष्मती च ।

तौ बहुकर्मसूयतौ, वेगवन्तौ, रौद्रगतियुक्तौ च । तौ "रुद्रवर्तनी" "हिरण्यवर्तनी" च । तयोर्मार्गो भीकरः, उग्रः, गत्या तेजोवर्धकश्च । ओजसस्तेजसश्च तौ पती स्तः ।

अरविन्दः दस्रशब्दस्य करणम्, उत्पादनम्, रूपधारणं, पूर्णतापादनम् इत्याद्यर्थान् बोधते, न तु सायणकृतं दस्रौ उपक्षपयितारौ, दर्शनीयौ इति वार्थम् । दस्रशब्दं पुरुदंससशब्दगतदंसशब्देन समानधर्माणं मन्यतेऽसौ ।

दस्रशब्दस्य सृजनमुत्पादनमेव अर्थो गृह्यते चेद् अश्विनोरैक्योऽभिव्यञ्जन-

ाव: (Positive side) एव द्योतितो भवति—तौ कर्तारौ भोक्तारौ च । दा तयोर्निषेधात्मको भाव: (negative side) यो नासत्यौ इति पदेन ोत्यते, सोऽप्रत्यायितो भवति । उभौ तौ नासत्यौ, उभौ तौ दस्रौ च । उभयत्रो-ायात्मकता विद्यते । एकत्र क्रियाभावोऽस्तिशेनेऽपरत्राऽऽत्मभाव: ।

अरविन्द: नासत्यशब्दस्य व्याकरणप्रक्रियां निरुक्तनिर्वचनं वा न गणयति । ात: (तस्य मते) नासत्यशब्दो गत्यर्थकाद् नसधातोर्व्युत्पन्न: । अश्विनौ स्वभावतोऽ-ारोहिणौ स्त:—द्रुतपादौ, पथि उग्रगामिनौ "द्रवत्पाणी, रुद्रवर्तनी" इति तौ नेरूप्येते ।

ग्रीकलेटिकपुराणकथायां कस्टोरपोल्लक्सौ यथा समुद्रयात्रिणां रक्षकौ बभूवतु:, ाथाऽश्विनौ ता शक्तिमधितिष्ठतो या ऋषीन् नावा तारयति, जले मज्जनाद् वा ाक्षति । एवं नासत्यौ इति शब्दस्यार्थोऽरविन्दमते समुद्रयात्राधिपती, गते: गति-मत्या: शक्तेर्वा पती इति स्यात् ।

"रुद्रवर्तनी" इति पदं "रक्तपथौ" इति व्याख्यायते आधुनिकैर्विद्वद्भि:. ात: सोऽर्थो नक्षत्रेषु युज्यते । वस्तुतो "रुद्रवर्तनी", "हिरण्यवर्तनी" इति विशे-षणे अश्विनोरोजस्वितां तेजस्वितां च द्योतयत: ।

एकस्यामृचि "रुद्रा हिरण्यवर्तनी" [५. ७५. ३] इत्युभयो: श्रवणात्. ाहचर्यस्य शब्दार्थनिर्णायकत्वेन, रुद्रत्वं हिरण्यत्वं च न युगपद् नक्षत्रे संगच्छेते । रुद्रशब्दस्य रक्तवर्णो यदि अर्थो गृह्यते तर्हि पीतवर्णात्मकहिरण्यशब्देन विरोधो भवति, रक्तं नक्षत्रं पीतेन पथा वर्तते इत्यर्थस्यानौचित्यात् ।

वेदेऽश्विनोर्निरूपणे तयो: पाश्चात्यदेशीय: पूर्वकालिको नक्षत्रभाव: चतुष्पदोऽ-श्वस्योपरि आरोहणं वा सर्वथा विलुप्तमस्ति ।

अत्राऽध्यात्मभावनैव तयोर्निरूपणे उपकारिका भवति । यमश्वं (यौ वाऽश्वौ) तावारोहत: स जीवनशक्तेरोजस्वितायाः प्राणस्य वा प्रतीको भवति । तयोरुभयसाधारणो धर्म: शुभस्पतित्वं मधूयुत्वं च । भिषजौ तौ वृद्धस्य यौवनं, व्रणस्य निरामयत्वम्, अपाङ्गस्य अविकलाङ्गतां च सम्पादयत: । अश्विनौ मानवस्य स्नायुबलस्य प्राणबलस्य च परिपूरणेन मानवं दंसिष्ठं, पुरुशाकतमं, पुरुमन्द्रं च कुरुत: । अपि च तौ नरौ (सत्यस्य प्रणेतारौ) धियंजिन्वौ, पुरुभोजसौ उपर्बुधौ, अहर्विदौ,, दिवो नपातौ, सिन्धुमातरौ, शम्भविष्ठौ, शक्रौ, विश्ववेदसौ, मनावसू, ऋतावृधौ, सुमखस्य सूरी, धिष्ण्यौ, अध्वराणां राजन्तौ, धिया वसुविदौ च स्त: । तौ नावा मतीनां पारं गमयत: । तौ यज्वरीरिषश्चनस्यत: ।

अश्विनौ मनस्तत्त्वेन दिवं, कायतत्त्वेन पृथिवीं चाधितिष्ठत: । (तयो: सहचरी) ऋतजा: दिव: सुति: सरस्वती भवति । अश्विसूक्तेषु प्रतीकबहुलं

वर्णनं भवति । तत्र मुख्यानि लिङ्गानि, मुख्या भावा: (leading features) त्रीणि भवन्ति—

१. रथस्तुति:, अश्वस्तुति:, विश्वव्यापिगतिस्तुति: ।

२. मधुने रथयोग:, मधुपानं, मधुवाहनो रथ:, रथे मधुपूर्णो दृति:, प्राणापानयोर्मधुसेक: ।

३. उषसा, सूर्येण, सूर्यस्य दुहित्रा च सह अनन्यादृश: सम्बन्ध: ।

अशनं (व्यापनं), मधु, ज्योति:—इति त्रीणि अश्विनोर्लिङ्गम् ।

अश्विनौ त्रिषु लोकेषु व्यश्नुवानौ, सत्यं प्रणयन्तौ, मधु सिञ्चन्तौ, त्रिविधेन अन्नेन मधुपूर्णदृतिना च शं (सुखं) भावयन्तौ, जीवनयात्रायां मानवम् आयुषा, बलेन, सौभाग्येन प्रेरयन्तौ पालयत: । शंभविष्ठौ, आगमिष्ठौ, दंसिष्ठौ, पुरुषा-कृतमौ, इन्द्रतमौ इत्येवम् आतिशायनिकप्रत्ययेन तयो: कल्याणकरत्वं सुखदत्वं च सूच्यते भवति ।

वेदेऽश्विनो: प्रातिस्विक पार्थक्यं दुर्विवेच्यं भवति । कदाचिद् ग्रीकडियोस्कु-रियुग्मस्य नामनी अत्राभिव्यञ्जके भवेताम् ।

कस्टोर: [kastor] काशितृ [kashitri], काशिता एकस्याश्विन: प्रकाशात्मकत्वं सूचयति ।

पोलुडेयुकेस: [poludeukes] अन्यस्याश्विन: पुरुदंसत्वं द्योतयति ।

ऋभुभिस्तक्षोऽश्विनो: रथोऽन्नेन मधुना च पूर्णो भवति । "पुरु वर्पांसि बिभ्रतौ" "पुरुदंससौ" भवन्तौ, "शुभस्पती" सन्तौ अश्विनौ मानवस्य प्रत्यङ्गं, प्रतिकर्म, प्रतिगति च दीप्तिं प्रीतिं च कुरुत: ।

पोलिडेयुकेसौ······पुरुदंससौ (वीर्यं—power)

कस्टोरौ·········काशितारौ (प्रकाश:—light)

अश्विनोरवियोज्यसम्बद्धे इमे द्वे तत्त्वे । यत्र रूपं प्रकाशमयं सविज्ञानं वा तत्र शक्ति: वीर्यं च भवत: । यत्र वा रूपं शक्तिमद् वीर्यवद् वा तत्र प्रकाशो विज्ञानं च भवत: ।

अर्वाचीनमतविषये योगी अरविन्दो लिखति । अर्वाचीनेषु भारतीयेषु वैदिक-विद्वत्सु त्रयोऽत्र गणनार्हा: ।

१. बालगङ्गाधरतिलक: ।

पाश्चात्यानां वेदविषयकं वैदुष्यं स्वीकृत्य, ज्योति:शास्त्रं चावलम्ब्य, आर्या हिमयुगे उत्तरध्रुवप्रदेशाद् दक्षिणान् देशान् व्याप्तवन्त: इति मतं स्थापितवान् "वेदे उत्तरध्रुवनिवास:" इति नाम स्वग्रन्थे तिलक: ।

२. टि. परमशिव: आर्य: (अय्यर:) भारतीयवैदिकपरम्परां प्रयत्नतरं

दूरे कृत्वा, हैमयुगे विलुप्तस्यास्य पृथिवीग्रहस्य पुना रूपधारणं रूपकभावेन वर्णयति ऋक्संहिता इति प्रतिपादयति "ऋचः" इति नाम स्वप्रणीते ग्रन्थे ।

उभयोरेतयोर्विदुषोर्ग्रन्थौ समवलम्ब्य वेदार्थो विमृश्यते चेद् नूतनया दृशा ऋक्संहिताया आधिदैविकम् आधिभौतिकं च तत्त्वम् अधिगन्तुं शक्यते, यत्तत्त्वं आर्य्याणां प्राचीनलोकस्य यथास्वं परितःस्थितिम् अबोधयद् अपि, अद्य यावत् अविज्ञातान् बहून् विषयान् प्रकाशपथमुपनीय तस्य प्राचीनलोकस्य भौतिकप्रभूतिम् अभिव्यञ्ज्यात् ।

२. स्वामी दयानन्दः [ख्रै. १८२४–१८८३] ।

आर्यसमाजस्य प्रवर्तको दयानन्दः पूर्वोक्ताभ्यां विद्वद्भ्यां प्राग्वर्ती बभूव । दैनंदिनजीवनोपयोगिधार्मिकग्रन्थरूपेण वेदान् स्थापयितुं स्वामी चेष्टितवान् । शब्दार्थकरणे व्याकरणं निरुक्तं च विशेषतोऽवलम्ब्य, पुराणप्रोक्तान्याख्यानानि दूरतो निरस्य ऋचा ज्ञानविज्ञानशाश्वतिकभावान् व्याचख्यौ स्वामी दयानन्दः ।

वैज्ञानिकैराविष्कृतानि, आविष्करिष्यमाणानि यानि यानि तत्त्वानि स्युस्तेषां सर्वेषां यथार्थभावो वेदेभ्योऽधिगन्तुं शक्यते इति दयानन्दमतं न स्वीकरोति अरविन्दः, यतः सर्वेषां ज्ञानविज्ञानानां प्रभूः वेद इति मतं महद्भिः प्रमाणैः साधनीयं भवति ।

वेदविषयं स्वमतम् अरविन्द एवं प्रतिपादयति । ऋचां शब्दशक्त्या ऋषीणां विचारा द्वयीभावेन सततमनुस्यूतं प्रवर्तन्ते, येन एका एव देवता विश्वप्रकृतेः अधिभूतम् अध्यात्मं च शक्तिद्वयम् अध्यासते । परन्तु तत्राध्यात्मभावोऽतिशेते । स एव भावो वेदे भूयान् व्यापकः, दृढमनुस्यूतः, संगतश्च । अतोऽयमेवार्थो वेदस्य प्राथम्येन प्रतिपादनीयः ।

(३) बालगङ्गाधरः तिलकः ।

"वेदे उत्तरध्रुवनिवासः" [The Arctic Home in the Vedas] इति नामके स्वग्रन्थे तिलकः सूर्यस्य संवत्सरगतिमनुसरन् त्रिंशद् उषसः, शतरात्रसत्रं, दीर्घतमसो दशमे युगे जीर्णता, ऋज्राश्वस्य शतमेषकर्तनेनाऽन्धत्वं तस्मै पुनरश्विभ्यां चक्षुर्दानम्, अत्रेः भुज्योश्च तमस उद्धरणं, वन्दनाय "स्वर्दृशे" निधेरिव अपगूढस्य[1] तमसि क्षियतः सूर्यस्य उन्नयनम्, वध्रिमत्यै हिरण्यहस्तस्य दानम् इत्यादीन्यश्विदेवत्यानि वर्णनानि समाश्रित्य, इन्द्रेण वृत्रवधं, नवग्वदशग्वानामङ्गिरसां नवदशान् मासान् सत्रानुष्ठानं, गवामयनं सत्रम् अन्यानि च ज्यौतिषिकतत्त्वानि समवलम्ब्य आर्याणामादिनिवासम् उत्तरध्रुवसमीपप्रदेशे प्रतिपादयति महता प्रयासेन प्रमाणेन च ।

१—ऋक् १. ११६, ११; ११७.५ ।

पाश्चात्यपौराणिककथायां हेलियस्य ३५० गावः, ३५० मेषाः च अहानि च रात्रीश्च संवत्सरस्य द्योतयन्ति । एवं सति प्राचीनग्रीकसंवत्सरे तावन्ति अहानि तावत्यो रात्रयश्चासन् । जर्मन्यपौराणिकाख्याने सुवर्णकारस्य ७०० सुवर्णवलया उच्यन्ते । ऋक् संहितायां सप्तशतानि विंशतिश्च पुत्रस्थानीयाः अहोरात्रात्मका मिथुनाः संवत्सरचक्रस्य उच्यन्ते ।

आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः [१.१६४.११]।

अनेनैतत् प्रतीयते यद् आर्याणां पृथग्भावात् प्राक् तेषामादिनिवासे संवत्सरस्य ३५० दिनान्यासन् । अत्र दशानां दिनानां, न्यूनतया दशदिनानि, सततं रात्रिरासीत् । अर्थाद् दशदिनपरिमाणा एका दीर्घा रात्रिरासीत् । अत्र दिनस्य अहोरात्रतया दश अहानि दश रात्रयश्च भवन्ति ।

रेभ ऋषिरसुरैः सायंकाले पाशैः बद्ध्वा निक्षिप्तः । दश रात्रीः नवाहानि च अप्सु निमग्नोऽसौ दशमेऽहनि प्रातः अश्विभ्यां उदकादुन्नीतः ।

परन्तु एतान् मिथुनीभूतान् विंशतिमहोरात्रान् दीर्घरात्रितया परिगणय्य रेभस्य जलेऽवस्थितेः दशानां रात्रीणां नवानामह्नां च पूर्तिः क्रियते चेद् वेदस्य वेदत्वं न सिद्ध्यति, यतो हि ध्रुवप्रदेशे स्थानभेदेन द्विसंख्यातः प्रारभ्य शतसंख्यां यावद् रात्रीणां दीर्घता भवति । अर्थाद् द्विरात्रादारभ्य शतरात्रं यावद् दीर्घं तमः । क्वचिद् रात्रिर्द्विदिनात्मिका, क्वचित् पञ्चदिनात्मिका, क्वचिद् दशदिनात्मिका क्वचिच्छतदिनात्मिका भवति ।[1]

परन्तु वेदे रेभ ऋषिरेक एव दश रात्रीर्नवाहानि च जले निमग्न आसीत् ।

अहीनः क्रतुः द्विरात्रादारभ्य द्वादशरात्रं यावद् व्याप्तो भवति । एवं द्विरात्रः क्रतुः, त्रिरात्रः क्रतुः, चतूरात्रः क्रतुः, इत्येवं दशरात्रः, द्वादशरात्रः क्रतुरहीनो भवति । तत ऊर्ध्वं त्रयोदशरात्रः चतुर्दशरात्रः इत्येवं शतरात्रं यावद् यः क्रतुः स सत्त्रशब्देन व्यवह्रियते । एवं रात्रिसत्त्राणि शतं रात्रीर्यावद् व्याप्तानि भवन्ति । शताद् रात्रिभ्य ऊर्ध्वं व्याप्नुवद् रात्रिसत्त्रं नास्ति ।

संवत्सरसत्त्राद् ऊर्ध्वं रात्रिसत्त्रमनुष्ठीयते स्म । अनेनैतत् प्रतीयते यदेता रात्रयः संवत्सरबहिर्भूता इति ।

अनया रात्रिकालिकया शतसंख्यया तिलको वेदगतं शतसंख्यात्मकं सर्वं व्याख्याति । यथा इन्द्रस्य शतं क्रतवः, नव च नवतिश्च पुराः, ऋज्राश्वेन हुताः

1—समाप्ते वा संवत्सरे रात्रिसत्त्रेषु राजानं क्रीणीयुः [कात्यायनश्रौ. सू. ८.२.११] । अतिरात्रः सत्त्रस्यान्ते आदौ च अनुष्ठित आसीत् । इदमभिप्लवेनाऽऽगमयनं समाप्तम् अभवत् [तै. स. ७. ५. १. १–२; ७.५.२. १–२] । द्वयोरतिरात्रयोरन्तरा रात्रिसत्त्राण्यभवन् ।

शतं मेषाः। अश्विदेवत्येषु सूक्तेषु सांख्यं (संख्यासम्बन्धि) यदप्याख्यानमस्ति तत्सर्वं ध्रुवप्रदेशगतस्थानभेदगतरात्रिभेदेन तिलको व्याख्याति।

एवं द्विरात्रात् प्रभृति शतरात्रं यावद् दीर्घरात्रिं स्वीकृत्य शतसंख्यासम्बद्धान्यन्यानि चाश्विदेवत्यानि आख्यानानि व्याख्यन्न् आर्याणाम् आदिनिवासम् उत्तरध्रुवसमीपस्थं प्रदेशं प्रमाणयति तिलकः।

शिशिरहिमेन जराजीर्णस्य सूर्यस्य वसन्तागमेन सह सर्वैश्वर्येण प्रत्युज्जीवनेऽश्विनोर्वीर्याणि अद्भुतानि कर्माणि च अधिगतानि स्युः इति वासन्तिकं मतं (Vernal Theory) मन्वानः प्राध्यापको मोक्षमूलरः (Max Muller) प्रतिपादयति।

तथाहि च्यवानः पतन् पतङ्गः अस्तं यन्नादित्यः अग्निकुण्डे अथवाऽगाधे तमसि प्रविष्टः अश्विभ्यामुन्नीयते।

तमोगर्तात् सूर्यस्योद्धरणेन बन्दनस्याख्यानं व्याख्यातं भवति।

कलिः कृश्यन् चन्द्रः। कलिर्नाम वृद्धःसन् तरुणीं जायां वित्त्वा पुनर्यौवनमलभत। "कलिं याभिर्वित्तजानिं दुवस्यथः" [ऋ. सं. १. ११२. १५]। छिन्नचरित्रायै विश्पलायै प्रतिधीयमाना आयसी जङ्घा शुक्लपक्षस्य चन्द्रस्य प्रथमा कला।

ऋज्राश्वस्यान्धता दीर्घाया रात्रेः, हेमन्तशिशिरयोर्वान्धता भवति। अस्तोत्तरः सूर्यः, अथवा मकरसंक्रान्तिम् उपयन् सूर्यः अन्धः, पंगुः, परावृक् च भवेत्। अस्तं यन्तं सूर्यं नावः पतितम् इव अवलम्ब्य भुज्युरेभयोराख्याने निष्पन्ने। वध्रिमती रात्रिकालिकी द्यौः। तस्यै हिरण्यहस्तस्य पुत्रस्य दानं प्रातरुषसोऽनन्तरं सूर्यस्योदयः।

शयोर्निवृत्तप्रसवा गौः रात्रौ तमसि शयानं (लीनं) तेजो यत्पुनः अश्विनौ प्रातरुन्नीय तां गां दोहसमर्थां कुरुतः। अस्यैव कर्मणः प्रकारान्तरेण उपपादनं बन्दनायाऽपगूढस्य निधेः उद्वापनम्। अश्विनौ सूर्यम् उद्गमयन्तौ नष्टं प्रकाशं प्रातः पुनरुद्धत्तः। "न वां जूर्यन्ति पूर्व्या कृतानि।" [ऋ. सं. १. ११७. ४]

उत्तरध्रुवे शिशिरऋतोरवसाने सांवत्सरिकं हिमग्रस्तं सूर्यं प्रवासात् (द० ध्रुवात्) तज्जन्यविपद उन्मुच्य पुनः प्रकाशयतो मकरसंक्रान्तौ। इदं प्रकृतिगतम् आधिदैविकं यज्ञम् उन्नयन्तौ अश्विनौ दैव्यौ भिषजाविति ख्यातिं गतौ।

यास्कः केवलं वर्तिकाया वृकस्याऽऽस्याद् मोचनम् उषसः सूर्यस्य ग्रसनाद् मोचनमिति आधिदैविकं व्याख्यानं कृतवान्।

वासन्तिकसिद्धान्तेन अथवा वासन्तिकमतेन सर्वेषाम् अश्विदेवत्यानाम्

आख्यानानां व्याख्यानं सुगमं न भवति । यद्यपि वन्दनः, भुज्युः, अत्रिः, पराकृक् च तमोग्रस्ताः एव शिशिरे हिमहतः सूर्यः अन्धः, पंगुः, विप्लुतः च भवितुमर्हति तथापि सूक्तेषु तमसो भूयस्या वैविध्यतया केवलो हिमहतः सूर्यः अश्विनोः चिकित्स्यो न भवेत् । तथाहि—तमसोऽन्यता ऋक्संहितायां ।

१. तिस्रः क्षपः भुज्योः [१. ११६. ४]।
   अनारम्भणे तमसि प्रविद्धः भुज्युः [१. १८२. ६]।
२. दशरात्रयो रेभस्य [१. ११६. २४ ।]
३. आहुषस्यैकं नक्तम् [१. ११६. २०]।
४. अत्रेर्महत् तमः [६. ५०. १०]।
५. शतं मेषान् वृक्ये चिखादतः ऋज्राश्वस्य [शतं रात्रीः] तमः [१. ११६. १६]।
६. वन्दनःतमोग्रस्तेनोपमीयते "सूर्यं न तमसि क्षियन्तम् ।"
[१. ११७. ५]
७. अत्रेः सप्तवध्र. वनस्पतिपेटिकायां बन्धनम् [५. ७८. ४–६]।

हिमहतः सूर्योऽन्धः पंगुर्वा भवेत्, न तु तमोग्रस्तः । अपि च तस्य अन्धत्वं पंगुत्वं च नियतकालिकं भवति ऋतोरेकस्य मासद्वयव्यापितया, अथवा हेमन्त-शिशिरयोः समासेन चातुर्मासिकं तमः । परन्तु अश्विदैवत्येषु सूक्तेषु तमसां वैविध्यात् न्यूनाधिककालावधित्वाच्च ध्रुवप्रदेशेषु यत्र सूर्यः उदीयमानो भवति तत्र स्थानभेदेन द्विरात्रादारभ्य शतरात्रं यावद् व्याप्नुवत् तमो भवेत् ।

पारसिकानामवेस्टग्रन्थोऽप्यत्र निदर्शकः । यथा वेदे इन्द्रवृत्रयुद्धं वर्ण्यते तथाऽवेस्टग्रन्थे तिष्ट्र्य–अपओषयोर्युद्धं वर्ण्यते । तत्र तिष्ट्र्यो वर्षासु नक्षत्रं भवति । अपओषः शुष्णः शोषको दाहकश्च ।

तिष्ट्र्योऽहुरमज्दाय कथयति—यदि मन्नाम्ना होमः क्रियते तर्हि शत्रुं निहत्य निर्दिष्टे समये भक्तानां पुरत आविर्भवामि, स च समयः एकरात्रः, द्विरात्रः पञ्चाशद्रात्रः, शतरात्रो वा भवतु । अत्र नानारात्रिनिदर्शनेन परतया शतत्वाच्च नेदं युद्धं वृष्टिकरणाय भवितुमर्हति, यतो वृष्टिरेकरात्रेण द्विरात्रेण, पञ्चाशद्रात्रेण, शतरात्रेण वा भवतीति तु न युज्यते । अतः तिष्ट्र्य—अपओषयोरिदं युद्धं तेजस्तमसोः परस्परं मन्तव्यम् ।

दीर्घतमा मामतेयो दशमे युगे जीर्णो भवति [ऋ. सं. १. १५८. ६]। अत्र युगशब्दो मासवाची । एवमनया ऋचा ध्रुवसमीपे स प्रदेशो सूच्यते यत्र दशमासावधि सौर्यं तेजो विराजति । द्विविधा नवग्वा दशग्वा अङ्गिरसो नव

मासान् दशमासान् वा ईजिरे[1]।" सत्यं तदिन्द्रो दशभिर्दशग्वैः सूर्यं विवेद तमसि क्षियन्तम्।" [ऋ. सं. ३. ३९. ५]

"इन्द्रः······दशसंख्याकैरङ्गिरोभिः सहितः सन् तमसि विलवर्तिन्यन्धकारे क्षियन्तं निवसन्तं सत्यं यथार्थप्रकाशं सूर्यं विवेद लेभे।" [सायणः]

अत्रेः सप्तवध्रेः, वनस्पतेर्योनेः, अश्विभ्यां मोचनं, तदनुषङ्गेण दशमासस्य कुमारस्य गर्भान्निर्गमनमपि सूर्यस्य दशमासान् प्रकाशनमेव द्योतयति।

[ऋ. सं. ५. ७८. ५–९]।

तिलकस्य मतं यद्यपि प्रमाणपुष्टं तथापि निर्दोषं नास्ति।

सप्तवध्रिः दशमासान् वनस्पतौ शयित्वा किमर्थं निर्ऋतिम् आविशति।

रेभस्य दश रात्रयः, भुज्योस्त्रिस्रः क्षपाः, ऋभूणां द्वादश दिनानि स्वापः।

[ऋ. सं. ४. ३३. ७]

एतत्सर्वं मकरसंक्रान्तौ सूर्यस्य दूरतया, मन्दगतौ भ्रान्त्या स्थिरत्वबुद्धेर्हेतोः समाधीयते चेत् त्रिरात्रदशरात्रद्वादशरात्रादिभेदाः दक्षिणध्रुवेऽपि भवन्ति। वेदानां देवविषयत्वात्, देवानां सुमेरुस्थत्वात् सुमेरुः उत्तरध्रुवः एव वेदे वर्ण्यते इति चेद् वेदस्य वेदत्वं नोपादेयं भवति वैज्ञानिकदृष्ट्या दक्षिणध्रुवस्यापि तथैव प्राधान्यात्।

अपि च आर्याणाम् आदिनिवासतया उत्तरध्रुवे सौरदर्शनस्य वर्णनेन वेदस्य किं नाम वेदत्वम्। इदानींतनवैज्ञानिकानां लेखाः धार्मिकग्रन्थतया न परिगण्यन्ते। प्रदेशविशेषस्य वर्णने सति, वेदो देशकालावच्छिन्नतया पौरुषेयः, तेनानित्यश्च भवति।

(४) मनीषी संपूर्णानन्दः।

मनीषी संपूर्णानन्दः "आर्याणाम् आदिदेशः" इतिनाम स्वहिन्दीग्रन्थे तिलक-मतं दूषयति।

दक्षिणायने मकररेखामभिव्याप्य उत्तरायणं यदा सूर्यः प्रक्रमते तदा स स्थिर इव दृश्यते। तत्र स्थूलदृष्ट्या केषाञ्चन त्रीणि दिनानि, केषाञ्चन दश रात्रयः संभवेयुरपि दीर्घतमसो द्वौ मासौ कथं समाधीयेते। दीर्घतमा दशभिः मासैर्जीर्णो भवति. न तु नवभिरेकादशभिर्वा इत्यत्र किं विनिगमकम्?

अश्विनौ सिन्धुजन्मानौ। जलेन नौभिश्च तयोः संबन्धः श्रूयते। भुज्युं

१—अङ्गिरसो द्विविधाः। सत्रयागमनुतिष्ठन्तो ये नवभिर्मासैः समाप्य गताः ते नवग्वाः।·········। ये तु दशभिर्मासैः समाप्य जग्मुस्ते दशग्वाः।

[सायणः १. ६२. ४ ऋ. सं.] [द्र. सायणः १०. ६२. ६]।

समुद्रात् शतारित्रया नावा तारयतः। तौ तृष्यते गोतमाय मेघम् उच्चाबुध्नं जिह्मबारं कृत्वा अपः क्षारितवन्तौ। [ऋ. सं. १. ११६. ९]।

अतोऽश्विनोर्वीर्याणि तमोनिरसने एव न, अपि तु वर्षासु सूर्यस्य धारणे उदकेभ्यो मोचने च भवन्ति।

अतोऽश्विदेवत्यानामाख्यानानामवगमाय सुदूराद् उत्तरध्रुवो न गन्तव्यो भवति[1]। प्रथमतो भुज्युरेभौ ऐतिहासिकौ अपि भवितुमर्हतः। समुद्रे कस्यापि त्रीणि दिनानि नव दिनानि वा विपन्नस्थितिर्नाऽसम्भाव्या। मासद्वयावधि सूर्यस्य निर्ऋतौ प्रवेशः, शतदिनानि वा तमसाऽऽच्छन्नता उत्तरध्रुवे एव न, भारते सप्तसिन्धुप्रदेशेऽपि बभूव। तदानीतनः उत्तरस्यः समुद्रः, तदानीतन्यो वर्षाश्च सर्वं दुर्बोधमाख्यानं विस्पष्टयेयुः। दश दिनानि षड् दिनानि वा नभो मेघाच्छन्नं भवति। वर्षाश्च शतं दिनानि यावद् भवन्ति। एवं प्रावृट्प्रसङ्गेन शाम्बरहत्या, ऋज्राश्वेन शतमेषविशसनम्, सप्तवध्रेः निर्ऋतिप्रवेशः—इत्यादीन्याख्यानवस्तूनि सुबोधानि भवन्ति।

ध्रुवप्रदेशे दश मासान् यावत् सततं दिनं न वर्तते। सप्तसिन्धौ दश मासान् दैनन्दिनगत्या प्रकाशस्य मासद्वयं वर्षासु अलक्ष्यो भवति सूर्यः। तिलकमते भूयान् दोषः। यदि अग्निः सप्तवध्रिः दशमासान् प्रकाश्य, वनस्पतेर्योनेर्मुमुक्षुः द्वौ मासौ निर्ऋतिं प्रविशति तर्हि तस्य तेन अदृश्यतया, मासद्वयं यावत् तमसा आवृतत्वं तस्मै रोचते खलु। परन्तु तमसावृतत्वं सूर्यस्य बन्धनं भवति, यस्माद् इन्द्रस्तं मोचयति। अतो बन्धनमेव मुक्तिः इति तु असङ्गतं भवति।

वर्षासु नायं दोषः। दश मासान् यज्ञः—अङ्गिरसामयनं, गवामयनं वा। ततः सूर्यो मेघावृतः। सूर्यस्य मेघावृतत्वमेव अत्रेः शतद्वारपीडागृहम्, ऋज्राश्वस्य मेषशतविशसनम्। तदानीं प्रसङ्गेन संतप्तः अभिक्लिन्नः सूर्यः अश्विनौ प्रार्थयते—हे अश्विनौ! यस्याः वृष्टेः कृते दश मासाः प्रतीक्षिताः, या वृष्टिः दशमासान् गर्भेऽवतिष्ठते, तां वृष्टिं गर्भाद् उन्मोचय। वृष्टिकरणेन वनस्पतियोनिः स्वयमेव विवृतद्वारा भवति।

१—अश्विनों की कथाओं के लिए भी इतनी दूर जाना अनावश्यक है। पहले तो रेभ और भुज्यु की कथाएँ, ऐतिहासिक भी हो सकती हैं।
दस महीने का सूर्य दो महीने तक घोर वर्षा में प्रायः अदृश्य हो जाता है।
पृष्ठ १७७ "वैदिक आख्यान" अध्याय १८ "आर्यों का आदिदेश" [१९४४] —संपूर्णानन्दः।

नपुंसकभर्तृका वध्रिमती अश्विभ्यां हिरण्यहस्तं पुत्रं लभते। वर्षासु उषाः पत्नी पत्युः सूर्यात् सुदूरे भवति। अतः सा वध्रिमती। प्रावृषोऽनन्तरं सूर्योदये उषसः पश्चात् सूर्यस्योदयात्, सूर्योऽत्र हिरण्यहस्तः पुत्र उषसः।

एवं मनीषिणः संपूर्णानन्दस्य मते अश्विदेवत्यानि आख्यानानि ध्रुवप्रदेशे आर्याणामादिनिवासं न प्रमाणयन्ति।[1]

वस्तुत इदं सप्तसिन्धुमतमपि निर्दोषं नास्ति। सप्तसिन्धुः स्वयं कल्पितः। भूततत्त्वविदां मते पुरा उत्तरभारते महान् समुद्रो बभूव सप्त नद्यश्च प्रोहुः तत्र। तथापि नेदं शाश्वतिकं तत्त्वम्। उत्तरध्रुवे दीर्घा रात्रिः, दीर्घं तमश्च प्रतिसंवत्सरं भवति इत्यतः तत् शाश्वतिकम्।

अपि च वर्षासु उषा वध्रिमती न भवितुमर्हति, यतो वर्षास्वपि पृथिव्या भ्रमणेन सूर्योदयत्वात्। मेघपटलानामुपरि उषा अपि भवति सूर्योऽपि प्रत्यहम्।

प्रत्युत ध्रुवप्रदेशे दीर्घरात्रिसत्त्वात् सूर्यस्यानुदयात् उषा वध्रिमती भवितुमर्हति। अतः सप्तसिन्धौ वर्षर्तुमाश्रित्य तिलकमतस्य खण्डनं न युक्तं भवति।

अपि च संपूर्णानन्दस्य सप्तसिन्धुमतम् एकाङ्गीनं भवति, यावता सोऽपि उत्तरभारतीय-युगान्तरीण-समुद्रमनु सूर्याश्व्युषसाम् उदयास्तमयौ वर्णयन् विश्वस्मिन् नान्यस्मिन् काले प्रदेशे वा एतेषां भुज्यु–रेभ–वध्रिमती–सप्तवध्रघत्र्यादीनां अश्विभ्यामुपकृतानाम् आख्यानानाम् उत्पत्तिम् एतेषां विद्यमानतां वा निषेधति। अपि च सप्तसिन्धुमते भुज्युरेभयोराधिदैविकमास्पदमपश्यन् तौ ऐतिहासिकौ मन्यते। अधमर्णजरतीयो न्यायो विद्वद्भिर्न समाद्रियते।

वासन्तिकं मतं वा, उषस्यं मतं वा, उत्तरध्रुववासमतं वा, सप्तसिन्धुमतं वा नाक्षत्रं मतं वा स्वीक्रियेत। परन्तु आख्यानान्यव्याख्यातानि भवन्ति।

नागृहीतविशेषणा बुद्धिः समाख्यं व्यवतिष्ठते। भुज्योः पारणे येऽश्वाः, ये रथाः, या नावः उपयुज्यन्ते, यैश्च पथिभिः स गृहं नीयते तेषां विशेषणानामनवगमे भुज्योः समुद्रात्तारणम् अविज्ञातमेव भवति।

एवं च "अर्थं यतीनाम् अपां" ब्रह्मणः किं नाम सारथित्वम् इत्येतद् विशेषणमविज्ञाय, युगशब्दस्याप्यर्थम् अनिर्णीय दीर्घतमसो दशमे युगे जीर्णता [ऋ. सं. १. १५८. ६] न सुविज्ञाता भवति।

१—सारांश यह है कि अश्विनों से सम्बन्ध रखने वाले आख्यानों से यह बात सिद्ध नहीं होती कि आर्य लोग कभी ध्रुवप्रदेश में रहते थे।
पृष्ठ ११९–१७८ "आर्यों का आदिदेश" [संपूर्णानन्दः] (१९४४)

किं वा आजिधावनम् ? कथं वा रथे रासभयोगः ? कथं वाऽश्वरहितो रथः स्वयं प्रवर्तते ?

अपि च वेदानां प्रदेशविशेषेण कालविशेषेण वा परिच्छेदे सति, तेषाम् अनित्यतया महाभारतपुराणादिवत् चित्रकथाप्रसङ्गात् यज्ञे, ज्ञाने, ध्याने वा तेषां उपयोगो न स्यात् । महाभारतपात्राणि दाशपाण्डवादयो यथा पूजादिकं न लभन्ते तथा वैदिकर्षीणां वशिष्ठविश्वामित्रप्रमुखानां पूजानर्हतया सोमयागादीनां प्रवर्तनम् अन्याय्यमभविष्यत् ।

—:०:—

द्वितीयोऽध्यायः ।

।। अथ विमर्शः ।।

१ समन्वयमनु ।

वेदव्याख्यातॄणां पाश्चात्यानां पौरस्त्यानां मतानां नानात्वेऽपि ऐक्यं तत्रोपपादयितुं शक्यते । प्रथमत आध्यात्मिकपक्षे कस्यापि विवादो न भवेत् । नानादेवतात्ववादे, त्रिदेवतात्ववादे, एकदेवतात्ववादे, ब्रह्मपरत्ववादे वा, देवानां वर्णनतया वेदाः कर्मज्ञानोपासनार्थम् अभ्यसनीयाः । अर्थज्ञानपूर्वकं यागे ज्ञाने च विनियोक्तव्याश्च भवन्ति । तत्र वेदे श्रूयमाणानाम् ऋषीणां राज्ञां वा ऐतिहासिकत्वे वेदानामनित्यत्वप्रसङ्गः । तत्रेतिहासेन यदि केवलः पौर्वापर्य्यक्रमो गृह्यते यथा वसन्तादीनामृतूनां, पूर्वपश्चिमादीनां दिशानां, बीजाङ्कुरस्कन्धशाखोपशाखानां, समुद्रपर्वतनदीमेघवृष्टीनां, रसासृग्मांसमेदोऽस्थिमज्जाशुक्राणां वा, तर्हि वेदानामपौरुषेयत्वं नित्यत्वं वा न व्याहन्येत ।

द्वितीयतो वेदार्थनिर्णयेऽज्ञानोपहततया कुण्ठितमनसो याथाकथाचं काल्पनिकान् अर्थान् उपादाय दिवमारोहन्तोऽपि सूर्यं वोषसं वा वेदेऽलभमाना अपश्यन्तः—"विषया विनिवर्तन्ते निराहारस्य देहिनः" [गीता २. ५९] इति न्यायेन शब्दजालग्रस्ता अर्थरूपमन्नमलभमानाः, निराहाराः सन्तो वेदेषु आधिदैविकेभ्यः, आधिभौतिकेभ्यश्च विषयेभ्यो विनिवर्तमानाः, पारमार्थिकं शाश्वतमर्थम् अन्विष्य आत्मानं तोषयितुम् इच्छन्ति । परन्तु तत्र मृगतृष्णायन्ते, यतो हि तत्र निरस्तसमस्तबाह्यप्रपञ्चा भूत्वा ब्रह्मजिज्ञासायामेतेऽसमर्थाः भवन्ति ।

फलतः कश्चन वैदिकमृषिं वाल्मीकिकालिदासादिवत् कविं मनुते, कश्चन वेदे उत्तरध्रुवप्रदेशवर्णनम् बोधते । कश्चन भारते विन्ध्योत्तरं ब्रह्मावर्तम् ऋषीणां जन्मभूमिं मनुते । तथाप्येते वेदं वेदार्थं च श्रद्धापुरःसरं स्वाभ्युदयनिःश्रेयसार्थं परिगृह्णन्ति ।

यथा गीतायां दशमेऽध्याये स्वविभूतिनिरूपणेन वसुरुद्रादिषु देवेषु आत्मनो योगं दर्शयन्नपि, पर्वतानां हिमालयं, स्रोतसां जाह्नवीं, पाण्डवानां धनञ्जयं, शस्त्रभृतां रामं च आत्मनोऽनन्यतया प्रतिपादयन् भारतमेव देशतया निर्दिशति कृष्णः । सत्यप्येवं स विश्वबन्द्यः, गीता च सर्वोपादेया वरीवर्ति । एवं वेदे भुज्युरेभच्यवनादीन् ऐतिहासिकान् मर्त्यांश्च मन्वाना अपि वेदस्य वेदत्वे कामपि क्षतिं न मन्यन्ते ।

वेदस्यैवं सर्वोपादेयत्वेऽपि तदर्थस्य वैषम्याद् जिज्ञासूनां मन्दमतीनां बालानां वेदेषु अश्रद्धा भवति । प्रायः सर्वे वैदिकविद्वांसो अश्विदेवत्येषु सूक्तेषु प्रतिपाद्यं विषयं मुख्यतया सूर्यस्य तमस उन्मोचनं कथयन्ति । परन्तु तस्य तमसो निरूपणे विप्रतिपद्यन्ते । यथा—तम इदम् ।

१. प्रत्यहम् उषसः प्राग्वर्ति ।

२. शिशिरर्तौ हिमसम्पातकृतम् ।

३. वर्षासु मेघाच्छादनेन मासद्वयव्यापि आहोस्वित् सार्धदिनव्यापि ।

४. भारते प्राचीनसप्तसिन्धुप्रदेशे वर्षासु मेघाच्छादनेन, शिशिरे हिमपातेन वा संभवत् ।

५. उत्तरध्रुवमभितः मासद्वयं, मासषट्कं, शतरात्रं वा व्यापि ।

इत्थं वैषम्ये सति वेदाः कदा, क्व, केन, कथं, किमर्थं वा प्रणीता इत्यादि-संशयग्रस्ततया, तमस्त्वेन इन्द्रवृत्रादियुद्धवर्णनेन, अश्विसहस्रवत्सरादिसत्रवेन, अग्निष्टोमादियागेन अद्यत्वे मानवानामुपयोगानुपलम्भात्, वेदानाम् अप्रामाण्यतया तन्मूलकब्राह्मणादीनाम्, श्रुतिस्मृतिपुराणदर्शनादीनां चाप्रामाण्यतापत्तिः ।

अतो वैषम्यराहित्येन, सर्वोपादेयतया सर्वार्थसंग्राहकतया वा वेदार्थो विवेच-नीयो भवति । तच्च विवेचनं गीतायां निरूप्यमाणविभूतियोगरीत्या संभवेत् । विष्णोरवतारभूतस्य कृष्णस्यैव विभूतिः सर्वत्र गोचरीक्रियते । तथा वेदे सर्वत्र देवेषु, ऋषिषु, गवाश्वादिपदार्थेषु मधुसोमहिरण्यादितत्त्वेषु सूर्यं, सौर्यं तेजो वा उपाधित्वेन गृह्यते चेद् अश्विदेवत्याः सर्वे विषयाः सुबोधा भवन्ति । यथा सुमेरौ तथा कुमेरावपि, यथा ध्रुवं तथा विषुवत्यपि दस्रत्वं वा नासत्यं वा संगतं भवति । आख्यानानां पौराणिकानामपि काप्यसंगतिर्न भवेत् ।

एवं वेदे आदित्यवर्णनस्वीकारे, आदित्यस्यैव देशकालोपाधितया ऐतिहासि-कत्वं, देवत्वम्, असुरत्वं, तेजस्त्वं, तमस्त्वं, वृत्रत्वम्, इन्द्रत्वं च संभवति ।

१. कुन्त्यां यथा सूर्यः पुत्रं कर्णं जनयामास तथाश्विनौ वध्रिमत्यां हिरण्य-हस्तं जनयामासतुरिति न श्रूयते ।

२. शयोर्निवृत्तप्रसवां गां दोहनसमर्थां कृतवन्तौ अश्विनौ, न तु तस्यां वत्सं जनयामासतुः ।

३. विमदाय पत्नीं, घोषायै पतिं, सूर्यां पतिगृहं च ऊहन्तौ अश्विनौ । परन्तु विमदस्य, घोषायाः[1], सूर्यायां वा पुत्रोऽश्विदेवत्येषु सूक्तेषु न श्रूयते ।

१—अध्वर्युं वा मधुपाणिं सुहस्त्यम् [ऋ. १०. ४१. ३] इत्यत्र सुहस्त्यो घोषेयः ।

४. छिन्नजङ्घायै विश्पलायै आयसीं जङ्घां योजितवन्तौ अश्विनौ इति बहवो मन्यन्ते[1]।

वस्तुतो विश्पलायाः जङ्घा तु न छिन्ना। वेः पर्णम् इव तस्याः चरित्रम् अच्छेदि [ऋ. १. ११६. १५] [छिन्नमभूत्]। चरित्रं नाम पादः, चर्यतेऽनेनेति व्युत्पत्त्या। तस्याः चरित्रे छिन्ने तस्यै जङ्घां प्रददतुरश्विनौ। चरित्रस्य स्थाने जङ्घाया योजनं न भैषज्यं भवति, न वा शस्त्रकर्म असंभवात्तस्य।

चरित्रं शरीरस्याङ्गम्। तस्याङ्गस्यैकोऽवयवो जङ्घा भवितुमर्हति। चरित्रस्यावयवो जङ्घात्मकश्छिन्नः, तत्रान्यां जङ्घां योजितवन्तौ इत्यर्थस्तु नात्र युज्यते। वेदः श्रुतिः शब्दप्रधानः। तत्रार्थोऽवगन्तव्यो विद्यया तपसा च। अत एव ऋषिर्मन्त्रार्थद्रष्टा इत्युच्यते।

तत्र जङ्घा शब्दः "सर्तवे" इति श्रुत्या अतिशयगतिं कुटिलगतिं[2] च द्योतयति। अपि च "हिते धने प्रत्यधत्तं" [ऋ. १. ११६. १५] इति पदैः सूर्यस्य कुमेरौ अस्तं, तदानीं सुमेरौ निवृता उदयश्च बोध्यते।

शुक्लपक्षस्य प्रतिपच्चन्द्रोऽत्र जङ्घा इति। तत्र प्रकाशस्यानुदयात् कृष्णवर्णतया आयसीति विशेषणं संगच्छमानमपि किं नाम जङ्घात्वं, को नाम जङ्घाचरित्रयोः संबन्धः, कथमत्र चन्द्रो विः (पक्षी) इत्यादिः विषयो न विवेच्यते।

कस्यचन मते विश्पला खेलस्य राज्ञः स्त्री[3], कस्यचन मते रणेऽश्वा काचन।

५. वर्तिकाया वृकस्य आस्याद् मोचनं केचन उषसः, सूर्यस्य ग्रासाद्, मोचनं मन्यन्ते। केचन वर्तिकां पक्षिविशेषं वृकं चारण्यश्वानं मन्यन्ते।

इत्थं पदार्थस्य दुरूहत्वे वैषम्ये च सति, सर्वाङ्गीणः कश्चन पन्थाः ग्रहणीयः, येन क्वापि विप्रतिपत्तिर्मा भूत्।

वैषम्यस्य दुरूहस्य च हेतुर्मौलिकसिद्धान्तस्याऽभाव एव। वेदस्य मुख्यः प्रतिपाद्यो विषयः सूर्य एव। सूर्यस्तेजसा विश्वं पूरयति। स आधिदैविको यज्ञः। शरीरिणा पुरुषेण परमात्मनोऽनधिगम्यतया, परमात्मनः प्रतीकरूपेण आदित्य

१—छिन्नजङ्घां खेलस्य सम्बन्धिनीं क्षिप्रं पुनः आयस्या जङ्घया समयोजयतम्। [सायणः ऋ. १. ११७. ११]। "प्रति जङ्घां विश्पलाया अधत्तम्" [१. ११८. ८] छिन्नजङ्घायै......आयसीं जङ्घाम् [सायणः]

२—जङ्घा तु प्रसृता [अमरः २. ६. ७२] जङ्घन्यते कुटिलं गच्छतीति जङ्घा।

३—अगस्त्यपुरोहितः खेलो नाम राजा। तस्य सम्बन्धिनी विश्पला नाम स्त्री। [सायणः ऋ. १. ११६. १५]

सूर्यम् उपादाय वेदे वर्णनं श्रूयते । तमेव सूर्यमश्विनौ उद्गमयतः । पृथिव्यां सर्वत्र सूर्यस्योदयास्तमयसंभवात् देशविशेषेण मन्त्राणां व्याख्यानेऽर्थः संगतो न भवति । अपि चानेनाश्विनोर्विश्वव्यापिताऽपि व्याहन्यते । अतोऽश्विनोः विश्व-व्यापितां सूर्ये मन्त्रार्थस्य पर्यवसानं चाऽऽस्थाय आख्यानानि व्याख्यायन्ते चेत् वैषम्यं वा विप्रतिपत्तिर्वा क्वापि न भवति ।

व्यश्नुवानौ व्यापनशीलौ अश्विनौ अन्तरिक्षस्थानौ द्युस्थानौ च भवेतां, न तु पार्थिवौ । तथा च श्रुतिः—

"इदं हि वां प्रदिवि स्थानमोक इमे गृहा अश्विनेदं दुरोणम् ।
आ नो दिवो बृहतः पर्वतादाद्भ्यो यातमिषमूर्जं वहन्ता ॥"

[ऋ. ५. ७६. ४]

पर्वतात् । आ । अत्ऽभ्यः ।

अपि च—यदिन्द्रेण सरथं याथो अश्विना यद् वा वायुना भवथः समोकसा ।
यदादित्येभिर्ऋभुभिः सजोषसा यद् वा विष्णोर्विक्रमणेषु तिष्ठथः ॥

[ऋ. ८. ९. १२]

सूर्यस्य विश्वात्मकत्वे श्रुतिः—

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आ प्रा द्यावापृथिवी अन्तरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥

[ऋ. १. ११५. १]

तिलकस्य उत्तरध्रुवमते वेदप्रतिपाद्याः सर्वे आदित्यगतिविषयाः संगृहीता न भवन्ति । देवयानवत् पितृयाणमपि वेदे वर्ण्यते ।

"एह यातं पथिभिर्देवयानैः" [ऋ. सं. १. १८३. ६]

पितृयाणशब्दः ऋक्संहितायां सकृच्छ्रूयते—

"पन्थामनु प्रविद्वान् पितृयाणं द्युमदग्ने समिधानो वि भाहि ।"

[ऋ. सं. १०. २. ७]

"यस्ते स्व इतरो देवयानात्" [ऋ. १०. १८. १]।

ऋक्संहितायां केचन शब्दा इदं यानद्वयं (देवयानपितृयाणे) विनिगमयन्ति ।

देवयानम्	पितृयाणम्
१. अन्तः पुत्रश्चरति दक्षिणायाः ३. ५८. १ (उषसः पुत्रः सूर्यः तस्या अनन्तरं चरति ।)	१. अस्य वामस्य पलितस्य होतुः १. १६४. १ २. वामं पितृभ्यो य इदं समेरिरे १०. ४०. १०

देवयानम्	पितृयाणम्
२. दक्षिणावतां दिवि सूर्यासः दक्षिणावन्तो अमृतं भजन्ते । १. १२५. ६	३. विश्वा वामानि धीमहि ८. २२. १८
३. होत्रा देवेषु गच्छति १. १८.८	४. प्राञ्चं कृणोत्यध्वरम् १. १८.८
४. एषो उषा अपूर्व्या १. ४६. १	५. प्रति त्यं चारुमध्वरम् १. १९. १
	६. पूर्वेभिः ऋषिभिः १. १. २
	७. पूर्वाः उषसः १. ४४. १०
	८. न वां जूर्यन्ति पूर्व्या कृतानि १. ११७. ४
	९. पूर्व्या जायमाना, विदथे शस्यमाना, पित्र्या ३. ३९. २
	१०. यमा (अश्विनो) यमसूः असूत ३. ३९. ३
	११. नाभिः पूर्व्या वाम् ४. ४४. ५
	१२. परि ह त्यद् वर्तिर्याथः ६. ६३. २
	१३. एष स्य भानुरुदियर्ति ४.४५.१
	१४. स्यत् ७. ६८. ६
	१५. उत त्यं भुज्युं ७. ६८. ७
	१६. प्राचीनम् उदिता सूर्यस्य ७. ७६. ३

पाश्चात्यैर्वासन्तिकमतेन (वसन्तप्रारम्भप्रकारेण), उषस्यमतेन (उषःकाल-प्रकारेण) वा सर्वेषाम् आख्यानानां व्याख्यानं क्रियते । तत्र ध्रुवस्थलीयो वसन्त उषा वा नाश्रीयते । तत्र भिन्नदेशवर्तितया उषसां त्रिंशत्वं, हिमेन मेघैर्वा सूर्यस्यान्धत्वं, पङ्गुत्वं, जीर्णता वा निरूप्यते ।

तिलक उत्तरध्रुवप्रदेशम् आर्यनिवासभूमिं प्रतिपिपादयिषुः ध्रुवीयं वसन्तं ध्रुवीयाम् उषसं च समाश्रयते ।

दीर्घतमा ऋषिर्दशमे युगे जीर्णो भवति । तत्र युगशब्दस्य अर्थोऽनिर्णीतः । युगं द्वयीभूतं युग्मम् । अनेकयोर्द्वन्द्वम् इदं दिनयोः, रात्र्योः, पक्षयोः, मासयोः

वत्सरयोः, दम्पत्योर्वा भवितुमर्हति । पाश्चात्यैः क्वचिद् युगशब्दस्यार्थो मानव-पारम्परिकजीवनम् (human ages, human generation) गृह्यते ।

एवं सति दीर्घतमाः कदा जीर्णो जातः इत्यस्यानिर्णयः । तत्र तिलकः अङ्गिरसां दशग्वानां दशमाससत्रेण, गवां च दशमाससत्रेण उत्तरध्रुवप्रदेशे दश मासान् सूर्यस्य प्रकाशं गृहीत्वा दशमे मासे दीर्घतमसो वृद्धत्वं प्रतिपादयति ।

यदि युगशब्देन वत्सरद्वयं गृह्यते तदा विंशत्या वर्षैः (एकेन मानवपारम्परिकजीवनेन) दीर्घतमसो वार्धक्यं भवति ।

यदि युगशब्देन पारम्परिकं जीवनं [विंशतिवर्षाणि—पितापुत्रानुक्रमेण] गृह्यते तर्हि दशभिर्युगैः शते वर्षाणि पुरुषायुषे यावद् भवतः ।

“दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे ।” [ऋ. १. १५८. ६]

२. आदित्यपर्यवसायित्वम् ।

महामहोपाध्यायः सीतारामशास्त्री स्वोपज्ञे “वेदार्थविचारे” एतानि मतानि दूषयित्वा वेदार्थस्य आदित्यपर्यवसायित्वमुपपादयति ।

“हेमे कालेऽप्रवृद्धतेजस आदित्यस्य, वसन्तकाले प्रवृद्धतेजस्कतया च्यवनस्याश्विभ्यां युवत्वसम्पादनम्, अत्रेस्तमसो मोचनं, कूपे पतितस्य मोचनप्रभृतिवर्णनानामुपपत्तावपि वसन्तोपपत्त्या बहूनि वर्णनानि नोपपद्यन्ते । वन्दनाविभुज्युप्रभृतीनां तमसः सकाशात्तो मुक्तिरुच्यते, तच्च वसन्तोपपत्त्या न युज्यते, न हि शीतकाले तेजसोऽल्पत्वं तम इति वर्णयितुं शक्यम् । अत आदित्यरूपवन्दनप्रभृतीनां मोचनं वसन्तकाले सूर्यस्य तेजस्विरूपत्वम् इति न वर्णयितुं शक्यं तमस्सकाशात्तस्य मोचनरूपत्वाभावात् । भुज्योः नौकाभिर्दिनरात्रित्रयेणाश्विभ्यां मोचनमुच्यते तन्नोपपद्यते । दीर्घतमा दशमे युगे जीर्णः संजातस्तस्याऽश्विभ्यां मोचनमश्विभ्यां कृतमित्यस्यानुपपत्तिः । तथोक्तस्य भुज्योः अश्विभ्यां मोचनं कृतं यस्मात् स्थानात् तत् स्थानमनारम्भणं तम इत्युक्तम्, तस्य अनुपपत्तिरिति प्रातिविकल्पसतिस्थानकल्पनयैतस्य सर्वस्योपपत्तिरिति भावयितुमाशयणीयमिति । अस्यामप्युपपत्तौ भूयस्यो वर्णना उपपद्यन्ते, नैतावताऽस्याऽनुक्रमणिकाकारमतेन विरोधः, परन्तु अस्या उपपत्तेः केवलं सुमेरुसम्बन्धित्वेनैव प्रवृत्त्या वेदोक्तसर्वासां वर्णनानां संग्रहासंभवः । नहि आदित्योऽश्विदेवप्रभृतीनां वामत्वेन वर्णनस्य प्राङ्मुखादिशब्देन व्यवहारस्य सम्यगुपपत्तिस्तत्पक्षे । किञ्च दिने ऋतुत्रयपर्यन्तं तापयुक्तता, रात्रौ सर्वां रात्रिं यावत् वृष्टिसम्बन्धस्य “देवानां माने”[1] इत्यादिषु वर्ण्यमानस्यानुपपत्तिः । नहि दक्षिणायने मृतस्य चन्द्रमःसायुज्यम् उत्तरायणे मृतस्याऽऽदित्य-

---

1—“देवानां माने [ऋ. १०. २०. २१ [द्र. वे. वि. पृष्ठ. ६२]

सायुज्यम् इत्यस्य वर्णनमेतत्पक्षे उपपद्यते, अस्य वामस्य इति सूक्ते "भूम्या असुरसृगात्मा क्व स्वित्' इति पृथिव्याः प्राणादिविषये संदिग्धत्वेन वर्णनस्याप्यनुपपत्तिः केवलं, किन्तु तेषां तादृशानां तत्सूक्तीयवर्णनानां देवान् प्रत्यपि निहितत्वं गुप्तत्वं रहस्यरूपत्वमित्यस्य वर्णनस्याप्यनुपपत्तिः । ब्राह्मणे वेदिद्वयवर्णनस्य द्वे वेदी भवतो द्वावेव लोकौ दक्षिणाऽन्योत्तराऽन्योत्तरया देवलोकम् अवरुन्धे दक्षिणया पितृलोकम् [शत. ब्रा. ३. ५] इति वर्णनस्याप्यनुपपत्तिः ।" [वे. वि. पृष्ठ २६९-२७०]

"एवं बहूनि स्थलान्यनुपपन्नानि भवन्ति ध्रुवस्थानीयवर्णनमात्रपरत्वे । "तानीदहानि बहुलान्यासन् या प्राचीनमुदिता सूर्यस्य ।" [ऋ. सं. ७. ७६. ३]

अत्र "इत्" इति शब्दस्य श्रवणेन मनुष्यनिवासरूपपृथिवीरूपकुमेरुसम्बन्धस्य प्रतीतिः ।

"तानि अहानि इत् कुमेरौ बहुलान्यासुर्याणि सूर्यस्योदयाद् इतिशेषः, प्राचीनमुदितानि । प्राचीनशब्देन प्रागञ्चनं यथैवं प्राचीनशब्दो नात्र कालवाचकः, किन्तु दिग्वाचको दिक्सम्बन्धेन प्रवृत्तः प्रागञ्चनमाह । एकवचनप्रयोगाद् इदम् अव्ययम्, तदुक्तं प्राचीनं प्रागञ्चनं यथा तथेति, सूर्यस्य शब्दस्य प्राचीनमित्यत्र अवधित्वे हि पञ्चम्यापत्तिः स्यात् ।" [वे. वि. पृष्ठ. २७०–२७१]

"अभ्युष्टा इन्नु भूयसीरुषास आ नो जीवान् वरुण तासु शाधि ।"

[ऋ. २. २८. ९]

"इत्" सन्निकृष्टे प्रदेशे भूयस्य उषासो नु अद्यापि अव्युष्टा न सम्यग् उदितास्तासूषस्सु नोऽस्माञ्जीवाञ्जीवयुक्तान् यथाऽस्माकं जीवन विपन्नं न स्यात् तथा कुरु इति । एवं चात्र अव्युष्टानाम् इत्यनेन अनुदितानां ग्रहणेऽपि तासां विभिन्नदेशीयानां विभिन्नकालिकीनाम् असन्ततानां ग्रहणं न प्राप्नोति किन्तु सातत्येन कृतकरिष्यमाणोदयानामेवेति । एतावता एता भूयस्य उषसो न सुमेरुमात्रसम्बन्धिन्यः किन्तु कुमेरावपि तत्सत्त्वम् । किञ्च प्रकृते मन्त्रे कुमेरुमात्रसंबन्धित्वैव प्राप्नोति वरुणस्य संबोधनात् । वरुणश्च पश्चिमदिक्सम्बन्धी । एवं च पश्चिमदिक्सम्बन्धिनीनामेवात्र उषसां ग्रहणम् । न चात्र तर्हि सुमेरावस्तोत्तरवर्तिनीनां सान्ध्यतेजोरूपाणां तासां ग्रहणमिति, तासां सुमेरुमात्रसंबन्धिता सुमेरावस्तावसरीयत्वं वरुणस्येत्यपि वर्णयितुमत्राशक्यम् ।"

"अद्यापि 'अव्युष्टाः' इत्यनेनाऽकृतोदयानां तदानीमसतीनां तासां वर्णनात् । नहि अस्तावसरेऽस्तोत्तरं सान्ध्यतेजोऽदृष्टं परस्ताद् दृश्यं भवति, किन्तु सत एव तस्य क्रमेणावहीयमानत्वम् इति न तद्रूपाणां तासां तदानीं ग्रहणसम्भवः । सुमेरौ पश्चिमायां सूर्यस्योषःप्रभृतीनामस्तेऽपि कुमेरौ तत्रोदयात् । एवं च वरुणसम्बन्धाद्

उदेष्यन्तीनामुषसां वर्णनाद् इदं वर्णनं कुमेरुसंबद्धमेव, न सुमेरुसंबद्धम्।"
[वे. वि पृष्ठ. २७१–२७२]

"किञ्च दीर्घतमसो विषये दशभिर्मासैर्वृद्धत्ववर्णनं दाशमासिकवत्सरस्वीकारद्वारा ध्रुवप्रदेशसम्बन्धसाधकम् इति न स्यात् तत्र वत्सरार्थकत्वेन दशभिर्युगैः विंशतिवत्सरैरित्यप्यर्थो वर्णनीयः स्याद् वर्णितश्च स पाश्चात्यदेशीयैः पारम्परिकजीवनं "पिढी" "पुस्त" इत्यादितदीयभाषया।……………। किञ्च तत्र द्वितीयार्थस्य अव्यक्तार्थत्वं स्वीक्रियत एव।" [वे. वि. पृष्ठ. २७१]
अथ मन्त्रार्थस्तावद् विचार्यते—

दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे।
अपामर्थं यतीनां ब्रह्मा भवति सारथिः॥ [ऋ. १. १५८. ६][1]

युगशब्दस्य वत्सरद्वयार्थं स्वीकृत्य दशभिर्युगैः विंशतिः वर्षाणि भवन्ति। एवं तस्यान्तिमे भागे [विंशे वर्षे] दीर्घतमा जीर्यति।

दीर्घतमसः कथा महाभारते वर्ण्यते।

दीर्घतमसं तस्य भार्या पुत्राश्च समुद्रे प्रचिक्षिपुः, तस्य भरणपोषणम् अनिच्छन्तः। तदानीं दीर्घतमा अश्विनौ तुष्टाव। तावागत्य तमुद्धृतवन्तौ।

दीर्घतमा मातुलस्य बृहस्पतेः शापेन जन्मान्ध आसीत्। अश्विनौ तस्मै चक्षुरपि ददतुः।

वेदार्थस्योपबृंहणम् इतिहासपुराणाभ्यां क्रियते। अत्र महाभारते दीर्घतमास्तस्य भरणपोषणमनिच्छद्भिरपत्यैः समुद्रे प्रक्षिप्तः। अतोऽस्यापत्यमेकं ज्येष्ठं विंशतिवर्षप्रायं स्यात्। एवं सति दीर्घतमस आयुः चत्वारिंशत् पञ्चाशद् वा वर्षाणि स्युः। अतो "युगशब्दस्य वत्सरद्वयार्थत्वं परित्यज्य ज्यौतिषिकवेदाङ्ग-

---

1—"दीर्घतमा एतन्नामा महर्षिः स च मामतेयः ममतायाः पुत्रः दशमे युगे दशयुगपर्यन्तं महानुभावयोरश्विनोः प्रभावात् पूर्वोक्ताद् दुःखाद् विमुक्तोऽत्यन्तसुखी स्वपुत्रभार्यादिभिः सहितो जीवितवान्। दशमे युगेऽतीते सति जुजुर्वान् जीर्णः वलीपलितगात्रो बभूव। एवंभूतः सन् अर्थं पुरुषैरर्थ्यमानं कर्मफलं स्वर्गादिकं यतीनां प्राप्नुवतीनाम् अपाम् अप्कार्याणां प्रजानाम्। यद्वा। अपाम् अपसां कर्मणाम् अर्थं प्रयोजनं यतीनां तासां प्रजानाम्। ब्रह्मा ब्रह्मस्वरूपः परिवृढः भवति। किञ्च सारथिः तद्धुर्निर्वाहको भवति देवो भवतीत्यर्थः। एवमस्य वृत्तान्तं मन्त्रोऽनुवदति। स्वयं वा स्वात्मानं परोक्षेण अश्विनोर्महानुभावत्वं प्रकटयितुं ब्रवीति।"
[सायणः]

ज्योतिषरीत्या पञ्चसंवत्सरमिति रूढार्थः स्वीकार्यः। तथा सति दशमयुगेन पञ्चाशद् वर्षाणि गृहीतानि भवेयुः। तथा सति तावति कालेऽपत्यानां पितृसंभरणयोग्यकालप्राप्तिसंभावना जराजीर्णत्वस्यापि संभावनात्।"

"परन्त्वस्मिन्नर्थेऽपि अपाम् अर्थं प्रति गन्तृत्वं तत्सारथित्वं च दीर्घतमसः शब्दस्य अर्थाविज्ञानात् स्पष्टार्थं न भवति। वेदे आदित्यस्यैव एकस्य स्तव इति प्राचीनमतविरोधश्च।" [वे. वि. पृष्ठ २७४]।

अथ शास्त्रिण ऋचो व्याख्यानम्।

"दीर्घतमा उचथ्यस्य ममतायाः पुत्रः औचथ्यो मामतेय आदित्य एव। स चासौ रात्रिसम्बन्धी। ममताशब्दस्य 'मा' इति 'मता' ममतेति व्युत्पत्तेः। "अत्र मेति मखशब्दस्य कृतह्रस्वस्य ग्रहणम्। अर्थश्च शून्यम् अभावः।"

यथा गोपथब्राह्मणे "मा खो मखः" इति। खम् आकाशरूपं शून्यम् अभावः। तन्मा भूद् इति अभावस्य अभावो विवक्ष्यते मखशब्देन। मखशब्दो यज्ञार्थो यज्ञ आदित्यरूप इति मखोऽप्यादित्यरूप एव। यथा मखशब्देन तेजःपूर्णः आदित्य उच्यते। यत्र मखत्वं (तेजःपूर्णता) नास्ति तत्र गर्तशब्देन व्यवहारो भवति। "दानुमत्या बृहन्तं गर्तमाशाते" [ऋ. ५. ६८. ५] इति मैत्रावरुणदेवताके सूक्ते श्रूयते। "एवं च रात्र्या गर्तरूपत्वे तस्या मेत्येवं तेजोऽभावरूपत्वं गृहीतं भवति।" एवं ममता तेजोऽभावरूपिणी रात्रिः। तस्याः पुत्रो दीर्घतमा मामतेयो नामवशतो दीर्घतमोरूपः। दीर्घं तमो भुव उभयोः पार्श्वयोः अत्युच्चस्थानयोः सुमेरुकुमेरुरूपयोः पर्यायेण भवति। अत्र तु सुमेरुस्थं गृह्यते दीर्घतमस आङ्गिरसपुत्रत्वाभिधानात्।

ऐतरेयब्राह्मणे प्रजापतेर्दुहितृत्वारोहकथायां दुहितुः सान्ध्यायाः उषसः कुमेर्वभिप्रायेण तस्यामारोहात् प्रजापतिना, तत्रास्तमयोत्तरं वर्तमानैर्देवैः रुद्रद्वारा वेधे, विद्धः प्रजापतिर्नक्षत्रात्मनाऽवस्थित इति वर्णनात्, तस्य कुमेरावस्तोत्तरं संभवो यतो रोहिण्यां देवेषु सुमेरौ तस्योदये कुमेरावस्तमये परवर्तिमृगनक्षत्रस्य तत्र सान्ध्योषसि सत्त्वं, तस्य दर्शनतस्तत्रत्यैर्वृष्ट्यागमनस्यानुभवात् तस्य ग्रीसदेशीयपुराणे पर्जन्यनक्षत्रत्ववचनाद् ऋग्वेदे कुमेरौ सर्वां रात्रिं व्याप्य वृष्टिवर्णनस्य दर्शनेन तादृशत्वं विज्ञायते।.....स प्रजापतिर्विद्धस्तस्य रेतः प्रवृत्तं, देवताभिर्वैश्वानराग्निसाहचर्येण तत्सन्तापने घनीभावो यः सम्पन्नस्तस्याऽऽदित्यरूपत्वं ब्राह्मणे उक्तम्–"यत्प्रथमम् उददीप्यत सोऽसावादित्यो भवत् इति"[1] तत्र यत्प्रथमं

1—"तस्य यद् रेतसः प्रथमम् उददीप्यत तद् असावादित्योऽभवत्।"
[द्र. ऐ. ब्रा. १३. १०]

पूर्वाह्नं तेन उद्दीप्तं स कुमेरस्य आदित्योऽभवत् इति । अत एव द्वितीयमुद्दीप्तस्य चाक्षणिमुद्गुरूपता । तत्परस्ताद् वर्तिनो येऽङ्गारा अवशान्ता उददीप्यन्त तेऽङ्गिरसोऽभवन्नित्युक्तिः । तेषाम् अङ्गिरसाम् उचथ्यो नामैकः । स उचथ्यः उचथ्यः केवलं शब्देन बोधनीयः । तस्या उचथ्याभावरूपिण्या ममतायाः पुत्रोऽपि दीर्घतमोनामको दीर्घतमोरूपः, तस्यापि मातापितृवत् कल्पितमेव पुत्रत्वम् । तस्य तमोरूपस्य जीर्णत्वं रात्र्या अवसाने परदिनप्रारम्भे भवेत् । स च रात्र्या अवसानरूपः परदिनप्रारम्भो मन्त्रे उच्यते—"दशमं युगम्" इति । तमोत्पत्तेः परस्तात् जीर्णत्वस्योत्पत्तिमारभ्य जीर्णत्वावधिः कालो दश युगानीति निर्दिश्यते ।"

"तत्र सुमेरुकुमेर्वोः मासषट्कं यावद् दिनं मासषट्कपरिमिता च रात्रिः । रात्रावपि प्रारम्भे सावित्रः, पश्चाद् उषोरूपिसान्ध्यतेजसः, प्रत्येकम् एकैको मास इति मासद्वयं, परस्तात्तमसः प्रवृत्तिः । तच्च तमो मासद्वयव्यापि । परस्तात् परदिनीयोषःसवित्रोश्च मासद्वयं काल इति कालक्रमः ।"

[वे. वि. पृष्ठ. २७४–२७५]

ध्रुवप्रदेशे स्थानान्तरापेक्षया तमसः कालाधिक्येन दीर्घतमस्त्वम् । तदुदीर्णं तमो मासद्वयव्यापि । तस्य मासद्वयस्य दशयुगत्वेन मन्त्रे श्रुतिः दशमे युगे इति । मासद्वये षष्टिर्दिनानि । एवमेकं युगं षड्भिर्दिनैर्भवति । अर्थात् षडहो युगमत्र । "तथा सति दशमे युगे षष्टितमे दिने मासद्वयावसानरूपे जीर्णत्वं दीर्घतमस इति भवति ।" [वे. वि, पृष्ठ. २७६, पङ्क्तिः १, २,] ।

दिनषट्कस्य युगस्वरूपता प्रकारान्तरेणापि भवति । विषुवत्प्रदेशे कतिपयैर्निमेषैः (in four minutes) आदित्य उदितो भवति, न तथा ध्रुवप्रदेशे । सुमेरुकुमेर्वोः प्रदक्षिणाप्रदक्षिणावर्तनैः कतिपयैरुदेति । तत्र एकाऽऽवृत्तिरस्माभिर्दिनशब्देन व्यवह्रियते, तादृशीभिस्त्रिभिर्दिनैस्तस्योदयस्तत्र । आदित्यबिम्बस्य षष्टिकलात्मकैकांशपरिमितो व्यासः । तत्र षोडशकलात्मकं बिम्बं प्रतिदिनमुदितं भवति । अत एव तस्य षोडशकलः पुरुषः इति व्यवहार उपनिषत्सु ।

आवृत्तित्रयेण अष्टाचत्वारिंशदेव कला उदिता भवन्ति, द्वादश कला अवशिष्यन्ते बिम्बस्य सम्पूर्णत्वाय, तावतापि तदर्थं द्वादशकलार्थं पुनरावृत्तेः असम्भवेन वाञ्छितायाः तस्याः परित्यागेनाऽऽवृत्तित्रयेणाऽऽदित्यो वा तद् बिम्बं बोधितं भवतीति व्यवहारः । तत्रत्यानामावृत्तीनाम् ऋक्त्वरूपत्वेन व्यवहारः । अत एवाऽऽदित्यस्य सुमेरुकुमेर्वोरभिप्रायेण यज्ञरूपत्वेन दानरूपत्वाद् दानार्थमुपयुज्यमाना ऋक् याज्यारूपत्वेन वेदे व्यवह्रियते । या याज्या दानकर्त्रीति ऐतरेये उच्यते "अतिर्वै याज्या" [ऐ. ब्रा. १०. ८] इति । [द्र. वे. वि. पृष्ठ. २७६] ।

दानावसरीया अन्तिमा तृतीया आवृत्तिरत्र याज्यानामिका ऋक् ।

तृचेन साम संमितं भवति । "तिसृभिः स्तुवन्ति तिसृभिरुद्गायन्ति तिसृभिर्हि साम संमितमिति ।" [ऐ. ब्रा. १२. १२]

"याज्यया यजति प्रत्तिर्वै याज्या ।" [ऐ. ब्रा. १०. ८] ।

आवृत्तित्रयेण मण्डलोदयः । एकोंऽशो मण्डलस्य व्यासः । "अत एव वृत्ताकारभ्रमे मण्डलस्य दण्डनिपातन्यायेन एकैकस्मिन् वृत्ते षष्ट्युत्तरत्रिशतवारं (३६०) सम्बन्धेन एकैकस्य वृत्तस्य तावन्तो भागा इति मन्यते, सम्मन्यते चाधमर्णो यद् वृत्ते षष्ट्यधिकत्रिशतं (३६०°) भागा भवन्तीति ।

वृत्तभागोऽक्षरशब्देन व्यवह्रियते—"गायत्रेण प्रतिमिमीते अर्कम् अर्केण साम।" [ऋ. सं. १. १६४. २४] ।

गायत्रेण छन्दसा अर्कम् ऋचं मिमीते । अर्केण ऋचा साम मण्डलं मिमीते इति । गायत्रं छन्द एकाक्षरात्मकं दैवम् । "दैव्येकम्" इति [पिङ्गलसू. २. ३] ।

यज्ञे गानावसरे ऋक्त्रयेणैकं साम गीयते । "तत्र तावता पूर्णबिम्बसंग्रहो न भवति [६० — ४८ = १२] इति बिम्बद्वयेन सविधवर्तिना दण्डनिपातन्यायेन पूर्णबिम्बसकलांशग्रहसंभवमभिप्रेत्य बिम्बद्वयप्रत्यक्षात्मकस्य त्रिकद्वयरूपस्य वेदे युगशब्देन व्यवहारः । स च सुमेराविव कुमेरावपि भवति । स चोक्तः काल एकस्मिन् वत्सरे अनेकवारमावृत्तो भवतीति तस्यानेकत्वेन व्यवहारः । स च सुमेराविव कुमेरावपि भवतीति युगानां "दैव्या" "मानुषा" इति विशेषणम् ।" दैव्यानि युगानि सुमेर्वभिप्राये, कुमेर्वभिप्राये तु मानुषाणि युगानीति व्यवहारः ।

एवं षड्हमानम् एकं युगम् । दशभिर्युगैः षष्टिदिनानि भवन्ति । तावन्तं कालं दीर्घं तमः । ततः परं तमसः क्षयात् दीर्घतमसो जीर्णत्ववचनं तदानीं न विरुध्यते ।

दीर्घस्य तमस ऊर्ध्वं रात्रिशेषेण मासद्वयं षष्टिदिनात्मकमवशिष्यते । तत्र परदिनप्रारम्भीयं सान्ध्यं तेजः क्रमशो विवर्धमानं प्रवर्तते । तत्र उषःशब्देन अथवा उषाः, सविता इति भेदकल्पनया व्यवहारः । एवं च "सदृशीरद्य" इत्यत्र उषसां त्रिंशत्संख्यया व्यवहारः संगच्छते । [ऋ. सं. १. १२३. ८] ।

सान्ध्यं तेजः, उषस्यं तेजः अव्यक्तं भवतीति तस्याब्रूपत्वम् ।

"अव्यक्तस्य तेजसोऽब्रूपत्वं, तस्य तमोमयकाले तमोरूपेण वृत्रेण निरोधवचनं, वृत्रस्य हननेन तस्याव्यक्तस्य तेजसः प्रवृत्तिरिति वचनम्, तत्र अव्यक्ते तेजसि अप्त्वं, तत्प्रदत्वाद् वृत्रे मेघत्वं, इन्द्रे वृष्टिप्रदातृत्वम् इति कल्पनां विना नोपपद्यते इति अव्यक्ते तेजसि अप्त्वं प्रोक्तम् ।" [वे. वि. पृष्ठ. २७७–२७८]

तमोमयीनाम् अपां गन्तव्यं स्थानमादित्यमण्डलम् । अतो व्यक्ते तेजस्यपि मण्डलोदयं यावद् अपां प्रवृत्तिर्भवति । अत एव ऋग्वर्णा:—

"अपाम् अर्थं यतीनां ब्रह्मा भवति सारथिः ।" [ऋ. सं. १. १५८. ६][1]

"अपाम् अव्यक्तानां पूर्वदिनीयानां तेजसाम् अर्थमवधिभूतम् आदित्यमण्डलं यतीनाम् असौ मामतेयो दीर्घतमा जीर्णत्वेन असमर्थः, सारथिः समानरथयोगी भवति, येन मार्गेण ता आपो गच्छन्ति ताभिः सह तमवधिं प्राप्नोति ।"

[वे. वि. पृष्ठ. २७८ पङ्क्तिः ४-७][2]

तिलकेन गवामयनेन, अङ्गिरसामयनेन च यो दशमासावधिकः संवत्सरः प्रकल्पितः स नात्र सिध्यति । दशानां मासानां संवत्सरसंबन्धित्वेऽपि दशमासावधिकः संवत्सरो नात्र विवक्षितः । यतो दीर्घतमस ऊर्ध्वं यतीनां (गच्छन्तीनाम्) "अपाम् अर्थं" (मण्डलम्) उपैतुमपेक्षितमासद्वयोगेन द्वादशमासा भवन्ति ।

१. पूर्वरात्रियोगे उदयपर्यन्तम्		द्वौ मासौ
२. उदयादारभ्यास्तमयपर्यन्तम्		षड् मासाः
३. दिनावसानीय-रात्रिप्रारम्भीय-सन्धितोयसोः		द्वौ मासौ
	एवम्	दश मासाः
४. तमोमयः कालः		द्वौ मासौ
	सर्वं मिलित्वा	द्वादश मासाः ॥

२ + ६ + २ + २ = १२

१—"जीर्णं तु दीर्घतमसं खिन्नास्तत्परिचारिणः ।
दासा बद्ध्वा नदीतोये दृष्टिहीनमवादधुः ॥
तत्रैकस्त्रैतनो नाम शस्त्रेणैनमपाहनत् ।
शिरस्यंसावुरश्चैव स्वयमेव न्यकृन्तत ॥" [बृ. दे. ४.२१-२४]
"अङ्गदेशसमीपे तु तं नद्यः समुदक्षिपन् ।" [बृ. दे. ४. २४]
"अनयामास चोत्थाय कक्षीवत्प्रमुखानृषीन् ॥" [बृ. दे. ४. २५]

२— द्र. वे. वि. पृष्ठ. २७४-२७८ ।

मातुलस्य बृहस्पतेः शापेन दीर्घतमा जनुषान्धः ।

उ. ध्रुवः

द. ध्रुवः	१	२	३	४	५	६	
	आश्विनः	कार्त्तिकः	आग्रहायणः	पौषः	माघः	फाल्गुनः	
	सान्ध्यं तेजः		दीर्घं तमः		सान्ध्यं तेजः		
	सविता	उषाः			उषाः	सविता	
१.		शुक्रः[2]	दीर्घतमाः[3]		बृहस्पतिः		४.
	३०	३०	३०	३०	३०	३०	
	भृगुः	अङ्गिराः उचथ्यः	मामतेयः				

अपामर्थं यतीनां ब्रह्मा भवति सारथिः। [ऋ. १. १५८. ६]
"अघासु हन्यन्ते गावोऽर्जुन्योः पर्युह्यते ।" [ऋ. १०. ८५. १३]

[अघासु मघासु ।]

पिण्डब्रह्माण्डन्यायेन मातुरुदरात् शिशोःजननं, रात्रेः दीर्घात्तमसः सूर्यस्य मोचनं, सृष्टेरादौ हिरण्यगर्भस्य प्रजापतित्वं चात्र द्योत्येत । तथाहि—दीर्घं तमः यस्मिन्, दीर्घतमसि वा यः स दीर्घतमाः । दीर्घंस्तमाः । "तमः आसीत् तमसा गूळ्हम् । अम्भः किम् आसीद् गहनं गभीरम् । ततः समुद्रो अर्णवः । तुग्रो ह भुज्युम् अश्विनोदमेघे । युक्तो ह यद् वां तौग्र्याय पेरुर्विमध्ये अर्णसो धायि पज्रः ।" [१०. १२९. १; ३; १९०. १.; १. ११६. ३.; १५८. ३]

"आवः शमं वृषभं तुग्र्यासु" [१. ३३. १५] "तपसस्तन्महिनाजायतैकम् । अबोध्यग्निर्ज्म उदेति सूर्यः ।" [१०. १२९. ३.; १. १५७. १]

हिरण्यगर्भस्य पाकेन, सूर्यस्य प्रसरेण, गर्भस्य वृद्ध्या ज्योतिर्नद्यः प्रवहन्ति ।

१—अस्तं यन् मण्डलम् ।

२—जन्म ।

३—जीर्णता दशमे युगे ।

४—अपाम् अर्थः उदयन् मण्डलम् ।

तेन तमः (दासकल्पाः आपः, अव्यक्तानि तेजांसि) गर्भं, सूर्यं, हिरण्यगर्भं न बाधते । दशभिः काष्ठैः चितः अग्निः अत्र दहति । स भूमिं मा खादीत् । आत्मनि बद्धः अयं दीर्घतमाः अश्विनोः भूमिम् अभिगच्छति । "न मा गरन् नद्यो मातृतमाः" [१. १५८. ५] ।

"मा माम् एधो दशतयश्चितो धाक् "

प्रयद् वां बद्धस्त्मनि खादति क्षाम् ।" [१. १५८. ४]

वर्धमानः अग्निः त्रेधा विधीयते । त्रिषु स्थानेषु व्याप्तः त्रैतनः । स एव त्रैतनो भूत्वा दीर्घस्य तमसः शिरः छिनत्ति ।

"शिरो यद् अस्य त्रैतनो वितक्षत्" [१. १५८. ५][1] शिरः अर्थं तमम् । शिरसः तक्षणेन तमसः उपक्षपयिता "दासः" (अग्निः) स्वयम् उरः अंसौ अपि "अद" [भक्षितवान्, हतवान्] [१. १५८. ५] । अंसोरसः अदनं, हननं वा शिरसोऽधस्तात् अग्नेः त्रैतनस्य व्याप्तिं द्योतयति ।

मानुषगर्भः मासेन कठिनो भवति, मासाभ्यां शिरः सम्पद्यते । मासत्रयेण ग्रीवाव्यपदेशः । [निरु. १४. ६]

स्वधा अवस्तात् प्रयतिः परस्तात् [१०. १२९. ५] ।

अर्वाङ् त्रिचक्रो मधुवाहनो रथः [१. १५७. ३] ।

अर्णसो मध्ये तुग्र्यासु अप्सु पिता तुग्रेण अवसृष्टः दीर्घतमाः भुज्युः अश्विभ्यां प्रेरणा पारं गमितः । समुद्रस्य पारं गतः भुज्युः त्रिभिरहोभिः तिसृभिः रात्रिभिश्च [१. ११६. ४] ।

त्रैतनेन वितष्टः शिरआद्यवयवसंभृतः दीर्घतमाः गर्भः, सूर्यः, हिरण्यगर्भः "अपाम् अर्थं यतीनां ब्रह्मा[2] भवति सारथिः" [१. १५८. ६] ।

दीर्घतमा मामतेयो जुजुर्वान् दशमे युगे [१. १५८. ६] ।

दश रात्रीरशिवेना नवद्यून् [१. ११६. २४] ।

मा मामेधो दशतयश्चितो धाक् [१. १५८. ४] ।

दशतयः दश अवयवाः यस्य । "संख्याया अवयवे तयप् ।"

[पा. ५. २. ४२]

१—त्रैतनः [१. १५८. ५] दाशतय्यां त्रैतनशब्दः अत्रैव श्रूयते ।

२—ब्रह्मा । द्र.

"यो देवेभ्य आतपति यो देवानां पुरोहितः ।

पूर्वो यो देवेभ्यो जातो नमो रुचाय ब्राह्मये ॥" [वा. सं. ३१. २०]

अग्निम् ईळे पुरोहितम् [ऋ. १. १. १] ।

तृतीयोऽध्यायः

॥ उपसंहारः ॥

वेदेऽश्विनोर्देवयोः अनितरसाधारणं किमप्यनुपमं वैशिष्ट्यं दृश्यते । दाशतय्याम् [ऋग्वेदे] नवममण्डलवर्जम् इतरेषु नवसु मण्डलेषु अश्विदेवताकानि सूक्तानि विद्यन्ते । भूयांसि प्रथमे, सप्तमे, अष्टमे, दशमे च सन्ति । मण्डले कस्मिन्नपि अश्विसूक्तम् आदावन्ते वा नोपलभ्यते ।[१] एकनवत्यधिकशतसंख्याकसूक्तात्मके [१–१९१] दशमे मण्डले चतुरशीत्यधिकशततमे [१८४] सूक्ते तिस्र ऋचः । तत्रान्तिमायाम् अश्विनौ देवता, द्वितीयस्यां चर्चि अन्यतमा देवताऽश्विनौ । मण्डले प्रथमदशमे समसंख्याके । प्रथमे मण्डले चतुरशीत्यधिकशततमं [१८४] सूक्तम् आश्विनम् अन्तिमम् ।

अश्विनोर्वैशिष्ट्यम् तयोरेकनाम्ना व्यपदेशः । अहोरात्रौ, सूर्याचन्द्रमसौ, द्यावापृथिव्यौ, अग्नीषोमौ, इन्द्राविष्णू, मित्रावरुणौ, यमयम्यौ इत्यादीनि पदानि पदद्वयसमासानि । हस्तौ पादौ नासिके श्रोत्रे इव अश्विनौ इति पदं युग्मार्थकमपि अभेदबोधकं भवति । हस्तौ, पादौ, नासिके श्रोत्रे वा द्व्यवयवे, शरीरे विभिन्नाश्रये च । अश्विनोः परस्परं संबन्धः प्रज्वलदग्निकाष्ठयोरिव, इन्द्रवाय्वोरिव, वाक्प्राणयोरिव, भवति । अत एव यास्कः "अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषाऽन्यः" [निरु. १२. १] इति निब्रूते । ज्योतिस्तमसोः, अहोरात्रयोः, द्यावापृथिव्योः, अश्विनीनक्षत्रयोर्वा तादृशी समानाधिकरणव्याप्तिर्योगपद्येन नास्ति । अत एव त्रयस्त्रिंशद्देवेषु अश्विनोरुपसंख्यानं न क्रियते यद्यपि तौ त्रयस्त्रिंशता देवैः सह सोमं पिबतः [ऋ. सं. ८. ३५. १–३] । द्यावापृथिव्यौ, अहोरात्रौ, सूर्याचन्द्रमसौ, राजानौ पुण्यकृतौ [निरु. १२. १] वा अश्विनोः कौ अपि गुणौ क्रिये वा द्योतयेताम्, न तु अश्विनोर्याथात्म्यम् ।

अपि च अश्विनौ नमुचिवधे इन्द्रम् अवतः [ऋ. सं. १०. १३१. ४] । तौ उषसं सोमं नयतः [ऋ. सं. १०. ८५. ९; १४] । सूर्यस्य उद्गमनं तयोर्मुख्यो व्यापारः [ऋ. सं. १. ४६. ६; ४७. ७; १५७. १; ८. ९. १८] । अश्विनौ उषसः सूर्येण च संगतौ सोमं पिबतः [ऋ. सं. ८. ३५. १–३] । अश्विनोः रथो द्यावापृथिव्यौ अलंकरोति [ऋ. सं. ८. २२. ५] । अश्विनोर्मियो नियमन राज्या सहाऽह्नः इव [ऋ. सं. १. ३४. १] ।

अतोऽश्विनौ इन्द्रसूर्याभ्यां, सूर्यचन्द्रमोभ्यां, द्यावापृथिवीभ्यां अहोरात्राभ्यां च पृथगेव ।

ग्रीक्–डिओस्कुरी अश्वारोहिणौ, बौधास्कोई–लैस्गत–नासत्यौ, अवेस्टग्रन्थस्थौ नासत्यौ[1] यौ कौ अपि एकद्वौ गुणौ वैदिकाश्विनोर्बोधयेताम् । यदि पुनस्तयो र्गुणक्रियाभ्याम् अधिकं किमपि वैदिकयोरश्विनोर्दृश्यते तर्हि तौ वैदिकौ अश्विनौ अर्वाक्कालिकौ इति नायाति । प्रत्युत वैपरीत्येन पाश्चात्ययोः एव अश्विनोरर्वाक्कालिकत्वम् अंशग्राहित्वं च द्योतितं भवति ।

त्वष्टुर्दुहिता सरण्यूः सूर्येण संगता, सवर्णां स्वस्थाने प्रतिनिधाय, अश्वा भूत्वा, निर्गत्य अश्वभूतात् सूर्याद् अश्विनौ जनयामास ।

अप्सु तपोरूपस्य अग्नेः प्रवेशेन संभूता सरण्यूः विभिन्नयोजनैः मनुं सूर्यं यमयम्यौ (जीवशरीरे, प्रकृतिपुरुषौ) चोत्पाद्य, वडवाभूता अश्वभूतस्य विवस्वतः शुक्रं नासिकाभ्याम् आघ्राय अश्विनौ सुषुवे । तस्मिन् समये सा मिथुनौ अहोरात्रौ तत्याज [ऋ. सं. १०. १७. १–२] ।

प्रातःस्मरणीयौ प्रातर्यावाणौ अश्विनौ मानवस्य सर्वं कर्म व्याप्नुतः । विश्वस्य स्पन्दनेन सह अश्विनोर्व्यापारः प्रवर्तते । सुप्तो यदा जागर्ति तदा द्वैतभावमापद्यते । अश्विनोः सत्ता सर्वत्रानुभूयते द्यावापृथिव्यात्मना, अहोरात्रात्मना सूर्यचन्द्रात्मना, इन्द्रियविषयरूपेण, तेजस्तमोरूपेण, अग्नीषोमीयरूपेण वा । तत्र अश्विनोराध्यात्मिकं रूपं पुरुषस्य रसनेन्द्रियम् । रसवती रसना न केवलं रसेनाश्नुते अपितु वाचं व्याहरन्ती ज्योतिषाऽप्यश्नुते । एवं शरीरपोषकस्य अन्नस्य ग्रहणेन, बुद्धिवर्धकस्य ज्ञानस्य च प्रयोगेण जिह्वास्वरूपौ अश्विनौ सर्वेषां भिषजौ ज्ञानात्मनो मधुनः सेक्तारौ च भवतः । "अश्विना यज्वरीरिषः"……… चनस्यतम् । धिष्ण्या वनतं गिरः । आयातं रुद्रवर्तनी ।" [ऋ. सं. १. ३. १–३]

अश्विनौ पृथिवीतो दिवं प्रति यज्ञं नयतः । अग्नौ हुतं हविः रसो भूत्वा अश्विनोः दिवं प्रति अयानसाधनं भवति । रसस्य दिवं प्रति आरोहणम् अग्निं (ज्योतिः) विना न भवति । एवं रसज्योतिभ्यां दिवं प्रति अश्नुवानौ अश्विनौ यज्ञकर्म आधिभौतिकाधिदैविकाध्यात्मिकसम्पत्तीः प्रदत्तः ।

संवत्सरात्मको यज्ञो नैसर्गिकः । "वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मः शरद्धविः [ऋ. सं. १०. ९०. ६] ।

अस्मिन् प्राकृते यज्ञे मानवेन किमपि कर्तव्यं न भवति । हविरजुहुतेऽपि

१—"ना ओङ्हैथ्य" इति "अवेस्ट" ग्रन्थे तयोर्नाम । (nāoṅhaithya.)

यज्ञफलं कामयमानाय अश्विनौ इषः (अन्नानि) अशित्वा, अप्रतिहतप्रसरया धिया कामान् दुग्ध्वा, वायुपथेन ज्योतिः प्रवर्तयतः।

[ऋ. सं. १०. २४. ५; १८४. ३]।

अस्याधिदैविकयज्ञस्य फलं स एव भोक्तुमर्हति यो वेदार्थं बुद्ध्वा अश्विनोः रथस्य सांवत्सरिकव्यापारेण सहाऽऽत्मनो भौतिकं जीवनं संगमयति। यथा पृथिव्यां बीजवापेन कृषीवलो धान्यं लभते, तथाश्विनावन्तरिक्षे मेघं सृष्ट्वा वृष्ट्या सेकेन तमः, दारिद्र्यम्, आमयम्, अज्ञानं च विनाश्य ज्योतिर्विज्ञानं च तनुतः [ऋ. सं. १. ११७. २१]।

द्यावापृथिव्योरन्तरा वर्तमानो मानवोऽश्विनोर्व्यापारेभ्यः कदापि न विमुक्तो भवति। तेजस्तमोभ्यां तमश्विनौ बहिर्व्याप्नुतः, रसज्योतिर्भ्यां च शरीरे। संवत्सरं तेजस्तमसोः व्यापनमेवाश्विनोर्मुख्यं कर्म। अत्र तमो निरस्य ज्योतिषः उद्गमने तौ स्तूयेते। अत्र तेजोऽग्नेरूपं, तमश्च रसस्य। रसोऽयं प्रकृतेः, अपां तत्वं भवति। "यो वः शिवतमो रसः, तस्य भाजयतेह नः, उशतीरिव मातरः" [ऋ. सं. १०. ९. २] इत्यापः प्रार्थ्यन्ते। तेजस्तमोभ्यां, रसज्योतिर्भ्याम्, अग्नीषोमाभ्यां व्याप्तमिदं विश्वम्। आभ्यां तत्त्वाभ्यामश्विनौ सर्वं व्यश्नुवाते।

ऋतं च सत्यं च प्रजापतेस्तपसोऽध्यजायत। इमे ऋतसत्ये विश्वस्य मूलभूते द्वे तत्वे। अतोऽत्र जायमानं सर्वं द्वैतभावापन्नं भवति। इदं सर्वव्यापकं द्वैतभावं विज्ञाय यः प्रवर्तते स प्रातर्यावा, उपर्भुत् भवति। तस्य कृतेऽश्विनौ तमो निरस्य सूर्यमुद्गमयतः। अश्विभ्यां प्रत्यहं क्रियमाणं सूर्योद्गमनं यः सम्यग् विजानाति स प्रकृतौ सदा द्रवत् मधु सोमं च पिबति। एतदर्थमश्विभ्यां सह अञ्जनमपेक्ष्यते। अञ्जने गृहीतस्य त्यागो विधेयो भवति। यथा तमो निरस्याश्विनौ ज्योतिः वर्धयतः तथाऽज्ञानं दूरीकृत्य ज्ञानमुपासीत। एते हानोपादाने विश्पलाया आख्याने सम्यगधिगम्येते। विश्पलायाश्चरित्रं यदा छिन्नं तदा अश्विनौ तस्यै हिरण्मयीं जङ्घां प्रतिधत्तः स्म। चरित्रं नामेन्द्रियं येन चरति मनः। इन्द्रियस्योपरमे सति अश्विनौ जङ्घां हिते धने "सर्तवे प्रत्यधत्तम्" [ऋ. सं. १. ११६. १५] अत्र अश्विनोः अनुग्रहेण जितेन्द्रियः मनस्वी भूत्वा बुद्धिमान् भवति। बुद्धेर्व्यापार एव जङ्घायाः सरणम्।

अश्विनौ चक्षुरगोचरौ। वायुस्तयोर्वाहनम्। वायुरेव स रसः येनाश्विनोरन्यतरो व्यश्नुते। तत्रेतरस्य व्यापनसाधनं ज्योतिः वाय्वश्वः शब्द एव। एवं वायुशब्दाभ्यां रसज्योतिर्भ्यां अश्विनौ सर्वं व्यश्नुवाते। अश्विनोर्वाहनं रासभः अनयोः वायुशब्दयोरेव मूर्तभूतः। एवम् अश्विनोर्व्यापारस्तदा गोचरो भवति यदा पुरुषः पृथिवीम् अपः अग्निं चातिक्रामति। त्रयाणामेतेषामवराणां भूतानां व्यापारो

यदा विरमति तदा अश्विनोरभिव्यक्तिर्भवति । अश्विनोः ईदृशीमभिव्यक्तिं मानवः साधारणे ऐन्द्रिये जीवने न अधिगच्छति । एतदर्थं सोऽश्विनोः प्रत्यक्षभूते द्यावापृथिव्यौ उपास्ते [ऋ. सं. १. ११२. १] । तत्र द्यावापृथिव्योः श्रेष्ठं ज्योतिः सूर्य एव । अयं "सूर्य आत्मा जगतस्तस्थुषश्च" [ऋ. सं. १. ११५. १] । अतः प्रतीकरूपेण सूर्यमुपास्य मानवोऽश्विनोः सर्वाः ऊतीः [ऋ.सं.१.११२.१–२५] अधिगन्तुमर्हति ।

अश्विनोरनुग्रहलाभाय सर्वत्र द्वन्द्वेऽश्विनोर्व्यापारमीक्षत ऋषिः । पाणी, पादौ, नेत्रे, श्रोत्रे, नासिके, चक्रवाके, दम्पती, ग्रावाणौ इत्यादीनि द्वन्द्वभावमापन्नानि । अत एव गृत्समदः ऋषिः भूतांशः काश्यपश्च एभिः द्वन्द्वभूतैरश्विनौ संवर्णयतः । [ऋ. सं. २. ३९; १०. १०६] ।

द्यावापृथिव्योरन्तरा अश्विनोरागमनेन सह वाता मधु प्रवहन्ति । अत ऋषिरश्विनौ वातौ भूत्वा स्वशरीरं प्रवेष्टुं प्रार्थयते—"आत्मेव वातः स्वसराणि गच्छतम्" [ऋ. सं. १. ३४. ७] । अग्नीषोमात्मके पिण्डीभूते शरीरे अश्विनोरभिव्यक्तिस्तदाभवति यदा नासिकया प्रवहन् वायुः वशीक्रियते ।

द्यावापृथिव्यौ स्वरथचक्ररूपेण व्यापारयन्तौ, ज्योतिषा तमः तिरस्कृत्य सूर्यं तत्तद्देशे उद्गमयन्तौ, हिरण्मयमार्गेण सूर्यत्वचा रथेन तत्र तत्र वर्तेते अश्विनौ । यत्र यस्मिन् काले देवौ वा इतरेषां देवानां स्तोतारो न सन्ति तत्राप्यश्विनोः स्तोतारो भवन्ति, ताभ्यामेव यज्ञशिरसः प्रवर्ग्यसंभारेण सन्धानात् । एवं सर्वे यागा अश्विनोरधि प्रभवन्ति, ताभ्यामेव छिन्नस्य यज्ञशिरसः संधानात् । "ययोरधि प्रयज्ञा असूरे सन्ति सूरयः" [ऋ. सं. ८. १०. ४] ।

सिन्धुमातरौ [ऋ. सं. १. ४६. २] सिन्धोः स्यन्दनेन समुत्पन्नावश्विनौ स्यन्दनविरत्या विरमतः । सिन्धुजातत्वादेव तौ द्रवत्पाणी शुभस्पती । रथश्च तयोः द्रवदश्वः [ऋ. सं. १. ३. १; ४. ४३. २] ।

हिरण्मयेन मार्गेण व्याप्नुवतोस्तयो रथो हिरण्मयो भवति । सूर्यस्य प्रसविता सविता हिरण्यपाणिः । अश्विनौ हिरण्यहस्तं वध्रिमत्यै दत्तः ।

सिन्धोः अपां जरयिता सूर्यः [ऋ. सं, १. ४६. ४] । दिवि आप ऋतम् । सूर्यज्योतिषा प्रकाशमानं तद् ऋतम् उषा भवति । अस्या उषसः साक्षात्करणमेव मधु । इदं मधु दिवो रसः । शश्वत्तमा उषा यदा ऊर्जानी, सूरिः, योषा इति नेत्राऽभिव्यज्यते [ऋ. सं. १. ११९. २; ३; ५] तदा मधु गोचरं भवति यच्चाश्विनोः प्रियं पेयम् ।

अश्विनोस्त्रिवृतं रथमुषा आरोहति, सा सोमं नीयते सोमेन परिणह्यते । अस्मिन् कर्मणि अश्विनौ यज्ञं मधुना सिञ्चतः कशया । अत्र यज्ञः सूर्यः यत्र रसो

ज्योतिषच पृथिव्या उद्गच्छती संपृक्तः। सूर्योऽत्र विमदस्य जायायां समुत्पत्स्यमानः पुत्रः। एतदर्थमेव विमदाय जाया नीयते [ऋ.सं. १.११६.१]। विमदजाययोः संपर्कोऽश्विभ्यां मधुसेकमपेक्षते।

दिवि आप ऋतं यद् अश्विनौ तरतः। तत्र पन्थाः सोमो यश्च दिवः स्रुतिः। ऋतदीप्तिरुषा मण्डलं नीयमाना मधु क्षरति येन सोमः अभिव्यज्यते। सूर्यतेजसा प्रकाशमानम् ऋतम् उषाः। अस्मिन्नुषोभूत ऋते विमदस्य भुज्योर्यद् गोचरं भवति तदेव मधु। मधुरिक्तम् ऋतमेव सोमः।

अश्विनो रथस्य गन्तव्यं स्थानं सोमिनो गृहम्। सूर्यां रथे आरोप्य यदाश्विनौ सोमिनो गृहं प्राप्नुतः तदा तयो रथस्य गतिर्विरता भवति। अश्विनोः कर्म रथे उषसमारोप्य सोमं प्रति नयनेन पर्यवस्यति। अयं चाश्विनो रथ ऋभुभिः तष्टो भवति। अतएव काक्षीवती घोषाऽश्विनौ ऋभुतष्टेन रथेनागन्तुं प्रार्थयते।

[ऋ. सं. १०. ३९. १२][1]

१—देवरथः

जीवनहेतुभूतस्य प्राणस्य उपासनस्य फलप्राप्तये प्राणस्य कश्चन देवरथः श्रूयते।

"अनकाममारोऽथ देवरथस्तस्य वागुद्धिः, श्रोत्रे पक्षसी, चक्षुषी युक्ते, मनः संग्रहीता, तदयं प्राणोऽधितिष्ठति, इति।" तदुक्तमृषिणा, इति—

"आ तेन यातं मनसो जवीयसा" [१०. ३९. १२]

"निमिषश्चिज्जवीयसेति जवीयसेति" [८. ७३. २]

इति। [ऐ. आ. २. ३. ८]

देवस्य प्राणस्य हिरण्यगर्भस्य रथो देवरथः। कामान् मारयतीति काममारः। न काममारः अकाममारः। न अकाममारः अनकाममारः। सर्वथा नाशयत्येव कामान् इत्यर्थः।

"न खलु हिरण्यगर्भं प्राप्तः कश्चिदपि अर्वाचीनं लोकं कामयते।" वागुद्धिः। ऊर्ध्वं धीयते स्थाप्यते युगमत्रेति रथस्य मुखम् ईषयोरग्रम् उद्धिरित्युच्यते।

श्रोत्रे पक्षसी। पार्श्वद्वयवर्तिनी चक्रे। चक्षुषी युक्ते। अश्वयोः स्वरूपे। मनः संग्रहीता। सारथिः।

रथम् इमं प्राणाख्यो देवः अधितिष्ठति, उपर्यारोहति।

[द्र. सायणः ऐ. आ २. ३. ८]

प्रग्रहरहितः, अश्वरहितः, ऋभुकृतोऽश्विनोरयं त्रिचक्रो रथो यदा रजः (अन्तरिक्षं) परिभ्रमन् द्यां पृथिवीं च पुष्णाति, तदा ऋभूणामेतद् महनीयं कर्म ऋषिर्वामदेवः स्तौति ।

अनश्वो जातो अनभीशुरुक्थ्यो रथस्त्रिचक्रः परिवर्तते रजः ।

महत्तद्वो देव्यस्य प्रवाचनं द्यामृभवः पृथिवीं यच्च पुष्यथ ॥ [ऋ.सं.४.३६.१]

सिन्धुजन्मानौ अश्विनौ सिन्धुं तितीर्षोर्यजमानस्य गभीरं गाधं पद्भ्यां चितः । कर्णाविव तौ यजमानस्याभीष्टमनुस्मरतः [ऋ. सं. १०.१०६.९] । इत्थं पृथिव्यां तिष्ठतोरश्विनोः सिन्धोरुपरि द्योये विराजतः । अतोऽश्विनोः अधिकारो पृथिवीतो वायुं यावत् । वायुवाहनः शब्दस्तयोर्मधु । तयोः रथे संचितं मधु तुरीयमन्नं भवति [ऋ. सं. ४. ४५. १] । यदा शब्दोऽश्विनोर्मधुः समेति तदा तावुषसा संगच्छेते ।

संज्ञया युग्मबोधकावश्विनौ । सर्वव्यापकत्वादश्विनौ तौ । सर्वकर्मसमर्थत्वाद् दस्रौ तौ, सर्वज्ञत्वाद् नासत्यौ च तौ । सोमस्योद्गमने ज्योतिष उद्गमने तयोर्व्यापारात् तयोः सर्वदा परस्परमाह्वयमानयोश्च अद्वैतसाधने तयोः कर्म पर्यवस्यति । एतत्तु तयो रथे उभय आरोहणे तृतीयस्य चक्रस्य प्रादुर्भावाद् द्योत्यते । "त्रिभिरश्ववानमश्विना निवाश्वो अद्वयाविनम्" [ऋ. सं. ५. ७५. ५] इत्यत्र "अद्वयाविनम्" इति पदम्, "वृषन्" [ऋ. सं १. १८४. ३], "वीर" [ऋ. सं. ५. ७४. ४] इत्येकवचनेनाश्विनोः संबोधनम्, उभयो रथ आरोहणे पूष्णा तयोः पितृत्वेन वरणम् [ऋ. सं. १०. ८५. १४], रथसहयोः योग्ययोस्तयोः त्वष्टुर्जामात्रा वायुना योजनम् [ऋ. सं. ८. २६. २१-२४] इत्यादिभिरश्विनोरद्वैतसाधने प्रवृत्तिरिति बुध्यते ।

दधीचे मधुविद्याग्रहणाय प्रतिहितम् अश्वस्य शिरः साम्यं तेज एव, यच्च उदयात् प्राक् सुमेरौ मासद्वयं यावत् क्रमशः उदयमनु प्रवर्धमानं भवति । यद्यप्यस्तोत्तरमपीदं तेजो भवति, तथापि यज्ञस्य अविकल्पाय, शिरःसन्धानाय, अत्र मधुविद्याग्रहणाद् इदं मधूदयात् प्राग्वर्ति भवति । अनेन मधुना यज्ञे सिक्ते सति प्रवर्ग्यसंभारेण शिरः पुनः सन्धीयते । शिरःसन्धानं नाम सूर्यस्योदयः । यज्ञोऽत्र सूर्येण पृथिव्यां तेजसो, घृतस्य, होमः । यज्ञस्तु इदानीमपि प्रवर्तते एव अपशिरा भूत्वा । स च यज्ञोऽधुना ध्रुवयोरन्तरा यत्र सूर्यः षण्मासान् सातत्येन अस्तं विना न प्रकाशते । अपि च शिरोऽपि विद्यते, प्रकाशते अन्यत्र कुमेरौ । तत्र पतितं शिर एव अश्विनौ पुनः सुमेरौ सन्धत्तः, येन देवानां यज्ञः कृत्स्नो भवति । अश्विनौ नूतनं शिरः कुतोऽपि नानयतः ।

सुमेरौ अश्विभ्यां शिरः प्रतिधीयते, तदा कुमेरौ, यत्र सूर्यस्तेनास्तं याति,

सान्ध्यतेजसः प्रवर्तनाय अश्व्यं शिरोपेदयते। तच्चात्र इन्द्रेण छिन्नम्, अश्विभ्यां पूर्वं दधीचि योजितम् अश्व्यं शिरः। यतस्तच्छिन्नम् अश्व्यं शिरः केनापि नापह्रियते। छिन्नं तत् क्वचित् पतेदेव।

सूर्योदयेन अश्विनोस्तिरोभावोऽन्यत्रोदयः च युगपद् भवति। एतत् कर्मद्वयेन प्रतिपाद्यते। इन्द्रोऽश्व्यं शिरश्छिनत्ति, अश्विनौ तदैव दधीचः स्वीयं शिरः प्रतिधत्तः।

मण्डलस्य पूर्णतया उदय एव इन्द्रस्य बलकृतिः। तेनोदयेन सह अश्विनोः विलय एव इन्द्रेण शिरश्छेदनम्। कृत्तं च तदश्व्यं शिरः कुरुक्षेत्रस्य जघनार्धे शर्यणावन्नाम्नि[1] सरस्युपलभ्यते।

अनया रीत्या अश्वशिरसा मधुग्रहणस्य तत्त्वं नाधिगम्यते चेद् इन्द्रेण अश्वशिरश्छेदनं न संगतं भवति। यदि शतपथब्राह्मणोक्तमाख्यानम् अर्वाक्कालिकमिति मत्वा प्रमाणत्वेन न गृह्यते तर्हि, वेदे संहितायां श्रूयमाणं दधीचा अश्वस्य शिरसा मधुप्रवचनम्, अश्विनोः उग्रं कर्म च न सुविदितं भवति।

अपि च ब्राह्मणगतमाख्यानं कपोलकल्पितमपि उन्मत्तप्रलाप इव भवति। यतोऽत्रेन्द्रेण अश्वशिरःकर्तनं न संगच्छते। किं नाम कृतमिन्द्रेणानेन। तस्य क्रोधेन दध्यङ् न दण्डितः, यतस्तस्य स्वीयं शिरः अश्विभ्यां पुनः संहितम्। इन्द्रोऽपि सत्रे आसीत्। दधीचो वैदुष्यमपि विदितमासीत् तेन। तथापि तेन स्वयं मधुविद्या दधीचो न गृहीता, न वा दध्यङ्ङेव यज्ञशिरःसन्धानाय आदिष्टः। अथाश्विनौ विना केनैतत् कर्तुं शक्यते। "ते देवा अश्विनावब्रुवन्। भिषजौ वै स्थः। इदं यज्ञस्य शिरः प्रतिधत्तम्।" [तै. आ. ५. १. ६] अपि च शिरःकर्तनसमये शिरसो विवेकः अपीन्द्रस्य नासीद् इत्याद्याक्षेपाणां समाधानाय गत्यन्तराभावात् अत्र अश्व्यं शिरः प्रवर्धमानं सान्ध्यं तेजः, तच्च उषःकालिकम्। श्रूयते च—"उषा वा अश्वस्य मेध्यस्य शिरः।" [बृहद् आ. उ. १. १. १]।

घर्मः प्रवर्ग्यः यज्ञशिरः इत्यादिशब्दाः आदित्यस्य पर्यायाः। इन्द्रं विनादित्यस्योदयासंभवात् यज्ञे इन्द्र एव देवता। इन्द्रस्य मण्डलमध्यवर्तितया, अश्विनोश्च मण्डलाद् बाह्यतयाऽश्वशिरःसन्धानम् अश्विनोः कर्म। मधुविद्यां गृहीत्वा अश्व्यशिरसोऽपसारणेऽश्विनोरवसरो न लब्धः। अतो मधुविद्याग्रहणमात्रेण अर्थाद् मधुनः पानेन वा सेकेन वा समासौ, मण्डलोदयः इन्द्रेणाश्व्यशिरश्छेदश्च युगपद् भवतः।

"इन्द्रो वै यज्ञस्य देवता। सा यैव यज्ञस्य देवता तयैवैतद् अश्विनौ यज्ञस्य शिरः प्रत्यधत्ताम्।" [शत. ब्रा. १४. २. १. १३]।

इन्द्रश्चाश्विनौ च वसवः। "एते हीदं सर्वं वासयन्ते"

[शत. ब्रा. १४. २. १. २०]

१—ऋ. सं. १. ८४. १३–१४; ११६. १२।

सविता रात्रावन्धकारे विलीनान् देवान् तमसो गर्भाद् बहिर्निर्गमयति । गतिश्च पद्भ्यां क्रियते । गत्या, अग्नेः पाकेन रूपं क्रियते येन द्रवस्य प्रवाहो भवति । गत्या ऊढो रसमयः पदार्थो हस्ताभ्यां संगृह्य संघट्य पिण्डीक्रियते, यस्य च प्रसूतस्य पिण्डस्य रूपम् उदीयमाने मण्डले गोचरीभवति ।

एवं गतिः, प्रवाहः, रूपम् इति त्रिभिर्योजनैः सविता प्रसुवति । तत्र गतिरश्विनो रूपम्, प्रवाहः सरस्वत्या रूपम् । साक्षात् प्रसूतं चेन्द्रस्य रूपम् ।

सौत्रामणीयज्ञात् पुरुषो जायमानस्त्रेधा विधीयते—१. यदवाङ् नाभेस्तदाश्विनम् । २. यदूर्ध्वं नाभेरवाचीनं शीर्ष्णस्तत् सारस्वतम् । ३. शिर ऐन्द्रम् ।

॥ इति चतुर्थो भागः ॥

—:०:—

परिशिष्टम्–१

मण्डलविभागः ।

दशभिर्मण्डलैः दाशतयी ऋक्संहिता ।

मण्डलविभागे आधुनिकं पाश्चात्यं मतम्—

सप्तमण्डलानि द्वितीयादारभ्याऽष्टमं यावत् [२–८] वंश्यानि, वंशगतानि । प्रत्येकं मण्डलमेकैकस्य वंशस्य । वंशोऽत्र ऋषीणाम् । नवमे मण्डले पवमानसोमदेवताकानि सूक्तानि संगृहीतानि । प्रथमं दशमं च पाश्चात्ये, इतरेभ्यो मण्डलेभ्योऽर्वाक्तने इति । तत्र प्रथमेऽन्तिमे च सूक्तसंख्या समा, १९१ सूक्तानि उभयत्र, यैवः तयोः काञ्चित् कृत्रिमतां द्योतयति ।

परन्तु सम्यग् विवेचने सति मण्डलानां पौर्वापर्यं निर्मूलं प्रतीयेत । ये ऋषयः वंश्याः, तेषामेव कतिपयानां पूर्वजाः प्रथमदशममण्डलगतानां कतिपयानां सूक्तानां द्रष्टारः सन्ति । यथा—

प्रथमे मण्डले गोतमो राहूगणः ऋषिः ।

चतुर्थे मण्डले वामदेवः गौतमः ऋषिः ।

अत्र गोतमः अवश्यं गोतमादर्वाक्तनः ।

तृतीयं मण्डलं वैश्वामित्रम् । विश्वामित्रः तत्र ऋषिः । विश्वामित्रः विश्वामित्रवंश्याश्च तृतीयमण्डलगतसूक्तानां द्रष्टारः । शुनः शेपः देवरातः विश्वामित्रस्य दत्तपुत्रः । शुनःशेपस्य ज्यायांसः पञ्चाशत् विश्वामित्रस्य पुत्राः । शुनःशेपस्य कनीयांसो विश्वामित्रस्य एकपञ्चाशत् पुत्राः[१] । एवं विश्वामित्रस्य एकशते पुत्रेषु मध्यमः शुनःशेपः, यस्य सूक्तानि प्रथमे मण्डले श्रूयन्ते, न त्वितरेषु मण्डलेषु ।

१—एकशतं पुत्राः विश्वामित्रस्य । एकशते पञ्चाशत् ज्यायांसः मधुच्छन्दसः, पञ्चाशच्च कनीयांसः ।

"वत्साः ! शुनःशेपो मया पुत्रत्वेन परिगृह्यते, स एव युष्माकं ज्येष्ठत्वेन अवतिष्ठताम्" इति पित्रा अभ्यर्थिताः ते ज्यायांसो नाभ्यनन्दन् । मधुच्छन्दास्तु पञ्चाशता कनीयोभिः सार्धं पितुर्वचनं बहु अमन्यत [द्र. ऐ. ब्रा. ३३.६] ।

डाक्टर-कुन्हनराजः (Dr. C. Kunhan Raja) प्रथममण्डलसंग्रहविषये लिखति—

नास्त्यनेकोऽपि कविः (ऋषिः) योऽर्वाचीनो मन्येत । भूयांसोऽत्र तथा प्राचीना यथा वंश्यमण्डलीयाः । अपि च घोरः कुत्स इव केचन प्राचीनतराः स्युः । प्रथममण्डले केषाञ्चन संग्रहे हेतुरेकोऽयं स्यात् यदेषां कृतयस्तथा पूर्णा न स्युः यथा पाश्चात्यानां वंश्यानां कृतयः । केषाञ्चन प्रथममण्डलगतानाम् ऋषीणां वंश्यमण्डलेषु संग्रहः सुशकोऽभविष्यत् । कण्वमेधातिथिप्रभृतीनां केषाञ्चन सूक्तानि यथा प्रथममण्डले दृश्यन्ते तथा वंश्यमण्डलेऽपि ।

प्रथममण्डलस्य क्रम एवं दृश्यते ।

	सूक्तम्	ऋषिः	विशेषः
१	१–१०	मधुच्छन्दाः वैश्वामित्रः	तृतीयं मण्डलं वैश्वामित्रम् ।
२	११	जेता माधुच्छन्दसः	उभौ [वै., म.] न तृतीये मण्डले । नवममण्डलस्य प्रथमसूक्तस्य ऋषिः मधुच्छन्दाः वैश्वामित्रः । दशममण्डलस्य उपान्त्यस्य सूक्तस्य [१०. १९०] ऋषिः माधुच्छन्दसः अघमर्षणः ।
३	१२–२३	मेधातिथिः काण्वः	अष्टमं मण्डलं कण्ववंश्यम् । अष्टममण्डले त्रीणि सूक्तानि तस्य [१. ३–२९; २; ३२] । नवमे मण्डले सूक्तं द्वितीयं तस्य ।
४	२४–३०	आजीगर्तिः शुनःशेपः	कृत्रिमो वैश्वामित्रो देवरातः ।
५	३१–३५	हिरण्यस्तूप आङ्गिरसः	
६	३६–४३	कण्वो घौरः	
७	४४–५०	प्रस्कण्वः काण्वः	
८	५१–५७	सव्य आङ्गिरसः	
९	५८–६४	नोधा गौतमः	
१०	६५–७३	पराशरः शाक्त्यः	शक्तिः वसिष्ठस्य पुत्रः । सप्तमं मण्डलं वासिष्ठम् ।

	सूक्तम्	ऋषिः	विशेषः
११	७४-९३	गोतमो राहूगणः	
१२	९४-९८	कुत्स आङ्गिरसः	
१३	९९	कश्यपो मारीचः	एकर्चं सूक्तम्। [ईदृशं सूक्तं नान्यत्र संहितायाम्।]
१४	१००	वार्षागिराः [पञ्च] ऋज्राश्वा-म्बरीष-सहदेव-भयमान-सुराधसः	एकं सूक्तम्। पञ्च ऋषयः
१५	१०१-१०४	कुत्स आङ्गिरसः	चत्वारि सूक्तानि
१६	१०५	त्रित आप्त्यः कुत्स आङ्गिरसो वा	एकं सूक्तम्।
१७	१०६-११५	कुत्स आङ्गिरसः	
१८	११६-१२५	कक्षीवान् दैर्घतमसः	
१९	१२६	कक्षीवान्। भावयव्यः। रोमशा।	कक्षीवान् [ऋक् १-५] स्वनयो भावयव्यः [ऋक् ६] रोमशा [ऋक् ७]
२०	१२७-१३९	परुच्छेपो दैवोदासिः	
२१	१४०-१६४	दीर्घतमा औचथ्यः	
२२	१६५[1]-१९१	अगस्त्यो मैत्रावरुणिः	

ऋग्यजुःसामभेदेन वेदाः त्रयः। परन्तु संहिताभिः चत्वारो वेदाः।

१ ऋक्संहितया ऋग्वेदः २ सामसंहितया सामवेदः

३ यजुःसंहितया यजुर्वेदः ४ अथर्वसंहितया अथर्ववेदः

अनेन चातुर्विध्येन त्रिपुरुषाश्चत्वार ऋत्विजः।

अयं विभागो वेदानां याज्ञिकत्वं द्योतयति [द्र. ऋ. सं. १०.७१.११]।

१—१६५ पञ्चदशर्चं सूक्तम्। इन्द्र ऋषिः अष्टानामृचाम् [१. २. ४. ६. ८. १०. ११. १२]।

मरुत ऋषयः चतसृणामृचाम् [३. ५. ७. ९]

अगस्त्यो मैत्रावरुणिः ऋषिः तृचस्य [१३-१५]

"संवादस्तृतीयाद्ययुजो मरुतां वाक्यम्। अन्त्यस्तृचोऽगस्त्यस्य। शिष्टा इन्द्रस्य एकादशी च।" [का. अनुक्रमणिका]

चतुर्षु वेदेषु ऋचामेव अभ्यर्हितत्वं परिगण्यते । तत्रैको हेतुः प्राथम्यपाठः । ऋ. सं. १०. ९०. ९—ऋचः, सामानि, छन्दांसि:, यजुः इति क्रमोऽत्र दृश्यते ।

ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः [मु. उ. १. १. ५]

द्वितीयो हेतुः स्वाभिहितेऽर्थे विश्वासदार्ढ्याय ऋचामेव समाश्रयणम् ।

न केवलमृचां पाठप्राथम्येनाभ्यर्हितत्वं किन्तु यज्ञाङ्गदार्ढ्यहेतुत्वादपि । तथा च तैत्तिरीया आमनन्ति—"यद् वै यज्ञस्य साम्ना यजुषा क्रियते शिथिलं तत्, यदृचा तद् दृढमिति ।" [तै. सं. ६. ५. १०. ३]

"तथा सर्ववेदगतानि ब्राह्मणानि स्वाभिहितेऽर्थे विश्वासदार्ढ्याय "तदेतद् ऋचाऽभ्युक्तम्" इत्यृचमेवोदाहरन्ति । मन्त्रकाण्डेष्वपि यजुर्वेदगतेषु तत्र तत्राध्वर्युणा प्रयोज्या ऋचो बहव आम्नाताः । साम्नां तु सर्वेषाम् ऋगाश्रितत्वं प्रसिद्धम् । आथर्वणिकैरपि स्वकीयसंहितायाम् ऋच एव बाहुल्येन अधीयन्ते । अतोऽन्यैः सर्वैर्वेदैरादृतत्वादभ्यर्हितत्वम् ।"[1] [सायणः ऋग्वेदभाष्यभूमिकायाम्] ।

एको विभागोऽष्टकाध्यायवर्गैः । अन्यो विभागो मण्डल-सूक्तानुवाकैः । द्वेधायं विभागः संहितायां ऋचाम् आनुपूर्व्यां भेदं नोपपादयति । तत्र मण्डल-विभागो युक्ततरो मन्यते, ऋषिच्छन्दोदेवताविनियोगानां तत्रैव विधानसम्भवात् । अष्टकविभागोऽर्वाचीनः स्वाध्यायाभ्यासार्थः समाश्रितो भवेत् ।

शौनकस्य प्रातिशाख्ये, कात्यायनस्य सर्वानुक्रमण्याम्, शौनकस्य बृहद्देवतायाम्[2], आश्वलायनश्रौतसूत्रे च मण्डलविभाग एव अनुश्रियते ।

१—आनुपूर्व्यात् कर्मणां स्वरूपं यजुर्वेदे समाम्नातम् । तत्र तत्र विशेषापेक्षायाम् अपेक्षिता याज्यापुरोनुवाक्यादय ऋग्वेदे समाम्नायन्ते, स्तोत्रादीनि तु सामवेदे । तथा सति भित्तिस्थानीयो यजुर्वेदः चित्रस्थानीयावितरौ । तस्मात् कर्मसु यजुर्वेदस्य प्राधान्यम् । [सायणः तैत्तिरीयसंहिताभाष्यभूमिकायाम्] ।

२—कर्माणि याभिः कथितानि राज्ञां दानानि चोच्चावचमध्यमानि ।
नाराशंसीरित्यृषयस्ताः प्रतीयात् याभिस्तुतिर्दाशतयीषु राज्ञाम् ॥
[बृ. दे. ३. १५४]

श्लोकोऽस्तीत् पितरं वातं वात आग्नेयमुत्तरम् ।
विस्पष्टं जातवेदस्यं प्रेति दाशतयीषु वै ॥ [बृ. दे. ८. ८८]

अत्र "दाशतयीषु" इति पदेन दश मण्डलानि ऋक्संहितायाः सूच्यन्ते ।

The contents of the eight Adhyāyas of the Bṛhad devatā do not Correspond in any way to the eight. Aṣṭakas of the Ṛg Veda".

तत्र यज्ञियदृष्ट्या पिन्कोट्महोदयः [F. Pincott] ऋक्संहितां षोढा विभजति ।

१. प्रथमं मण्डलं शर्तार्चनां, पुरोडाशस्य एकादशकपालतया एकादशधा विभागम् अर्हति ।

२. द्वितीयादिसप्तमान्तानि मण्डलानि तत्तदृषिदृष्टानि वंशानुगानि वंश्यानि । प्रथमं मण्डलं वंशानुगतानाम् ऋषीणां सूक्तैः संकलितमस्ति ।

३. अष्टमं मण्डलं गौणतया यज्ञियम् । तत्र हेतुः—१ खिलसूक्तानामेकादशानां तत्रान्तर्भावः । २ प्रगाथशब्दव्यपदेशः । गाथा लौकिकी भवति । तत्र प्रशब्दः प्रकृष्टार्थद्योतकः । लौकिकेभ्यः प्रकृष्टतया मण्डलं प्रागाथम् ।

४. नवमं मण्डलं पवमानदेवताकं पूर्वगतमण्डलान्यनु अभिषूयमाणसोमदेवताकत्वात् । ५–६ दशममण्डलस्य द्वौ भागौ । प्रथमो भागः चतुरशीतं सूक्तं यावत् यत्र ऋषिं छन्दश्चानु सूक्तानां व्यवस्था भवति । अपि चात्र प्रतिविभागम् एकम् आप्रीसूक्तं दृश्यते । प्रथमे विभागे आप्रीसूक्तं सप्ततितमम् [१०. ७०] । तस्य ऋषिः सुमित्रो वाध्र्यश्वः ।

प्रथमो विभागः [१०. १–८४]

द्वितीयो विभागः [१०. ८५–१९१]

द्वितीयस्य विभागस्य आप्रीसूक्तं भृगूणाम् [१०. ११०] । जमदग्निर्भार्गवः, जामदग्न्यो रामो वात्र ऋषिः ।

द्वितीये विभागे व्यवस्थाक्रमः ऋक्संख्यान्यूनतया भवति ।

वंशानुगतमण्डलेषु एकैकम् आप्रीसूक्तं भवति । दशमे मण्डले तु द्वे आप्रीसूक्ते स्तः । एवम् आप्रीसूक्तद्वयेन सूक्तानां व्यवस्थाद्वयेन च, पिन्कोट्महोदयो दशममण्डलस्य भागद्वयं मन्यते ।

कात्यायनस्य ऋग्वेदसर्वानुक्रमण्याम् ऋचः १०५५२

१. प्रथमं मण्डलं शतर्चिनाम्	ऋचः	२००६
२. द्वितीयं मण्डलं गार्त्समदम्	ऋचः	४२९
३. तृतीयं मण्डलं वैश्वामित्रम्	ऋचः	६१७
४. चतुर्थं मण्डलं वामदेव्यम्	ऋचः	५८९
५. पञ्चमं मण्डलं आत्रेयम्	ऋचः	७२७
६. षष्ठं मण्डलं भारद्वाजम्	ऋचः	७६५

"The Bṛhad-Devatā" A.A. Macdonell (H O S) Part I Introduction p. xxviii.

७.	सप्तमं मण्डलं वासिष्ठम्	ऋचः	८४१
८.	अष्टमं मण्डलम्	ऋचः	१७१६ [१६३६ + ८०]
९.	नवमं मण्डलम्	ऋचः	११०८
१०	दशमं मण्डलम्	ऋचः	१७५४
	आहत्य	ऋचः	१०५५२

अथ एकादश वालखिल्यानि सूक्तानि सम्मिलितानि सन्ति (अष्टमे मण्डले)।

	सूक्तानि	ऋक्संख्या
मण्डलेषु १–१०	१०१७	१०४७२
वालखिल्यानि	११	८०
	१०२८	१०५५२

अष्टमे मण्डले "ऋषिदत्तानुक्रमेण: प्राङ्मत्स्यात् काण्वः" इति परिभाष्यते कात्यायनेन। मत्स्यः साम्मदः ऋषिः सप्तषष्टस्य सूक्तस्य [८. ६७]। "शतर्चिन आद्ये मण्डलेऽन्त्ये क्षुद्रसूक्तमहासूक्ता मध्यमेषु माध्यमाः।"

[का. स. परिभाषा २. १]

पिन्कोटमहोदयः प्रथमं मण्डलं मिश्रितं मुख्यं मन्यते। सप्तगणकथानाम् एकादशसंख्यायोगेन सोऽत्र मण्डले एकादशवर्गान् सूक्तानां करोति। तथाहि—

प्रथमे मण्डले सूक्तानि १९१

	ऋषिः		सूक्तसंख्या	
१	विश्वामित्राः	१	१०	१–१०
२	आङ्गिरसः भरद्वाजाः	२	५४	११–६४
३	वसिष्ठाः	३	९	६५–७३
४	आङ्गिरसः गौतमाः	४	२०	७४–९३
५	कुत्सः भरद्वाज आङ्गिरसः	५	५	९४–९८
६	कश्यपः, पञ्चऋषयश्च		२	९९–१००
७	कुत्सः भरद्वाज आङ्गिरसः	५	१५	१०१–११५
८	आङ्गिरसः गौतमाः	४	११	११६–१२६
९	भृगवः	३	१३	१२७–१३९
१०	आङ्गिरसः गौतमाः	२	२५	१४०–१६४
११	अगस्त्यः	१	२७	१६५–१९१
			१९१	

अथ मण्डले मध्ये सोमाहुतिः। नवनवतितमं सूक्तम् [९९] एकर्चं कश्य-

यस्याऽऽर्षम् अग्निदेवताकम्। प्रथमे मण्डलेऽत्रिवर्ज्जम् इतरेषां वंश्यानाम् ऋषीणां सूक्तानि संकलितानि सन्ति।

प्रथमे मण्डले आदौ अन्ते [१; १८९] च अग्निः। इतरमण्डलेषु अन्तेऽग्निर्नास्ति। [अष्टमे मण्डले तु अन्ते अग्निदेवताके द्वे सूक्ते स्तः (८. १०२–१०३)]। अपि च प्रथमे मण्डले (प्रायः) प्रत्यृषि सूक्तानामादौ अन्ते च अग्निः। एवमस्य मण्डलस्य अग्निप्राधान्यं, यज्ञप्राधान्यं द्योत्यते।

मण्डलस्य मध्यस्थे केन्द्रे अग्निदेवताकमेकर्चं सूक्तम् [१. ९९], पञ्चानाम् ऋषीणाम् आर्षम् एकं सूक्तं च [१. १००]। अस्य द्वितीयस्य सूक्तस्य देवता इन्द्रो मरुतश्च। इन्द्रो मरुतश्चाग्निना सह सोमं पिबन्ति।

सूक्तद्वयमिदं [१. ९९–१००] मध्येऽग्नौ सोमाहुतिं द्योतयति। सूक्तद्वयमिदमभितः पञ्चानां वंशानुगतानामृषीणां सूक्तानि।

$$\frac{\frac{५}{५}}{११}$$ (१)—मध्ये सोमाहुतिः।[1]

अथ द्वितीयाद्यष्टमपर्यन्तानां सप्तानां मण्डलानां याज्ञिकदृष्ट्या व्यवस्था दृश्यते। तथाहि तत्र मध्ये आत्रेयं पञ्चमं मण्डलम्। अत्रिश्च सोमसम्बन्धी सोमस्यात्रिजातत्वात्। प्रथममण्डलस्य केन्द्रे, मध्येऽग्निः, वंशानुगतमण्डलानां मध्ये च सोमः।

१—मध्ये कश्यपः। दिग् विभागे कश्यपस्य मध्यता भागवते प्रोच्यते—

दद‍ौ प्राचीं दिशं होत्रे ब्रह्मणे दक्षिणां दिशम्।
अध्वर्यवे प्रतीचीं वै उद्गात्रे उत्तरां दिशम्॥
अन्येभ्योऽवान्तरदिशः कश्यपाय च मध्यतः।

[भा. पु. ९. १६. २१–२२]

कश्यपानां सोमेन सह सम्बन्धः श्रूयते—"ये तेभ्यो भूतवीरेभ्योऽसितमृगाः कश्यपानां सोमपीथम् अभिजिग्युः।" [ऐ. ब्रा. ३५.१]

ऋक्संहितायां कश्यपानां, सूक्तद्वयवर्ज्जं सर्वाणीतराणि सूक्तानि सोमदेवत्यानि। ते द्वे सूक्ते—प्रथमे मण्डले मध्यगतं [१. ९९] एकर्चम् अग्निदेवताकमेकम्। अन्यत् अष्टमे मण्डले वैश्वदेवम्।

[८. २९–विश्वे देवाः देवता]।

१. गार्त्समदं मं २
२. वैश्वामित्रं मं ३
३. वामदेव्यं मं ४ [आङ्गिरसो गौतमः]
[आत्रेयं मं ५]
३. भारद्वाजं मं ६ [आङ्गिरसो भारद्वाजः]
२. वासिष्ठं मं ७
१. प्रागाथं काण्वं मं ८

—:०:—

परिशिष्टम्–२

आश्विन्य ऋचः ।[1]

अश्विदेवत्येन ऋक्संहितायां परिगणितानाम् ऋचां मण्डलशः गणना ।

१. प्रथमे मण्डले	ऋचः २१३
१. ३. १–३	३
१. १५. ११	१
१. २२. १–४	४
१. ३०. १७–१९	३
१. ३४	१२
१. ४६	१५
१. ४७	१०
१. ९२. १६–१८	३
१. ११२[2]	२५
१. ११६	२५
१. ११७	२५
१. ११८	११
१. ११९	१०
१. १२०[3]	१२

२. द्वितीये मण्डले	ऋचः १२
२. २७. ५	१
२. ३९	८
२. ४१. ७–९	३
	१२

२२५

३. तृतीये मण्डले	ऋचः ९
३. ५८	९

२३४

४. चतुर्थे मण्डले	ऋचः २३
४. १५. ९–१०	२
४. ४३	७
४. ४४	७
४. ४५	७
	२३

२५७

१—चतुष्पञ्चाशत् (५४) सूक्तानि अश्विनोः स्तुतौ विनियुक्तानि । केषुचिद् इतरेषु चतुर्विंशतौ (२४) सूक्तेषु इतरैः देवैः सह तौ स्तूयेते । दाशतय्यां पञ्चाशदधिकषट्शतानि (६५०) ऋचः आश्विन्यः ।

२—१. ११२. १ आद्यपादस्य द्यावापृथिव्यौ देवता । द्वितीयपादस्य अग्निः । उत्तरार्धचंस्य अश्विनौ ।

३—१. १२०. १२ दुःस्वप्ननाशनं देवताऽत्र ।

१. १३९. ३–५	३	५. पञ्चमे मण्डले	ऋचः ४८.
१. १५७	६	५. ७३	१०
१. १५८	६	५. ७४	१०
१. १८०	१०	५. ७५	९
१. १८१	९	५. ७६	५
१. १८२	८	५. ७७	५
१. १८३	६	५. ७८	९
१. १८४	६		४८
	२१३		३०५
६. षष्ठे मण्डले	ऋचः २२	८. अष्टमे मण्डले	ऋचः १९९
६. ६२	११	८. ५. १–३७	३७¹
६. ६३	११	८. ८	२३
	२२	८. ९	२१
	३२७		
७. सप्तमे मण्डले	ऋचः ५६.	८. १०	६
७. ६७	१०	८. १८. ८	१
७. ६८	९	८. २२	१८
७. ६९	८	८. २६. १–१९	१९
७. ७०	७	८. ३५	२४
७. ७१	६	८. ४२. ४–६	३
७. ७२	५	८. ५७	४
७. ७३	५	८. ७३	१८
७. ७४	६	८. ८५	९
	५६	८. ८६	५
		८. ८७	६
	४८३	८. १०१. ७–८	२
			१९९
			५०२

१—८. ५. ३७ उत्तरार्धस्य चैद्यः कशुः देवता ।

९. दशमे मण्डले	ऋचः ५४
१०. २४. ४–६	३
१०. ३९	१४
१०. ४०	१४
१०. ४१	३
१०. १०६	११
१०. १३१. ४–५	२
१०. १४३	६
१०. १८४.३	१
	५४
	६३२[२]

अन्या अपि आश्विन्य ऋचः, आश्विना अर्धर्चाश्च श्रूयन्ते । यथा ऋक्—

१.	३. ५४. १६	वैश्वदेवे सूक्ते
२.	५. ४२. १८	,, ,,
३.	६. ४९. ५	,, ,,
४.	६. ५०. १०	,, ,,
५.	१०. ३६. ६	,, ,,
६.	१०. ६१. ४	,, ,,
७.	१०. ६१. १५[१]	,, ,,
८.	१०. ६५. १२	,, ,,
९.	१०. ८५. १४	सूर्याविवाहः

यथा अर्धर्चाः

१.	१. १०९. ४	अत्र इन्द्राग्नी देवता सूक्ते
२.	४. १४. १	सूक्ते देवता अग्निः
३.	५. ४१. ३	वैश्वदेवे सूक्ते
४.	५. ४९. १	वैश्वदेवे सूक्ते
५.	१०. १८४. २	उत्तरार्धर्चस्य अश्विनौ देवता । पूर्वार्धर्चस्य सिनीवाली-सरस्वत्यौ ।

१—१०. ६१. १५ वैश्वदेवे सूक्ते इन्द्रस्तुतौ, नासत्यौ विषयः ।

२—इयं गणना [६३२—ऋचः] श्रीपाददामोदर-सातवळेकरेण सम्पादितां दैवतसंहिताम् अनुसृत्य कृताऽस्ति ।

८. ५. १–३६ अश्विनौ ।
३७ अश्विनौ चैद्यः कशुः (उत्तरार्धस्य) ।
३८–३९ चैद्यः कशुः ।
८. २६ १–१९ अश्विनौ ।
२०–२५ वायुः ।

६३२
२
६
९

दाशतय्याम् आश्विन्यः ऋचः—६५०

एवमादयोऽर्चा भवन्ति यत्राश्विनौ स्तूयेते ।

१. ४४. १–२	अत्र अश्विनौ अग्निः उषाश्च देवताः ।
१०. १३२. १	अत्र अश्विनौ द्यावाभूमी च देवताः ।

पादा यथा—

१. २०. ३	ऋभवः देवता
१. ८९. ४	विश्वेदेवा देवताः
४. १३. १	अग्निः देवता
४. ५२. २–३	उषाः देवता
७. ४०. ५	विश्वे देवा देवताः
१०. ३५. ६	विश्वे देवा देवताः
१०. ८५. २६	विवाहमन्त्रः, आशीः
१०. ९२. १३	विश्वे देवा देवताः

परिशिष्टम्—३

अश्विसूक्तानाम् ऋषयः ।

अर्षणाद् ऋषिः[1] । ऋषगतौ इति धातुः । "वेदप्राप्त्यर्थं तपोऽनुतिष्ठतः पुरुषान् स्वयम्भूर्वेदपुरुषः प्राप्नोत्" इति सायणः [१. १. १]

मण्डलविभागेन ऋक्संहिता दाशतयी । प्रथमं मण्डलं शतर्चिनाम् ।

१. प्रथमे मण्डले आदौ मधुच्छन्दा वैश्वामित्रः ।

"मधु ह स्म वा ऋषिभ्यो मधुच्छन्दाश्छन्दति तन्मधुच्छन्दसो मधुच्छन्दस्त्वम् इति ।" [ऐ. आ. १. १. ३]

मण्डलस्यादौ सूक्तानां दशानाम् [१. १–१०] असौ द्रष्टा । तत्र तृतीये सूक्ते प्रथमस्तृचोऽश्विदेवताकः । द्वितीयतृतीयसूक्तयोः सप्ततृचाः सप्त देवताश्च । ताः क्रमशः—

१. वायुः	१. २. १– ३	
२. इन्द्रवायू	१. २. ४– ६	
३. मित्रावरुणौ	१. २. ७– ९	
४. अश्विनौ	१. ३. १– ३	
५. इन्द्रः	१. ३. ४– ६	
६. विश्वेदेवाः	१. ३. ७– ९	
७. सरस्वती	१. ३. १०–१२	[प्रथमोऽनुवाकोऽत्र समाप्नोति ।]

अत्र वायोः प्रारम्भ सरस्वत्या अवसितिः । सरस्वती विश्वस्य प्रवाहरूपा । वायुः प्रथमः विश्वसृजा प्रथमसृष्टा आपः । अत्र इन्द्रवायू मित्रावरुणौ अश्विनौ च द्विदेवत्यग्रहा भवन्ति । सोमस्याग्रपेयत्वनिर्णयायाऽऽजिधावने इन्द्रवायू प्रथमं मुखं प्रतिपद्येते, ततो मित्रावरुणौ ततोऽश्विनौ । उषसोऽश्विनोः रथे आरोहणम् अनु-

---

१—तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयम्भु अभ्यानर्षत् त ऋषयोऽभवंस्तदृषीणाम् ऋषित्वम् इति विज्ञायते [निरु. २. ११] ।

इन्प्रत्ययान्त ऋषिशब्दः । 'ऋष्यन्धक······' [पा. ४. १.११४]

इति निपातनाद् लघूपधगुणाभावः । किप्रत्ययो वात्र ज्ञेयः ।

[सायणः १. १. २]

मन्यन्ते विश्वेदेवाः [१. ११६. १७]। इन्द्रावनकर्मणि सरस्वती अश्विनोः सहाया ।

२. मेधातिथिः काण्वः । तेन दृष्टानि सूक्तानि द्वादश [१. १२–२३]। तत्र ऋगेकाऽश्विनी [१. १५. ११]। मधुच्छन्दस आच्छादनस्य मधुत्वेन, पृथिव्यां तस्याऽऽनुकूल्यात् धीधारिणावती मेधा भवति । सा च मेधाऽतिथिरूपाऽत्र ऋषेः । ऋतुना सह यज्ञं निर्वहतोर्ऋतुसहितयोरश्विनोः स्तुतिरत्र ।

३. शुनःशेपः, आजीगर्तिः (सूयवसस्य अजीगर्तस्य पुत्रः), देवैर्दत्तत्वात् देवरातः । स वैश्वामित्रः कृत्रिमः (न तु औरसः)। तेन दृष्टानि सप्त सूक्तानि [१. २४–३०][1]। तत्रैक आश्विनस्तृचः [१. ३०. १७–१९]।

सोऽजीगर्तस्य मध्यमपुत्रो द्वितीयत्वेन । विश्वामित्रस्यापि मध्यमोऽसौ उत्तरैकपञ्चाशता पुत्रैरेव तस्य ज्येष्ठत्वाङ्गीकारात् । हरिश्चन्द्रस्य वरुणदेवताके यज्ञे पशुत्वेन यूपे बद्धोऽसौ । स त्रिधा बद्धः । स समुद्रे परियान्तं त्रिचक्रमश्विनोः रथं स्तौति ।

[अत्र अन्तरिक्षं, रविस्तत्रो वायुश्च गतिमान् उपवः प्राक्]

४. हिरण्यस्तूप आङ्गिरसः । तेन दृष्टानि सूक्तानि पञ्च [१. ३१–३५][2]। तत्रैकम् अश्विदेवताकं सूक्तम् [१. ३४]। हिरण्यं स्तूप इव यस्याऽसौ हिरण्यस्तूपः । अश्विदेवताकासु ऋक्षु इतः प्राक् सकृदेव हिरण्यशब्दः श्रुतः, स च विशेषणतया[3] । हिरण्यस्तूपस्य सूक्तम् [१. ३४] एव इदंप्रथमतया प्रथमे मण्डले समग्रतयाऽश्विदेवताकम् । सूक्तानाम् आनुपूर्वीकत्वे हिरण्यस्तूप. छन्दोविषयेऽप्यधिकत्वेन गृहीतोऽस्ति । "आदौ गायत्रं प्राग्घिरण्यस्तूपात्[4]" [का. स. अनु. १२. १४] इति ।

सविता देवानां प्रसविता । प्रथमे मण्डले सवितृदेवताकं सूक्तमेकमेव । तच्च हिरण्यस्तूपदृष्टेषु पञ्चसु सूक्तेषु अन्तिमम् [१. ३५]। पूर्वं सप्त ऋचः सावित्र्यः श्रुताः । मेधातिथेः काण्वस्य चतस्रः [१. २२. ५–८]। ततः शुनःशेपस्य तृचः

१—अत्र षष्ठोऽनुवाकः समाप्नोति ।

२—एभिः पञ्चभिः सूक्तैः सप्तमोऽनुवाकः ।

३—आश्विनावश्वावत्येषा यातं शवीरया । गोमद् दस्रा हिरण्यवत् ॥
[१. ३०. १७] [शुनःशेपस्य आर्षम्]

४—अयं सायणभाष्ये पाठः । अनुक्रमण्यां तु "प्राग्घैरण्यस्तूपीयात्" इतिपाठः ।

[१. २४. ३–५]। यद्यपि हिरण्यस्तूपस्याऽऽश्विने सूक्ते हिरण्यशब्दो[1] न श्रूयते, तथापि सविताऽग्रोषसः पूर्वम् अश्विनोः रथं प्रेषयति [१. ३४. १०]। हिरण्यस्तूपशब्दो दाशतय्यां सकृच्छ्रूयते। हिरण्यस्तूपस्य पुत्रः अर्चन् हैरण्यस्तूपः पिता हिरण्यस्तूप आङ्गिरसः इव सवितारं रक्षणायाऽऽह्वयति—

"हिरण्यस्तूपः सवितर्यथा त्वाऽऽङ्गिरसो जुह्वे।" [१०. १४९. ५]

५. प्रस्कण्वः काण्वः। तेन दृष्टानि सूक्तानि सप्त [१. ४४–५०][2]। अग्नि-अश्वि-उषः-सूर्या अत्र देवताः। सप्तसु सूक्तेषु प्रथमं द्विकम् अग्निदेवताकम् द्वितीयं द्विकम् अश्विदेवताकम्, तृतीयं द्विकम् उषोदेवताकम्, अन्तिमं च सप्तमं सूक्तम् सूर्यदेवताकम्। प्रथमस्य सूक्तस्य आद्ये द्वे ऋचौ अश्विदेवताके उषोदेवताके च। एवम् अग्निना अश्विभ्याम् उषसा च प्रक्रम्य प्रतिदेवतं द्वे द्वे सूक्ते निधायाऽन्तिमेन सूक्तेन सूर्ये पर्यवसानमत्र।

६. गोतमो राहूगणः[3]। तेन दृष्टानि सूक्तानि विंशतिः [१. ७४–९३]। तत्रैकस्तृच आश्विनः [१. ९२. १६–१८]।

७. कुत्स आङ्गिरसः। तेन दृष्टानि सूक्तानि दश [१. १०६–११५][4]। तत्राऽऽश्विनं सूक्तमेकम् [१. ११२]। [अत्र द्यां च पृथिवीं चान्तरा भवन्ति अश्विनोरवनानि।]

८. दैर्घतमसः कक्षीवान् औशिजः। तेन दृष्टानि सूक्तानि एकादश [१. ११६–१२६][5]। काक्षीवते आश्विने आर्षे [१. ११६–१२०] संवत्सरं यावद् अश्विनोर्व्यापने भवन्ति अद्भुतानि कर्माणि प्रतिपाद्यन्ते।

१—द्र. मेधातिथेः काण्वस्य—"हिरण्यपाणिमूतये सवितारम् उपह्वये।" [१. २२. ५]। हिरण्यस्तूपस्याऽऽङ्गिरसस्य—"हिरण्ययेन सविता रथेन" [१. ३५. २]

२—एतैः सप्तभिर्नवमोऽनुवाकः।

३—रहूगणस्य अपत्यं राहूगणः। "अभिस्त्वा गोतमा गिरा" [१. ७८. १] "अवोचाम रहूगणाः" [१. ७८. ५] रहूगणाः रहूगणस्य पुत्रा वयं गोतमाः (सायणः)। अनेन तृचा सप्तविंशो वर्गः।

४—एभिर्दशभिः षोडशोऽनुवाकः। कुत्सः इन्द्रस्यैकः संस्तविको देवः [निरु. ७. १०]। "इन्द्राकुत्सा वहमाना रथेन" [५. ३१. ९]

५—एभिरेकादशभिः सप्तदशाष्टादशौ अनुवाकौ। अत्र पञ्चभिः आश्विनैः सूक्तैः सप्तदशोऽनुवाकः। अष्टादशस्यानुवाकस्य प्रथमं सूक्तमैन्द्रम् [१. १२१], येन प्रथमोऽष्टकः समाप्तो भवति।

९. परुच्छेपो दैवोदासिः । तेन दृष्टानि सूक्तानि त्रयोदश [१.१२७–१३९][1] । तत्रैक आश्विनस्तृचः [१. १३९. ३–५] । पर्ववत् शेपः, परुषि परुषि शेपोऽस्येति वा परुच्छेपः । अभ्यासः परुच्छेपस्य शीलम् । परुच्छेपस्य जन्म विदुः षड् देवाः—"दध्यङ् ह मे जनुषं पूर्वो अङ्गिराः प्रियमेधः कण्वो अत्रिर्मनुर्विदुः ।" [१. १३९. ९] । पूर्वः पूरकः सर्वस्य पुरातनो वा । एतेषु षट्सु देवेषु परुच्छेपस्य "आयतिः" दीर्घकालः सम्बन्धोऽस्ति । तेषु तस्य नाभयः [जीवेन संबद्धाः प्राणाः, फलसंबद्धा यागा वा] सन्ति [द्र. सायणः] ।

१०. दीर्घतमा औचथ्यः । तेन दृष्टानि सूक्तानि पञ्चविंशतिः [१. १४०–१६४][2] तत्राऽऽश्विने द्वे सूक्ते [१. १५७–१५८][3] । [मामहयं दीर्घं तमः] ।

११. अगस्त्यो मैत्रावरुणिः । तेन दृष्टानि उत्तराणि सप्तविंशतिः सूक्तानि प्रथमे मण्डले [१. १६५–१९१][4] । तत्र कासांचन ऋचां द्रष्टारोऽन्ये । तत्र आश्विनसूक्तानि पञ्च, यत्र नान्यो द्रष्टा [१. १८०–१८४] । तत्र चतुर्थेन सूक्तेन द्वितीयाष्टके चतुर्थोऽध्यायः समाप्तो भवति । पञ्चमेन सूक्तेन [१. १८४] पञ्चमः अध्यायः प्रारभ्यते । [ध्रुवयोरन्तरा रथः । देवयानः पन्थाः । उत्तरे ध्रुवे सूर्यः उदितः ।]

१२. द्वितीयं मण्डलं गृत्समदेन दृष्टम् । तत्र आश्विनम्—एका ऋक् [२. ३७. ५], एकं सूक्तम् [२. ३९], एकस्तृचः [२. ४१. ७–९] ।

"प्राणो वै गृत्सोऽपानो मदः" [ऐ. आ. २. २. १] ।

गृत्समदः पूर्वम् आङ्गिरसकुले शुनकपुत्रः शौनकः । यज्ञकालेऽसुरैर्गृहीत इन्द्रेण मोचितः । पश्चादसौ भृगुकुले गृत्समदनामाऽभवत् । तथा चानुक्रमणिका—"य आङ्गिरसः शौनहोत्रो भूत्वा भार्गवः शौनकोऽभवत् ।
स गृत्समदो द्वितीयं मण्डलमपश्यत् ॥" इति ।

१३. तृतीयं मण्डलं गाथिना विश्वामित्रेण दृष्टम् । तत्राऽऽश्विनं सूक्तमेकम् [३. ५८] । एका च ऋक् [३. ५४. १६] । अश्विनोः रथोऽत्र ऋतजाः [ऋतं जनयिता, ऋतेषु जातः] सद्यो द्यावापृथिव्यो परियाति [३. ५८. ८] ।

१४. चतुर्थं मण्डलं गौतमेन वामदेवेन दृष्टम् । तत्र त्रीणि आश्विनसूक्तानि

१—एभिस्त्रयोदशभिः एकोनविंशविंशौ अनुवाकौ ।

२—अनया पंचविंशत्या एकविंशद्वाविंशावनुवाकौ ।

३—अत्र प्रथमेन सूक्तेन [१. १५७] द्वितीयेऽष्टके द्वितीयोऽध्यायः समाप्तो भवति । द्वितीयेन सूक्तेन [१. १५८] तृतीयोऽध्यायः प्रारभ्यते ।

४—अनया सप्तविंशत्या त्रयोविंशचतुर्विंशावनुवाकौ ।

पुरुमीळ्हाजमीळ्हौ सौहोत्रौ द्रष्टारौ सूक्तद्वयस्य [४. ४३–४४]। वामदेवो गौतमो द्रष्टा सूक्तस्यैकस्य [४. ४५], ऋग्द्वयस्य च [४. १५. ९–१०]।

पुरुमीळ्हो वैददश्विः दीर्घयशाः, तरन्तस्य भ्राता, यो बहुविधमन्नं श्यावाश्वाय अदात्। "यद्देवा अब्रुवन्नयं वै नः सर्वेषां वामः तस्माद् वामदेवः।" [ऐ. आ. २. २. १]। (वामो वननीयः संभजनीयः)।

[अग्निश्च सोमश्च दिवं गतो यज्ञेन। यज्ञोऽत्र हविष्मान्, तरणिः भोजश्च। अश्विनोः रथो मधुपूर्णः। हवींषि अश्विनोर्वपुरभि सचन्ते (प्राप्नुवन्ति), स्तुतयश्च रथं वहन्ति]।

१५. पञ्चमं मण्डलम् अत्रिदृष्टत्वाद् आत्रेयम्। "य इदं सर्वं पाप्मनोऽत्रायत" सोऽत्रिः [ऐ. आ. २. २. १]। अत्र षट् सूक्तानि आश्विनानि।

पौर आत्रेयः [५. ७३–७४]। अवस्युरात्रेयः [५. ७५]

भौमोऽत्रिः [५. ७६–७७]। सप्तवध्रिरात्रेयः [५. ७८]

[दश मासान् वनस्पतौ शयित्वा तस्माद् जन्म सप्तवध्रेः]।

१६. षष्ठं मण्डलं भरद्वाजेन बार्हस्पत्येन दृष्टम्। बिभर्ति वाजान् यस्माद् तस्माद् भरद्वाजः। "एष उ वै बिभ्रद्वाजः। प्रजा वै वाजस्ता एष बिभर्ति। यद् बिभर्ति तस्माद् भरद्वाजः।" [ऐ. आ. २. २. २]

[मुक्तस्य भरद्वाजत्वम्। अत्र वाजस्य (अन्नस्य सोमस्य) श्रैष्ठ्यम्।]

अत्र द्वे आश्विने सूक्ते [६. ६२–६३]। दाशतय्याम् अष्टौ अष्टकाः। पञ्चमेऽष्टके प्रथमोऽध्यायः, मण्डले च षष्ठोऽनुवाकोऽत्र प्रथमेनाऽऽश्विनसूक्तेन [६. ६२] प्रारभ्यते।

१७. सप्तमं मण्डलं मैत्रावरुणिना वसिष्ठेन दृष्टम्। "अयं वै नः सर्वेषां वसिष्ठः।" [ऐ. आ. २. २. २]।

अत्र आश्विनानि सूक्तानि अष्टौ [७. ६७–७४]।

अश्विभ्यां समानबन्धुत्वं वसिष्ठस्य। अत्र स्वर्विद् रथः सप्त स्रवतः परियाति। चित्रं भोजनम्। अघ्न्या गौः। ध्रुवस्यः सूर्यः।

१८. अथ अष्टमं मण्डलम्। "ऋषिश्चाऽनुक्तगोत्रः प्राङ् मत्स्यात् काण्वः" [का. अनु.] इति परिभाषितत्वात् षट्षष्टितमं सूक्तं यावत् काण्वः ऋषिः। मण्डले आश्विनसूक्तानि—

१. ब्रह्मातिथिः काण्वः	८. ५
२. सध्वंसः काण्वः	८. ८
३. शशकर्णः काण्वः	८. ९
४. प्रगाथो घौरः काण्वः	८. १०

५. हरिमिबठिः काण्वः	८. १८. ८	
६. सोभरिः काण्वः	८. २२	
७. विश्वमना वैयश्वः व्यश्वो वाऽऽङ्गिरसः	८. २६	
८. श्यावाश्व आत्रेयः	८. ३५	
९. नाभाकः काण्वः, अर्चनाना आत्रेयो वा	८. ४२. ४–६	
१०. मेध्यः काण्वः	८. ५७	[वालखिल्यं नवमम्]
११. गोपवन आत्रेयः सप्तवध्रिः वा	८. ७३	
१२. कृष्ण आङ्गिरसः	८. ८५	
१३. कृष्ण आङ्गिरसः विश्वको वा कार्ष्णिः	८. ८६	
१४. कृष्ण आङ्गिरसः वासिष्ठो वा द्युम्नीकः, प्रियमेधः आङ्गिरसो वा	८. ८७	
१५. जमदग्निर्भार्गवः	८. १०१. ७–८	

[अष्टमे मण्डलेऽश्विनोः शौकत्रयस्यापि विश्वाभिरूतिभिः, विश्वाभिर्धीभिः, विश्वैः राधोभिश्च । सर्वैः देवैः सह अश्विनोः सहभावः ।]

अथ दशमं मण्डलम्[1] । तत्र क्षुद्रसूक्ताः महासूक्ताश्च ऋषयः । अत्र आश्विन-सूक्तानि—

१९ ऐन्द्रो विमदः, प्राजापत्यो वा, वासुक्रो वसुकृत् वा	१०. २४. ४–६
२० काक्षीवती घोषा	१०. ३९–४०
२१ सुहस्त्यो घौषेयः	१०. ४१
२२ भूतांशः काश्यपः	१०. १०६
२३ सुकीर्तिः काक्षीवतः	१०. १३१. ४–५

१—नवमं मण्डलं सर्वं पावमान्यं सौम्यम् । अतः पवमानात् सोमाद् नान्या देवताऽत्र । "पवमान स्तुतः सोमो नवमे त्विह मण्डले ।" [बृ. दे. ६. १३०]
"एतत्सूक्तशतं सौम्यं मण्डलं सचतुर्दशम् ।
पावमानम् इति ख्यातम् अनुवाकास्तु सप्त वै ॥" [बृ. दे. ६. १४९]

२४ अत्रिः सांख्यः १०. १४३

२५ त्वष्टा गर्भकर्ता, विष्णुर्वा प्राजापत्यः } १०. १८४. २–३

[दशमे मण्डले भूतानां प्रत्यक्षम् अश्विनोर्व्याप्तिः । गोरूपः पयांसीव अश्विनो सर्वैधनैः पुरुषम् अलंकुरुतः ।]

"यस्य वाक्यं स ऋषिः । या तेनोच्यते सा देवता" [का. अनु. २. ४–५] । इति कात्यायनपरिभाषया ऋषिमन्त्रदेवतानां कश्चनाविच्छेद्यः सम्बन्धो निरूप्यते। ऋषिप्रोक्तो मन्त्रः मन्त्रनिर्दिष्टा देवता । अतो येन मन्त्रः प्रोक्तः न तेन मन्त्रस्यार्थ एव दृष्टो मन्त्रप्रतिपाद्या देवताऽपि तेन प्रीणिता ।

"तिस्र एव देवता इति नैरुक्ताः" [निरु. ७. ५] । तिस्र एव देवताः क्षित्यन्तरिक्षद्युस्थाना अग्निः, वायुः, सूर्य इति । तत्तत्स्थाना अन्यदेवतास्तद्विभूतयः । कर्मपृथक्त्वाद्धि पृथगभिधानस्तुतयः ।

"एकैव वा महानात्मा देवता । सा सूर्य इत्याचक्षते । स हि सर्वभूतात्मा । तदुक्तम् ऋषिणा 'सूर्य आत्मा जगतस्तस्थुषश्च' [१. ११५. १] इति । तद्विभूतयोऽन्या देवताः । तदप्येतद् ऋचोक्तम् । "इन्द्रं मित्रं वरुणम् अग्निमाहुः' [१. १६४. ४६] इति ।" [का. अनु. २. १४–२०] ।

ऐतरेयारण्यके ऋषीणां प्राणत्वेन प्राणस्य च सूर्यत्वेनोपासना श्रूयते । "स यत् प्राणो गृत्सोऽपानो मदः, तस्माद् गृत्समदः, तस्माद् गृत्समद इत्याचक्षत एतमेव सन्तम् ।" "एष उ एव बिभ्रद्वाजः । प्रजा वै वाजस्ता एष बिभर्ति । यद्बिभर्ति तस्माद् भरद्वाजः, तस्माद् भरद्वाज इत्याचक्षते एतमेव सन्तम् ।" [ऐ. आ. २. २. १–२]

तत्र सायणः—"य एष मण्डलस्थोऽस्माभिर्दृश्यमानस्तपति स एष प्राणो हि । न खल्वादित्यप्राणयोर्भेदोऽस्ति । अध्यात्मम् अधिदैवं चेदं स्थानभेदमात्रम् । अत एवाऽऽदित्यो ह वै बाह्यः प्राणः उदयत्येष ह्येनं चाक्षुषं प्राणमनु गृह्णीत इति श्रुत्यन्तरे पठ्यते । एक एव पदार्थो देहं प्रवर्तयितुम् अन्तःस्थितो दृष्टिमनुग्रहीतुं बहिःस्थित इत्येतावदेव द्वयोर्वैषम्यम् इति ।"

प्रथममण्डलद्रष्टार ऋषयः शतर्चिन इत्युच्यन्ते ।" तं यच्छतं वर्षाण्यभ्यार्चत् तस्माच्छतर्चिन स्तस्याच्छतर्चिन इत्याचक्षत एतमेव सन्तम् ।" [ऐ.आ. २.२.१]

"यस्मादयं प्राणस्तं मनुष्यदेहं वर्षशतमभ्यर्चितवांस्तस्मात् तथैव व्युत्पत्त्या प्राणस्यावतारभूताः प्रथममण्डलद्रष्टारो मुनयः शतर्चिसंज्ञकाः सम्पन्नाः ।" [सायणः]

एवं सति प्रथमं मण्डलं विश्वपुरुषस्य स्थूलं शरीरम् अभ्यर्चति ।

द्वितीयं मण्डलं गार्त्समदं प्राणापानात्मकम् ।

तृतीयं मण्डलं विश्वात्मनः प्राणस्य मित्रभूतत्वाद् भोग्यात्मकम् ।

चतुर्थं मण्डलं प्राणस्य वागादीनामिन्द्रियाणां वामत्वेन (संभजनीयत्वेन) वामदेव्यम् ।

पञ्चमं मण्डलं प्राणस्य पापेभ्यस्त्रायकत्वाद् अत्रिपुत्रम् आत्रेयम् ।

षष्ठं मण्डलं प्राणस्य देहेन्द्रियाणां गतिबलाधायकत्वाद् वाजं बिभ्रद् भारद्वाजम् ।

सप्तमं मण्डलं प्राणस्य सर्वमनुप्रविश्य निवासहेतुभूततया वासिष्ठम् ।

अष्टमं मण्डलं प्राणस्य विश्वमनुप्रविश्य विविधाकारैः प्रगमनात् प्रगाथ-नामकम् । "प्राणदेवताया मूर्तिविशेषप्रतिपादकाः ऋग्द्वयात्मकसूक्तरूपा मन्त्र-विशेषाः प्रगाथा इत्युच्यन्ते । तन्मन्त्रद्रष्टारो महर्षयोऽपि प्रगाथनामकाः ।"

[सायणः ऐ. आ. २. २. २]

नवमं मण्डलं प्राणस्य पावकतया पावमानं सौम्यम् ।

दशमं मण्डलं प्राणस्यैव क्षुद्ररूपमहारूपत्वात् क्षुद्रसूक्तमहासूक्तीयम् ।

अथ महाभारते सप्तर्षीणां नामनिर्वचनम् । तत्रानुशासनपर्वणि दानधर्मपर्वणि त्रिनवतितमेऽध्याये ऋषयः स्वं स्वं नाम यातुधान्यै कृत्यायै निर्ब्रुवन्ति । तत्र—

भीष्म उवाच

विज्ञाय यातुधानीं तां कृत्याम् ऋषिवधैषिणीम् ।
अत्रिः क्षुधापरीतात्मा ततो वचनमब्रवीत् ॥ [८१]

१. अत्रिरुवाच—अरात्रिरत्रिः सा रात्रिर्यां नाधीते त्रिरद्य वै ।
अरात्रिरत्रिरित्येव नाम मे विद्धि शोभने ॥ [८२]

अरातिभ्यः (कामक्रोधादिशत्रुभ्यः) यस्त्रायते सोऽरात्रिः । अदनात् अत् मृत्युः । तस्मात् यस्त्रायते सोऽत्रिः ।

यावता तत्त्वज्ञानं न भवति तावता रात्रिः । तद्राहित्याद् अहम् अरात्रिः । अदनात् अत् परमात्मा । तं त्रिः वाक्प्राणमनोभिः अहमधीये । तस्मादपि अहम् अत्रिः ।

यातुधान्युवाच—यथोदाहृतमेतत्ते मयि नाम महाद्युते ।
दुर्धार्यमेतन्मनसा गच्छावतर पद्मिनीम् ॥ [८३]

२. वसिष्ठ उवाच—वसिष्ठोऽस्मि वरिष्ठोऽस्मि वसे वासगृहेष्वपि ।
वसिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम् ॥ [८४]

श्रेष्ठधनत्वाद् वसिष्ठः । सर्वेषां श्रेष्ठत्वाद् वरिष्ठश्च ।

गृहस्थाश्रमे वासात्, सर्वेषां निवासाधारभूतत्वाच्च वसिष्ठः ।

३. कश्यप उवाच—कुलं कुलं च कुवमः कुवमः कश्यपो द्विजः ।
काश्यः काशनिकाशत्वाद् एतन्मे नाम धारय ॥ [८५]

अहं नाम्ना कश्यपः, कुवमः, काश्यश्च । कश्यं शरीरम् । तद् अन्तर्यामितया

पाति इति कश्यपः। कुः पृथिवी। तत्र वसति वर्षति इति कुवसः सूर्योऽप्यहम्। काशकुसुमम् इव शुभ्रवर्णत्वाद् अहं काश्यश्च।

४. भरद्वाज उवाच—भरेऽसुतान् भरेऽशिष्यान् भरे देवान् भरे द्विजान्।
भरे भार्यां भरे द्वाजं भरद्वाजोऽस्मि शोभने॥ [८८]

असुतान्, अशिष्यान् अपि, एवं देवान्, ब्राह्मणान्, भार्यां, द्वाजान् (वर्णसंकरजातान्) अपि वाजेन अन्नेन हविषा भरति इति भरद्वाजः।

५. गौतम उवाच—गोदमो दमतोऽधूमोऽदमस्ते समदर्शनात्।
विद्धि मां गौतमं कृत्ये यातुधानि निबोध माम्॥ [९०]

गवाम् इन्द्रियाणां दमनाद् अहं गोदमः। धूमरहितोऽग्निः इवाऽहं तेजस्वी। समदर्शितया तव (त्वया केनापि) अदम्योऽहम्। मम गौः (शरीरकान्तिः) अतमाः तमोरहिता। अतोऽहं गौतमः।

६. विश्वामित्र उवाच—विश्वे देवाश्च मे मित्रं मित्रमस्मि गवां तथा।
विश्वामित्रमिति ख्यातं यातुधानि निबोध मे॥ [९२]

सर्वे देवा मम मित्रम्। सर्वेषां गवां रश्मीनां सर्वेषां लोकानाम् अहं मित्रमस्मि। अतोहं विश्वामित्रः।

७. जमदग्निरुवाच—जाजमद्यजजानेऽहं जिजाहीह जिजायिषि।
जमदग्निरिति ख्यातस्ततो मां विद्धि शोभने॥ [९४]

देवानाम् आहवनीयाग्नेर्जातत्वाद् मम नाम जमदग्निः।

८. अरुन्धत्युवाच—धरान् धरित्रीं वसुधां भर्तुस्तिष्ठाम्यनन्तरम्।
मनोऽनुरुन्धती भर्तुरिति मां विद्ध्यरुन्धतीम्॥ [९६]

अधःपर्वतान् पृथिवीं द्यां च आनुकूल्येन दधामि। भर्तुर्निकटे भवामि। भर्तुर्मनोऽनु रुन्धे। अतो माम् अरुन्धतीं विद्धि।

परिशिष्टम्-४

॥ अत्रिः ॥

आदिब्रह्मणो बहुषु पुत्रेषु तृतीयोऽत्रिः ।

"अहं तृतीय इत्यमंस्त तस्मादत्रिः स कीर्त्यते ।" [ब्रह्माण्डे ३. ४. ४५]

भृगुः, अङ्गिराः, अत्रिः इति तृतीयः सः । "अर्चिषु भृगुः संबभूव । अङ्गारेषु अङ्गिराः । अत्रैव तृतीयम् ऋच्छतेत्यूचुः । तस्माद् अत्रिः ।" [निरु. ३. १७]

ब्रह्मणो मानसाः पुत्रा विदिताः षण्महर्षयः ।
मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ।
अत्रेस्तु बहवः पुत्राः श्रूयन्ते मनुजाधिप ।
सर्वे वेदविदः सिद्धाः शान्तात्मानो महर्षयः ॥
पिता सोमस्य वै विप्र जज्ञेऽत्रिर्भगवानृषिः ।
तत्रापि सर्वलोकानां तस्थौ स्वेनौजसा वृतः ॥

[म. भा. आदिपर्व अ. ६६]

अत्रि. पाञ्चजन्यः[1] । [ऋ. सं. १. ११७. ३]

१. प्रजापति-वरुण-वाग्-वायु-अग्निसहयोगेन जनितत्वात् पाञ्चजन्यः ।

२. ऋषि-पितृ-देव-तिर्यङ्-मनुष्यभेदेन पञ्चधा विभाग इति पाञ्चजन्यः ।

३. अनु-द्रुह्यु-तुर्वसु-यदु-पुरूणां पञ्चधाविभक्तानां राजवंशानामेव पुरायुगे मनुष्यत्वेन पञ्चजनत्वेन देवैः व्यवस्थापनात् पाञ्चजन्यः ।

अप्सु सर्वजगद्बीजं हिरण्यगर्भो ब्रह्मा वायुमयः प्रादुरभूत् ।

यावदनात्मा आसीत् तावदग्निस्तावदापः । हिरण्यम् इत्यग्निरेतसो संज्ञा । तद्गर्भे यो गम्य आत्मा वायुः स हिरण्यगर्भः । सोऽग्निमयश्च आपोमयश्च इति द्विधाभूतः । प्रजापतिस्ताभ्यां विराजमसृजत् ।

१—यदश्विनावपाग् यत् प्राक् स्थो वाजिनीवसू ।
यद् द्रुह्यव्यनवि तुर्वशे यदौ हुवे वामथ मा गतम् ॥ [८. १०. ५]
यद् इन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ [१.१०८.८]
"पाञ्चजन्यम् । निषादपञ्चमाश्चत्वारो वर्णाः पञ्चजनाः । तेषु भवम् ।"

चित्यः परिच्छिन्नः यज्ञमयः अन्नमयः अग्निः विराट्-पृथिवी। चित्योऽग्निः तप्यमानः चितेनियेयं नामाग्निमजनयत्–स मनुः।

अभिजितं नाम ब्रह्माणं परितः सूर्योऽयं परिक्रामति। तस्य ब्रह्मणो रश्मिगताः सर्वे प्राणा ऋषयः। चन्द्रमसि स्वतः कृष्णवर्णे प्रतिमूर्च्छितैः सूर्यकिरणैः उत्पन्नायां ज्योत्स्नायां स्थिता नानाधर्मविभक्ताः प्राणाः मध्यमाः पितरः उच्यन्ते। पृथिव्यामेव प्रतिमूर्च्छिताः सूर्यकिरणाः अवराः पितरः उच्यन्ते। प्रकाशस्थाः प्राणाः देवाः। तमसिस्थाः असुराः।

दक्षादिभ्यः स्वयं प्रस्रवतां प्रचेतोनाम्नां रसानां संयोगजन्मा दिक्सोममयः प्राणो दक्षः। सोऽनवरतमिह पृथिव्यामुपसर्पति। एवं सूर्यमण्डलप्रकाशतो बहिश्चतुर्दिक्षु परिव्याप्तात् अम्भःसमुद्रात् आपोमयः प्राणः पृथिव्याम् उपसर्पति। तयोश्च (दिक्सोममय-आपोमय-प्राणयोः) पृथिव्या रसे वाङ्मये प्राणे संस्रवो[१] भवति। तत एव पार्थिवप्राणसंलग्नम् आकाशम् उद्भूतं भवति।

तत्र त्रयाणां प्राणानां संघर्षात् अग्निर्वसुरुद्भवति। तस्मिन्नग्निस्वरूपे भृग्वङ्गिरोऽत्रयः प्राणाः संभवन्ति। अर्चिषि भृगुः। भृगुर्वारुणिः। वरुणांशतो भृगुः। अङ्गारेष्वङ्गिराः।

"त्वमग्ने प्रथमो अङ्गिरा ऋषिः" [१. ३१. १]। अग्न्यंशतोऽङ्गिराः।

अथ यावानिह वाचिको भाग उदपतत् सोऽत्रिर्नाम। पच्यमानः भर्जनप्रधानः भागः भृगुः। दह्यमानकाष्ठादिबहिःस्थितं वायुरसाद्यर्थम् आत्मनि येनाऽऽकृष्य स्वद्यते स भोक्ता प्राणोऽदनप्रधानत्वाद् अत्रिर्नामोच्यते।

अत्रेः पारदर्शकप्रतिबन्धकत्वं (Opaque) सूर्यतैजसकिरणप्रत्यावर्तकत्वं (nontransparent) च। अत्रिप्राणैः सूर्यरश्मिः प्रत्याहृतो भूत्वा वस्तुनो रूपं जनयति, तैजसम्, अप्यं, पार्थिवं च। काचादिपदार्थे पारदर्शितया (being transparent) अत्रिप्राणः अत्यल्पमात्र एवोपादीयते। वाय्वाद्यरूपिद्रव्येषु अयमत्रिर्नारम्भकद्रव्यम्। अत एव तत्र सूर्यरश्मेरप्रत्याघाताद् रूपं नोत्पद्यते।

सूर्यांशुपरितापात् पृथिवीपिण्डात् प्रतिपलमुद्भवन् अयम् अत्रिप्राणः पृथिवीम् अनु परिप्लवते। पुनरयमत्रिप्राणः संवत्सरे सहस्रांशुभिः संयोगात् प्रत्यावर्त्ति परितप्यते। परिक्रमणावृत्तित्रयेण तु त्रिः संवत्सरसहस्रांशुपरितापात् अस्यात्रिप्राणस्य शरीरं सोमत्वम् आपद्यते। स सोमभागः परितप्यमानस्याऽत्रेर्नेत्रतः परिस्रवति। नेत्रशब्दोऽत्र रश्मिपरः।

१—तु. ता नः पृक्षम् इषा रयिम् [८. ५. ३६]। [ऋ. ५. ७६. ४–५; १. १२०. ९]।

यावानयमग्नेः तनुभागः सोमरूपेण परिणमते तावान् ऊर्ध्वरेता इतोऽग्नेः पृथग्भूय सर्वतो दिक्षु व्याप्नुवन् पृथ्वीमन्वेव पुनः संपतति ।

पृथ्वीमनु संपतन्तम् एतं सोमराशिं हिरण्यगर्भो ब्रह्मा वायुरूपेण चन्द्रकक्षाधरातले निगृह्य एकविंशतिकृत्वः परिक्रमणोत्तरं क्रमेण एनं सोमराशिं सर्वतः संचिन्वन् एकं सूर्यवत् सहस्रांशुमयं सोमपिण्डं[1] सम्पादयति स्म । स एवायं चन्द्रः पृथिवीं परितः परिक्रममाणो दिवि दृश्यते ।

यथाऽहनि सोमराशिः सूर्यांशुपरितप्तः ऊर्ध्वरेताः सन् पृथिव्या उत्क्रम्य दिक्षु व्याप्नुवन् रात्रौ पुनः पृथिव्यामेव संपतितुम् आरभते, किन्तु स पृथिवीम् इमां परितः चन्द्रकक्षोपलक्षितव्योम्नि हिरण्यगर्भेणोद्भाविते वायुचक्रमध्ये धरातले प्रत्यवरुद्धो नाधस्तात् पृथ्वीतलेऽवतरति । तत्रैव संचीयमानः एकविंशतिपरिक्रमणावच्छिन्नेन कालेन पिण्डात्मना परिणतोभूत्वा पृथिवीं परित एव अद्यापि तेन वायुना प्रणोदितः परिक्रमते ।

यथाऽऽकाशविकीर्णांशुः केतुरयं क्रमेण पिण्डो भूत्वा सूर्यो भवति एवम् एव विकीर्णाः सोमांशवः क्रमेण संहृत्य चन्द्रकलतां गच्छन्ति ।

अस्य चन्द्रस्य यावान् सोमभागः पृथिव्याम् ओषधिवनस्पतिप्राणिजातेषु संक्रममाणो ह्रसति तावानेव पुनरितोऽन्येद्युः सोमः चन्द्रमण्डले प्रविशन् परिपूरयति[2] । अस्य चन्द्रस्य रथः चन्द्रकक्षात्मको वायुमयो मार्गविशेषः सहस्रांशुमयः ।

आख्यातं च रथस्वरूपं कौर्मे पद्मपुराणाध्याये—
वीथ्याश्रयाणि चरति नक्षत्राणि निशाकरः ।
त्रिचक्रोभयतोऽश्वश्च विज्ञेयस्तस्य वै रथः ॥
शतारैश्च त्रिभिश्चक्रैर्युक्तः शुक्लैर्हयोत्तमैः ।
दशभिस्त्वकृशैर्दिव्यैरसङ्गैस्तैर्मनोजवैः ।
रथेनानेन देवैश्च पितृभिश्चैव गच्छति ।
सोमोऽह्यम्बुमयैर्गोभिः शुक्लैः शुक्लगभस्तिमान् ॥

१—दश रात्रीरशिवेना नव द्यून् अवनद्धं श्नथितम् अप्स्वन्तः ।
विप्रुतं रेभम् उदनि प्रवृक्तम् उन्निन्यथुः सोमम् इव स्रुवेण ॥
[१. ११६. २४] ।
अश्विनोः (रथस्य) गतिर्द्रष्टव्या—[ऋ. सं. १. ३४. ८–९; ४७. ७; ७. ६७. ८; ८. ५. ८; १०. १] ।

२—"समस्मे भूषतं नरोत्सं न पिप्युषीरिषः ।" १०. १४३.६ ।

अस्य अग्निप्राणस्य प्रथमो द्रष्टा तन्नाम्ना अग्निरिति ख्यातः आदौ तावद् भूमिष्ठमेवाग्निप्राणं ददर्श इति कृत्वा भौमोऽग्निः प्रथमः ।

भौमोऽग्निः ऋषिःसूक्तानाम् [ऋ. सं. ५. २७; ५. ३७–४३; ५. ७६; ५. ७७; ५. ८२–८६; ९. ६७. १०–१२; ९. ८६. ४१–४५; १०. १३७. ४] एष एव हि भौमोऽग्निः चन्द्रस्य पिताऽऽसीत् ।

अथ यः पश्चादाकाशे उत्तरध्रुवसंनिहिते सप्तर्षिमण्डले तुरीयतारकामयम् अग्निम् अपश्यत् स द्वितीयः सांख्योऽग्निः । सा तारका बृहत्संहितायाम् उच्यते—पूर्वे भागे भगवान् मरीचिर् अपरे स्थितो वसिष्ठोऽस्मात् ।

तस्याङ्गिरास्ततोऽत्रिस्तस्याऽऽसन्नः पुलस्त्यश्च ।

पुलहः क्रतुरिति भगवानासन्नानुक्रमेण पूर्वाद्याः ॥

अयमाधिदैविकोऽग्निः ।

चत्वारः सहचराः प्राणाः प्राधान्येनोत्पद्यन्ते[1] ।

१. नाभानेदिष्ठः । २. वालखिल्याः । ३. वृषाकपिः । ४. एवयामरुत् ।

योनौ रेतःसेको नाभानेदिष्ठेन । तस्य रेतसो विकिरणं वालखिल्यैः—शिरोग्रीवाहस्तवक्षोजठरकटिपादाद्यङ्गप्रत्यङ्गनिर्माणाय विभक्तं क्रियते रेतः । वृषाकपिरात्मानं कल्पयति । लोमानि त्वङ् मांसम् अस्थि मज्जा चेति पञ्चधा विहितं करोति ।

ततोऽस्मिन्नेव एवयामरुत् काठिन्यं सम्पाद्य प्रतिष्ठाम् आदधाति । यावत्प्रतिष्ठां न लभते तावत् पराश्रयेणैव तिष्ठतीति गर्भाशयं न त्यजति । प्रतिष्ठां लब्ध्वा आत्मनाऽऽत्मानं धारयितुं समर्थो भूत्वा गर्भाशयात् बहिर्भवितुं प्रयतते ।

"एवयामरुदेतद्वै करोति, तेनेदं सर्वमेतद्वै कृतम् एति यदिदं किंचेति ।" [ऐ. ब्रा. २२. १०] । रेतः, प्राणाः, आत्मा, प्रतिष्ठा इति चत्वारः शरीरं प्रारभन्ते । तत्र १ नाभानेदिष्ठः सोमः (रेतः)

२ वालखिल्याः वायुः (प्राणः)

३ वृषाकपिः विष्णुः (आत्मा)

४ एवयामरुत् अग्निः (प्रतिष्ठा)

1—तान्ययोनि सहचराणीत्याचक्षते नाभानेदिष्ठं वालखिल्या वृषाकपिम् एवयामरुतम् तानि सहैव शंसेत् इति । [ऐ. ब्रा. २२. १०] ।

एवयामरुतं शंसति प्रतिष्ठा वै एवयामरुत् प्रतिष्ठामेवास्य तद् कल्पयतीति । [ऐ. ब्रा. २०. ४] ।

पञ्चमे मण्डले समाप्तीतस्य [५. ८७][1] सूक्तस्यर्षिः एवयामरुद् आत्रेयः। ऋक्संहितायां दशमस्यां द्वावेव ऋषी अत्रिनाम्ना।

१. भौमोः अत्रिः २. सांख्यः अत्रिः [१०. १४३]।

तत्र सांख्योऽत्रिः पूर्वस्य भौमस्यात्रेः निगडागारबन्धनादसुरकृतपीडानिवारकत्वेन आश्विनौ देवौ स्तौति। [१०. १४३. १-२]

अपि भौम-सांख्याभ्याम् अत्रिभ्याम् अन्ये बहु आत्रेया बहवो मन्त्रद्रष्टारः श्रूयन्ते। ते यथा—

१ सदापृणः	२ प्रतिक्षत्रः	३ ससः
४ वव्रिः	५ प्रतिरथः	६ प्रतिभानुः
७ बभ्रुः	८ विश्वसामा	९ श्रुतिवित्
१० प्रतिप्रभः	११ गयः	१२ इषः
१३ वसुश्रुतः	१४ कुमारः	१५ गविष्ठिरः
१६ धरुणः	१७ सुतम्भरः	१८ अवस्युः
१९ गातुः	२० रातहव्यः	२१ यजतः
२२ उरुचक्रिः	२३ बाहुवृक्तिः	२४ सत्यश्रवाः
२५ एवयामरुद्	२६ स्वस्ती	२७ गोपवनः
२८ सप्तवध्रिः	२९ पौरः	३० अर्चनानाः

३१ श्यावाश्वः आर्चनानसः	३२ अन्धीगुः श्यावाश्विः
३३ बुधः सौम्य आत्रेयः	३४ विश्ववारा आत्रेयी
३५ अपाला आत्रेयी	३६ मृक्तवाहाः द्वितः
३७ द्युम्नः विश्वचर्षणिः	३८ वसूयवः आत्रेयाः
३९ प्रयस्वन्तः आत्रेयाः	४० गौपायनाः लौपायना वा आत्रेयाश्चत्वारः। बन्धु-सुबन्धु-श्रुतबन्धु-विप्रबन्धवः इति।[2]

[द्रष्टव्यम्—"महर्षिकुलवैभवम्" "अत्रिः" पृष्ठ ८२–१२१]

१—पञ्चमे मण्डलेऽन्तिमं सूक्तमिदम्।

२—तत्र अश्विदेवत्यानां सूक्तानामृषयः। (१) पौर आत्रेयः [५. ७३–७४] (२) अवस्यु आत्रेयः [५. ७५] (३) भौमोऽत्रिः [५. ७६-७७] (४) सप्तवध्रिः आत्रेयः [५. ७८] (५) श्यावाश्वः आत्रेयः [८. ३५] (६) अर्चनानाः आत्रेयः [८. ४२.४-६] (७) गोपवनः आत्रेयः [८.७३]

। : अत्रिः[1]।

दीर्घतमसः पुत्रस्य कक्षीवतः पञ्च सूक्तानि [१. ११६–१२०]।

तत्र-प्रथम-द्वितीय-तृतीयसूक्तेषु अत्रेरुद्धारः प्रतिपाद्यते। चतुर्थे सूक्ते एकस्याम् ऋचि चतुर्षु रक्षितेषु एकोऽत्रिः। पञ्चमेऽन्तिमे सूक्ते त्रिर्न श्रूयते। एतेषु चतुर्षु सूक्तेषु अत्रिरेक एव, तद् विषयकम् अश्विनो रक्षणम् अप्येकमेव। तथापि प्रक्रिया भिन्ना, भिन्नायामपि तत्राऽनुस्यूता उत्तरोत्तरश्रेयो विधायिनी काचन आनुपूर्वी वृत्तिर्दरीदृश्यते। तद्यथा—

(१.११६.८) अत्रिः ग्रीष्माग्निः वर्षेण सिक्तः पृथिवीं शस्यसम्पन्नां विदधद् आज्यचरुपुरोडाशादिभिः बलप्रदं रसवद् अन्नं लभते।

पूर्वस्याम् ऋचि कुम्भैः सुरासेकः। अतः अस्याम् ऋचि शस्यसम्पत्तिर्युक्तैव। परन्तु केवलं वृष्ट्या तापशमनं, तेनौषधिवनस्पतीनां प्ररोहो वा वेदे विधेयो न भवितुम् अर्हति, लौकिकज्ञानेन पुरुषार्थेन तत्सम्भवात्। अतो नात्र केवला प्राकृतिकी वृष्टिः। अपितु अश्विभ्यां कृता वृष्टिरपेक्ष्यते। प्राकृतिकी वृष्टिरन्तरिक्षस्थैः रुद्रैः रक्षोभिश्च अनाक्रान्ता न भवति। तया वृष्ट्या पितुमतीम् ऊर्जम् अत्रिर्न लभेत। अत एव कक्षीवान् (कक्ष्यावान् यज्ञतन्तुप्रग्रहवान्) यज्ञे बर्हिः प्रवृङ्क्ते, स्तोमांश्च प्रेरयति [१. ११६. १]। यज्ञेन पुष्ट एवाग्निः रुद्रान् रक्षांसि च अपास्य वृष्ट्या सह पितुमतीम् ऊर्जं लभेत। दुर्बलो दीयमानभिक्षाग्रहणाय बाहुं प्रसारयितुम् अपि न प्रभवेत्। दत्तहविष्को अश्विनो यदा वर्षतः तदा पितुमतीम् ऊर्जम् अपि प्रापयतः। देवकृतं वर्षणं दिव्यं भवति यः सन्तापपरिहाराय अलं भवेत्। अत्र घ्रंस एव वारितौ भवति, न तु अतिवृष्ट्या अग्निरेव प्रशमितः स्यात्। अस्या वृष्ट्याः स्वरूपं श्रूयते—

कारोतराच्छफादश्वस्य वृष्णः शतं कुम्भाँ असिञ्चतं सुरायाः [ऋ. ७] अश्वशफेन दस्युहननं कदाचिद् भवेत्। कारोतराच्छफात् शतसंख्याककुम्भैः सुरायाः सेकं यज्ञकर्ता वेदार्थविद् एव जानीयात्। पितुमत्या ऊर्जा युक्तः देवयानेन स्वर्गं यायात्।[2] "उन्निन्यथुः सर्वगणं स्वस्ति" इति चात्र श्रुतिः।

वृष्टिः भृगुः। ऊर्क् अङ्गिराः। अतोऽत्र खनित्वा अत्रिः अन्वेष्टव्यः[3]। यदि न

१—"अत्रिम्। अद् भक्षणे। अदेस्त्रिनिश्च इति चशब्दात् त्रिप्" [सायणः १. ११६. ८]। "अदेस्त्रिनिश्च" [उणादिसूत्रम् ५०८] चात् त्रिप्। अत्त्री। अत्त्रिणौ। अत्त्रिणः। अत्त्रिः। अत्त्री। अत्त्रयः। [सि. कौ.] अत्रिः तीर्णतमाः। "निरहंसस्तमसः स्पर्तम् अत्रिम्" [७. ७१. ५]

२—एह यातं पथिभिर्देवयानैः [१. १८३. ६]

३—अत्रैव तृतीयम् ऋच्छत इत्यूचुः। तस्मादत्रिः। [निरु. ३.१७]

खन्यते पृथिवी तमसाच्छन्ना भवति । अतः ऋबीसाद् अश्विनौ अत्रिम् उन्नयतः । ऋबीसाद् उन्नीतः "अत्रिः" भवति । पृथिवीस्थानोऽग्निः दिवम् उन्नीतोऽत्रिर्भवति । अग्नौ उन्नीते रोदस्यो पर्याप्तिर्भवति देवेभ्यः स्वस्ति भवति ।

१.११७.३ अत्र अत्रेः न उन्नयनम् अपितु मोचनम् । अनयोर्भेदः ।

१.११६.८	१.११७.३
१ अत्रिम् ऋबीसाद् उन्नयतः ।	१ अत्रिम ऋबीसाद् मुञ्चतः ।
२ सर्वगणम् ।	२ पाञ्चजन्यम् गणेन ।
३ स्वस्ति ।	३ अनुपूर्वं चोदयन्ता ।
४ अश्विनौ ।	४ नरौ वृषणौ ।
५ हिमेन घ्रंसम् अग्निम् अवारयेथाम् पितुमतीम् ऊर्जम् अधत्तम् ।	५ विनन्तौ दस्योः अशिवस्य मायाः ।
६ ऋबीसे अवनीतम्[1] ।	६ ऋषिम् ।

१.११६.८—पञ्चभूतानां घनीभूता पृथिवी पिण्डाकारा । तत्र निरवकाशतया पापपुण्ययोर्विवेकाभावात्, तत्र अवनीतम् अवाङ्मुखम् अत्रिं सर्वगणम् उन्निन्यथुः । अज्ञानोपहतस्य उन्नयनम् ।

१.११७.३—ऋषित्वाद् विवेकः । अंहोमुक्तम् ऋबीसम् । अशिवस्य दस्योः मायाः बन्धनम् ।

मोचनप्रक्रिया—"अनुपूर्वं वृषणा चोदयन्ता" । सर्वगणोऽत्र पाञ्चजन्यः । पञ्चधा विभक्ते ऋबीसे अशिवो दस्युः मायाभिः ऋषिम् अबध्नात् । पञ्चाग्निरूपाणि पृथक् पृथक् विभक्तानि यथा रचनम् आत्मानं नयन्ति तदा तेषु अनुपूर्वेरभावात् तानि दस्यव इव आचरन्ति । अतोऽश्विनौ नेतारौ वर्षकौ भूत्वा पञ्च भूतानि आनुपूर्व्या चोदयतः । अत्र पिण्डीभूता पृथिवी पञ्चधा आत्मानं विभुञ्जती स्वेन ज्योतिषा च अश्विभ्यां आप्ता तमो घ्नती वर्षन्ती अत्रिं मोचयति ।

१.११८.७ अवनीताय अत्रये तप्ताम् अग्निम् ऊर्जम् ओमानम् अश्विनौ अधत्ताम् । पूर्वं यो घ्रंसः तापकोऽभवत् [१. ११६. ८], सोऽधुना रसकेन ब्रह्मरसेन परिणतः । अत्र न उन्नयनम्, न मोचनम् । ऋषिमुक्तस्यात्रेः अंहसो मोचनात्, अशिवस्य मायानां विनाशनाद् ऋबीसे सर्वम् "ओमान ऊर्जं" जातः । ऋचः उत्तरार्धे अभिरिताय (षट्केन विहितचक्षुष्काय) कण्वाय अश्विनौ चक्षुः प्रायच्छताम् इति । अत्रेः तप्तस्य ओमानीभूतत्वं, कण्वाय अन्धाय चक्षुर्दाने च अनुगतं संगतं च ।

१—"ऋबीसम् अपगतभासम् । अपहृतभासम् । अन्तर्हितभासम् । गतभासम् वा ।" [निरु. ६. ३५]

अथ कश्चन समन्वयः ।

१. ११९. ६ "हिमेन घर्मं परितप्तम् अत्रये" । अत्र योग्यक्रियाया अध्याहारः कर्तव्यः । पूर्वस्मृत्या "अवारयताम्" इति । यदा तप्तः ओमानः ऊर्क कृतः, कथं पुनः परितापः ? उक्तस्य निर्विशेषणतया पुनरुक्तिः न भवति । अत्र "परि" इत्यधिकम् । तापस्य परितो व्याप्तिः । उन्नीतस्य मुक्तस्य ऋबीसो नास्ति । तथापि परितः तापो विद्यते इदानीमपि । तापस्येयं परितो व्याप्तिः तपस्विनो विश्वामित्रस्य उर्वश्यां प्रसक्तिरिव । घर्मः स्वयं तप्तो न भवति । [१. ११९. २] "घर्मं स्वदामि" । घर्मोऽत्र स्वादुः कृतः ।

[१. ११९. ६] स घर्मोऽत्र अत्रये परितप्तो जातः । दिवं गतोऽत्रिः [शश्वत्तमाया उषसो व्युष्टौ– १. ११८. ११] घर्मस्य परिपूतेः परितप्तो जातः ।

रेभः [स्तुतिकर्ता], अत्रिः, भुज्युः [१. ११६. ३–५] शश्वत्तमाया उषसः प्रकाशेन विषयाणां परिपूत्या अप्स्वन्तोऽवनद्धः [१. ११६. २४]। तम् अश्विनौ "उरुष्यथः" (रक्षतः)। उरु-स्य-थः विस्तारेण अवस्यतः । सूर्ति विस्तार्य सूर्ति न्यवारयताम् । उषसा दीप्तं दिव्यं वस्तु यदि सूर्याय न इज्यते [यज्वरीरिषः १. ३. १], तर्हि तद् दस्युर्भवति । तत्र प्रतीकारः उरुष्यः । पार्थिवः पदार्थो दिव्येन ज्योतिषा व्यापितः यावता वाग्वात्मना न गृह्यते तावता परिपूतिः, यस्याः अवसितिः उरुष्यः ॥

रेभः स्तुतिकर्ता । तस्य ज्ञानं च शब्दश्च विद्यते । अर्थेन तादात्म्याभावात् शब्दरूपं ज्ञानं तस्य (अत्रेः) कृते परितप्तो घर्मो जातः अत्र प्रतीकारो हिमः-अर्थः अश्विनोः रसः ।

अत्र हिमेन शयोः गौः पूर्यते, गवि रक्षक पयः अश्विनौ वर्षितवन्तौ । शयुः स्वपन् भुज्युः । अश्विनौ भुज्युं समुद्राद् उदूहतुः नौभिः (त्रिविधाभिः) [१. ११६. ३] ।

—:०:—

१. अन्तरिक्षप्रुद्भिः—रसं ज्योतिश्चान्तरा प्रवर्तमानो भुज्युः अनयोः सायुज्यं चिकीर्षति ।

२. अपोदकाभिः—निर्विषयस्य इन्द्रियाणि विषयेभ्य उद्गच्छद् उदकं न पिबन्ति ।

३. आत्मन्वतीभिः—भुज्योः आत्मा शब्दात्मना प्राणिति ।

शयोः (शयानस्य सुप्तस्य) भुज्योः गौः (भूतसृष्टिः यत्रेन्द्रियाणि गच्छन्ति), अप्रसूः स्तरी जाता । हिमसेकेन तां पयसा प्रपूर्य रेभम्-अत्रिम्-शयुं दीर्घेण आयुषा संयोज्य वन्दनम् अकुरुताम् अश्विनौ ।

रेभः—अत्रिः—शयुः—वन्दनः ।

मैत्रावरुणेर्वसिष्ठस्याऽऽर्षम् [७. ७१. १–६] ।

अथ पञ्चममर्थं "निरंहसस्तमसः स्पर्तमत्रिम्" । अत्र अंहः तमः । पापात् तमसः (च) अत्रिः मोचितः । "निःस्पर्तम् अपारयतम्" इति सायणः । काक्षीवतेषु पूर्वगतेषु सूक्तेषु तमः शब्दोऽत्रिविषये न श्रुतः ।[1]

अस्यामृचि—१. च्यवानो जरसो मोचितः ।
२. पेदवेऽश्वो दत्तः ।
३. अत्रिः अंहसः तमसः पारितः ।
४. जाहुषः राज्यभ्रष्टः पुनः स्वराज्ये स्थापितः ।

एतानि चत्वारि कर्माणि पूर्वगतासु चतसृषु ऋक्षु क्रमशो द्रष्टुं शक्यन्ते ।

१. च्यवानः [ऋ १]	२ पेदुः [ऋ २]
३. अत्रिः [ऋ ३]	४ जाहुषः [ऋ ४]

सूक्तेऽन्तिमा ऋक् एतानि चत्वारि कर्माणि आर्त्विज्येन बोधयति ।

इयं मनीषा, इयम् अश्विना गीर्, इमां सुवृक्तिं वृषणा जुषेथाम् ।
इमा ब्रह्माणि युवयून्यग्मन् यूयं पात स्वस्तिभिः सदा नः ॥ [७. ७१. ६]

१. मनीषा—सूर्योदयः (दक्षिणध्रुवेऽस्तगमनेन)—च्यवानः—ऋक्—होता ।
२. गीः —दीर्घा रात्रिः दीर्घदिनेन परिणता उत्तरध्रुवस्थापरत्वात्—पेदवे आशुः अश्वः-यजुः-अध्वर्युः ।
३. सुवृक्तिः—उत्तरध्रुवे सूर्योदयः । वसन्तग्रीष्मवर्षा ऋतवः-अत्रिः-साम-उद्गाता ।
४. ब्रह्माणि—मण्डलस्य दैनंदिनगतिः, ध्रुवयोरन्तरा । जाहुषः-अथर्वा-ब्रह्मा ।

—:o:—

१—अनारम्भणे तमसि प्रविद्धं [भुज्युम्] । [१. १८२. ६] ।

परिशिष्टम्–५

वेदकालः ।

तत्र पाश्चात्यविदुषा मोक्षमूलरेण [Max Muller] वेदाङ्ग–ब्राह्मण-संहितानां रचनाविषयकान् स्वमनीषया आनुमानिककालविभागान् प्रकल्प्य ऋग्वेदस्य रचनाकालः खैस्ताब्दात् प्राग् द्वादशशतवर्षमितः अवधारितः । एतदर्थं स बौद्धग्रन्थेभ्यो धावति स्म । तथाहि—

पार्श्वमहावीरबुद्धानां समयः खैस्तात् प्राक् षष्ठी शताब्दी । बौद्धजैनेभ्यः प्राग्वति वैदिकं वाङ्मयं, यतो यथास्वं तत् बौद्धजैनाः स्वीकुर्वन्ति वैदिकधर्म-दूषणाय । एवं मोक्षमूलरमते—

१. वेदाङ्गानि	६००— २००	वर्षेषु प्राक् खैस्तात् ।
२. ब्राह्मणानि	८००— ६००	,, ,, ,,
३. संहिताः	१०००— ८००	,, ,, ,,
४. मन्त्ररचना	१२००—१०००	,, ,, ,,

[अत्रेदं वक्तव्यं यद् बौद्धजैनेभ्यः प्रागपि वेदविरोधिनो बभूवुः ।]

तत्र मन्त्ररचनाकाले श्रोयडरमहाभागेन [Von Schroedor] किञ्चित् संशोधनं कृतम् । मन्त्रकालः २०००—१५०० प्रा. खै. ।

ज्यौतिषिकगणनया याकोबिमहोदयेन [H. Jacobi] वेदकालः निर्णीतः—४५००—२५०० प्रा. खै. ।

याकोबिसमकालिकः बालगङ्गाधरतिलकः ज्यौतिषिकगणनया वेदकालं निर्ण-यति स्म ६००० प्रा. खै.

तत्र उभयोः ज्यौतिषिकम् आस्पदम्—

ब्राह्मणेषु कृत्तिकासु वसन्तसम्पातः ।[1]

१—"ज्योतिर्विदः सूर्यस्य संक्रमणवृत्तं २७ नक्षत्रेषु विभजन्ति, पूर्णं संक्रमणवृत्तम् ३६० अंशानाम् अस्ति । तत् प्रत्येकं नक्षत्रं ३६० ÷ २७ = १३$\frac{1}{3}$ अंशानाम् चापं निर्माति । संक्रमणबिन्दुश्च ७२ वर्षेषु एकम् अंशं विहाय अपरम् अंशं प्रसर्पति । एवम् एकस्मात् नक्षत्रात् संक्रमणबिन्दुः परं नक्षत्रं याति, तत्र ७२ × १३$\frac{1}{3}$ = ९७२ वर्षात्मकः

संहितासु मृगशिरसि नक्षत्रे वसन्तसम्पातः श्रूयते ।

डा० अविनाशचन्द्रदासः "ऋग्वेदिक् इण्डिया"-नामके पुस्तके अनेकानि भूगर्भशास्त्रीयतत्त्वानि, विशेषतः आर्यावर्तसप्तसिन्धु-चतुःसमुद्रीस्थितिम् आधारीकृत्य गणनाद्वारा वेदस्य समयं पञ्चविंशतिसहस्रसंवत्सरपूर्वं मन्यते ।

प्रस्तरलेखः ।

श्रीह्यूगोविंक्लर महोदयः १९०७ ई. वर्षे एशिया-माइनरदेशे "बोघाजकोई" इत्यत्र इष्टकासु उत्कीर्णं लेखं प्राप्तवान्, यस्मिंल्लेखे मित्र-वरुण-इन्द्र-नासत्या वैदिकदेवताः पठ्यन्ते । ऐतिहासिकप्रमाणेन अस्य लेखस्य कालः ख्रीस्तात् प्राक् चतुर्दशशताब्दी निर्णीतोऽस्ति ।

परन्तु अस्मात् वेदकालनिर्णयोऽनेनापि न भवति । बोघाजकोईस्थानि देवतानामानि कस्मात्प्रभृति पुरातनार्यशाखायाः अभविष्यन्, या शाखा भारतीयप्राचीनार्यशाखायाः भिन्ना अभविष्यत् । उभयशाखयोः किंचिद् उभयसाधारण्यं प्राचीनपारम्पर्यम् अभविष्यत् । अतः ह्यूगोविंक्लरस्य आविष्कृतिलेखेन वेदकालस्य अतितरां प्राचीनतां प्रमाणयितुं न शक्यते ।

ज्योतिःशास्त्रं, नक्षत्रगणना वा नात्र कालनिर्णये प्रमाणतामेति अन्यार्थमेव संदिग्धत्वात् । बोघाजकोईप्रस्तरलेखः वेदकालं १४००-तमं वर्षं प्रा. ख्री. उपनयेत् ।

भाषाणां [वेद-अवेस्ट-ब्राह्मण-पाणिनीयसंस्कृतादीनां] तुलनात्मकाध्ययनमपि वेदकालनिर्णये नोपकरोति । परन्तु भाषाणामविच्छेदं पारम्पर्यम्, ज्योतिःशास्त्रम् अवलम्ब्य, भूगर्भविद्यामाधाय वा वेदानां कोऽपि प्राचीनः कालः—यथा १६००० वा २५००० प्रा. ख्री.—कल्प्यते, तन्नोपपन्नमेव ।

अथ वेदकालनिर्णये निःसन्दिग्धं प्रमाणं, विण्टर्नित्ज़महोदयस्य [w. winternitz] मते भारतीयेतिहासो भवति । वेदसंहिताः पार्श्व-महावीर-बुद्धेभ्यः प्राग्वर्तिन्यः । तासां प्रारम्भकालः प्राक् ख्रीस्तात् द्विसहस्रवर्षमितम् अर्ध-तृतीयसहस्र-परिमितं वा वर्षं भवति । [२००० वा २५०० प्रा. ख्री.] ।

कालो भवति । सम्प्रति वसन्तसम्पातः पूर्वभाद्रपदनक्षत्रस्य चतुर्थचरणे भवति, यदा चायं कृत्तिकानक्षत्रे भवति स्म ततो वर्तमानस्थितेः प्राप्तये ४¾ नक्षत्राणि लङ्घितानि । यदि एकस्य नक्षत्रस्य लङ्घनाय–९७२ वर्षात्मककालापेक्षा तदा ४¾ नक्षत्रलङ्घने ९७२ × ४¾ = ४६१७ वर्षात्मककालोऽवश्यमपेक्षितः स्यात् । तदेवं वेदाङ्गज्योतिषगणनानुसारेण वेदानां २५०० ई. पू. पूर्वकालिकता प्रतीता भवति ।

भारतीयविदुषां मते वेदाः नित्याः ईश्वरीयज्ञानत्वान्न तेषां निर्माणकालः सम्भावितुं शक्यः। कार्यशब्दवादिनां मतेऽपि वाय्वाकाशादिवत् प्रवाहनित्यतया वेदानां नित्यत्वम्। "आख्या प्रवचनात्" [जै. १. १. ३०] इति जैमिनि-दर्शनाद् वेदानाम् अपौरुषेयत्वम् अपि प्रतिपाद्यते।

"वेदप्रकाशविधुरमखिलं जगदन्धकारमयमेव सम्भवेत्। स्थाने एवोक्तं भगवता दण्डिमहाभागेन—इदमन्धतमं कृत्स्नं जायेत भुवनत्रयम्।

यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ।। इति।

अत्र शब्दाह्वयं ज्योतिर्वेदमेव संकेतयति।"

"पश्य देवस्य काव्यं न ममार न जीर्यति।" "वाचा विरूपनित्यया" इत्यादिवचोभिः वेदस्य नित्यत्वं प्रतिपाद्यते। ईश्वरप्रेरितं ज्ञानं परत्र संक्रान्तये ऋषिभिर्मन्त्ररूपेण निबद्धम् इति य आमनन्ति ते उपोद्बलकेन मन्त्रान् एव पुरस्कुर्वन्ति।

"ब्रह्माणि ससृजे वसिष्ठः" [ऋ. सं. ७. १८. ४], "इयं गीमान्दार्यस्य" [१. १६६. १५], "गोतमो नव्यमतक्षद् ब्रह्म" [१. ६२. १३] "ब्रह्माणि जनयन्त विप्राः [७. २२. ९] इत्यादि। अस्तु तावत् भवतु यद् वा तद् वा। परन्तु विश्वसाहित्ये वेदानां प्राचीनत्वं तु सर्वैरेव मुक्तकण्ठतः स्वीकृतम् इति तु अपेतशङ्कम्।"

[द्र. पृष्ठ. ३९–४० "संस्कृतसाहित्यविमर्शः" आचार्यः द्विजेन्द्रनाथः।]

१—अदितिकालः—६००० ई. पूर्वतः ४००० ई. पू. पर्यन्तम्। अत्र काले उपास्यदेवनामगुणमुख्यचरितादिबोधका गद्यपद्यमया मन्त्रा रचिता ये यज्ञेषु प्रयुज्यन्ते स्म।

२—मृगशिरःकालः—४००० ई. पूर्वतः २५०० ई. पू. पर्यन्तम्। अत्रैव महत्त्वशालिनि काले भूयांस ऋग्वेदमन्त्रा व्यरच्यन्त।

३—कृत्तिकाकालः—२५०० ई. पूर्वतः १४०० ई. पू. पर्यन्तम्। अस्मिन् काले शतपथब्राह्मणतैत्तिरीयसंहितयोः प्रणयनमजायत।

४—अन्तिमःकालः—१४०० ई. पूर्वतः ५०० ई. पू. पर्यन्तम्। अत्र काले श्रौतसूत्रगृह्यसूत्रदर्शनसूत्रादीनामार्षग्रन्थानां रचना जाता। तानेव विरोद्धुं प्रतिक्रियारूपेण बौद्धधर्म उदितो बभूव।

[पृष्ठ. १४–१५ "संस्कृतसाहित्येतिहासः"—आचार्यः श्रीरामचन्द्रमिश्रः]

परिशिष्टम्–६

वेदे किं पुंदेवताप्राधान्यम् ?

वेदे पुंदेवताप्राधान्यं स्थापयता आधुनिकभारतीयविदुषा डा. सूर्यकान्तेन वेदस्य अर्वाचीनता आपाद्यते ।

विश्वस्मिन्नन्येषु देवशास्त्रेषु (Mythology) स्त्रीपुंसयोः उभयोः प्राधान्येन पूजा वर्ण्यते । तत्र कानिचन स्त्रीदेवतानां नामानि निर्दिश्यन्ते । यथा–इरिन्निस्, इसिस्, अफ्रोडैट्, रीआ, डाफ्ने, हिप्पोडामिया, अरमीति, हैलेना, इष्टर्, लीडा ।

डा. सूर्यकान्तस्य मते वैदिकदेवशास्त्रस्याभ्युदयस्तदा प्रारेभे यदा आर्याः स्त्रीदेवता अवगणय्य पुंदेवतासु अनुरक्ता बभूवुः । मैसोपोटामियाबैबिलोनियादिदेवानां देवशास्त्रीयविकासमवलोक्य वैदिकदेवशास्त्रस्य प्रारम्भकालः त्रिसहस्रवर्षेभ्यः प्रागमन्तव्यो भवति ।

अन्यत्र स्त्रीपुंसयोः देवतयोः आचारभ्रंशं, वेदे देवतानाम् उच्चैस्तरम् आचारं च दृष्ट्वा डा. सूर्यकान्तः वैदिकदेवशास्त्रस्य भूमिकामुपसंहरति—अस्माकं मते वैदिकदेवविकासस्य समयः तादृशे युगे मन्तव्यः यदा देवीनां पूजा ह्रसन्ती, देवानां पूजा वर्धमाना च बभूव इति ।

हन्त ! अत्र वक्तव्यं यद् आधुनिकानां मतिर्विपरीता जाता । वैदिकदेवतावादे योनित्वकल्पना ऐन्द्रियसुखदृष्ट्या न कृताऽस्ति । (स्त्रीदेवतायाः) स्त्रियाः तत्त्वमबुद्ध्वा कालान्तरे विषयविजृम्भता संभवेद् इत्यत्र धार्मिकेतिहासे भूयांसि प्रमाणानि भवन्ति ।

प्रथमतो वेदे इन्द्रोऽपि देवता, सरस्वती अपि देवता । वेदे देवताशब्दः यज्ञमनु प्रवर्तते । "स (सविता) चेत्ता देवता पदम्" [ऋ. सं. १. २२. ५] । "सः" च सविता देवः एतन्मन्त्रप्रतिपाद्यदेवता भूत्वा "पदं" यजमानेन प्राप्यं स्थानं "चेत्ता" ज्ञापयिता भवति ।" [सायणः]

सर्वं व्याकरणमत्र उपोद्बलकम् । द्रष्टव्यान्येतानि सूत्राणि । "साऽस्य देवता" [पा. ४. २. २४] इन्द्रो देवताऽस्येति ऐन्द्रं हविः ।

त्यज्यमानद्रव्ये उद्देश्यविशेषो देवता, मन्त्रस्तुत्या च । [सि. कौ.]

"देवतान्तात् तादर्थ्ये यत्" [पा. ५. ४. २४] अग्निदेवतायै इदम् अग्निदेवत्यम् । पितृदेवत्यम् ।

"देवात् तल्" [पा. ५. ४. २७] देव एव देवता ।

"देवताद्वन्द्वे च" [पा. ६. ३. २६] "आनङ् द्वन्द्वे" । मित्रावरुणौ ।

अर्धमात्रालाघवेनापि पुत्रोत्सवं मन्यमाना वैय्याकरणाः[1] कथमत्र अर्धतृतीयमात्रकं "ता" इति वर्णद्वयं सहन्ते ।

"देवताद्वन्द्वे च" [पा. ७. ३. २१] पूर्वोत्तरपदवृद्धिः । आग्निमारुतम् ।

यागार्था देवता[2] । यागेन "संगतिः" भवति । हविष्प्रदानाय हविः—स्वीकरणाय च देवता भवति । वस्तुतो यागः देवानां (देवीनां देवानां च) प्रीणनाय । अग्ने यं यज्ञमध्वरं विश्वतः परिभूरसि ।

स इद्देवेषु गच्छति ॥ [ऋ. सं. १. १. ४]

स देवाँ एह वक्षति । [ऋ. सं. १. १. २]

हविः पार्थिवः पदार्थः । अग्नौ तद् हूयते । अग्निमुखा देवाः तद् अश्नन्ति । देवैरशितं[3] हविः यजमानस्य अभ्युदयाय प्रकल्पते । एवं तद् हविः यजमानस्य भविष्यतः "भद्रस्य" उपादानं, निमित्तं च भवति । उपादानत्वेन निमित्ततया च हविः आधारः योनिः । तद् हविः अशित्वा देवो देवी वा फलं प्रसूते इत्यतः देवे देव्यां च स्त्रीत्वेन देवतात्वकल्पना । शब्दशास्त्रे प्रकृतिः, विभक्तिः,प्रत्ययः, वचनम् इत्यादिभिः पदैरपि अयमर्थो व्यज्यते । अपरं च "अश्विनौ देवता" इति प्रयोगो भवति, न तु "अश्विनौ देवते" इति द्विवचनेन ।

व्याकरणे सूत्रमेकं विद्यते येन आधारोपादानकर्तॄणां त्रयाणाम् तादात्म्यं प्रत्याख्यते । तथाहि—

दिक्शब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः । [पा.५.३.२७]

देशकालपदार्थवाचकाः शब्दा वेदे बहुधा स्त्रियां श्रूयन्ते, यथा उषाः, सूर्या, वृषाकपायी, सरण्यूः, दिवो दुहिता, सिनीवाली, राका, इळा, भारती, सरस्वती, दक्षिणा, अदितिः, द्यावापृथिव्यौ, रोदसी, रसा, पुरन्धिः, इट् इत्यादयः । स्वयं वेदिः स्त्रियाम् अस्ति ।

"इयं वेदिः परो अन्तः पृथिव्याः" । [ऋ. सं. १.१६४. ३५] ।

१—"अर्धमात्रालाघवेन पुत्रोत्सवं मन्यन्ते वैयाकरणाः ।"

[परिभाषेन्दुशेखरः—१२२]

२—तिस्र एव देवता इति नैरुक्ताः [निरु. ७. ५] ।

३—अश्विना यज्वरीरिषः चनस्यतम् [ऋ. सं. १. ३. १] ।

पूतं पवित्रं वैदिकं विज्ञानं भवति । अर्थाभावात् पाश्चात्यानां हठिया विलोपे सति, मानवं जीवितं देवेषु आरोप्य देवतानां शिथिलाचारत्वं कल्प्येत । अतो वैदिकाख्यानानि मूलभूतानि इतरेषामाख्यानानां निकषायेरन् , न तु अन्यथाऽत्र स्वमतिप्रेरितं वैपरीत्यं कल्प्यम्[1] ।

द्वयोरश्विनोः अन्यतरा स्त्री नास्ति, द्वयोरेका च पत्नी सूर्यस्य दुहिता, यां तौ वरौ भूत्वा तस्या वधूयुं सोमं प्रति नयतः । अश्विनौ चैनौ वृद्धस्य च्यवनस्य भार्यां "सुकन्यां" (राज्ञः शर्यातिस्य पुत्रीम्) अपहर्तुम् ईषतुः, पितृगृहे जीर्णस्या चोयया सह रहस्यालपतः स्म इत्येवम् आचारदोषम् अश्विनोर्दृष्ट्वा किं नाम डा. सूर्यकान्तो मन्येत ? अपि चाश्विनौ नाम्नापि इतरेषु देवशास्त्रेषु न श्रूयेते ।

१—वेद में प्रधानता पुंदेवताओं को दी गयी है और उनमें भी द्युस्थानीय देवताओं को । परिणाम इसका यह निकल सकता है कि वैदिकदेवशास्त्र का अभ्युदय ऐसे काल में हुआ था जब कि आर्य लोग देवी-पूजा से हटकर पुंदेवताओं की पूजा पर आ चुके थे—और निश्चय ही यह काल मेसोपोटामिया, बेबिलोनिया आदिदेशों के देवशास्त्रीय विकास को देखते हुये २००० बरस पहले के आस-पास का ठहरता है ।
वैदिक देवताओं के चारित्रिक स्तर की उच्चता से भी इस बात की पुष्टि होती है । क्योंकि जहां एक ओर निकट-पूर्वीय देशों के देवी-देवताओं का चरित्र आज के मानदण्ड से देखने पर कुछ ढीला-ढाला-सा प्रतीत होता है वहां वैदिकदेवताओं का चरित्र आज के मानदण्ड की दृष्टि से अत्यन्त उच्चकोटि का ठहरता है ।

हमारी समझ में वैदिक देव-विकास का काल ऐसे युग में रखा जाना चाहिये जब कि देवियों की पूजा ह्रास पर थी और पुंदेवताओं की पूजा उत्कर्ष पर ।

[पृष्ठ २७, भूमिका "वैदिक देवशास्त्र" डा॰ सूर्यकान्तः]

परिशिष्टम्—७

।। अश्विनोर्व्याप्तिः ।।

अश्विनौ रसज्योतिर्भ्यां सर्वं व्यश्नुवाते [निरु. १२. १] । रसज्योतिषोर्दिव्यं चाक्षुषं रूपम् अग्नौ सोमे च ।

अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकम् । [ऋ. सं. १.९३.६]

अग्निः सोमश्च "हविर्लक्षणेनान्नेन वर्धमानौ अन्येषां देवानां यागाय विस्तीर्णं स्थानं" कुरुतः ।

राजानौ वा एतौ देवतानां यदग्नीषोमावन्तरा देवता इज्येते देवतानां विधृत्यै । [तै. सं. २. ६. २. १–२]

"इज्येते इत्यत्र बहुवचनव्यत्ययो द्रष्टव्यः । प्रधानदेवता हि तयोर्मध्ये इज्यन्ते । उभयतोऽवस्थिताभ्यां राजभ्यां मध्येऽवस्थिताः प्रधानदेवता विशेषेण धृता भवन्ति । …………अथवा राजभ्यां ताभ्याम् अन्या देवता जीवितप्रदानेन पोषिता भवन्ति ।" [सायणः]

विश्वं व्याप्तमस्ति पञ्चभिर्भूतैः[1] । तत्र एकविंशत्या सर्वाणि रूपाणि ध्रियन्ते । "ये त्रिषप्ताः परि यन्ति विश्वारूपाणि बिभ्रतः" । [शौ. अ. सं. १. १. १] । व्यापनेऽनेकत्वमपेक्षितम् , एकस्मिन्नेव स्वस्मिन् व्याप्यव्यापकभावासम्भवात् । अवरतो व्यापनं द्वैतेन भवति । तत्र शाश्वतिकसार्वत्रिकव्यापनकर्तृत्वेन, द्वैतभावेन च अश्विनौ श्रूयेते । अत्रैव तयोर्नाम "अश्विनौ" इति सार्थकम् । अत एव "अश्विनौ व्यात्तम्" इति वाजसनेया श्रुतिः । [वा. सं. ३१.२२] । एकस्य द्वैतं नाम व्यात्तम् ।

त्रिवृत् (त्रेधा वर्तमानः) अश्विनोः रथः सप्त स्रवतः परितो गच्छति [ऋ. सं. १. ३४. ८; ७. ६७. ८] । स च रथः पञ्च भूतान्यभि प्रथमानो भवति ।

स पप्रथानो अभि पञ्च भूमा । [ऋ. सं. ७. ६९. २]

अग्नीषोमौ वायुना संहतौ रूपं धत्तः । प्रकाशजलसंयोगेन सृष्टिरिन्द्रधनुषि गोचरीभवति । "रसान् रश्मिभिरादाय वायुनायं गतः सह ।

वर्षत्येव च यल्लोके तेनेन्द्र इति स स्मृतः ।।" [बृ. दे. १.६८]

१—पञ्च जना मम होत्रं जुषन्तां गोजाता उत ये यज्ञियासः [ऋ.सं१०.५३.५]

रसात्मकस्य सोमस्य पिण्डभावेन धारणम् अग्निकर्तृकम् । अत एव पृथिव्या अभिमानी देवोऽग्निः । पृथिवी पर्वतादिना विस्तीर्णा व्याप्नोति । तत्र अग्निः पृथिव्या विस्तीर्णः अवयवभूतः । वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकम् अध्येधे अग्निः । [ऋ.सं. ७.३६.१]

एवं पृथिवीयं पृथुनाम्ना विपुला वेदिता । अदृश्यो जातेयं कालान्तरेऽम्बु लीयते । आविर्भूता तिरोभूता सजला च पुनः पुनः ।

आविर्भूता सृष्टिकाले तज्जलोपर्युपस्थिता ।
प्रलये च तिरोभूता जलस्याभ्यन्तरे स्थिता ॥
[देवी भागवते नवमस्कन्धे नवमेऽध्याये श्लो. १४-१५]
अश्विनौ विवस्वतः पुत्रौ, विश्वपुरुषस्य श्वासम् ।

सूर्यं परितो गच्छन्तो ग्रहाः सूर्यस्यैव शकलाज्जाताः इत्याधुनिका वैज्ञानिकाः । केचन । एवं सति ते ग्रहाः रसेन ज्योतिषा च अश्विभ्यां व्याप्ता भवन्ति ।

"चरित्रं हि वेरिवाच्छेदि पर्णम् आजा खेलस्य परितक्म्यायाम् ।
सद्यो जङ्घाम् आयसीं विश्पलायै धने हिते सर्तवे प्रत्यधत्तम् ॥"
[ऋ. सं. १.११६.१५]

विः = सूर्यः ।
पर्णम् = पूरकं शकलम् । पृणाति, पर्णयति पिपर्तीति वा पर्णम् ।
[अमरकोषे वनवर्गः २. ४.१४]

विश्पला = पृथिवी ।
आयसी जङ्घा = √अय् गतौ । √अस् भुवि । अयस् गत्या वर्तमानः ।
तत्सम्बन्धिनी । तस्येदम् इत्यणि ङीपि आयसी (जङ्घा) ।
"पूर्णम् अदः" [सूर्यः]
"पूर्णम् इदम्" [पृथिवी]
पूर्णात् पूर्णम् उदच्यते ।
पूर्णस्य पूर्णम् आदाय
पूर्णमेवावशिष्यते ॥ [ईश. उप. शान्तिमन्त्रः]
अगस्त्यविषये श्रूयते ।

"युवं पय उस्रियायाम् अधत्तं पक्वम् आमायाम् अव पूर्व्यं गोः" ।
"युवं ह घर्मं मधुमन्तमत्रयेऽपो न क्षोदोऽवृणीतम् एषे ।"
"युवां चिद्धि ष्माश्विनावनु द्यून् विरुद्रस्य प्रस्रवणस्य सातौ ।
अगस्त्यो नरां नृषु प्रशस्तः काराधुनीव चितयत्सहस्रैः ॥"
[ऋ. सं. १. १८०. ३; ४; ८]

अगस्त्योऽत्र ऋषिः ।

अपक्वायां भोगोरस्राविण्यां गवि पक्वं पयः पूर्वभवं तत्रैवोत्पन्नम् अधस्ताद-धारयताम् अश्विनौ ।

ततम् अग्नि सौख्यमिच्छते अत्रये क्षोद्यमानानि उदकानीव अश्विनौ अधारयताम् ।

"विशिष्टोष्णरूपदुःखद्रावणस्य वृष्ट्युदकसंस्त्यायस्य लाभे सति अगस्त्यः कर्मनिर्वाहकानां मनुष्याणां मनुष्येषु प्रशस्तः सन् शब्दप्रेरकशङ्खादिरिव सहस्रैः (स्तोत्रैः) अश्विनौ प्रबोधयति ।"

ततम् अग्निम् उदकेन मधुमन्तं कृत्वा तट इव बाधेते अश्विनौ । आमे पदार्थे अपक्वं पयः, पूर्वम् अवस्तात् सत्, पक्वं कृत्वा उत्स्रावयतोऽश्विनौ ।

अतिशयवृष्टौ सत्यां, शब्दैः मरुद्भिश्च शङ्खभौ इवाश्विनौ वस्तूनि प्रकाशयतः ।

कदाननौ अश्विनौ ।

पुराजौ [ऋ. सं. ७. ७३. १ , यज्ञवाहसौ [ऋ. सं. १. १५. ११]– प्राचीनतमौ यज्ञप्रवर्तकौ अश्विनौ । यज्ञेन अनाप्यं किमपि नास्ति । अरणिभ्याम् अग्निनिष्पादनेन सह अश्विनौ देवतात्वेनाभिमतौ । अरणिद्वयमश्विनोरेव रूपम् ।

वैदिकाख्यानानि नैत्यिकानि । तत्र आधुनिकेतिहासदृष्टिर्न घटते । मन्त्रे वर्णानुपूर्व्यां पदेऽर्थे च पौर्वापर्यं कल्प्येत चेत् आख्यानेष्वपि इतिहासः संभवेत् । संवत्सरसत्रे यदि इतिहासो भवेत् तर्हि वेदेऽपीतिहासो भवेत् ।

वस्तुत उत्तमं काव्यं कालानवच्छिन्नं भवति[1] । दशरथोऽयोध्यायां संबभूव । अद्यापि अयोध्यायामेव "दशरथः" भवितुम् अर्हति ।

वैदिकाख्यानैः मानवो विस्मृतं शाश्वतिकं तत्वम् अन्विष्यति[2] । मर्त्यः शाश्वतिकेन कालेन तादात्म्यमापन्नः सन्नमृतो भवति ।

१—एक उच्चकोटि की कविता के निर्माण के समय काल का घटक लुप्त हो जाता है । [पृष्ठ ४, पङ्क्ति १५–१६, भूमिका "वैदिकदेवशास्त्र" डॉ. सूर्यकान्तः, भारत भारती] गर्भस्थो वामदेवो गर्भेण परिच्छिन्नोऽपि समयस्य आदिबिन्दौ विराजमानः आसीत् । तेन तत्र देवानां पूर्वाणि जन्मानि विदितानि आसन् । "आदिकालं प्राप्य, तं बिच्छिद्य महाकालेन तादात्म्यम् ।" संस्कारसाक्षात्करणात् पूर्वजातिज्ञानम् । [योगसूत्रम् ३. १८] ।

२—या देवी सर्वभूतेषु स्मृतिरूपेण संस्थिता नमस्तस्यै........॥

[चण्डी सप्तशती अ. ५] ।

पृथिव्याम् अग्निरुपास्यो देवः, मनुष्या देवता । साक्षाद् अग्निः शरीरं दहति । परन्तु काष्ठद्रव्येषु अभिव्यक्तोऽग्निः भोग्यविषयो भवति । पृथिव्यामयम् अग्निरेव सर्वेन्द्रियविषयः ।

"एक एवाग्निर्बहुधा समिद्धः ।" [ऋ. सं. ८. ५८. २] ।

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये [ऋ.सं.१.११२.१]

इममग्निमधिकर्तुं मानवो बहुधा चेष्टते । अनेनाऽऽधुनिकं विज्ञानं प्रवर्तते । वैदिकः वैतानिकाग्निना भुवं दिवं च दोग्धि सर्वाभीष्टान् ।

अश्विनौ स्वयम् अग्निं निर्मन्थीतः हिरण्ययीभ्याम् अरणिभ्यां, येन दशमे मासि प्रसूतिर्भवति । [ऋ. सं. १०. १८४. ३] ।

अश्विप्रसूतेन अग्निना दिव्यं ज्योतिरधिगत्य मानवो देवो भवति ।

द्यावापृथिव्यौ, अहोरात्रौ, प्राणापानौ अश्विनोररणिभूतौ ।

अश्विनोर्मंगलकर्म न जीर्यति । "न वां जूर्यन्ति पूर्व्या कृतानि ।"

[ऋ. सं. १. ११७. ४] ।

संवत्सरचक्रं यथा पुनः पुनरावर्तते तथाऽश्विनौ अरणिभ्यां पुनः पुनरग्निं मन्थतः[1] । एवम् अश्विनौ सनातनौ भवतः । अतएव तयोः अश्विनौ इति नाम्नः सार्थक्यम् ।

परिशिष्टम् ८

अश्विनौ संख्या च ।

विराट्पुरुषस्य व्यात्तभूतत्वेन, मध्यमोत्तमस्थानभेदेन, रसज्योतिर्भ्यां व्यशनेन च अश्विनौ द्वौ । रोदस्याः पृथिवी, अन्तरिक्षं द्यौरिति त्रेधा विभक्तत्वात् अश्विनौ लोकत्रयव्यापिनौ । तयोरथः त्रिवृत् । उपस आरोहणेन रथोयं त्रिवन्धुरस्त्रिचक्रश्च भवति ।

यथा गृत्समदः ऊनत्रिंशता युग्मैरश्विनौ उपमिमीते [२. ३९][1] तथा त्रयस्त्रिंशता "त्रिः" इति पदैः अश्विनोः त्रित्वव्यापितां हिरण्यस्तूपः स्तौति [१. ३४]।

त्रित्वावयवयुक्ते रथे चतुर्धात्व विभागेन निहितं श्रूयते । [४. ४५. १]।

अश्विनौ चतसृभ्यो दिग्भ्यः आगच्छतः । "आ पश्चातान्नासत्या पुरस्ताद् अश्विना यातम् अधराद् उदक्तात् ।" [७. ७२. ५; ७३. ५]।

तौ "विश्वतः पाञ्चजन्येन राया" [७. ७२. ५; ७३. ५] आगच्छतः ।

तौ अत्रिं पाञ्चजन्यं ऋबीसाद् मुञ्चतः [१. ११७. ३]।

त्रिवन्धुरः अश्विनोः रथः पञ्चभूतानि प्रथमानो भवति [७. ६९. २]।

भुज्योः समुद्रात्तारणेऽश्विनौ षड्भिरश्वैर्युक्तान् त्रीन् रथान् युञ्जाते । रथत्रयं स्थानत्रयभेदेन स्यात् । जले नावं जलरहिते प्रदेशे रथं च तौ युञ्जाते । नावः चतस्रो, रथाश्च त्रयो युज्यन्ते भुज्योः तारणे ।

चतस्रो नावः, त्रयो रथाः, षड् अश्वाः ।

रथस्य एकं चक्रम् अघ्न्यस्य मूर्धनि नियतं भवति, अन्यच्चक्रं द्यां परीयते । [१. ३०. १९]। अघ्न्यस्य मूर्धाऽत्र ध्रुवक्षेत्रं भवति यत्र सूर्यः षड्मासान् अस्तं विना सततं भ्रमन्निव प्रकाशते । अन्यच्चक्रं ध्रुवयोरन्तरा षाण्मासिकगत्या देवयानपितृयानाभ्यां सूर्यस्य गमनम् ।[2]

१—द्र. पृष्ठम् १०४ ।

२—चक्र गमनम् । "चक्रं परसैन्यं यद्वा चक्रं वीर्यकर्मसाधनम् । घञर्थे कवि-धानम् इति कः "कृञादीनां के" [का. ६. १. १२. १] इति द्विर्वचनम् । [सायणः ८. ५. ३४]।

भुज्युः सूर्यः यो दक्षिणायने उत्तरध्रुवेऽस्तं गतः पुनस्तत्र उदीयते । उत्तरध्रुवे सूर्यस्य उदितस्याभावेऽपि चतुरो मासान् तेजसो विद्यमानतया¹ तेषु चतुर्षु मासेषु अश्विनोर्वाभिः चतसृभिर्नौभिः प्लूयते । एवं ध्रुवप्रान्तरा उत्तरायणे सूर्यस्य षाण्मासिकगतिः त्रिभिः रथैः षडश्वैः प्लूयते । ऋतुभवेन रथत्रयम्, मासषट्कत्वेन अश्वषट्कत्वं च ।

"चतस्रो नावो जठलस्य जुष्टा उदश्विभ्याम् इषिताः पारयन्ति ।"

१. १८२. ६ ।

"त्रिभी रथैः शतपद्भिः षडश्वैः ।" [१. ११६. ४] ।

रथः १		रथः २		रथः ३		
अश्वः १	अश्वः २	अश्वः ३	अश्वः ४	अश्वः ५	अश्वः ६	भुज्युः

तस्यांसफलके खड्गं निजघान ततोऽङ्गदः ।
यज्ञोपवीतवच्चैनं चिच्छेद कपिकुञ्जरः ॥
[रामायणे युद्धकाण्डे सर्गः ७६, श्लोकः १०]¹ ।

इमां व्युत्पत्तिं प्रदर्शयति अन्यथापि सायणः । [ऋ. शतधनम्, १०. १५५. ७] "शतम् इति बहुनाम बहुधनस्य कर्तारम् । मूलविभुजादित्वात् कप्रत्ययः । यद्वा शतकरणसाधनं बहुयागनिष्पादनम् इत्यर्थः ।...।
—द्वौ मासौ दीर्घं तमः ।
[द्र.] प्रत्युवाच ततः सीतां भयसंदर्शनं वचः ।
शृणु मैथिलि मद्वाक्यं मासान् द्वादश भामिनि ।
कालेनानेन नाभ्येषि यदि मां चारुहासिनि ।
ततस्त्वां प्रातराशार्थं सूदाश्छेत्स्यन्ति लेशशः ॥
[रामायणे अरण्यकाण्डे ५६. २४–२५] ।
द्वौ मासौ रक्षितव्यौ मे योऽवधिस्ते मया कृतः ।
ततः शयनमारोह मम त्वं वरवर्णिनि ॥ [रामायणे सुन्दरकाण्डे २२. ८]
—"वेदवेद्ये परे पुंसि जाते दशरथात्मजे ।
वेदः प्राचेतसादासीत् साक्षाद् रामायणात्मना ॥"
(१) अङ्गदं परिरक्षन्तौ मैन्दो द्विविद एव च ।
तस्य तस्थतुरभ्याशे परस्परदिदृक्षया ॥ [रा. युद्ध. ७६. १५] ।
(२) रूपद्रविणसम्पन्नावश्विनौ रूपसम्मतौ ।
मैन्दं च द्विविदं चैव जनयामासतुः स्वयम् ॥ [रा. बाल. १७. १४]

रथः शतपद्, नौश्च शतारित्रा ।

शतम् । इयं संख्या भूयो भूयः श्रूयते । यथा (१) इन्द्रः शतक्रतुः ।

(२) अत्रिः शतद्वारे पीडायन्त्रगृहे प्रवेशितः ।

(३) ऋज्राश्वः शतं मेषान् वृक्यै शकलीकृत्य प्रादात्, येन पिता तम् अन्धम् अकार्षीत् ।

(४) कक्षीवते अश्वस्य शफात् सुरायाः शतं कुम्भान् अश्विनौ असिञ्चताम् ।

(५) अश्विनौ स्वयं शतक्रतू । [१. ११२. २३] ।

(६) सोमः शतचक्रः । [१०. १४४. ४] ।

(७) अश्विनोः नौः शतारित्रा [१. ११६. ५] अश्विनोः रथः शतोतिः [६. ६२. ५; ७. ६८. ३] ।

येन आश्व्येन शिरसा दध्यङ् मधु प्रोवाचाऽश्विनौ, तच्छिरः शर्यणावति पतितम् आसीत् । तस्य शिरसोऽस्थिभिः इन्द्रो नवतीर्नव वृत्राणि जघान । [१.८४.१३–१४; ११६.१२] । "जघान नवतीर्नव" [१.८४. १३] दशाधिका षट्शती [९० × ९ = ८१०] । सप्तविंशतिर्नक्षत्राणि अश्विन्यादीनि रेवत्यन्तानि । शुक्लकृष्णपक्षाभ्यां चन्द्रस्य त्रिंशता दिनैः त्रिंशत् कलाः भवन्ति । तासां त्रिंशतः सप्तविंशतिकृत्वः आवृत्त्या दशाधिकाष्टशती भवति ।

१५ × २ = ३०	३० × २७ = ८१०
२७ × २ = ५४	५४ × १५ = ८१०

त्रिपञ्चाशः क्रीळति व्रात एषां देव इव सविता सत्यधर्मा [१०. ३४. ८] ।
"अक्षाणां त्र्यधिकपञ्चाशत्संख्याकः संघः क्रीळति आस्फारे विहरति । आधिकाः प्रायेण तावद्भिरक्षैर्दीव्यन्ति हि ।" [सायणः]

एक एव चन्द्रः त्रिपञ्चाशद्वारं क्रामतीति चतुष्पञ्चाशच्चन्द्राः स्युः । यथाऽत्र चन्द्रेण संख्याऽधिगता भवति एवं शतं संख्या सूर्येणाऽधिगन्तुं शक्यते ।

रथः शतपत् । मासद्वयावधिरेको रथः । द्वयोर्मासयोः विंशत्यधिकशत-संख्याका अहोरात्राः । ३० × २ × २ = १२० ।

अस्यां संख्यायां शतं पादाः, विंशतिः सन्धिः ।

यथा युगगणनायाम्—

---

(३) गोप्ता हि रामं सौमित्रिर्लक्ष्मणं चापि राघवः ।
अश्विनोरिव सौभ्रात्रं तयोर्लोकेषु विश्रुतम् ॥
[रा. अयोध्या. ८. ३१] ।

	वर्षाणि	सन्धिकालः[1]
कृतयुगे	४०००	८००
त्रेतायुगे	३०००	६००
द्वापरयुगे	२०००	४००
कलियुगे	१०००	२००
	१००००	२०००

द्वादशसहस्राणि वर्षाणि एकस्मिन् मानवे चतुर्युगे ।

दैवं चतुर्युगं तु १२००० × ३६० = ४३२०००० वर्षाणि ।

ब्रह्मणः कल्पस्तु सहस्रं दैवचतुर्युगानाम्

४३२०००० × १००० = ४३२००००००० वर्षाणि ।[2]

द्वात्रिंशदधिकचतुःशती कोटीनां वर्षाणि ब्राह्मे कल्पे ।

यथा युगगणनायां षष्ठोंऽशः सन्धिकालः, तथा मासगणनायामपि स्यादेव । एवं सति त्रिंशत्यधिकशतसंख्याकाऽहोरात्रात्मके मासद्वयावधिकाले त्रिंशतम् अहोरात्रान् सन्धिकालेन पृथक्कृत्य अवशिष्यन्ते शतम् अहोरात्राः । तेऽत्र रथस्य पादाः, नावोऽरित्राणि च ।

एवं रथस्य पदां शतम्, नावोऽरित्राणां शतम्,

मेषाणां शतम्, कुम्भानामपि शतम् ।

तिसृभी रात्रिभिस्त्रिभिर्दिनैरश्विनौ भुज्युं समुद्राद् उत्तारयतः । "तिस्रः क्षपस्त्रिरहातिव्रजद्भिर्नासत्या भुज्युम् ऊहथुः पतङ्गैः" [१. ११६. ४] । इयं संवत्सरगतिर्भवितुमर्हति देवयानेन त्रीणि अहानि, पितृयानेन तिस्रो रात्रयः । परन्तु शब्दशः ऋत्वोऽर्धः तिस्रो रात्रयः नवाऽहानि च भवन्ति । ऋचि त्रीणि अहानि इति न श्रूयतेऽपि तु "त्रिरहा", अहानि त्रिः । त्रिरित्यत्र संख्याया अभ्यावृत्तिगणने सुच् प्रत्ययः । का संख्याऽभ्यावर्तितामनीति जिज्ञासायां सन्निहितं

१—चत्वार्याहुः सहस्राणि वर्षाणां तत्कृतं युगम् ॥ [२२

तस्य तावच्छती सन्ध्या सन्ध्यांशश्च तथाविधः ।

सहस्रमेकं वर्षाणां ततः कलियुगं स्मृतम् ॥ [२५]

तस्य वर्षशतं सन्धिः सन्ध्यांशश्च ततः परम् ।

सन्धिसन्ध्यांशयोस्तुल्यं प्रमाणमुपधारय ॥ [२६]

[म. भा. वनपर्व. अ. १८८, २२–२६]

२—शतं तेऽयुतं हायनान् द्वे युगे त्रीणि चत्वारि कृण्मः [अ.सं. ८.२.२१] ।

"तिस्रः" इति संख्यावाचकं पदमेव परामृश्यते। एवं "त्रिः" "तिस्रः", नव "अहा", नवाऽहानीति यावत्। "तिस्रः क्षपः त्रिसंख्याका रात्रीः त्रिरहा त्रिवारमावृत्तानि अहानि च अति व्रजद्भिः" इति चात्र सायणः"। [१. ११६. ४]

तिस्रः नव च मिलित्वा द्वादश सम्भवन्ति। द्वादशभिर्मासैः संवत्सरः। ध्रुवे दीर्घं तमः द्वौ मासौ। अश्विनोः कालः "ऊर्ध्वमर्धरात्रात् प्रकाशीभावस्य अनुविष्टम्भम्"। [निरु. १२. १]। तमसि अनुप्रविष्टं ज्योतिर्यदा तमोऽतिशेते, तदा प्रभृति सिन्धोः स्यन्दनं, रथः क्रामति। तच्चैवं सिध्यति।

अग्निं होतारम् अन्तरा षष्टिश्च नवतिश्च पाशाः श्रूयन्ते। अग्निर्यत्र सूर्योऽस्तं याति, होताऽपि अग्निरेव[1] यः सवितृरूपेण सूर्यं प्रसुवति दिवि।

सूर्यस्य अग्रे चत्वारिंशद् दशरथस्य शोणाः श्रेणिं नयन्ति इति च श्रूयते। [आश्व श्रौ. सू. १. ३] [ऋ. सं. १. १२६. ४]

"दशरथस्य दशसंख्याकरथवतः, सहस्रस्य सहस्रसंख्याकानुचरोपेतस्य, शोणवर्णोपेता अश्वाः। एकैकस्य रथस्य चतुष्टये सति दशरथानां मिलित्वा चत्वारिंशद् अश्वा भवन्ति।" [द्र. सायण–१. १२६. ४]

वेदार्थस्य तत्त्वेनाऽवगमस्य अशक्यत्वाद् "अर्थनित्यः परीक्षेत[2]" इति न्यायेन अत्र सहस्रपदेन[3] सूर्योऽधिगम्यते।

दशसु दिक्षु व्यापितया सूर्य एव दशरथः। हस्रा उषाः। तया सह वर्तनात् सूर्य एव सहस्रः।

"उषा हस्रेव निरिणीते अप्सः" [१. १२४. ७]


"उषाः प्रभाते हस्रा हसना इव अप्सः दन्तस्थानीयानि रूपाणि नीलपीतादीनि, यद्वा निरूप्यमाणानि पदार्थजातानि निरिणीते नितरां रिणीते गमयति प्रकाशयतीत्यर्थः।" [सायणः]

षष्टिः, नवतिः, चत्वारिंशत्–एताः संख्याः एवं स्युः।

१—अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।
[ऋ. सं. १. १. १]

२—निरु. २. १

३—चत्वारिंशद् दशरथस्य शोणाः सहस्रस्याग्रे श्रेणिं नयन्ति।
[ऋ. सं. १. १२६. ४]



१ अग्निः २ होता

३. ध्रुवः ४. ध्रुवः

त्रिंशत् स्वसार उपयन्ति । त्र्यरुण्यः त्रिभागाग्रण्यः ।

“त्रिभी रथैः शतपद्भिः षडश्वैः” [१. ११६. ४] इत्यत्र यदि अश्वः शतपद् गृह्यते तर्हि सूर्यस्य संवत्सरगतिरत्र संगच्छते, तच्च दिनमानैः । संवत्सरे त्रिंशत्यधिकत्रिशतसंख्याका अहोरात्राः ।

३६० × २ = ७२०

षड् अश्वाः	६००
नौः शतारित्रा	१००
रेभस्योन्नयनं[1] रात्रयः १० अहानि ९	१९
स्वयं सूर्यः (रेभः, भुज्युः)	१
आहत्य	७२०

अथ सहस्रम् । सूर्याया विवाहे बहुः सहस्रम् । रासभरथेनाऽश्विनौ सहस्रं जिग्यतुः ।

अश्विनोः रथश्चक्रत्रययुक्तः, स्थानत्रयवर्ती, सारथ्याधारत्रयत्रययुक्तश्च ।

१—दश रात्रीरशिवेना नव द्यून् [१. ११६. २४]

रथैश्चक्रैश्च व्यापनमेव द्योत्यते। रथेन रंहतः, चक्रेण क्रामतः। ध्रुवयोः अन्तरा देवयानपितृयानाभ्यां, ध्रुवयोश्च गतिभेदेन[1] गतेस्त्रैविध्यम्। एवं सति—

ध्रुवयोरन्तरा शतपद्भिः षड्भिः रथैः, अश्वैर्वा	६००
ध्रुवयोः शतारित्राभिः चतसृभिः नौभिः[2]	४००
आहत्य	१००० (सहस्रम्)

१—द्र. अष्टावक्र उवाच—

द्वाविन्द्राग्नी चरतो वै सखायौ द्वौ देवर्षी नारदपर्वतौ च।
द्वावश्विनौ द्वे रथस्यापि चक्रे भार्यापती द्वौ विहितौ विधात्रा॥

(महाभारते वनपर्वणि अ. १३४, श्लोक ९.)

२—ऋ. सं. १. ११६. ३, ५; १. १८२. ६.

परिशिष्टम् ६

इन्द्रनासत्यौ ।

अश्विनौ सकृद् "इन्द्रनासत्या" इति संबोध्येते । "इन्द्रनासत्या सचनस्तमा" [८. २६. ८] "इन्द्राश्विनौ अतिशयेन सर्वैः समवेतव्यौ सेव्यमानौ वा ।" [सायणः]

" एवं "यदिन्द्रेण सरथं याथो अश्विना" [८.९.१२]

अत्र इन्द्रेण सहैकं समानं रथमश्विनौ आरूढौ ।

अन्यत्र श्रूयते इन्द्रोऽश्विनावावर्तयति । इन्द्रोऽन्तरिक्षस्थानः । तमोरूपान् वृत्रान् हत्वा सूर्यस्य दिव्यारोपणम् इन्द्रकर्मैव । तत्कर्माश्विनौ अपि कुरुतः । "इन्द्रतमा" [१. १८२. २] "वृत्रहन्तमा" [८. ८. ९, २२] । इन्द्रस्त्रिकद्रुकेषु सोमं पिबति, नवं च नवतिं च वृत्रान् हन्ति । माध्यंदिनं सवनं विशेषत इन्द्रस्य । अतिरात्रे च पर्यायैरिन्द्रोऽसुरान् अपाकरोति ।

अश्विनौ अहोरात्रं प्रवर्तेते । "त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा" [१.३४.२] । तयोः प्रकर्षेणावनात् तौ प्रातर्युजौ । वृत्रहननादिकर्मसु अश्विनौ इन्द्रं रक्षतः । पुत्रं पितरौ इव इन्द्रमश्विनौ अवतः [१०.१३१. ४-५] । अरणिमन्थनम् अश्विभ्यां क्रियते [१०. १८४.३] । अग्निं विना सोमाहुतिर्न भवति । अत इन्द्रकर्मस्वश्विनौ विराजत एव । अत एव अश्विनौ इन्द्रेण सह समानरथमारोहतः । इदमारोहणं कदा इत्यत्र श्रूयते—

"त्वमिन्द्र सालावृकान् सहस्रम् आसन् दधिषे अश्विना ववृत्याः ।"

[१०. ७३. ३]

"हे इन्द्र ! त्वं सहस्रं सालावृकान् आसन् आस्ये दधिषे धारयसि । तदानीम् अश्विना अश्विनावपि आववृत्याः आवर्तयेः ।" [सायणः]

"हे इन्द्र ! सालावृकान् मर्कटाद्याकारान् अनेकरूपान् मायाविनः राक्षसान् सहस्रं बहून् इत्यर्थः आस्ये दधिषे धारयसि तथा अश्विनावपि आवर्तयेः ।"

[उद्गीथः]

किञ्च संग्रामे त्वरमाणोऽपि यज्ञम् उपागच्छतीन्द्रः तदा सख्याय तौ नासत्यौ वहति । शूर इन्द्रः सहस्रं वसुसमूहं यजमानाय (रथे) धारयति । अश्विनावपि ["तव अनुचरौ"-सायणः] बहूनि धनानि प्रयच्छतः ।

"समना तूर्णिरुपयासि यज्ञम् आ नासत्या सख्याय वक्षि ।
वसाव्याम् इन्द्र धारयः सहस्राश्विना शूर ददतुर्मघानि ॥" [१०.७३.४]

"समना समानया तुल्यया भवद्गुणरूपया स्तुत्या स्तूयमान इति शेषः, तूर्णिः क्षिप्रं यज्ञमुपगच्छसि । उपगच्छंश्च अश्विनौ सखिभावाय सखिकर्मणे वा यज्ञं प्रति सहगमनलक्षणाय यज्ञाङ्गभावलक्षणाय वा आवक्षि आवहसि । किंच वसुसमूहं धनसंघातं हे इन्द्र ! रथे धारयसि यजमानाय दातुम् । किंच हे शूर ! तव सखायौ अश्विनौ च यज्ञमुपगम्य यजमानाय ददतुः दत्तवन्तौ सहस्राणि बहूनि धनानि ।" [उद्गीथः]

एवं सालावृकेषु इन्द्रेण हतेषु अश्विनाविन्द्रेण सह सरथमारोहतः । सलावृक्याः पुत्राः सालावृकाः । सलावृकी रात्रिरूपा । "तस्याः सलावृकीत्वं विनाशकरवृकरूपत्वेन । तच्च तच्छब्दतो विज्ञायते, यथात्र "स" शब्देन षोऽन्तकर्मणि इति धातोर्निष्पन्नेनान्तो बोध्यते । तं सं लाति अर्थाद् भक्ष्यस्येति सलास्तादृशी वृकीति । अरण्यशुनां भक्ष्योपर्याक्रमणं सर्वात्मना तद्विनाशनं लोकप्रसिद्धम् इति, तत् सादृश्याद् अत्र रात्रौ सलावृकीत्वव्यवहारः । तत्पुत्राश्च रात्रिकालीनानि तमांसि ।" [वे. वि. पृष्ठ २०१]

एवं प्रातर्युजावश्विनौ भवतः ।

वेदे देवानां कालाभिमानितया देशाभिमानिता भवति । त्रिकद्रुकेषु सोमपानं कालत्रयमिव देशत्रयमप्यपेक्ष्यते । कालाभिमानित्वम् अश्विनोः श्रूयते—

उतायातं संगवे, प्रातरह्नो, मध्यंदिन, उदिता सूर्यस्य ।
दिवा नक्तम् अवसा शंतमेन .... । [५.७६.३]
दिवा नक्तं शरुमस्मद् युयोतम् [७. ७१. १]
दिवा नक्तं माध्वी त्रासीथां नः [७. ७१. २]
त्रिश्चिन्नो अद्या भवतं नवेदसा [१. ३४. १]
त्रिर्नक्तं याथस्त्रिर्वश्विना दिवा [१. ३४. २]
समाने अहन् त्रिरवद्यगोहना त्रिरद्य यज्ञं मधुना मिमिक्षतम् । [१.३४.३]
सूर्यस्य गत्या यथा कालविभागस्तथा दिग्विभागोऽपि ।
"आ पश्चातान्नासत्या पुरस्ताद् अश्विना यातम् अधराद् उदक्तात् ।
आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥"
[७. ७२. ५; ७३. ५]

दिक्कालाभ्यां देशोऽपि विभज्यते । "पाञ्चजन्येन राया" इति श्रुत्या जनाः पञ्च । अतस्तेषां निवासभूमयोऽपि पञ्च । तच्च यथा—

यदश्विनावपाग् यत् प्राक् स्थो वाजिनीवसू ।

यद् द्रुह्यव्यनवि तुर्वशे यदौ हुवे वाम् अथ मा गतम् ॥ [८. १०. ५]

अत्र प्राग् अपाक्शब्दाभ्यामुदयास्तमयौ तद्देशौ च लक्ष्येते । एवमत्र पञ्चधा विभागः—

१. उदयदेशः, अस्तमयदेशो वा । [पूरुः[1] तस्य देशः] २. द्रुह्युः [तस्य देशः] ३. अनुः [तस्य देशः] ४. तुर्वशः [तस्य देशः] ५. यदुः [तस्य देशः] ।

एवं दिग्-देश-कालभेदेन अश्विभ्यां क्रियमाणानि अवनानि वीर्याणि च कीर्त्यन्ते । तत्रावनानां संग्रहः प्रथमे मण्डले द्वादशाधिकशततमे सूक्ते [१.११२] कुत्सस्य आङ्गिरसस्यार्षे श्रूयते । तत्राश्विभ्याम् अवितानां रक्षितानाम् नामानि श्रूयन्ते । उत्तरमण्डलेषु अवनानि स्वरूपतः श्रूयन्ते । यद्यपि कानिचन नामानि अश्विसूक्तेष्वन्यत्र न श्रूयन्ते । यथा—

तुर्वीतिः, दभीतिः, ध्वसन्तिः, पुरुषन्तिः [१.११२.२३]

[एतेऽन्यत्रापि श्रूयन्ते ।]

वम्रः विपिपानः, उपस्तुतः, पृथिः, व्यश्वः[2] [१.११२.१५], स्यूमरश्मिः [१६], कशोजूः [१४], त्रिशोकः [१२], वशः, अश्व्यः, प्रेणिः [१०], श्रुतर्यः, नर्यः [९], परावृक् [८] पृश्निगुः, पुरुकुत्सः, शुचन्तिः [७], कर्कन्धुः वय्यः; अन्तकः [ऋ. सं. १.११२.६] ।

अस्मिन् संग्रहे घोषायाः नाम न श्रूयते । यद्यप्यन्यत्र [१.११७.७] अश्विभ्यां तस्यै पतिप्रापणं कीर्त्यते । स्वयं घोषायाः ऋषेः दृष्टे द्वे सूक्ते दशमे मण्डले श्रूयेते, यत्र सा अश्विभ्यां वृषभं रेतिनं पतिं कामयते [१०. ४०.९; ११] । अनयोः सूक्तयोः [१०.३९-४०] अश्विभ्यां कृतानाम् अवनकर्मणां पुनः संग्रहः कृतो विद्यते । यस्तु संग्रहः पूर्वतनसंग्रहात् [१.११२] न्यूनः भिन्नक्रमश्च ।

अश्विनोरवनानि वीर्याणि च दिग्देशकालविभागैः अवगन्तुं व्यवस्थापयितुं च शक्यन्ते ।

१—यदिन्द्राग्नी यदुषु तुर्वशेषु यद् द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातम् अथा सोमस्य पिबतं सुतस्य ॥ [१.१०८.८]
यदुषु । तुर्वशेषु । द्रुह्युषु । अनुषु । पूरुषु ।

२—व्यश्वः (स्तोता) ८.९.१०; २६.९

परिशिष्टम् १०

। इट् ।

इट् नाम हविर्लक्षणमन्नम् । या इष्यते सा इट् । अग्निः देवानां मुखम् । अग्निना देवा हविर्गृह्णन्ति । अग्रे [स्वर्गं प्रति] हविर्नयति इति अग्रणीत्वाद् अग्निः ।

यज्ञनिर्वाहकत्वाद् अश्विनौ यज्ञवाहसौ [१. १५. ११] । तौ प्रवर्ग्येण यज्ञं संभरत इति देवानाम् अध्वर्यू । एवं यज्ञेनाऽनन्यसम्बन्धात् तौ यज्ञनिर्वाहकं हविर्लक्षणमन्नम् इच्छतः । [१. ३. १] ।

यवं वपन्तौ अश्विनौ इषं दुग्धः । ततः तौ वज्रेण दस्युं हन्तुं प्रभवतः । दस्युं हत्वा उरु ज्योतिष्कुरुतः [१. ११७. २१] । एवम् इषो दोहेन ज्योतिर्लाभो भवति । अश्विभ्यां दत्ता इट् ज्योतिष्मती भवति, या तमः तिरस्कृत्य यष्टॄन् रक्षति पुष्णाति च [१. ४६. ६] ।

ऋक्संहितायाम् अश्विनोः विषये इट् प्रारम्भे "यज्वरी", [१. ३. १] अन्ते "पिप्युषी" । "समस्मे भूषतं नरोत्सं न पिप्युषीरिषः" [१०. १४३. ६] । "आपः यथा कूपं पूरयन्ति तथा अश्विनौ अस्मान् अलंकुरुतम् ।"

"प्रवृद्धानि इष्यमाणानि पयांसि गोरुध इव बहुभिर्धनैः हे नेतारौ ! अस्मान् अलंकुरुतम् ।"

"उत्सः प्रवाहो यथा वृद्धानि अन्नानि अलंकरोति तद्वत् अश्विनौ अस्मान् अलंकुरुतम् ।"

यज्वरीशब्दः संहितायां द्विः श्रूयते । उभौ अपि अश्विनोर्विषये । (१) यज्वरीः इषः [१. ३. १] । (२) यज्वरीः विशः [१०. ४१. २] । "विशो येन गच्छथो यज्वरीर्नरा ।" येन रथेन यजनशीलाः प्रजाः युवां गच्छथः ।

अश्विनोः रथयोगेन "यज्वर्यः इषः" "यज्वर्यो विशो" भवन्ति ।

इषां विषये आश्विनीषु ऋक्षु एवं श्रुतिः ।

१. इषः चनस्यतम् अश्विनौ [१. ३. १] ।

२. अश्ववत्या गोमत्या हिरण्यवत्या इषाऽऽयातोऽश्विनौ, येन शुनः शेपः त्रिभ्यो बन्धनेभ्यो मुक्तो भवति [१. ३०. १७] ।

३. त्रिः मधुमत्या कशया मधुसेकादूर्ध्वम् इषो वाजवत्यो भवन्ति । [१. ३४. २–३] ।

४. इट् ज्योतिष्मती तमस्तिरो भवति [१. ४६. ६] ।

५. सुकृते सुदानवे इषं पृञ्चन्ता (मिश्रयन्तौ) अश्विनौ बर्हिरासीदतः [१. ४७. ८]।

६. अश्विनौ इषा वाजैः च आयातः [१. ११७. १]।

७. इषा आगत्य विदुषे वाजं (बलं) यच्छतः [१. ११७. १०]।

८. वाजवतीं रयिं धेनुमतीमिषं च अश्विनौ प्रयच्छतः [१. १२०. ९]।

९. वाजाय इषे च मधुरी अश्विनौ यशा ईट्टे । [१. १८०. २]।
[अश्विभ्यां मधुपानाद् ऊर्जमिव वाज इट् च प्रादुर्भवतः ।]

१०. इषं (अन्नं) वृजनं (बलं) जीरदानुं (चिरकालजीवनं) च विद्याम (लभेमहि) [१. १८०. १०]।

११. इषां रयीणाम् अपां च प्रापयतः अध्वर्यन्तौ (अध्वरं यज्ञं पारयितुमिच्छन्तौ) अश्विनौ [१. १८१. १]।

१२. यदा ऋतजा रथो द्यावापृथिव्यौ परितो याति, तदा पुरुवीः (बहु अन्नान्यः) इषोऽश्विनौ परितो गच्छन्ति । [५. ५८. ८]।

१३. नाना स्थानेभ्योऽश्विनौ इषम् ऊर्जं चावहतः [५. ७६. ४]

१४. बह्वीः इषः अनु रथः भवति । इषा रथस्य गतिर्भवति । इट् चास्यच असश्चमणी भवति [६. ६२. ७–८]।

१५. "पीवरीः" (प्रवृद्धा) इषः "पश्वे तोकाय शं गवे वाम्" अश्विनौ आवहतः [८. ५. २०]।

१६. दिव्याः इषः (मेघेभ्योः) अप (कृष्य) वर्षतः अश्विनौ [८.५. २१]।

१७. दूरदेशादपि शत्रूणां निवासभूमीः भक्षन्तो (व्याप्नुवन्तौ) (शत्रूणां अन्नानि, शत्रुभ्यः, अपकृष्य) इषः अश्विनौ आवहतः [८. ५. ११]।

१८. यो रथः इषा सह वर्तते न तं चक्रम् अभि बाधते [८. ५. ३४]।

१९. "बृहन्तम् इषा रयिम्" [८. ५. ३६] अश्विनौ अन्नेन धनं सम्पूर्णं कुरुतः।

२०. सहस्रनिर्णिजं (बहुविधरूपम्) इषं धत्तं घृतश्चुतम् [८. ८. १५]।

२१. "रथे कोशे हिरण्यये" अश्विनौ आरोहतः । पीवरीः (पायवितृणि) स्थूलानि इषः (अन्नानि) भोजयतश्च [८. २२. ९]।
"हिरण्मयरज्ज्वादियुक्ते आयुधादीनां कोशस्थाने ,रमणसाधके रथे" [सायणः]।

२२. "इषं नो वोळ्हम् अश्विना" [८. ३५. ४–६] यज्ञं, हवं, स्तोमं, गिरः, अध्वरं सेवमानौ अश्विनौ इषं अन्नं प्रापयतः ।

२३. अस्मभ्यं भूषतं मरीलं न पिप्युषीरिषः [१०. १४३. ६]।

परिशिष्टम् ११

॥ वर्तिः ॥

ऋक्संहितायां "वर्तिः" इति पदम् अष्टाविंशतिकृत्वः श्रूयते। तत्रैकवर्ज्जं यज्ञान्तिमं [१०. १२२. ६] इतराणि सप्तविंशतिः आश्विनानि (अश्विनोः संबन्धे प्रयुक्तानि)।

तृतीये, चतुर्थे, नवमे च मण्डले वर्तिः इति पदं न श्रूयते।

(१) १. ३४. ४	(२) १. ९२. १६	(३) १. ११६. १८
(४) १. ११७. २	(५) १. ११९. ४	(६) १. १८३. ३
(७) १. १८४. ५	(८) २. ४१. ७	(९) ५. ७५. ७
(१०) ६. ४९. ५	(११) ६. ६२. ३	(१२) ६. ६२. १०
(१३) ६. ६३. २	(१४) ७. ४०. ५	(१५) ७. ६७. १०
(१६) ७. ६९. ५	(१७) ७. ६९. ८	(१८) ८. ९. ११
(१९) ८. ९. १८	(२०) ८. २२. १७	(२१) ८. २६. १४
(२२) ८. २६. १५	(२३) ८. ३५. ७	(२४) ८. ३५. ८
(२५) ८. ३५. ९	(२६) ८. ८७. ३	(२७) १०. ३९. १३
(२८) १०. १२२. ६		

वर्तिः।

वर्तनसाधनं गृहम् [१. ३४. ४]।

वर्तनाधिकरणं गृहम् [१. ११७. २]।

"येन गच्छथः सुकृतो दुरोणं (गृहम्) तेन नरा वर्तिरस्मभ्यं यातम्"

[१. ११७. २]।

गृहं यज्ञसम्बन्धि [१. १८४. ५]।

मार्गः तेन मार्गेणरथेन वा [२. ४१. ७]।

यज्ञगृहम् [५. ७५. ७]।

स्तोतृगृहम् [६. ४९. ५]।

मार्गं यजमानगृहं वा [७. ६९. ५]।

वर्तन्तेऽत्रेति वर्तिर्गृहम् [८. २२. १७]।

मार्गम् [८. ३५. ७]। मार्गम् [१०. ३९. १३] [सायणः]।

वर्तिः—वर्तन्या प्रसिद्धेन मार्गेण [१. ३४. ४] [स्कन्दः] ।

मार्गम् [१. ३४. ४] [वे. मा.] ।

तृतीयार्थे प्रथमैषा । वर्तन्या प्रसिद्धेन पथा । [१. ९२. १६ स्कन्दः] ।

कथं किमर्थं वा अश्विनौ वर्तिरायातः इति पर्यालोचनेन अश्विनोर्व्यापारः सुबोधो भवेत् ।

१. ३४. ४

त्रिर्वर्तिर्यातम्[1] । हिरण्यस्तूपस्य आङ्गिरसस्याऽयं अस्मिन् सूक्तेऽश्विनोः व्यापारस्य सर्वथा त्रित्वं श्रूयते । एवं वर्तिः त्रिः आगम्यते ।

सवनत्रयेण, लोकत्रयेण, प्रकाशस्य तारतम्येन येषां वा त्रिरागमनं स्यात् ।

१. ९२. १६

"अर्वाग् रथं समनसा नियच्छतम्" । समानमनस्कौ अश्विनौ वर्तिरायातः रथेन, येन वर्तिरासमन्तात् गोमत्, हिरण्यवत् च भवति ।

उषस्या गावः । सावित्रं हिरण्यम् । उषसः पश्चात् सविता उदेति । सूक्ते उत्तरे द्व्यृचे प्रशस्यं ज्योतिर्दिवि कृण्वन्तौ, ऊर्जम् आवहन्तौ, उषर्बुधो देवान् हिरण्ययमार्गेण अश्विनौ आवहतः (१. ९२. १७–१८) ।

१. ११६. १८.

दिवोदासाय (दिवोदासस्य) वर्तिः यदा अश्विनौ यातः तदा रयिमति तयोः रथे वृषभस्य शिंशुमारस्य युक्तौ भवतः ।

दिवोदासस्य वर्तिस्तत्र भवेत् यत्र (क्षितिजे) आगमनेन दिवं ज्योतिः आक्रमेत । मण्डलमधुना क्षितिजाद् अधः । अतः पृथिव्या अस्मिन् पार्श्वे सूर्योऽस्तं मियात्; तत्र अश्विनोः रथे वृषभो युक्तः । अस्मिन् पार्श्वे सूर्यः उज्जिगमिषुः तत्र अम्भस्तलेभ्यसाम् अपां प्रवर्तनात् तयोः तस्मिन्न् एव रथे जलचरो ग्राहः "शिंशुमारः" युक्तः ।

१. ११७. २

येन (रथेन) सुकृतो दुरोणं (गृहं) गच्छथः, तेन नरा नेतारौ अस्माकं वर्तिः यातम् । वर्तिः अतिक्रम्य दुरोणं प्राप्यते ।

"दुरोणे यज्ञगृहे" (सायणः) १. ६९. २ ।

"दूरं रोहणम्" > दुरोणम् (?) [मेरो] ।

१—"वर्ततेऽनेति वर्तिर्गृहम् । हृपिषिरुहिवृति" [उण् ५५८] इत्यादिना इप्रत्ययः । "सुपां सुलुक्..." [पा. ७. १. ३९] इति द्वितीयैकवचनस्य लु आदेशः ।" [सायणः १. ३४. ४] ।

"दुरोहणं रोहति स्वर्गो वै लोको दूरोहणम् ।"

"अतिथिः दुरोणसत्" [ऋ. सं ४. ४०. ५—ऐ. ब्रा. १८. ६]।

१.११९.४

"यासिष्टं वर्तिः वृषणा विजेन्यम् ।" अत्रागमनेन जयः, दिवोदासस्य अवनं, भुज्योः पितृप्राप्तिश्च भवति ।

१.१८३.३

"वर्तिः याथः तनयाय त्मने च "

१.१८४.५

"यातं वर्तिः तनयाय त्मने च ।" अत्र सूर्यस्य उदयः, मण्डलम् अपूर्णं (त्मने) पुरतः ज्योतिःप्रसरः ।

२. ४१. ७

"गोमत् अश्वावत्, नृपाय्यं" वर्तिः । अत्र वर्तिः न हिरण्यवत् । इदं सवितुः कालात् प्राक् । अत्र अश्विनौ "नासत्यौ रुद्रौ" च ।

५.७५.७

"तिरश्चिद् अर्यया परि वर्तिर्यातम् अदाभ्या ।" अहिंस्यौ अर्यौ (स्वामिनौ) अश्विनौ । अत्र अश्विनोः (मण्डलस्य) तिरश्चीना गतिः ।

६.४९.५

भारद्वाजस्यार्षं पञ्चदशर्चं वैश्वदेवम् । तत्रैषा आश्विनी ऋक् । अत्र उत्तरोऽर्धर्चः प्रथमे मण्डले श्रुतः (१. १८३. ३) । अश्विनोः रथः, येन तौ वर्तिः यासः, स सुवृत् हविष्मान् व्रतानि अनु च वर्तमानः ।

षष्ठे मण्डले (६. ४९. ५) अश्विनोः रथः मनसा (मनोव्यापारेण) युजानः (अश्वैः सम्प्रयुज्यमानः) विरुक्मान् (विशेषेण दीप्यमानः) । अतः स रथः वपुः (शरीरं-सूर्यमण्डलम् इति यावत्) छादयति (तेजसा) । तादृशेन रथेनाश्विनौ वर्तिर्याथः ।

"स मे वपुश्छदयद् अश्विनोर्यो रथो विरुक्मान् मनसा युजानः ।
तेन नरा नासत्येषयध्यै वर्तिर्याथस्तनयाय त्मने च ॥" ६.४९.५

६.६२.३

यस्मिन् पार्श्वे सूर्योऽस्तं याति तत्र वर्तिः "अरध्रम्" (असमृद्धम्) । अश्विनौ उदयस्थले धियः (स्तोतॄन् रश्मीन्) सातत्येन उन्नयतः । यः "व्यथिः" (हिंसकः तमोरूपः) तं "परि शयध्यै", (दीर्घनिद्रायै, कुरुतः) ।

६.६२.१०

"द्युमता नृवता रथेन अनर्वैः चक्रैः वर्तिः" अश्विनौ यातः । अत्र रथः दीप्तिमान् , रश्मिमान् । ज्योतींषि चक्रविम्बकानि प्रवर्तन्ते । मण्डलं न उदितम् । अस्तस्थले, तत्र पृथिव्यां मर्त्यानां निवासात् , तदवच्छिन्नमण्डलस्यापि मर्त्यतया कुमेरौ, अश्विनौ तिरोहितेन क्रोधेन मर्त्यस्य (मण्डलस्य) शीर्षाणि वृश्चतः ।

६.६३.२

इदानीम् अश्विनौ "रथम्" "वर्तिः" परियाथः । यत् (वर्तिः) सन्निकृष्टः विप्रकृष्टः वा शत्रुः न हिंस्यात् । अत्र सूर्यः सर्वथाऽस्तं याति, येन उदयस्थले (कुमेरौ) स्वप्नेन,दीर्घेण वा तमसा वृतो न भवति । मण्डलस्य षाण्मासिकोदयात् ।

७.४०.५

याविष्ठे मण्डले वर्तिः चतुः श्रूयते । एका संपूर्णा ऋक् आवृत्ता [७. ६७. १०; ७. ६९. ८] उभे एके । तत्र द्वितीयः पादः—

"याविष्टं वर्तिर् अश्विनाव् इरावत्" । चत्वारिंशं सूक्तं वैश्वदेवम् । तत्र पञ्चम्यामृचि अन्तिमः पादः—"याविष्टं वर्तिरश्विनाविरावत् ।"

अस्यां विष्णोः स्तुतिः । इतरे देवाः विष्णोः शाखा इव । रुद्रः रुद्रियं महत्त्वं विन्दते । अश्विनौ च "इरावत्" (हविर्लक्षणयुक्तं) "वर्तिः" (गृहम्) प्राप्नुतः ।

७.६९.५

"रथो युजानः परि याति वर्तिः ।" अत्रोषसा तमः प्रकाशितम् । रथः वर्तिः परियाति । यज्ञश्च प्रवर्तते । कुमेरौ मण्डलस्य उदयात् प्राक् उषसः ज्योतिः दिवं परिवर्तते । अत्र अश्विनोः हिरण्ययो रथः द्यां च पृथिवीं च बाधमानो भवति । [७. ६९. १] ।

८.९.११

तोकाय तनयाय अश्विनौ वर्तिर्यातः । यथाश्विनौ

"छर्दिष्पा" गृहस्य पालकौ

"परस्पा" परस्ताद् अस्तस्थले पालकौ

"अमत्या" रश्मीनां मन्तव्यदेवानां पालकौ

"तनूपा" मण्डलं वर्धयन्तौ उदयस्थले

८.९.१८

नृपाय्यं वर्तिः "नृभिर्नेतृभिः ऋत्विग्भिः पालनीयं यज्ञगृहम्" [सायणः] । अत्र उषाः सूर्येण सम्यग् दीप्यते । अश्विनोः रथो वर्तिर्याति यत्र रश्मयः शीर्णं मिमते ।

८.२२.१७

वर्तिः गोमत्, अश्ववत्, हिरण्यवत् च । अश्विनौ "मधुपातमौ"

८.२६.१५

नृपाय्यं वर्तिः । "विपुद्रुहा" (शरौ) इव अश्विनौ "यज्ञम् ऊहथुः" (अवैकल्येन समाप्तिं प्रापयतः) ।

८.३५.७-९

"त्रिर्वर्तिर्यातमश्विना ।" [१. ३४. ४] । अत्र अश्विनौ "सोमं सुतं महिषेवावपगच्छथः ।" उदकस्यान्तं (तमसः पारं) प्राप्नुतः हारिद्रवौ इव । हंसौ इव अध्वगौ इव पततः । श्येनाविव हविर्ग्रहणाय पततः ।

८.८७.३

वर्तिः उपयातः । प्रियमेधसः वृक्तबर्हिषः दिविष्टिषु (अह्नाम् आगमनेषु प्रातः कालेषु) यज्ञं (देवैः) जुष्टं प्राप्नुतः अश्विनौ । अत्राश्विनोः सर्वाण्यवनानि सिध्यन्ति ।

१०.३९.१३

"ता वर्तिर्यातं जयुषा विपर्वतम्" । अत्राश्विनौ मार्गं गच्छतः पर्वतं प्रति जयशीलेन रथेन । अत्र "वि" इत्युपसर्गेण गमनस्य वैविध्यं प्रतीयते ।

दाशतय्यां "वर्तिः" इति पदम् इदम् अश्विविषयकम् अन्तिमम् । अत्र "वर्तिः" गम्यते जयुषा रथेन ।

पर्वतशब्देन मेरौ सार्धत्रयोविंशत्यंशान् यावत् उपरि गमनं प्रतीयते ।

अत्र सुमेरौ क्षितिजे उदेतुं प्रवर्तमानं मण्डलं त्रिभिश्चतुर्भिर्वा परिक्रमैः पूर्णम् उदेति । यावता समग्रं मण्डलं क्षितिजम् उपर्युपरि नागच्छति, तावता वृत्तेन वर्तनात् वर्तिकेत्युच्यते, या च वृकेण तमसा ग्रसिता भवति । मण्डलस्य पूर्णतया उदयेनैव वर्तिकायाः मोचनं भवति । अत एवास्यामृचि उत्तरार्धर्चे वर्तिकायाः मोचनं श्रूयते । सूर्योदयात् प्राक् तमसि लीनः शयुरित्युच्यते । तत्रोषस आगमनेन तेजोरूपं पयः क्षरितं भवति । अत एव पूर्वमश्विनौ, तत उषाः, ततः सूर्यः इति क्रमः उदयस्थले । तथा चेयमृक् ।

"ता वर्तिर्यातं जयुषा वि पर्वतम् अपिन्वतं शयवे धेनुमश्विना ।
वृकस्य चिद् वर्तिकाम् अन्तरास्याद् युवं शचीभिर्ग्रसिताम् अमुञ्चतम् ।"
[१०. ३९. १३]

१०.१२२.६

घृतं क्षरन्नग्निः त्रीणि सवनानि दीप्यमानः वर्तिर्यज्ञं[१] परियन् सुक्रतुरिवाचरति।

१—अवर्तिम् । दारिद्र्यम् [सायणः १. ११८. २]

"अग्ने घृतस्नुस्त्रिर्ऋतानि दीद्यद् वर्तिर्यज्ञं परियन्त्सुक्रतूयसे ।"

"घृतस्नुः घृतेन आज्येन प्रस्नातः स्नातेरौणादिकः कुप्रत्ययः । यद् वा घृतो दीप्तः स्नुः सानुः समुच्छ्रितो ज्वालासमूहो यस्य स तथोक्तः । पदादिषु मांस्पृत्स्नू-नाम् उपसंख्यानमिति सानु शब्दस्य स्नुभावः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वम् ईदृशस्त्वं त्रिः त्रिवारमावृत्तानि ऋतानि सत्यभूतानि पृथिव्यादीनि त्रीणि स्थानानि यद्वा गार्हपत्यादीनि स्थानानि दीद्यद् दीपयन् वर्तिः सर्वं यज्ञगृहं सर्वमनुष्ठीयमानं यागं च परियन् परितो गच्छन् तत्तद् यज्ञगृहं तं तं यज्ञं च प्राप्नुवन् सुक्रतूयसे । सुक्रतुः यजमानः । स इवाचरसि ।" [इ. सायणः]

घृतस्नुः । घृतस्नो ! (अग्ने !) [५. २६. २]

घृतस्य प्रेरक । यद्वा घृतेन स्नात ।

"घृतस्नुना हव्येन" ६. ५२. ८ घृतप्रस्रवणेन हविषा ।

परिशिष्टम्–१२

॥ सोमः ॥

"सोमो वधूयुरभवद् अश्विनास्ताम् उभा वरा ।" [ऋ. सं. १०. ८५. ९]

सोमस्य स्वरूपनिर्णयो दुष्करः ।

वायोः पानं सोमः । सोमस्य सूर्यया सह विवाहे वहतुः सहस्रं, यं च अश्विनौ रासभरथेन जिग्यतुः । जितसहस्रेण रासभयुक्तेन रथेन अश्विनौ सूर्यां सोमं प्रति नयतः ।

सूर्यायाः सोमेन सह विवाहः अश्विनोः सोमपाने परिणमति ।

अश्विनोः सूर्यया सह तादात्म्यमेव सोमस्य रूपम् । स च सोमः न शरीरात्मना द्रष्टुं शक्यते । अत एव श्रूयते—

"कं सोमं पपथुरश्विना" [१. ४७. १०]

"सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति कश्चन ।" [१०. ८५. ३]

अत्र दृष्टान्तः पङ्कजविकसनम् । प्रातर्यथा सूर्यप्रकाशस्पर्शेन पङ्कजं विकसति तथा पृथिव्यां चराचरेषु पदार्थेषु ओषधिवनस्पत्यादिषु द्विपदि चतुष्पदि च गोः, अश्वस्य, हिरण्यस्य, इषः, ऊर्जः, पयसः वा अभिव्यक्तिः अश्विनोरागमनेन संभवति । तमसि लीनाः पदार्थाः अभिव्यक्ता भवन्ति अश्विनोरागमनेन सूर्यरश्मिभिः । पदार्थानाम् अभिव्यक्तिरेव सोमस्य सवः । इयमभिव्यक्तिः अश्विभ्यां ज्योतिष उन्नयनेन भवति । अभिव्यञ्जनं प्रति प्रकाशस्य नयनमेव सूर्याया रथे वहनम् ।

प्रकाशेन तमो द्रवति । अतः श्रूयते—

"सिन्धूनां पदे वसु" [उषसः प्रकाशः]

"दिव इन्दवः" [१. ४६. ९]

"तेन नासत्या गतं रथेन सूर्यत्वचा" [१. ४७. ९]

हिरण्यवर्तनी सूर्यावसू अश्विनौ । ज्योतिष्मतीं तमस्तिर इट् अश्विनौ प्रार्थ्येते । सूर्येण उषसा च सजोषसौ तौ सोमं पिबतः ।

[ऋ. सं. १. ४६. ६; ९२. १८; ७. ६८. ३; ८. ३५. १–३]

परिशिष्टम्–१३

प्रकीर्णम् ।

१

मत्स्यपुराणे तारकोपाख्याने [अध्यायः १४७]

चन्द्रादित्यावश्विनौ च चतुरङ्गबलान्वितौ । [८६]

हेमपिङ्गध्वजौ देवौ चन्द्रार्काभितद्युती [९६]

कुम्भेन रत्नचित्रेण केयूरमिथुनयोरभूत् ॥ [९७]

वामनस्य सर्वदेवमये रूपे—

अश्विनौ श्रवणे तस्य, माता वायुर्महात्मनः । [म. पु. अ. २४५, श्लो. ५६

माद्रवत्यां तु जनितावश्विभ्यामिति शुश्रुमः ।

नकुलः सहदेवश्च रूपशीलगुणान्वितौ ॥ [म. पु. ५०. ५०]

साम्प्रतं तत् प्रवक्ष्यामि यद् वैवस्वतमुच्यते ॥ [२६]

अत्रिश्चैव वसिष्ठश्च कश्यपो गौतमस्तथा ।

भरद्वाजस्तथा योगी विश्वामित्रः प्रतापवान् ॥ [२७]

जमदग्निश्च सप्तैते साम्प्रतं ये महर्षयः ।

कृत्वा धर्मव्यवस्थानं प्रयान्ति परमं पदम् ॥ [२८]

साध्या विश्वे च रुद्राश्च मरुतो वसवोऽश्विनौ ।

आदित्याश्च सुरास्तद्वत् सप्त देवगणाः स्मृताः ॥ [२९]

[म. पु. ९. २६–२९]

२

विष्णुधर्मोत्तरमहापुराणे [खण्डः ३, अध्यायः ७९]

वज्र उवाच ।

नासत्ययोर्ममाचक्ष्व रूपनिर्माणमच्युत ।

नासत्यरूपयोश्चैव त्वं हि सर्वविद् उच्यते ॥ [१]

मार्कण्डेय उवाच ।

पद्मपत्रसवर्णाभौ पद्मपत्रसमाम्बरौ ।

द्विभुजौ देवभिषजौ कर्तव्यौ देवसंयुतौ ॥ [२]

सर्वाभरणसम्पन्नौ विशेषाच्चारुलोचनौ ।

तयोरौषधयः कार्या दिव्या दक्षिणहस्तयोः ॥ [३]

वामयोः पुस्तकौ कार्य्यौ दर्शनीयौ तथा द्विज ।
एकस्य दक्षिणे पार्श्वे वामे चान्यस्य यादव ॥ [४]
नारीयुग्मं तु कर्तव्यं सुरूपं चारुदर्शनम् ।
तयोश्च नामनी प्रोक्ते रूपसंपत्तथाकृतिः ॥ [५]
मधूकपुष्पसंकाशा रूपसंपत्प्रकीर्तिता ।
आकृतिः कथिता लोके शरकाण्डनिभा तथा ॥
न तु भाण्डकरे कार्ये चन्द्रशुक्लाम्बरे तथा ॥ [६]
नासत्ययो रूपमिदं तवोक्तं मयाद्य मुख्यं यदुवंशमुख्य ।
ध्यानेन सर्वामयनाशकारि संपूजितं वा भुवि मानवानाम् ॥ [७]

नासत्ययोरावाहनमन्त्रः—

आवाहयाम्यहं देवौ नासत्यौ सूर्यनन्दनौ ।
आगच्छेताम् महाभागौ वरदौ चाश्विनौ शुभौ ॥
[वि. ध. पु. ख. ३, अ. १०३, श्लो. ४] ।

चन्द्रमण्डलदर्शनम्—

त्वद्बिम्बे निर्मले पृथ्वी सशैलवनकानना । [१६]
शशाकृतिः सदा दृश्या शशलक्ष्मासि चानघ ।
तेनैव कारणेन त्वम् उच्यसे मृगलाञ्छनः ॥ [१७]
तोयसारमयं पिण्डं पितॄणां धाममव्ययम् ॥ [४]
प्रजानां भावनं सर्वं चाधारं जगतामपि ।
शरीरिणां शरीरेषु रसं पञ्चात्मकं स्मृतम् ॥ [५]
आलम्बकं क्लेदकं च तथा चैवावबोधकम् ।
संधायकं तर्पकं च देहिनां देहगोचरम् ॥ [६]
मनः सर्वेन्द्रियाणां च सर्वेषां नायकं तथा ।
ओषधीशं जगद्योनिममृताधारमव्ययम् ॥ [७]
[वि. ध. पु. १. २९] ।

आदित्यदर्शनम्—

आगारं [आधारं ?] सर्वभूतानां जठरस्थं हुताशनम् । [३]
पञ्चधावस्थितं देहे सर्वेषां प्राणिनां स्मृतः ।
आलोचकः पाचकश्च रोचको रञ्जकस्तथा ॥ [४]
भ्राजकश्च तथा देवः सर्वेषां प्राणिनां तथा ।
यन्मयं देहिनां चक्षुर्यश्चक्षुर्दक्षिणस्तथा ॥ [५]

स वै देवातिदेवस्य वासुदेवस्य कीर्तितः ॥ [५]

[वि. ध. पु. १. ३०] ।

अग्नीषोममयं चैतज्जगदेतत् प्रकीर्तितम् ।

अग्नीषोमौ जगन्नाथो देवदेवो जनार्दनः ॥ [वि.ध.पु. १. २९.१४] ।

३

काश्यपशिल्परत्ने श्रीकुमारप्रणीते अष्टचत्वारिंशः पटलः ।

तत्र अश्विनोर्लक्षणम् [पटल. ४८, श्लो. २६–३३]

भद्रसिंहासनासीनावश्विनौ विश्वरूपिणौ ॥ [२६]

दाडिमिपुष्पसंकाशावरुणौ सोपपीनकौ (सोपवीतकौ ?) ।

कुङ्कुमरक्तोत्पलाढ्यौ च कमण्डलु सुधारिणौ ॥ [२७]

नासत्यौ दस्रनामानौ चूडामुकुटधारिणौ ।

करद्वयसमायुक्तौ अम्भूषणविभूषितौ ॥ [२८]

अभयं दक्षिणे हस्ते पुस्तकं वामहस्तके ।

लम्बितौ दक्षिणौ पादौ वाममुत्कुटिकासनौ ॥ [२९]

देवानां भिषजावेतौ द्वौ चिकित्साविधायकौ ।

तयोः पार्श्वद्वये विप्र....वामे च...दक्षिणक्रमात् ॥[३०]

धृतिः सञ्जीवनी चैव अश्विनौ चामरौ धृतौ ।

पृष्ठे विशल्यकरणी द्वे स्थितौ [?] ॥ [३१]

वामे धन्वन्तरिश्चैव वामात्रेयस्तथैव च ।

शीतरश्मिनिभावेतौ [?] कृष्णवाससौ ॥ [३२]

खड्गखेटकसंयुक्तौ सर्वाभरणभूषितौ ।

अश्विनौ तु समाख्यातौ वह्निः पूर्ववद् एव हि ॥ [३३]

तत्र देवताध्यानप्रकरणे—[अध्यायः २९, श्लो. ९१–९३] ।

अथाश्विनौ—

एकसिंहासनासीनावश्विनावश्वरूपिणौ ।

दाडिमीपुष्पसंकाशावुभौ तौ सोपवीतकौ ॥ [९१]

कुङ्कुमरक्तोत्पलाढ्यौ च पीतमम्बरधारिणौ ।

करद्वयसमायुक्तौ श्रीभूषणविभूषितौ ॥ [९२]

अभयं दक्षिणे हस्ते वरदं वामहस्तके ।

लम्बितौ दक्षिणं पादं वाममुत्कुटिकासनौ ॥ [९३]

४

अश्विनीकुमारयोः मूर्ती ।

वामपार्श्वस्थस्य वामहस्ते किंचिद् धृतमस्ति । स एव सम्मुखीनः । मुद्रहस्तो दक्षिण उभयोः—अङ्गुष्ठतर्जन्योः स्पर्शः ।

दक्षिणपार्श्वस्थस्य वामहस्तः कट्या अधस्ताद् वामोरौ निहितः ।

"यांची मूर्ति पुढीलप्रमाणे करावी, असें विष्णुधर्मोत्तरपुराणांत सांगितले आहे—कमलपत्रप्रमाणे कान्ति, द्विभुज, सुन्दर डोळे यांचे व सर्वाभरणसम्पन्न, अशा त्यांच्या मूर्ति बनवाव्या । त्यांच्या उजव्या हतांत पुस्तक असावें । पार्श्वभागीं एक नारीयुग्म निर्माण करावें ।"

मूर्तेरधस्तात्—"अश्विनीकुमार"

"आनन्दविकतनच्या सौजन्याने ।"

[भारतीयसंस्कृतिकोशे महाराष्ट्रीभाषायाम्—पृष्ठ. ३०९]

५

उपमन्युकृताऽश्विनोः स्तुतिः "वाग्भिर्ऋग्भिः ।"

प्रपूर्वगौ पूर्वजौ चित्रभानू गिरा वाऽऽशंसामि तपसा ह्यनन्तौ ।
दिव्यौ सुपर्णौ विरजौ विमानावधिक्षिपन्तौ भुवनानि विश्वा ॥
हिरण्मयौ शकुनी सांपरायौ नासत्यदस्रौ सुनसौ वैजयन्तौ ।
शुक्लं वयन्तौ तरसा सुवेमावभिव्ययन्तावसितं विवस्वतः ॥
ग्रस्तां सुपर्णस्य बलेन वर्तिकाममुञ्चतामश्विनौ सौभगाय ।
तावत्सुवृत्तावनमन्तमायया वसत्तमा गा अरुणा उदावहन् ॥
षष्टिश्च गावस्त्रिशताश्च धेनव एकं वत्सं सुवते तं दुहन्ति ।
नानागोष्ठा विहिता एकदोहनास्तावश्विनौ दुहतो घर्ममुक्थ्यम् ॥
एकां नाभिं सप्तशता अराः श्रिताः प्रधिष्वन्या विंशतिरर्पिता अराः ।
अनेमि चक्रं परिवर्ततेऽजरं मायाश्विनौ समनक्ति चर्षणी ॥
एकं चक्रं वर्तते द्वादशारं षण्णाभिमेकाक्षमृतस्य धारणम् ।
यस्मिन् देवा अधि विश्वे विषक्तास्तावश्विनौ मुञ्चतं मा विषीदतम् ॥
अश्विनाविन्दुममृतं वृत्तभूयौ तिरोधत्तामश्विनौ दासपत्नी ।
हित्वा गिरिमश्विनौ गा मुदा चरन्तौ तद्वृष्टिमह्ना प्रस्थितौ बलस्य ॥
युवां दिशो जनयथो दशाग्रे समानं मूर्ध्नि रथयानं वियन्ति ।
तासां यातमृषयोऽनु प्रयान्ति देवा मनुष्याः क्षितिमाचरन्ति ॥
युवां वर्णान् विकुरुथो विश्वरूपांस्तेऽधिक्षियन्ते भुवनानि विश्वा ।
ते भानवोऽप्यनुसृताश्चरन्ति देवा मनुष्याः क्षितिमाचरन्ति ॥
तौ नासत्यावश्विनौ वां महेऽहं स्रजं च यां बिभृथः पुष्करस्य ।
तौ नासत्यावमृतावृतावृधावृते देवास्तत् प्रपदे न सूते ॥

मुखेन गर्भं लभतां युवानौ गतासुरेतत् प्रपदेन सूते ।
सद्यो जातो मातरमत्ति गर्भस्तावश्विनौ मुञ्चथो जीवसे गाः ॥
स्तोतुं न शक्नोमि गुणैर्भवन्तौ चक्षुर्विहीनः पथि सम्प्रमोहः ।
दुर्गेऽहमस्मिन् पतितोऽस्मि कूपे युवां शरण्यौ शरणं प्रपद्ये ॥
इत्येवं तेनाभिष्टुतावश्विनावाजग्मतुः ।
आहतुश्चैनम् । प्रीतौ स्वः । एष तेऽपूपः ।
अशानैनम् इति ।"

[म. भा. आदि. ३. ५७–६१] ।

ग्रन्थसूचिः

१. ऋग्वेदसंहिता—१ वैदिकसंशोधनमण्डलेनप्रकाशिता ।
२ विश्वेश्वरानन्दभारतभारतीग्रन्थमाला ।

२. सामवेदः ।

३. यजुर्वेदः—१. तैत्तिरीयसंहिता सायणभाष्योपेता । [आनन्दाश्रममुद्रणालयः]
२. वाजसनेयिसंहिता उवट-महीधर-भाष्योपेता ।

४. अथर्ववेदः—शौनकीयशाखा

५. दैवत-संहिता —द्वितीयोभागः स्वाध्यायमण्डल, औंध ।

६. ऐयरेयब्राह्मणम् ।

७. शतपथब्राह्मणम् । (माध्यन्दिनशाखीयम्)

८. तैत्तिरीयारण्यके प्रथमः प्रश्नः ।

९. निरुक्तं यास्कस्य ।

१०. शौनकीयबृहद्देवता ।

११. बृहदारण्यकोपनिषत् ।

१२. आश्वलायनश्रौतसूत्रम् ।

१३. न्यायमञ्जरी द्याद्विवेदस्य ।

१४. महाभारतम् गीताप्रेस, गोरखपुर ।

१५. "वाल्मीकिरामायणम्" Mylapore, Madras 1958.

१६. पुराणानि विष्णु-वायु-ब्रह्म-मत्स्य-विष्णुधर्मोत्तर-भागवतानि ।

१७. वेदार्थविचारः । महामहोपाध्यायश्रीसीतारामशास्त्रिकृतः ।
१८८२ शकवत्सरे कालिकातानगर्यां प्रकाशितः ।

१८. महर्षिकुलवैभवम् । मधुसूदन ओझा विरचितम् । जोधपुरं, राजस्थानम् ।

१९. शिल्परत्नं श्रीकुमाराणाम् । के. साम्बशिवशास्त्रिणा संशोधितम्, अनन्त-शयननगरे ।

२०. काश्यपशिल्पम् । आनन्दाश्रमग्रन्थावलिः ।

२१. "वैदिककोषः"—हंसराजेन संगृहीतः ।
दयानन्दमहाविद्यालयः, लाहोर १९२७ ।

२२. "संस्कृतसाहित्येतिहासः" आचार्यः श्रीरामचन्द्रमिश्रः ।
चौखम्बा विद्याभवन, वाराणसी—१.

२३. "संस्कृतसाहित्यविमर्शः" आचार्यः द्विजेन्द्रनाथः । भारतीप्रतिष्ठानम् । मय-राष्ट्रनगरम् (मेरठ) उत्तरप्रदेशः ।
२४. मन्त्रतत्त्वप्रकाशः । श्रीचिन्मयस्वामिशास्त्रिमहोदयेन विरचितः । मद्रास् ला जर्नल् प्रेस १९५१ ।
२५. वैदिकदेवशास्त्र । डा. सूर्यकान्तेनाऽनूदितम् "वैदिक्-मैथोलोजी" इत्याङ्ग्लभाषाग्रन्थस्य, स्वोपज्ञभूमिकासहितं—हिन्दीभाषायाम् ।
२६. आर्यों का आदिदेश । डा. संपूर्णानन्दः, हिन्दीभाषायाम् ।
२७. भारतीयसंस्कृतिकोशः । मराठी १९६२ ।

BIBLIOGRAPHY

(In addition to the one given above in Sanskrit)

1. Ancient India : Its Language and Religions [pp. 49-50]—H. Oldenberg. Chicago (1898.)
2. "The Arctic Home in the Vedas." Bal Gangadhar Tilak. Messrs. Tilak Bros. Poona City (1925).
3. "The Brhad Devatā" attributed to 'Saunaka. Text, Translation and Notes. A. A. Macdonnell, H. O. S. Reprint, Parts I and II, Motilal Banarsidass.
4. A Critical study of the Rg Veda—Dr. Deo Prakash Patanjal Shastri. Patanjal Publications, New Delhi.
5. A Dictionary of Greek and Roman Biography and Mythology ed. by William Smith, London (1880) [pp. 1052–1054]
6. A Dictionary of Symbols–Cirlot. Trans from Spanish by Jack Sage, Routledge and Kegan Paul, London.
7. A Dictionary of Classical Mythology— J. E. Zimmerman [Harper and Row].
8. Dictionary of All Scriptures and Mythology G. A. Gaskell, Newyork (1960).

9. The Etymologies of Yaska—Siddheswar Varma V. I. Series. 5 [1953].

10. Everyman's Dictionary, non-Classical Mythology, compiled by Egerton Sykes. Dent and Dutton.

11. A Hand-book of Greek Mythology. Pt. II., ch. VIII. pp. 230-231 H. J. Rose, M. A. [5th edition-1953].

12. History of Dharma Sastra—Pandurang Vaman Kane, B. O. R. I., Poona. Vol. II., Pt. I., p. 435, 439, 440; Pt. II., ch. XXXIII. pp. 1147–1151; 1162–1163.

13. A History of Indian Literature Vol. I, Pt. I.—M. Winternitz, Ph. D., University of Calcutta.

14. Hymns from the Rg Veda—A.A. Macdonnel. Y. M. C. A., Calcutta.

15. Hymns of the Rg. Veda—Charlotte Manning, note on p. 15; p. 16-pub-Susil Gupta Ltd., Calcutta.

16. Inspired Writings of Hinduism—Theodre Goldstucker Calcutta [1952].

17. Introduction to "Asya Vāma Hymn"—Dr. C. Kunhan Raja.

18. Modern Mythology—Lang (Andrews) (1897). pp. 68–69; 61; 135.

19. Myth, Ritual and Religion—Andrew Lang Vol I. ch. I. "Systems of Mythology" pp. 5–7; 124–127.

20. The Mythology of All Races :—"Indian and Iranian"—A. B. Keith, Vol, VI. pp. 30–32.
"Egyptian"—W. Max Muller. Ph. D., Vol. XII. ch. 11. pp. 23–32.

21. The Purana Index Vol. I.—V. R. Ramachandra Dikshitar.

22. Rg Veda Brāhmanas; Aitareya and Kausitaki Trans. A. B. Keith, H. O. S. Vol. 25 (1920) [ch. XVIII. 4].

23. Rg Veda Mandala VII. Trans. H. E. Velankar.

24. Religion and Philosophy of the Veda and Upanishads. A. B. Keith, H. O. S. Vol. 31 & 32.

25. Religion of the Veda—Bloomfild.

26. Sacred Books of the East. Vol. XLIII, Pt IV, p. 28 'S. B. VIII. 2. 1. 11; 12; 14.

27. Sāma Veda. Trans The Rev. J. Stevenson D. D.

28. 'Satapatha Brāhmana Vol. I., pp. 221—223. Dr. Ratna Kumari Publications. Series No. I. New Delhi [1967].

29. The Secret of the Veda. [Vol. 10] Sri Aurobindo [pp. 29-30; 75-78; 316, 318].

30. Siddha Bharati—Part I. V. V. R. Institute.

31. Sarup Bharati—Vishweshwaranand Pub. Series. 6. pp. 81—83.

32. Soma in the Legends—Dr. B. H. Kapadia.

33. Some observations on the Relations between "Gods" and "Powers" in the Veda.—J. Gonda (Gravenhage).

34. The science of the Vedas is the science of Man. C. M. Srinivasan, pp. 59—60.

35. Sparks from the Vedic Fire—V. S. Agarwala.

36. Vedas—Dr. C. Kunhan Raja, Waltair [1957] p. 16; 18; 27—30.

37. Veda of the Black Yajus Shool. Trans. A. B. Keith [1914] VI. 4. 9 .

38. Vedic Index of Names and Subjects, Vols. I & II. A.A. Macdonell & A. Berriedale Keith, Motilal Banarsidass.

39. Vedic Lectures : Proceedings of the Summer School of Vedic Studies. V. S. Agarwala.

40. The Vedic Mythology—A. A. Macdonell. Indological Book House, Varanasi.

41. Vedic Selections—Dr. K. C. Chatterjee, Calcutta University.

Periodicals :

1. Annals of the Bhandarkar Oriental Institute.
2. Indian Historical Quarterly, Calcutta. Vol XXVI Dec. 1950, pp. 320–324.
3. Journal of the Royal Asiatic Society of Great Britain and Ireland. New Series. Vol. II (1866). Art. I. p. 0.
   ibid. 16, 1884 Art. XVIII. pp. 381–399.
4. Journal of the American Oriental Society.
5. Journal of the Bombay University.
6. Journal of the Bombay Branch of the Royal Asiatic Society.
7. The Mythic Society's Quarterly Journal.
8. Poona Orientalist.
9. Proceedings and Transactions of A. I. O. C.
10. Select Papers of All India Oriental Conference.
11. Siddheswar Verma Commemoration Volume (1950).
12. Woolner Commemoration Volume Lahore (1940).

ग्रन्थस्थकतिपयशब्दानां सूची

ग्रन्थस्थाः केचन द्रष्टव्या मन्त्राः

Statement of Candidate as Required by vide Clause 9 of The Regulations for Doctor of Philosophy (Ph. D.) Under Section 25 (K) of The Dibrugarh University act 1965.

Most of the modern and ancient theories on A'svins have been studied and the theory of Yāska has been well accepted.

The Ā'svina hymns and Ṛks of the Ṛg Veda have been thoroughly investigated in finding out the origin, form, nature, functions and relation with other gods of the A'svins.

The Yajur Veda and the Atharva Veda, the 'Satapatha and the Aitareya Brāhmaṇas, the Nirukta and the Bṛhad Devatā, and the Taittirīya Āraṇyaka have been searched to find out the sacrifical, anatomical, medicinal and esoteric aspects of the A'svins. Their relations with Savitṛ, Pūṣan, Indra, Saraswatī, Sūrya and Soma are well observed.

The origin of the A'svins enunciated in the Purāṇas has been traced to the Ṛg veda with a synthetic approach.

In dealing with the solar myth defect in Sri B. G. Tilak's Arctic Home Theory has been pointed out.

The observations will give joyous surprise to the traditional Indian scholars and will make the Western scholars revise their divisive analytical approach to the Ṛg veda Text; for it is held that Vedas are eternal and revealed, and that the Ṛg veda Text is as indivisible as the human body.

The Greek Dios Kouroi or the two sons of the Lettic

God cannot be accepted as the prototype of the A'svins. The Avesta cannot help in determining the age of the Rg Veda.

Here there is an approach to realise the real characteristics af the A'svins The fundamental twinness in the universe should ultimately merge into oneness as the twin "Day" and "Night" merge in the "Sun".

The method is to follow the solar year with all its potentialities in relation to the earth. The human body, to wit is pervaded by the A'svins from outside through "Day" and "Night", and from inside through matter (रस) and energy (ज्योतिस्)

The A'svins ride on the air put into motion through heat caused by light or sound. This heat creates light to the eye, but sound to the ear.

The human tongue is a true representation of the A'svins, for the tongne has a two-fold function. It cures and nourishes the human body through food (रस) and removes ignorance through speech (ज्योतिस्). And the A'svins are said to pervade with these two properties, one A'svin with "rasa" and the other with "jyotis".

The all pervading motion of the A'svins can be realised in the "Cleaning motion" and the "recreative nourishment".

Objects manifest out of darkness, as if out of void, with the spread and growth of light. Similarly the play of sound and light shapes and reshapes the objects.

Until one observes the manifested objects in their air-manifest form, one cannot have any approach to the A'svins, one cannot have a vision of the golden-hued and sun-rays-cloaked car of the A'svins.

The A'svins may be associated with the Prakṛti–Puruṣa theory of the Sāṁkhyas. Their twinness and their mutually inseparable individualities lead to the Indian Yoga system.

From the temporal aspect one can observe that the period of ten (to twelve) months usually taken in the formation of the embryo, in pregnancy and birth tallies with the period taken in the annual setting and rising of the sun in the polar region. Seasonal climatic changes on the earth caused by the sun and the moon are to be attributed to the functions of the A'svins.

A'svins fundamentally represent the starting point of evolution. So they are said to be born of nostrils, indicating motion, the flowing wind, comprising the matter and the flow. By the flow the wind–matter transforms, shapes itself and takes forms.

The function of the A'svins is represented symbolically in the bringing up of the sun from the ocean of darkness. Hence A'svins' function is repeated annually without any break. Their car at one yoking moves through the seven flows spreading over the five regions of the three worlds in the same day.

Incidentally I have also dealt with certain properties like Ūrk, Vāja, Madhu, Soma, etc. [Not included in this edition.]

Considering the approach and the method, and the details of studies and investigations indicated above, it is felt that the present work contributes to advancement of Vedic knowledge and that it will pioneer intensive research on the subject of the thesis.

April, 28, 1969 T. K. Krishnaswami Aiyar

शोधाः

[मात्राभेदोऽनुस्वारलोपश्च सोढव्यौ]

पृष्ठं	पङ्क्तिः	अशुद्धं	शुद्धम्
१	६ [निवेदनम्]	राष्ट्रीय	राष्ट्रिय
४	२०	–भिन्नो	–भिन्नौ
१३	१३	तव	तत्र
१४	११	–म्नेव	–म्नेन
३४	७	प्रसह्यमानो	प्रसह्यानो
४०	७	हवं	एवं
४१	११	आवहनीयः	आहवनीयः
५०	१७	समद्रः	समुद्रः
५१	८	दीक्ष्ण	तीक्ष्ण
५५	९	-शिंसुमा-	-शिंशुमा-
६०	१	अघतम्	अघतम्
६०	१३	ताप	तापं
६१	१०	गर्भं	गर्भँ
६२	१९	८.२२.२.	८.१२.२
६५	१९	शिशव:	शिशवः
६६	१२	१.१६१	१.११६.१
६६	२३	विदु	विदुः
९२	१२	गुह	गुहं
१०३	२७	पदार्थे:	पदार्थैः
१४६	१९	पवित्रण	पवित्रेण
१५२	२४	तद्धिवना	तद्दिवना
१५७	१७	पार्श्वे	पार्श्वे
१५९	९	वा	वां
१६७	३	त्यक्ताम्	त्याज्यताम्
१७१	३	संक्षेपे	संक्षेपेण
१७४	१८	अथा	अथ
१८०	२७	सती	सतीः

पृष्ठं	पङ्क्तिः	अशुद्धं	शुद्धम्
१८२	५	वाहन	वाहनम्
१८३	५	द्विदेत्य	द्विदेवत्य
१८३	७	युग्मे नये	युग्मेन ये
१८३	९	तत अश्विनौ	ततोऽश्विनौ
१८६	३	सत्राब	रात्राव
१८७	२६	–पूतौ	–पूतो
१८८	२२	–क्रामस्तस्य	–क्रामंस्तस्य
१८८	२२	अवाचीन	अवाचीनं
१८९	६	अमुष्य	अमुष्यै
१८९	८	–स्रजो	स्रजौ
१९३	१९	एतै	एते
१९६	५	–सुतौ योऽसो	सुतो योऽसौ
१९९	२९	सरिदद्रूपा	सरिद्रूपा
२०१	१३	विवस्वन्तं भ्रमिमारोप्य	विवस्वन्तं
२०५	१२	मैथुने	मैथुने
२०६	१६	श्वात्रि	श्वात्रि
२१३	२४	विष्णुयमो	विष्णुर्यमो
२१४	२७	निहन्तु	निहन्तुं
२१९	१२	सामा	सीमा
२२५	११	शब्दस्यार्यो	शब्दस्यार्थो
२३०	१४	सप्तवघ्र:	सप्तवध्रे:
२३४	६	वशिष्ठ	वसिष्ठ
२३६	१२	–शय	संशय
२३७	२४	आदित्य	आदित्यं
२४८	९	अत्रं	अत्र
२४९	२५	उषस:	उषसा
२४९	२०	नियमन	नियमनं
२५२	२०	सू य	सूरय:
२५२	२२	रथश्व	रथश्व
.२	२३	द्रवदश्व:	द्रवदश्वः
१७	८	यैव:	यैव

पृष्ठं	पङ्क्तिः	अशुद्धं	शुद्धम्
२६१	४	हे	हे
२७७	२	अह	अहं
२७८	२	बुहपु	बहुपु
२८१	२७	तान्तयेतानि	तान्येतानि
२८१	२०	वारितो	वारितो
२८४	२	उन्नीतो	उन्नीतो
२८४	१०	भिनन्ती	भिनन्ती
२८४	११	पिलुमतीम्	पिलुमतीम्
२८४	२२	—र्व्या	पूर्व्या
२८४	२४	ओभानम्	ओमानम्
२८४	२५	अधताम्	अधताम्
२८४	२६	ऋषिमूतस्य	ऋषिमूतस्य
२८४	२९	धताम्	धत्ताम्
२८४	२९	अनेः	अन्वेः
२८९	१३	गीमा—	गीर्मा—
२९५	१५	इयमदिनो—	इयमभिनो—
२९७	१०	अश्विनौ	अश्विनो
३०४	२५	त्वरमाणो	त्वरमाणो
३१०	२१	वृषमा	वृषभो